# ।। जन्मकुण्डल्यां कुटुम्ब-सुत-कलत्रभावत्रिकम् एकमध्ययनम्।।

वटोदरस्थ-श्रीमहाराजा-सयाजिराव-विश्वविद्यालयस्य
वाचस्पत्युपाध्यर्थं (Ph.D.)
समर्पितोऽयं शोधनिबन्धः।


<u>शोधछात्रः</u>।
जोशी संजय प्रवीणकान्त।



मार्गदर्शकः।
प्रो. डॉ. जयदेव अ. जानी (पूर्वाध्यक्षः)
संस्कृत-पाली-प्राकृतविभागः।
फेकल्टी ऑफ आर्ट्स्।
महाराजा सयाजिराव विश्वविद्यालयः।
वडोदरा (वटपत्तनम्) ३९०००२



सप्टेम्बर - २०१२

# ।। जन्मकुण्डल्यां कुटुम्ब-सुत-कलत्रभावत्रिकम् एकमध्ययनम्।।

वटोदरस्थ-श्रीमहाराजा-सयाजिराव-विश्वविद्यालयस्य
वाचस्पत्युपाध्यर्थं (Ph.D.)
समर्पितोऽयं शोधनिबन्धः।


<u>शोधछात्रः</u>।
जोशी संजय प्रवीणकान्त।

मार्गदर्शकः।
प्रो. डॉ. जयदेव अ. जानी (पूर्वाध्यक्षः)
संस्कृत-पाली-प्राकृतविभागः।
फेकल्टी ऑफ आर्ट्स्।
महाराजा सयाजिराव विश्वविद्यालयः।
वडोदरा (वटपत्तनम्) ३९०००२

<u>प्रधानाध्यापकः</u>।
वटोदर संस्कृत महाविद्यालयः।
महाराजा सयाजिराव विश्वविद्यालयः।
वडोदरा (वटपत्तनम्)
३९०००२



सप्टेम्बर - २०१२

# आभारप्रदर्शनम्।

अस्य महानिबन्धस्य परिपूर्णतायै येषां गुरुवर्याणां समयो मार्गदर्शनं चाऽहं परमेश्वराशीर्वाद–रूपेणाऽधिगतवान् तेषां प्रो. डॉ. जयदेव–अरुणोदय–जानीमहोदयानामुपकारस्मरणं करोमि। अहं तेषां चरणकमलेषु मदीयं ज्यौतिषशास्त्रज्ञानं तद्विषयकां दृष्टिं तत्परिणामरूपं फलितज्यौतिषं नवतररूपं च प्राप्तवान्। तेषामुपकारान् कीदृशैः शब्दैः केन च प्रकरेण वर्णयानीति न जाने ।

अस्य महानिबन्धस्य पूर्णतायै महानुभावानां गुरुवर्याणां प्रत्यक्षं सहृदयताधिकता समासादिता ते वडोदरा संस्कृत महाविद्यालयस्य पूर्वप्रधानाचार्याः श्रीमन्तो योगेश–ओझामहोदया धन्यवादानर्हन्ति। सुहृद्वर्याणां गुरुचरणानां डॉ. किशोर–वैद्यमहाभागानामुपकारं संस्मरामि। अस्य शोधमहानिबन्धस्य कार्यकाले वडोदरा संस्कृत महाविद्यालयस्य पुस्तकालयस्य सञ्चालकाः डॉ. ठाकोरलालदवेमहोदया यथावश्यकानि पुस्तकानि प्रदाय यत्सहायं कृतवन्तस्तेषामुपकारान् हृदयेन स्मरामि। महाराजा सयाजिराव विश्वविद्यालयस्य श्रीमती हंसा महेता ग्रन्थालयस्य कर्मचारिणः समये समये पुस्तकानि प्रदाय स्वकीयं सौहार्दं सेवाप्रीतिं च प्रदर्शितवन्तस्तदर्थं तेषामुपकारस्मरणं करोमि।

अन्ते च महाराजाविश्वविद्यालयस्य प्राच्यविद्यामन्दिरस्य कार्यकारिनियामकाः प्रो. डॉ. मुकुन्द–लालजी–वाडेकरमहोदयानां चरणकमलेषु प्रणतयः। प्राच्यविद्यामन्दिरस्य सर्वेऽपि कर्मचारिणो विशेषतश्च पुस्तकालयाधिकारी श्रीमान् दिगम्बर–काशीकरमहोदयोऽपि यथावश्यकानि पुस्तकानि प्रदर्शितवान ततस्तस्मै धन्यवादान् व्याहरामि। इति शम्।

वटपत्तनम्। जोशीकुलोत्पन्नःप्रवीणकान्तात्मजः सञ्जयशर्मा।
दिनाङ्कः २७ /०९/२०१२

## ।। प्रमाणपत्रम् ।।

(Certificate)

इदमत्र प्रमाणीक्रियते मया शोधछात्रेण यदत्र वाचस्पत्यस्य समग्रं संशोधनं मदीयमेव। तत्र प्रस्थापितानि चर्चानिरूपणानि मदीयान्येव। अत्र प्रदत्तं संशोधनं मयाऽस्य महानिबन्धस्याऽन्तिमे भागे प्रदत्तैः सूचीनिर्दिष्टैः ग्रन्थैः त्रैमासिकादिभिश्च सम्पूर्णतां नीतमस्ति। प्रदानमपि मौलिकमिति शम्।

वटपत्तनम्। संजय प्रवीणकान्त जोशी।

दिनाङ्कः २७/०९/२०१२ वाचस्पत्य-शोधछात्रः।

## ।। मार्गदर्शकस्य प्रमाणपत्रम् ।।

(Certificate of the Guiding Teacher)

जानीत्यपाह्वोऽरुणोदयात्मजो जयदेवशर्माऽहं वाचस्पत्यस्य शोधछात्राय जोशी संजय-प्रवीणकान्ताय प्रमाणपत्रं ददामि यदत्र महानिबन्धे संशोधनविषयकाः सर्वे सिद्धान्ताः विचाराश्च शोधछात्रेण स्वयं सङ्कलिताः विशदीकृताश्च। अस्य वाचस्पत्यस्य महानिबन्धस्य संशोधनं मदीये मार्गदर्शने सम्यक्तया शोधछात्रेण मौलिकप्रदानरूपेण प्रस्थापितमिति प्रमाणीक्रियते।

वटपत्तनम्।

दिनाङ्कः २७/०९/२०१२

प्रॉ. डॉ. जयदेव अरुणोदय जानी।
पूर्वाध्यक्षः,संस्कृत-पाली-प्राकृतविभागः।
फेकल्टी ऑफ आर्ट्स्।
महाराजा सयाजिराव विश्वविद्यालयः।
वटपत्तनम् - ३९०००२

## ।।पुरोवाक्।।

श्रीमद्भगवते हाटकेश्वरमहारुद्राय नमः।
गोत्रप्रवर्तकाय श्रीभरद्वाजाय नमः।
त्रिवेदीकुलोत्पन्नाय श्रीमते जगन्ननाथाय तत्पुत्राय श्रीमते माधवलालाय
तत्पुत्राय श्रीमते कनैयालालाय तत्पुत्रायाऽस्मत् पितृचरणाय श्रीमते प्रवीणकान्ताय
वात्सल्यमूर्तये च जनन्यै अवन्तिकायै नमो नमः।

श्रीसयाजिरावनृपतेः कृपाभाजां श्रीमतां ज्यौतिषशास्त्रपारङ्गतानां पण्डिताग्रणीनां श्रीमतां कनैयालालमहानुभावानां चरणकमलयोः सादरं सप्रणामं भक्तिपूर्णं हृदयं प्रकटयतो ममाऽन्तःकरणं भूरिभूरि हर्षमनुभवति। तत्कारणमपि स्पष्टीकरोमि। ज्यौतिषशास्त्रविदुषामग्रगण्यस्य श्रीमतः कनैयालालस्य पौत्रतया मयाऽपि ज्यौतिषशास्त्रविषयकमध्ययनं करणीयमिति बाल्यकालादेव संकल्पाः पुष्टिं याताः।

वडोदरासंस्कृतमहाविद्यालये गुरुचरणानां डॉ. निरंजन–शुक्लमहोदयानां श्रीचन्द्रकान्त–जोशी–महोदयानां च चरणकमलेषु ज्यौतिषशास्त्राचार्यस्य २००३ तमे वर्षे परीक्षामुत्तीर्य मया २००५ तमे वर्षे तत्रैवाऽध्यापनकार्यमपि कर्तुं लाभोऽपि श्रीहाटकेश्वरकृपया समासादितः।

एकदा प्रधानाचार्याणां श्रीमतां योगेश–ओझामहोदयानां सांनिध्ये सर्वेऽध्यापकाःसमुपविष्टा आसन्। तदा विनयनसंकायस्य संस्कृत–पाली–प्राकृतविभागे प्रोफेसरपदमलङ्कुर्वाणाः श्रीमन्तः स्व० डॉ. लाभशंकर(ललित)जोशीमहोदयाः समुपागताः। तैः सह चर्चायां ज्यौतिषशास्त्रविषयमाश्रित्य मया वाचस्पत्यं पारयितव्यमिति प्रो.जोशीमहोदयैः प्रेरितोऽहं निर्णयं कृतवान् । किन्तु षण्मासाभ्यन्तर एव तेषामाकस्मिकं निधनं जातम्। तत्पश्चात् किंकर्तव्यमूढोऽहं पुनरेकदा प्रधानाचार्याणां समीपे प्रो. डॉ. राजेन्द्र–नाणावटीमहोदयान् दृष्टवान्। तैरेव सपदि प्रोक्तम् " अल्या भाई! प्रो. जयदेव पासे जाने? (अरे मित्र! प्रो. डॉ. जयदेवं पश्य।) इति बोधितोऽहं गुरुवर्येण श्रीमता डॉ. किशोरवैद्य–महोदयेन सह संस्कृत–पाली–प्राकृतविभागस्य तत्कालिकाध्यक्षान् प्रो. डॉ. श्री जयदेव-अरुणोदय-जानीमहानुभावान् द्रष्टुं गतवान्। तदा प्रो. डॉ. जानीमहोदयानां सकाशे केवलमेकं स्थानं रिक्तमासीदतोऽहं "समयो नास्ति। कार्यबाहुल्यमस्ति ।" इत्युक्त्वाऽऽगामिनि वर्षे पुनरागन्तुं कथितः। संस्कृतमहाविद्यालयं प्रतिनिवृत्य प्रधानाचार्याणां समीपे प्रो. डॉ. नाणावटीमहोदयान् दृष्टवान् । तैर्ममाऽनुभवः श्रुतः। तत्कालमेव प्रो. डॉ. नाणावटीमहोदयैर्दूरभाषेण प्रो. डॉ. जयदेवजानिना सह वार्तालापःकृतोऽहं च पुनः संस्कृत–पाली–प्राकृत विभागे प्रेषितः। डॉ. किशोर वैद्येन सह अहं प्रो. डॉ. जयदेव-जानीमहोदयान् दृष्टवान् । प्रो. डॉ. जयदेव-जानीमहोदयैः कथितं ''कार्यराम्भं कुर्वः। किन्तु पञ्जीकरण(Registration)मन्तरं करिष्याव'' इति।

वाचस्पत्यस्य शीर्षकं निश्चितम् । कार्यमारब्धम्। शनैःशनैरपि नियतरूपेण प्रो. डॉ. जयदेव–जानीमहोदयैः समारब्धः। सम्पर्को दृढस्तदनु सुदृढश्च जातः। नियमितरूपेणाऽहं यां यां सामग्रीं (Data) प्राप्तवान् तां तां गृहीत्वा मार्गदर्शकमहोदयैः सह चर्चादिकं कृतवान् । प्रथमत एव प्रो. डॉ. जयदेव–जानीमहोदयाः सर्वेभ्यो वाचस्पत्य(Ph.D.)छात्रेभ्यः संशोधनस्य रूपरेखां ददाति स्पष्टं च बोधयान्ति । तदनुसारमहं कुत्रापि काञ्चिदपि समस्यां कञ्चिदपि विलम्बं वा नैव दृष्टवान् । एता–वत्कालपर्यन्तं समयः क्व गतः कथं च कार्यं समाप्तिमगमत् तन्मया विना भारं पारितम् । लीलयैव कार्यभारस्य हिमालयो लङ्घितो मया । अतो मम हृदयमतीव धन्यतामनुभवति।

वाचस्पत्यस्य शीर्षकं 'जन्मकुण्डल्यां कुटुम्ब–सुत–कलत्रभावत्रिवम् – एकमध्ययनम्'। तदनुसृत्य पं.शङ्कर–बालकृष्ण–दीक्षितचरणानां ज्यौतिषशास्त्रेतिहास(हिन्दी)ग्रन्थस्य सघनपठनं कृत्वा प्रथमदृष्ट्या विषयो वर्णितः । तदनु कुटुम्बभावस्य, सुतभावस्य कलत्रभावस्य च ज्यौतिषशास्त्रानुसारं सामान्यः परिचय एकत्रीकृतः। तदनन्तरमेतद्भावत्रिकस्य विशेषपरिचयोऽपि साधितः। एतस्मि–न्नध्ययनकाले ज्यौतिषशास्त्र पठिताः कतिचित् होरा–नवमांश–द्रेष्काण–पारिजातादिविषया अप्यत्र महानिबन्धेऽत्यावश्यका इति विचार्य सर्वेऽपि परिशिष्टेषु संदृब्धाः सन्ति । आधुनिके कलिमलग्रस्ते दुःखपूर्णे समस्यासमन्विते चिन्ताविषादादिदुर्भावमथिते च युगे सामाजिकानां मनुष्याणां सुत–सम्बधिन्यः कुटुम्बसम्बधिन्यः कलत्रसम्बधिन्यश्च चिन्ताः समधिका दृश्यन्ते। अत एवैतस्य महानिबन्धस्य संशोधनफलं परिणामश्च समाजे समुपयोगितामवश्यं धारयन्तीति मम विन्रमः प्रयासः। सर्वेषां ज्योतिर्विदां ज्यौतिषशास्त्ररसिकानां चाऽपेक्षापूर्तिं विधास्यत इति शम्।

अस्य महानिबन्धस्य पूर्णतायै येषां येषां महानुभावानां गुरुवर्याणां सहकार्यकराणां सुहृदाञ्च प्रत्यक्षं परोक्षं वा सहृदयताधिकता तेषां धन्यवादान् व्याहरन् प्रथमं वडोदरासंस्कृतमहाविद्यालयस्य पूर्व-प्रधानाचार्याः श्रीमन्तो योगेश–ओझामहोदया हृदयगतान् धन्यवादानर्हन्ति। अस्य महानिबन्धस्य 'अङ्गुलिनिर्देशेन पुण्यं लब्धवतां प्रो. डॉ. राजेन्द्र-नाणावटीमहोदयानामपि स्नेहभावं प्रकटीकरोमि। सुहृद्वर्याणां गुरुचरणानां डॉ. किशोर–वैद्यमहाभागानामनेकशो यदा कदापि संशोधने आवश्यकता जाता तदा तदा मां सस्नेहं सवात्सल्यं च स्वागतं व्याहरताम् एतेषामुपकारं कथयितुं मदीया जिह्वा विरामं प्राप्तुं न शक्नोति। सुहृद्यवर्यः श्रीमान् मुकेशत्रिवेदी श्रीमान् दीपकयाज्ञिकः श्रीमती पौलोमीदवे च धन्यवादानर्हन्ति।

अस्य महानिबन्धस्य गणकयन्त्रे लिपिबद्धां प्रतिं कर्तुं स्वसमयं ददतौ डॉ. महेश–पटेलः श्रीमान् पीयूष–शाहश्च यत्साहाय्यं कृतवन्तौ तयोरुपकारान् न विस्मरामि।

मदीयगुरुचरणा वेदशास्त्रसंपन्नाः स्व. पण्डितश्रीनरहरि–ओझा पण्डितश्रीलक्ष्मीशङ्कर–शुक्लः श्रीमदनलाल–ओझा श्रीरमणलाल–पुराणीमहानुभावा विद्यमानाश्च प्रो. डॉ.जयन्तीलाल–भट्टः श्रीमफतलाल–व्यासः श्रीकान्तिलाल–याज्ञिकमहोदयाः प्राथम्येन प्रणामानर्हन्ति ।

अन्ते च मम पितृचरणाः श्रीमन्तः प्रवीणकान्तमहोदयाः स्ववात्सल्येन मां प्रेरितवन्तः। मदीया भ्रातरो योगेशस्तत्पत्नी रेखाभाभी राजीवो गौरांगश्च भगिन्यौ अनिला रागिणी चेति सर्वे सौहार्देन मां प्रेरितवन्तः । अतस्तेषामपि साधुवादान् प्रकटीकरोमि।

वटपत्तनम्। जोशीकुलोत्पन्नःप्रवीणकान्तात्मजः सञ्जय शर्मा।

दिनाङ्कः २७ /०९/२०१२

## STATEMENT – I

## HOW THE PRESENT WORK TENDS TO THE GENERAL ADVANCEMDNT OF KNOWLEDGE

The Astrology is not mere a mathematical or a calculation-based science which reigns over the hearts of the people of the world but it furnishes the practical outlook towards the life-style spent or intensely desired to be spent but numerous people. A person desirous of peaceful and unhindered progress both socially and spiritually, takes interest in the Astrology depending on one's capacity and interest. The Astrology is much closer to the humanity than any other sciences.

The astrological predictions are obviously the attractive feature for the society yet no authentic study or research in this area of astrological theories and predictions regarding its social and esp. family aspect has been carried out so far, though there are many books published in this area with individual aspect.

The thesis deals with the following matters of discussion and relevant topics. The preface gives the clear indication of its necessity and importance of the topic of research proposed in the subsequent pages of the thesis. The thesis comprises of 08 chapters and 07 Appendices followed by Bibliography.

The present study attempts to specify the significant contribution of the hitherto research and predictions in light of the old and modern works on Astrology.

The study is comparative, comprehensive and critical, hence it tends to contribute towards the general enhancement of knowledge.

- - - - -

## STATEMENT – II

## SOURCES, INDEBTEDNESS & ORGINALITY

In the preparation of the present thesis, I have fully drawn upon the available published literature on the Astrology. All the sources, quotations and references occurring in the present thesis have been verified properly and traced to the original source.

I have studied the texts on the astrological principles as well as predictions and other relevant works, too. For the general study of the historical data I have consulted Bhartiya jyotishshatra Itihas of Shankar Balkrishna Dikshit (Pub. Hindi Samiti Granthamala, Lakhnau, 1985).

I have also carefully gone through all the available relevant literature and sources.

I have expressed my own views in the light of traditional as well as modern research done so far in the field of astrological principles and predictions.

- - - -

## **संक्षेपः। (Synopsis)**

जन्मकुण्डल्यां कुटुम्ब-सुत-कलत्र भावत्रिकम् - एकमध्ययनमिति शोधनिबन्धः निम्नलिखितप्रकारेण संशोधनविषयान् प्रस्तोति।

प्रथमं तावत् प्रमाणपत्रद्वयं तदनु पुरोवचने प्रस्तुतसंशोधनस्य कारणं प्रयोजनं च प्रदर्शयित्वाऽस्मिन् शोधनिबन्धे येषां येषां वन्दनीयानां गुरूणां सुहृदां च साहाय्यमधिगत्य जीवनस्य चरमोऽर्थः पारितस्तेषां तेषां च नामोल्लेखं कृत्वोपकारप्रदर्शनं कृतं मया।

प्रस्तुतेऽस्मिन् शोधनिबन्धे अष्टप्रकरणानि **दृष्टि**नामधेयानि सन्ति।

प्रथमादृष्टिः - **ज्योतिषशास्त्रेतिहासः।** अत्र ऋग्वेदादारभ्य मध्यकालीनाधुनिककालपर्यन्तं प्राप्तानां ज्यौतिषसम्बधितविषयाणां पदार्थानां निरूपणं चर्चासहितं प्रस्तुतम्। तत्र-

| | | |
|---|---|---|
| ०१ सूर्यः। | ०२ चन्द्रः। | ०३ ग्रहगतिः। |
| ०४ संवत्सरो वर्षं वा। | ०५ अयनम्। | ०६ ऋतवः। |
| ०७ मासाः। | ०८ पक्षः। | ०९ पूर्णिमा। |
| १० अमावास्या। | ११ तिथिः। | १२ अहोरात्रम्। |
| १३ वासरः। | १४ मुहूर्तम्। | १५ ग्रहणम्। |
| १६ अन्तरिक्षम्। | १७ पृथ्वी। | १८ द्युलोकः। |

इति विषयचर्चा सोदाहरणं प्रस्तुता।

अस्यामेवदृष्ट्यां अर्वाचीनकाले ज्यौतिषविषये सम्मानितानां विद्वत्मूर्धन्यानां श्रीमतां शङ्कर-बालकृष्ण-दीक्षितचरणानां महत्त्वपूर्णग्रन्थस्य ''भारतीयज्यौतिषशास्त्र-इतिहास'' इत्याख्यस्याऽमूलचूलम् अध्ययनं सोदाहरणं

विशदीकृतं वर्तते। अत्रैव गणकतरङ्गिणी जातकपारिजातो बृहज्जातकमित्यादीनाम् अभ्यासः प्रस्तुतः। बृहत्तसंहितादिनाम् आकरग्रन्थाानामपि चर्चाप्रदर्शिता वर्त्तते।

द्वितीयादृष्टिः – **जन्मकुण्डल्यां भावविचारः।** अत्र जन्मकुण्डल्यां देशविभागानुसारं लेखनस्य यानि त्रीणिप्रकाराणि प्रचलितानि सचित्राणि व्याख्यातानि। तथा च जातकस्य जन्मकुण्डल्यां प्रथमादिद्वादशभावेषु स्थितानां सूर्यादिग्रहाणां बलाबलविचारः फलनियमं च विशदीकृते।

तृतीयादृष्टिः – **जन्मकुण्डल्यां विशेषयुतीनां विचारः।** यस्यां दृष्ट्यां जन्मकुण्डलीस्थितानां ग्रहाणां अन्यैर्ग्रहैः सह सञ्जातानां युतीनां सामान्यविचारः प्रस्तुतः। तथा च द्वितीय–पञ्चम–सप्तमभावेषु कुटुम्ब–सुत–कलत्राख्येषु सूर्यादि–ग्रहाणां द्विग्रहादिसप्तग्रहाणां विशेषयुतीनां विचारोऽपि प्रदर्शितः।

चतुर्थीदृष्टिः – **जन्मकुण्डल्यां ग्रहाणां दृष्टिविचारः।** जन्मकुण्डल्यां सूर्यचन्द्रमङ्गलादिग्रहाणामन्यान्यक्षेत्रस्थानां दृष्टिर्जातकस्य जीवने प्रभावं दर्शयति। तेषां ग्रहाणां मेषवृषभादिराशिपतीनां क्षेत्रेषु स्थित्वा प्रभावस्य यत्फलं भवति तस्य विचारः कृतः।

पञ्चमीदृष्टिः – **जन्मकुण्डल्यां कुटुम्बभावस्य विचारः।** जातकस्य जन्मकुण्डल्यां द्वितीयभावस्य कुटुम्बभाव इति नामान्तरम्। अत्र कुटुम्बभावस्य अर्थः प्रयोजनं च तत्र च स्थितानां उच्चनीचादिग्रहाणां क्षेत्रपरत्वे यद्यत् शास्त्रेषु प्रदिष्टम् अनुभवे च प्रसिद्धं तस्य तस्य चर्चाविचारः प्रस्तुतः।

षष्ठीदृष्टिः – **जन्मकुण्डल्यां सुतभावस्य विचारः।** जातकस्य जन्मकुण्डल्यां पञ्चमभाव सुतभाव इति कथ्यते। अत्र सुतभावस्य अर्थः सप्रयोजनं भावफलं तथा च पञ्चमभावे स्थितानां उच्चनीचादिग्रहाणां क्षेत्रपरत्वे यद्यत् फलं शास्त्रेषु लक्षितं अनुभवे च दृष्टं तस्य तस्य परामर्शः प्रस्तुतः।

सप्तमीदृष्टिः – **जन्मकुण्डल्यां कलत्रभावस्य विचारः।** जातकस्य जन्मकुण्डल्यां सप्तमभाव एव कलत्रभा इति प्रसिद्धम्। अत्र कलत्रभास्य अर्थः प्रयोजनं भावफलं ततश्च स्थितानां उच्चनीचादिग्रहाणां क्षेत्रपरत्वे यद्यत् फलं शास्त्रेषु प्रथितं अनुभवेन प्रसिद्धं तस्य तस्य चर्चा विशदीकृता।

अष्टमीदृष्टिः – **उपसंहारः।**

अष्टप्रकरणान्ते सप्त (०७) परिशिष्टानि सन्ति।

०१ शोधनिबन्धसम्बन्धितकुण्डलीनां सङ्ग्रहः।
०२ होरादि–दशवर्गाणां परिचयः।
०३ सूर्यादिग्रहाणां विविधाः संज्ञाः।
०४ प्रथमादि–द्वादशभावानां विविधाः संज्ञाः।
०५ मेषादि–मीनान्तानां राशीनां विविधाः संज्ञाः।
०६ तिथ्यादि–पञ्चाङ्गविषयाः।
०७ सूर्यादिग्रहाणाम् अरिष्टपरिहारोपायाः।

अस्य प्रस्तुत शोधनिबन्धस्य समापनपूर्वं **सन्दर्भग्रन्थसूची** प्रदत्ता।

– x – x – x –

## संक्षेपसूचि।

| | |
|---|---|
| अम.को. | = अमरकोशः। |
| अभि.शा. | = अभिज्ञानशाकुन्तलः। |
| अथ.सं. | = अथर्ववेद संहिता। |
| अनु. | = अनुवादकः। |
| आश्व.सू. | = आश्वलायनसूत्र। |
| उ.का. | = उत्तरकालामृत। |
| ऐ.ब्रा. | = ऐतरीय ब्राह्मण। |
| क.सं. | = कश्यपसंहिता। |
| कु.सं. | = कुमारसंभवम्। |
| ग्रन्थ. | = ग्रन्थकारः। |
| गो.ब्रा. | = गोपथ ब्राह्मणः। |
| च.चि. | = चमत्कार चिन्तामणिः। |
| जा.त. | = जातक तत्त्वम्। |
| जा.त.सं.त. | = जातकतत्त्वंसंज्ञातत्त्वम्। |
| जा.त.पं.वि. | = जातकतत्त्वंपञ्चमविवेकः। |
| जा.त.स.वि. | = जातकतत्त्वंसप्तमविवेकः। |
| जा.भ. | = जातका भरणम्। |
| जा.पा. | = जातक पारिजातः। |
| जा.लं. | = जातकालङ्कारः। |
| जै.सूत्र. | = जैमिनी सूत्रम्। |
| ज्यो.श्या.सं. | = ज्योतिषश्यामसंग्रहः। |
| तै.ब्रा. | = तैत्तिरीय ब्राह्मणः। |
| ते.सं. | = तैत्तिरीयसंहिता। |
| दु.अ. | = दुर्गाअर्गलास्तोत्रम्। |
| दु.स. | = दुर्गासप्तशती। |
| द्वि.वि. | = द्वितीय विवेकः। |
| नि.पू. | = नित्यकर्म–पूजाप्रकाश। |

| | |
|---|---|
| नपु. | = नपुंसकलिङ्गम्। |
| ना.सं. | = नारदसंहिता। |
| पा.गु.सू. | = पारस्कर गुह्यसूत्रम्। |
| पु. | = पुलिङ्गम्। |
| परि.कु.क्र. | = परिशिष्टकुण्डलीक्रमाङ्कः। |
| पं.वि. | = पञ्चमविवेकः। |
| पाणि.सू. | = पाणिनियसूत्रम्। |
| प्र. | = प्रकाशकः। |
| प्र.वि. | = प्रथमविवेकः। |
| फ.दी. | = फलदीपिका। |
| बा.ज्यो.सा.स. | = बालबोधज्योतिषसारसमुच्चयः। |
| बृ.जा. | = बृहज्जातकम्। |
| बृ.पा.हो.शा. | = बृहत्पाराशरहोराशास्त्रम्। |
| बृ.र. | = बृहत्स्तोत्ररत्नाकरः। |
| बृ.सं. | = बृहत्संहिता। |
| बृ.ब्र.कर्म.स. | = बृहद् ब्रह्मनित्यकर्मसमुच्चयः। |
| मु.चि. | = मुहूर्त चिंतामणि। |
| मु.मा. | = मुहूर्ते मार्तंडः। |
| म.स्मृ. | = मनु स्मृतिः। |
| मा.सा. | = मानसागरी। |
| भा.ज्यो. | = भारतीय ज्योतिष । |
| भा.ज्यो.पृ. | = भारतीय ज्योतिष। पृष्ठ |
| वि.च. | = विवाहचन्द्रिका। |
| वि.सुख. | = विवाहीक सुख। |
| वृद्ध.य.जा. | = वृद्धयवनजातकम्। |
| व्या. | = व्याख्याकारः । |
| ऋ.स. | = ऋग्वेदसंहिता। |
| स.क.अ.प्र. | = सर्वकर्म अनुष्ठान प्रकशः। |

| | |
|---|---|
| सं.वै.यं.मं.प्र. | = संक्षप्ति वैष्णव यन्त्र–मन्त्र प्रयोगाली। |
| सू.सि. | = सूर्यसिद्धान्तः। |
| सारावली | = सारावली। |
| स.सूत्र. | = समृद्धिसूत्रम्। |
| साम.स. | = सामवेदसंहिता। |
| स्त्री.जा. | = स्त्रीजातकम्। |
| स्त्री.लि. | = स्त्रीलिङ्गम्। |
| शत.ब्रा. | = शतपथ ब्राह्मणः। |
| शा.र. | = शान्तिरत्नम्। |
| शु.य.म.व.सं. | = श्रीशुक्लयजुर्वेदीयमाध्यन्दिनवाजसनेयिसंहिता। |
| श्रीभा.मा. | = श्रीमद्भागवतमहापुराणम्। |
| श्रीव्रतो.च. | = श्रीव्रतोद्यापनचन्द्रिका। |
| श्रौ.सू. | = श्रौत सूत्रम्। |
| स.ना.स्तो.सं. | = सहस्त्रनामस्तोत्रसंग्रहः। |
| सं. | = सम्पादकः । |
| स.वि. | = सप्तमविवेकः। |

## ।। विषयानुक्रमणी ।।


आभारप्रदर्शनम्।

प्रमाणपत्रम्-०१।

प्रमाणपत्रम्-०२।

पुरोवाक्। i-iii

संक्षेपः। (**Synopsis**) iv-viii

संक्षेपसूची।

विषयानुक्रमणी।

| क्रमाङ्कः। | विषयः। | पृष्ठानि। |
|---|---|---|
| प्रथमा दृष्टिः। | ज्योतिःशास्त्रेतिहासः। | ००१-०६० |
| द्वितीया दृष्टिः। | जन्मकुण्डल्यां भावविचारः। | ०६१-१०९ |
| तृतीया दृष्टिः। | जन्मकुण्डल्यां ग्रहाणां युतिविचारः। | ११०-१३६ |
| चतुर्थी दृष्टिः। | जन्मकुण्डल्यां ग्रहाणां दृष्टिविचारः। | १३७-१५९ |
| पञ्चमी दृष्टिः। | जन्मकुण्डल्यां कुटुम्बभावस्य विचारः। | १६०-२०३ |
| षष्ठी दृष्टिः। | जन्मकुण्डल्यां सुतभावस्य विचारः। | २०४-२५० |
| सप्तमी दृष्टिः। | जन्मकुण्डल्यां कलत्रभावस्य विचारः। | २५१-२९४ |
| अष्टमी दृष्टिः। | उपसंहारः। | २९५-३०० |

परिशिष्टानि। ३०१-४१२

०१ शोधनिबन्धसम्बन्धितकुण्डलीनां संग्रहः।

०२ होरादि-दशवर्गाणां परिचयः।

०३ सूर्यादिग्रहाणां विविधाः सञ्ज्ञाः।

०४ प्रथमादि-द्वादशभावानां विविधाः संज्ञाः।

०५ मेषादि-मीनान्तानां राशीनां विविधाः संज्ञाः।

०६ तीथ्यादि-पञ्चाङ्गविषयाः।

०७ सूर्यादिग्रहाणाम् अरिष्टपरिहारोपायाः।

अस्य प्रस्तुत शोधनिबन्धस्य समापनपूर्वं सन्दर्भग्रन्थसूची प्रदत्ता। ४१३-४२४


-o-o-o-

# प्रथमा दृष्टिः।

## ज्योतिःशास्त्रेतिहासः।
(०१-६०)

## प्रथमा दृष्टिः।

### ज्योतिःशास्त्रेतिहासः।

स जयति सिन्धुरवदनो देवो यत्पादपङ्कजस्मरणम्।
वासरमणिरिव तमसां राशीन्नाशयतु विघ्नानाम्।।

ऋग्वेद-यजुर्वेद-सामवेद-अर्थवेदानां कस्यश्चिदपि भागस्थ सूक्तं वा मन्त्रो वा पादं वा सावधानतया पठ्येत तर्हि ज्योतिर्विज्ञान सम्बन्धिनः शब्दानां संज्ञानां वा नामनिर्देशोऽभीक्ष्णं पठ्यते। तद्यथा आकाशं चन्द्रसूर्यो रश्मिर्नक्षत्रं तारकाणि संवत्सरम् ऋतवो मासाः दिनं रात्रिश्चेत्यादि पदानां संदर्भो न केवलं प्राप्यतेऽपितु तेषां पदानां स्वरूपं मनोहरतया रोचकतया अश्चर्योद्भावकतया रसपूर्णं च विद्यते।

ऋग्वेदीयेपुरुषसूक्ते एवं पठ्यते-

''नाभ्या आसीदन्तरिक्षं शीर्ष्णो द्यौः समवर्तत।
पद्भ्यां भूमिर्दिशः श्रोत्रात् तथा लोकाँ अकल्पयन्।। '' ।।(ऋ. सं.१०/९०/१४) ।।

उद्यन्नद्य मित्रमह आरोहन्नुतरां दिवम्। हृद्रोगं मम सूर्य हरिमाणं च नाशय।। ऋ.सं. १/५०/११।।

यत्राऽस्य जगतस्त्रयो विभागाः स्वीकृता दृश्यन्ते। अन्तरिक्षन्तावत् द्यावापृथिव्योन्तरालेतिष्ठति यद्यपि सूर्यो द्युलोकस्थानीयोऽग्निः दिवः परमेपदे तिष्ठति। यश्च हृदयरोगादि विनाशकः।

ऋग्वेदीयेमन्त्रे एवमपि पठ्यते-

(सूपर्णा एव आसते मध्य अरोधने दिवः।
ते सेधन्ति पथो वृकं तरन्तं यह्वतीरपो वित्तं मे अस्य रोदसी। ऋ.सं. १/१०५/११)

यत्रद्यावापृथिव्योरन्तरालेचन्द्रमसः स्थितिः। तदुपरिद्युलोके सूर्यस्थानम्। तद्उर्ध्वं च सूर्यस्य कक्षेति स्पष्टं ज्ञायते।[१]

---

[१] तुलनीयं भूमेःपिण्डशशाङ्करविकविकुजेज्याज्ञार्कि नक्षत्रकक्षाः। सू.सि./

## प्रथमा दृष्टिः।

सर्वेषां भुवनानां जातानां वा जीवाजीवानां आधार: सूर्य एवेति दरीदृश्यते।[२]

ऋग्वेदे समानांमास आकृति[३]रीतत्र संवत्सरस्य वर्षस्य वा समानार्थितया समा–शब्द पठ्यते। यद्यपि वर्षदिनानां संख्या ३६५ इति शतपथ ब्राह्मेण[४] स्पष्टं प्रदत्ता।

**वर्षः।**

अत्र ऋग्वेदस्य मन्त्रद्वयं कृष्णयजुर्वेदस्य च मन्त्रानायोऽतिव रसप्रदं वर्तते सत्यस्याऽऽदित्यस्य[५] द्वादशारं चक्रं द्युलोकं परित: सततं भ्रमणशीलमपि नाशं न गच्छति। यत्र तत्पुत्राणां ७२० युग्मानि दिनरात्रिरुपाणि आरूढाणि सन्ति। इदं अपि प्रश्नरूपेण प्रस्तूयते यत् द्वादशपरिधियुक्तं चक्रमेकंनाभित्रय समन्वितमिति न कोऽपि जानामि। एत च संवत्सरनामधेयम्। तत्र च ३६० शंकव इव चलन्तअरा: संलग्ना: सन्ति।[६]

**अयनविचारः।**

तैत्तिरीयसंहितायां ''तस्मादित्य: षण्मासो दक्षिणेनैति षडुत्तरेणे''ति (६/५/३) वचनबलेनेदं स्पष्टं ज्ञायते यद् यावत् कालपर्यन्तं सूर्यस्य स्थिति: विषुववृत्तस्य उत्तरे वा दक्षिणे वेति दृष्ट्वा उत्तरायणं दक्षिणामिति च द्वे अयने प्राप्यते।

**षड्ऋतवः।**

तैत्तिरीयब्राह्मणे च ''तस्य ते संवत्सरस्य वसन्त: शिर:। ग्रीष्मो दक्षिण: पक्ष:। वर्षापुच्छं। शरदुत्तर: पक्ष:। हेमन्तो मध्यम:'' (३/१०/४/१) इति षड्तूनां गणना वैदिके काले वसन्तादारब्धा। अत:

वसन्त: (=मधुमाधवौ)

---

अत्रेदं प्रतिपत्तव्यं यत् कक्षाणामुपयुपरि स्थिति: एवं वर्तते–भूमिस्थपिण्डात् शशांकस्य (चन्द्रस्य) तदूऊर्ध्वं रवेततश्च कवे: (शुक्रस्य) तत: कुजस्य (भौमस्य) ततइज्यस्य (पूजनीयस्य गुरो:) ततोऽपिज्ञस्य (बुधस्य) तत: अर्के: (शनिश्चरस्य) ततोऽन्ते च नक्षत्राणां स्पष्टिभवति।

[२] यत्रेमा विश्वाभुवनानि तस्थु। ऋ.सं. १/१६४/२ सूर्य आत्माजगतस्तस्थुश्च। ऋ.सं.

[३] ऋ.सं. १०/८५/५

[४] शत.ब्रा. २/२/३

[५] द्वादशारं न हि तज्जराय वर्वति चक्रं परिद्यामृतस्य। आ पुत्रा अग्ने मिथुनांसो अत्र सप्त शतानि विंशतिश्च तस्थु:।। ऋ.सं. १/१६४/११।।

[६] द्वादशप्रधयश्चक्रमेकं त्रीणि नभ्यानिक उमच्चिकेत।
तस्मिन्त्साकं त्रिशता न न शंकवोऽर्पिता: षष्टिर्न चलाचलास:।। ऋ.सं. १/१६४/४८।।

**प्रथमा दृष्टिः।**

ग्रीष्मः (=शुक्रशुची)

वर्षा (=नभोनभस्यौ)

शरद् (=इषउर्जौ)

हेमन्तः (=सहः सहस्यौ)

शिशिरः (=तपस् तपस्यौ) चेति पूर्व निगदितम्

ऋग्वेदीयपुरुषसूक्ते ''वसन्तोऽस्यासीदाज्यं ग्रीष्म इध्मः शरदहविरीति (१०/९०/६)।''

**सामवेदेऋतुवर्णनम्।**

वा ५ संतः। ई ३ न्नू ३ रंतायाः। ग्रीष्मइन्नुरा१न्ती ३ याः। वर्षाण्यनुशा ३ हुं। रा ३ दाः। हेमन्तः शिशिरइन्नुरा २ । न्तीयाउ। वा ३४५।।१२।। अथ सपूजनविधिरुद्रजपः पृ.११०।।

**मासविचारः।**

वैदिकज्यौतषिशास्त्रानुसारेणमासगणनं त्रिविधं श्रूयते उपयुज्यते च। तद्यथा (१) सावनमासः सूर्योदयात् आरभ्य द्वितीयदिनस्य सूर्योदयः पर्यन्तस्य मानेन एकोदिवसः। तेषां त्रिंशत् दिवसानां मासः एव सावनमासः। सावनशब्दस्य प्रातःसवनादिषु पठितात् सोमयागान्तर्गत-सवनशब्दात् सवनस्येदं सावनमिति कालमाधवकारेण ''सावनशब्दोऽहोरात्रोपलक्षकः सोमयागे सवनत्रयस्याहोरात्र सम्पाद्यत्वात्'' इति। तत्र तत्रैकमहोरात्रं चाऽहः कथ्यते तेषां षड्दिनानि षड्ऽहः पञ्च च षड्ऽहः एकोमासः इति। (२) चान्द्रमासस्यगणनं द्विविधं पूर्णिमान्तं अमान्तञ्च भारतस्य विविधेषु प्रदेशेषु गण्यते तथापि प्रत्येकस्मिन् चान्द्रमासे ३० तिथयः संभवन्ति। सूर्यचन्द्रयोर्द्वादशांसात्मकः कालः तिथिरित्युच्यते। (३) वैदिकज्योतिषि भ-चक्राधारिते सौरमासगणने यद्यपि सौरमासनामानि नैव प्राप्यन्ते तथापि एकवर्षवितस्य भचक्रस्य द्वादशभागान्तं प्रत्येकं मासः एक इति ज्ञायते परवर्तिज्योतिषि सौरमासस्य गणनम् सूर्यस्य एकस्मिन् राशौ यावन् भोगकालस्तस्यमानं संक्रान्तिरीति यत् कथ्यते तदेव सौरमासः। वैदिकज्योतिषि नक्षत्रवर्षमानं बार्हस्पत्यमानं च यद्यपि न दृश्येते आधुनिके तु ज्योतिषशास्त्रे तदनुसारं गणनादिकं बहुषः प्राप्यते।

यजुर्वेदस्य वाजसनेयिसंहितायां तैत्तिरीयसंहितायां चैवं पठ्यते

मधवे स्वाहा माधवाय स्वाहा शुक्रायस्वाहा शुचये स्वाहा

नभसे स्वाहा नभस्याय स्वाहोषाय स्वाहोर्जाय स्वाहा सहसे स्वाहा

सहस्याय स्वाहा तपसे स्वाहा तपस्याय स्वाहाँ हसपतये स्वाहा[७]।

मधुश्च माधवश्च वासन्तिकावृतू शुक्रश्च शुचिश्च ग्रैष्मावृतू नभश्च नभस्यश्च वार्षिकानृतू इषश्चोर्जश्च शरदावृतू सहश्च सहस्यश्च हैमान्तिकावृतू तपश्च तपस्यश्च शैशिरावृतू[८]।

मधुश्च माधवश्च शुक्रश्च शुचिश्च नभश्च नभस्यश्चेषश्चोर्जश्च सहश्च सहस्यश्च तपश्च तपस्यश्चोपयामगृहीतोसिँ स सर्पोस्यँ हस्पत्याय त्वा[९]।

अरुणोरुणरजाः पुण्डरीको विश्वजिदभिजित्। आर्द्रः पिन्वमानोन्नवान् रसवानिरावान्। सर्वौषधः सम्भरो सहस्वान्[१०]।

त्रयोदशनामान्यपि प्राप्यन्ते। किन्तु तान्यत्रप्रचलितानि।

ते च चान्द्रमासा इति निर्विवादमेव यतो मास शब्दस्य अर्थश्चन्द्र एव। अतस्तेषां नामानि मधु र्माधवः शुक्रः, शुचिर्नभो नभस्य इष उर्जः सहः सहस्य[११] तपस्तपस्यश्च एतदपि स्पष्टं यत् वैदिककाले चैत्रारंभी वर्षः आसित् यस्य परंपरा शकसंवति विद्यामानाऽस्ति।

वैदिकमासानामाधुनिकनामानिऋतश्च अधोनिर्दिष्टेकोष्टके स्पष्टं भवति।

| **क्रमाङ्कः** | **वैदिकम्।** | **आधुनिकम्।** | **ऋतुः।** |
|---|---|---|---|
| १ | मधुः।[१२] | चैत्रः। | वसन्तः। |
| २ | माधवः। | वैशाखः। | वसन्तः। |
| ३ | शुक्रः। | ज्येष्ठः। | ग्रीष्मः। |

[७] शु.य.म.व.सं. २२/३१

[८] तै.सं. ४/४/११

[९] तै.सं. १/४/१४

[१०] तै.ब्रा. ३/१०/१

[११] कुमारसंभवे कालिदासः ''सहस्य रात्रीरुदेवासतत्परा'' (५/२६)

[१२] वैदिककाले वसन्तसम्पातश्चैत्र एवाधुनिकेतु फाल्गुनमासे दृश्यते। एतद् क्रमेणैव सर्वेषामृतूनां संपाताः ज्ञेयाः।

| | | | |
|---|---|---|---|
| ४ | शुचिः। | आषाढः।[१३] | ग्रीष्मः। |
| ५ | नभः। | श्रावणः। | वर्षा। |
| ६ | नभस्य। | भाद्रपदः। | वर्षा। |
| ७ | इषः। | अश्विनः। | शरद्। |
| ८ | उर्जः। | कार्तिकः। | शरद्। |
| ९ | सहः। | मार्गशीर्षः। | हेमन्तः। |
| १० | सहस्य।[१४] | पौषः। | हेमन्तः। |
| ११ | तपः। | माघः। | शिशिरः। |
| १२ | तपस्यः। | फाल्गुनः। | शिशिरः। |
| १३ | संसर्पः। | अधिकमासो वा पुरुषोत्तमो वा मलमासो वा। | – |

वैदिककालानन्तरं मधुमाधवादिमासानां चैत्रवैशाखादिनामानि प्रचलितानि जातानि तत्रेदमश्यमन्तव्यं यद् यस्यां पौढामास्या चन्द्रस्य यस्मिन्नेवनक्षत्रेमुपस्थितिर्भवेत् तन्नक्षत्रस्य नामानुसारेण तन्नक्षत्र सम्बन्धी चन्द्रस्य पूर्णमासः इति व्युत्पत्या चित्रानक्षत्रे उपस्थितस्य चन्द्रस्य अस्तित्वे चैत्रीपूर्णिमा पौर्णमासी वा प्रख्याता जाता। तदनुसारेण विशाखानक्षत्रे चन्द्रस्योपस्थितित्वे वैशाखी पौर्णमासी। एवमन्यत्र प्रतिपत्तव्य।

**अर्धमासविचारः।**

अर्धमासाः[१५] इति एकस्मिन् वर्षे चतुर्विंशति संख्याका भवन्ति। एतेषां अपि पक्षा इति नामान्तरम्। प्रत्येकस्मिन् मासे शुक्लकृष्णाविति पक्षद्वयम् अर्धमासौ वा। तत्र प्रतिपदादारभ्य पूर्णिमापर्यन्तानां दिवसानां शुक्लपक्ष इति नामकरणम्। पूर्णिमानन्तरं प्रतिपदातारभ्य अमावास्यान्तानां दिवसानां कृष्णपक्ष इति नामकरणम्। भारते पूर्णीमान्तोमासः अमावास्यान्तोमासश्चेत्युभयम् स्वीकृत्य मासगणना प्राप्यते।[१६]

**तिथिः।**

तैत्तिरीयब्राह्मणे (१/५/१०) एवं पठ्यते ''चन्द्रमा वै पञ्चदशः। एष हि पञ्चदशामपक्षीयते। पञ्चदश्यामापूर्यते'' इति श्रुतेः चन्द्रमसः पञ्चदशदिनपर्यन्तम् अपक्षयः आपूर्तिश्च अमावास्या च पूर्णिमा

[१३] आषाढमासस्य ऋतुसंपातः ग्रीष्मात् वर्षायां चलितोऽत एव कालिदासः कथयति–आषाढस्य प्रथमे दिवसे मेघमाश्लिष्टसानुम्। (मेघ. २)

[१४] कुमारसंभवे कालिदासः– ''सहस्य रात्रीरुदेवासतत्परा'' (५/२६)

[१५] ज्योतिर्विद–शङ्कर–बालकृष्ण–दीक्षितमहोयदयेन स्वकीये भारतीयज्योतिषेत्याख्ये ग्रन्थे ४९ त्तमे पृष्ठे पवित्रन् पवियिष्यन् पूत इति चतुर्विंशति नामान्यर्धमासानां परिगणितानि।

[१६] बर्हिषा पूर्णमासे व्रतमुपैति वत्सैरमावास्याम् (तै.सं.१/६/७)

चेति प्राप्यते। समग्राणां तिथीनां अन्तरभेदेन तिभिभेदो वैदिकज्यौतिषि अस्पष्ट एव। परवर्तिज्यौतिषि तिथिमानमेवं यत्रसूर्यचन्द्रयोर्मध्ये द्वादशांशान्तर तिथिरेका । यद्यपि बहवृचब्राह्मणे एतादृशी स्पष्टता दृश्यते यत्–''यां पर्यस्तमियादभ्युदियादिति सा तिथिः तेन चन्द्रस्यैव उदयास्त पर्यन्त कालस्तिभिरेका'' इति प्राप्यते।

**अहोरात्रम्।**

तैत्तिरीयब्राह्मणे (३/१०/१/१, ३/१०/१/२) शुक्लकृष्णपक्षयोः दिनानां रात्रीणां च संज्ञाः अधोलिखितप्रकारेण प्रदत्ताः। तदेतत् कोष्टकानुसारेण प्रस्तूयते।

| दिनसंज्ञाः। | | | रात्रीसंज्ञाः। | | |
|---|---|---|---|---|---|
| **क्रमाङ्कः** | **शुक्लपक्षः** | **कृष्णपक्षः** | **क्रमाङ्कः** | **शुक्लपक्षः** | **कृष्णपक्षः** |
| १ | संज्ञानम्। | प्रस्तुतम्। | १ | दर्शा। | सुता। |
| २ | विज्ञानम्। | विष्टुतम्। | २ | दृष्टा। | सुन्वनी। |
| ३ | प्रज्ञानम्। | संस्तुतम्। | ३ | दर्शता। | प्रसुता। |
| ४ | जानत्। | कल्याणम्। | ४ | विश्वरूपा। | सूयमाना। |
| ५ | अभिजानत। | विश्वरूपम्। | ५ | सुदर्शना। | अभीषूयमाणा। |
| ६ | संकल्पमानम्। | शुक्रम्। | ६ | आप्यमाना। | पीति। |
| ७ | प्रकल्पमानम्। | अमृतम्। | ७ | प्यायमाना। | प्रपा। |
| ८ | उपकल्पमानम्। | तेजस्वि। | ८ | प्याया। | सम्पा। |
| ९ | उपक्लृप्तम्। | तेजः। | ९ | सूनृता। | तृप्तिः। |
| १० | क्लृप्तम्। | समृद्धम्। | १० | इरा। | तर्पयन्ती। |
| ११ | श्रेयः। | अरुणम्। | ११ | आपूर्यमाणा। | कान्ता |
| १२ | अवसीयः। | भानुमत्। | १२ | पूर्यमाणा। | काम्या। |
| १३ | आयत्। | मरिचिमत्। | १३ | पूरयन्ति। | कामजाता। |
| १४ | सम्भूतम्। | अभितपत्। | १४ | पूर्णा। | आयुष्मती। |
| १५ | भूतम्। | तपस्वत्। | १५ | पौर्णमासी। | कामदुघा। |

**दिनभागाः।**

सूर्योदयादारभ्य सूर्यास्तपर्यन्त कालस्य दिनस्येति यावत् तस्य पूर्वाह्न पराह्न नामानौ द्वौभागौ स्वाभाविकौ, पूर्वाह्नमध्याह्न अपराह्न नामानस्त्रयो विभागाः [१७] पूर्वाह्नमध्याह्नापराह्नसायाह्ननामानश्चत्वारो विभागाः[१८] पञ्चविभागाः प्रातःसंगवमध्याह्नापराह्नसायमित्याख्या विभागाः [१९]।

[१७] शत.ब्रा. २/४/२/८

## प्रथमा दृष्टिः।

### सूर्यचन्द्रसम्बधः।

सूर्यस्वप्रकाशितश्चन्द्रः परप्रकाशितः सूर्योप्रकाशितोवेति वैदिकज्योतिषि स्पष्टं प्राप्यते [२०] । सूर्यरश्मिश्चन्द्रमागन्धर्वः यत्र चन्द्रमसः सूर्यरश्मिरिति निर्देशः चन्द्रस्य परप्रकाशित्वं प्रगटयति। अपरं चैतरीयब्राह्मणे (४०/५) चन्द्रमा अमावास्या मादित्यमनुप्रविशति इत्यानुसारेणाऽमावास्यायां सूर्यचन्द्रयोः समकालीनास्थितिः पठ्यते।

### वासरः।

रविचन्द्रभौमबुधबृहस्पतिशुक्रशनैश्चरादिनां वाराणां नामानि वैदिकसाहित्ये नोल्लिखीतानि न दृश्यन्ते तथापि वारशब्दाऽर्थे वासरशब्दस्य प्रयोगो बहुषो दृश्यते।

### मुहूर्तानि।

मुहूर्तानां कालमान नामानि च सर्वप्रथमं तैत्तिरीयब्राह्मणे (३/१०/९, ३/१०/१/१,२) पठ्यन्ते यत्र दिनमानस्य द्वादशघंटानां (षष्ठीर्घट्यः)पञ्चदशसंख्याभागाकारेण ४८ मिनिटाः(चस्रोःघट्यः) प्राप्यन्ते तथैव रात्रेरपि पञ्चदशमुहूर्तानि।[२१] दिनमुहूर्तानि तावत् (शुक्लपक्षस्य) (१) चित्रः (२) केतुः (३) दाता (४) प्रदाता (५) सविता (६) प्रसविता (७) अभिशास्ता (८) अनुमन्नमेति सन्ति।

अपरत्र (तै.ब्रा. ३/१०/१) मुहूर्तनामानि। (१) चित्र (२) केतुः (३) प्रभात् (४) आभान् (५) संभान् (६) ज्योतिस्मान् (७) स्तेजस्वान् (८) आतपन् (९) तपन् (१०) अभितपन् (११) रोचनः (१२) रोचमानः (१३) शोभनः (१४) शोभमानः (१५) कल्याणः च प्रदत्तानि।

तत्रैव (तै.ब्रा. ३/१०/१/१,२) शुक्लपक्षस्य रात्रिमुहूर्तानि (१) दाता (२) प्रदाता (३) आनन्दः (४) मोदः (५) प्रमोदः (६) आवेशन् (७) निवेशयन् (८) संवेशनः (९) संशान्तः (१०) शान्तः (११) आभवन् (१२) प्रभवन् (१३) सम्भवन् (१४) संभूतः (१५) भूतः च प्रदत्तानि सन्ति।

---

[१८] अर्थ.सं. ९/६/४६

[१९] ऋ.सं. ५/७६/३

[२०] तै.सं. ३/४/७/१

[२१] मुहूर्तचिन्तामणिकाराः दिनमानस्य द्वादशघण्टानां (षष्ठीर्घट्यः) षोडशसंख्ययाभागाकारेण ४५ मिनिटाः स्वीकुर्वन्ति। (शुभाशुभप्रकरणम् पृ.४५)

कृष्णपक्षस्य दिनमुहूर्तानां नामनि तैत्तिरीयब्राह्मणे (३/१०/१/२) (१) सविता (२) प्रसविता (३) दीप्तः (४) दीपयन् (५) दीप्यमानः (६) ज्वलन् (७) ज्वलिता (८) तपन् (९) वितपन् (१०) संतपन् (११) रोचनः (१२) रोचमानः (१३) शंभूः (१४) शुंभमानः (१५) वाम च प्रदत्तानि।

अपरत्र (तै.ब्रा. ३/१०/१/३) कृष्णपक्षस्य रात्रिमुहूर्तानि
(१) अभिशास्ता (२) अनमन्ता (३) आनन्दः (४) मोदः (५) प्रमोदः (६) आसादयन् (७) निषादयन् (८) संसादनः (९) संशान्त (१०) शान्तः (११) आभूः (१२) विभूः (१३) प्रभूः (१४) शंभूः (१५) भुजः च प्रदत्तानि सन्ति।

आधुनिकेकाले मुहूर्तानां प्रसिद्धनामान्येवम् प्राप्यन्ते तद्यथा (१) शिव (२) सार्पः (३) मित्रः (४) पितृदेवः (५) वसुः (६) अम्बुः (७) विश्वेदेवा (८) अभिजित् (९) ब्रह्मा (१०) इन्द्रः (११) इनद्रग्नी (१२) निशाचरः (१३) जलाधीशः (१४) अर्यमा (१५) भगश्चेति सन्ति।

रात्रिमुहूर्तानां नामानि (१) शिव (२) अजैकपाद (३) आहिर्बुध्नयः (४) पूषा (५) दस्रौ (६) यमः (७) अग्निः (८) ब्रह्मा (९) सोमः (१०) अदितिः (११) बृहस्पतिः (१२) विष्णुः (१३) सूर्यः (१४) त्वष्टा (विश्वकर्मा) (१५) वायुश्चति सन्ति।[२२]

## <u>नक्षत्राणि।</u>

अपत्ये तावयो? (ऋ.सं. १/५०/२) इत्यत्र अभिश्यावमि (ऋ.सं. १०/६८/११) त्यत्र च सुस्पष्टतया कार्यानुरुपभाजिनः तारकानां समूहः नक्षत्रमिति संज्ञामुद्वहन्ति इति वेदकालात् नक्षत्रस्वरूपविषये पूर्णं ज्ञानं भारतीयज्यौतिषस्य वर्तते।

---

२२ अह्नः स्युः शिवसार्पमित्रपितरोवस्वंबु विश्वोभिजित्।
केन्द्रेंद्राग्निनिशाचराअपिजलधीशोर्यमाख्योभगः।।
रात्रेः स्युः स्मरहात्रयोजचरणात्पंचाश्वितोथोदिति।
जीवोविष्णुरिनास्त्रस्तिथिलवाः कर्मेषु भोक्तं स्मृतम्।। मुहूर्तमार्तंड २/४।।

**प्रथमा दृष्टिः।**

प्रतिचिह्ननक्षत्राणां नामानि ऋग्वेदे रक्षितानि दृश्यन्ते। तद्यथा। तिस्य(ऋ.सं. ५/५४/१३, १०/६४/८) पुष्य ऋ.सं.

संहितोक्तानि नक्षत्रणि तैत्तिरीय (तै.सं ४/४/१०)

| **क्रमाङ्कः** | **नक्षत्रनाम** | **देवता** | **लिङ्गम्** | **तारासंख्या**[२३] |
|---|---|---|---|---|
| १ | कृत्तिका।[२४] | अग्निः। | स्त्री. | ०६ |
| २ | रोहिणी। | प्रजापतिः। | स्त्री. | ०५ |
| ३ | मृगशीर्षम् १,३,४ | सोमः। | नपुं. | ०३ |
| | (इन्वका २) | (सोमः)। | (स्त्री.) | (०३) |
| ४ | आर्द्रा १,३,४ | रुद्रः। | स्त्री. | ०१ |
| | (बाहू २) | (रुद्रः)। | (पुं.) | ०१ |
| ५ | पुनर्वसुः। | अदितिः। | पुं. | ०४ |
| ६ | तिष्यः। | बृहस्पतिः। | पुं. | ०३ |
| ७ | आश्लेषा। | सर्पः। | स्त्री. | ०५ |
| ८ | मघा। | पितरः। | स्त्री. | ०५ |
| ९ | फाल्गुनी। १,३,४ | अर्यमा। | स्त्री. | ०२ |
| | (पूर्वाफाल्गुनी २) | (अर्यमा) | (स्त्री.) | (०२) |
| १० | फालगुनी। १,३,४ | भगः। | स्त्री. | ०२ |
| | (उत्तराफाल्गुनी २) | (भगः।) | (स्त्री.) | (०२) |
| ११ | हस्तः। | सविता। | पुं. | ०५ |
| १२ | चित्रा। | इन्द्रः १,२ | स्त्री. | ०१ |
| | | (त्वष्टा ३,४) | | |
| १३ | स्वातिः १ | वायुः। | स्त्री. | ०१ |
| | (निष्ट्या २,३,४) | (वायुः।) | (स्त्री.) | (०१) |
| १४ | विशाखा। | इन्द्राग्नी। | स्त्री. | ०४ |
| १५ | अनुराधा। | मित्रः। | स्त्री. | ०४ |
| १६ | रोहिणी १,२ | इन्द्रः। | स्त्री. | ०३ |
| | (ज्येष्ठा ३,४) | (इन्द्रः।) | (स्त्री.) | (०३) |

[२३] मुहूर्तचिन्तामणिक्रमोऽत्र गृहीतः तै.ब्रा. केवलमेकवचनबहुवचनेति निर्देशात्।

[२४] प्रचलितपाठानुसारं कृत्तिकायाः तृतीयः क्रमः गृह्यते।

| | | | | |
|---|---|---|---|---|
| १७ | विचृतौ। १ | पितरः। | पुं. | १९ |
| | (मूलबर्हषी २) | (निर्ऋतिः) | (स्त्री.) | (११) |
| | (मूलम्) | (निर्ऋतिः) | (नपुं.) | (११) |
| | (मूलम्) | (प्रजापतिः।) | (नपुं.) | (११) |
| १८ | आषाढा। १,३,४ | आपः। | स्त्री. | ०२ |
| | (पूर्वाषाढा २) | आपः। | स्त्री. | (०२) |
| १९ | आषाढा। १,३,४ | विश्वेदेवाः। | स्त्री. | ०२ |
| | (उत्तराषाढा २) | (विश्वेदेवाः।) | (स्त्री.) | (०२) |
| | अभिजित् ३,४ | ब्रह्मा। | नपुं. | ०३ |
| २० | श्रोणा। | विष्णुः। | स्त्री. | ०३ |
| २१ | श्रविष्ठा। | वसवः। | स्त्री. | ०४ |
| २२ | शतभिषक्। | इन्द्रः १,२ | पुं. | १०० |
| | | (वरुणो वा) | (पुं.) | (१००) |
| २३ | प्रोष्ठपदः १,३,४ | अजैकपादः। | पुं. | ०२ |
| | (पूर्वपौष्ठपदः २) | (अजैकपादः।) | (पुं.) | (०२) |
| २४ | प्रोष्ठपदः १,३,४ | अहिर्बुध्नियः। | पुं. | ०३ |
| | (उत्तरपौष्ठपदः २) | (अहिर्बुध्नियः।) | (पुं.) | (०३) |
| २५ | रेवती। | पूषा। | स्त्री. | ३२ |
| २६ | अश्वयुजः। | अश्विनौ। | स्त्री. | ०३ |
| २७ | अपभरणी। | यमः। | स्त्री. | ०३ |

एतेषा ५,६,११,१७,२२,२३,२४,इत्यादीनि पुंनक्षत्राणि। १,२,४,७,८,९,१०,१२,१३,१४,१५, १६,१८,१९,२०, २१,२५,२६,२७ इत्यादीनि स्त्रीनक्षत्राणि तथा ३३ त्यस्य नपुंसकलिङ्गम्।

**<u>ग्रहणानि।</u>**

ताण्ड्यब्राह्मणे (४/५/२) गोपथब्राह्मणे(८/१९) शतपथब्राह्मणे (५/३/२२) च ग्रहणोल्लेखाः प्राप्यन्ते यद्यपि वैदिककाले ग्रहणविषयकं भयं नासीत।

**ग्रहाः।**

गृहणातीतिग्रहः इति व्युत्पत्त्यनुसारेण ग्रहाणां प्रभावः सुस्पष्टो भवति। अत एवोक्तम्– ग्रहाराज्यप्रयच्छन्ति ग्रहाराज्यं हरन्ति च ग्रहैस्तु व्यापितं सर्वं त्रैलोक्यं सचराचरम्।

## प्रथमा दृष्टिः।

अमी ये पञ्चोक्षणोमध्ये तस्थुर्महोदिवः। देवत्रानु प्रावच्यं सध्रीचीनानि वावृतुर्वित्तं मे अश्य रोदसी (ऋ. १/१०५/१०) इत्यस्मिन्मन्त्रे पञ्च संख्योल्लेखन भौम–बुध–बृहस्पति–शुक्र–शनैश्चराणां ग्रहणं सर्वैः स्वीकृतं वर्तते। तत्र सूर्याचन्द्रमसाविति सूर्यस्य चन्द्रस्य चान्तर्गणेन ग्रहाणां संख्यासप्तैवासन्न। यद्यपि याज्ञवल्क्यस्मृत्यां नवग्रहाणां नमोल्लेखः प्राप्यन्ते ।

सूर्यः सोमो महीपुत्रः सोमपुत्रो बृहस्पतिः।
शुक्रः शनैश्चरो राहुः केतुश्चैते ग्रहाः स्मृताः।।।। याज्ञवल्क्यस्मृतिः आचाराध्यायः/३९५।।

वेदाङ्गज्योतिषम्।

शिक्षा कल्पो व्याकरणं छन्दसां चयः।
ज्योतिषामयनं चैव वेदाङ्गानि षडेव तु।।

इत्यत्र परिगणितेषु षट्सुवेदाङ्गेषु ज्यौतिषवेदाङ्गस्य यत् नाम पठ्यन्ते तद् विषयकं लगधाचार्यस्य–वेदाङ्गज्यौतिषमिति नामना षट्त्रिंशत् श्लोकयुक्तः ग्रन्थः प्राप्यते इति बालशङ्कर स्वकीये भारतीयज्यौतिषशास्त्रेतिहास इति ग्रन्थे (पृ. ९४) निर्देशः कृतास्ति।

''कालज्ञानं प्रवक्ष्यामि लगधस्य महात्मनः।। ऋग्वेदज्यौतिषम्–२।।''

संवत्सरम्।

वेदकालीनज्यौतिषग्रन्थेषु भिन्नभिन्नानि पञ्चसंवत्सरनामानि प्राप्यन्ते तानि च (१) संवत्सरम् (२) परिवत्सरम्, (३) इदावत्सरम्, (४) अनुवत्सरम्, (५) इद्वत्सरम् च। तत्र संवत्सरे माघशुक्लप्रतिपदा घनिष्ठानक्षत्रयुक्ते समये उत्तरायणप्रारम्भः कथितः। परिवत्सरनामके संवत्सरे माघशुक्लत्रयोदश्यां सौरधनिष्ठानक्षत्रे चान्द्रे च आर्द्रानक्षत्रे उत्तरायणप्रारम्भः दर्शितः। अनुवत्सरनामकेसंवत्सरे माघशुक्लसप्तम्यां सौरे धनिष्ठानक्षत्रे चान्द्रे चाश्विनी नक्षत्रे। उत्तरायणप्रारम्भः कथितः उद्वत्सरनामके संवत्सरे माघकृष्णचतुर्थ्यां सौरे धनिष्ठानक्षत्रे चान्द्रे चोत्तफाल्गुनीनक्षत्रे उक्तः। दक्षिणायनारम्भस्तु संवत्सरनामके संवत्सरे श्रावणशुक्लसप्तम्यां सौरे आश्लेषार्धनक्षत्रे चान्द्रे च्चित्रानक्षत्रे परिवत्सरनामके संवत्सरे श्रावणकृष्णचतुर्थ्यां सौरे आश्लेषार्धनक्षत्रे चान्द्रे च पूर्वाभाद्रपदानक्षत्रे, इदावत्सरनामके संवत्सरे श्रावणशुक्लप्रतिपदि सौरे आश्लेषार्धनक्षत्रे चान्द्रे चाऽश्लेषनक्षत्रे

**प्रथमा दृष्टिः।**

अनुवत्सरनामके संवत्सरे श्रावणशुक्लत्रयोदश्यां सौरे आश्लेषार्धनक्षत्रे चान्द्र च पूर्वाषाढानक्षत्रे इद्वत्सरनामके संवत्सरे श्रावणकृष्णदशम्यां सौरे आश्लेषार्धनक्षत्रे चान्द्रे च रोहिणीनक्षत्रे निगदितः।

संवत्सरकोष्टकम्।

| **क्रमांकः** | **संवत्सरनामानि** | **तैत्तिरीय-ब्राह्मणोक्तनामानि** | **गर्गोक्तनामानि** | **वराहोक्तनामानि** |
|---|---|---|---|---|
| १ | संवत्सरम्। | अग्निः। | अग्निः। | अग्निः। |
| २ | परिवत्सरम्। | आदित्यः। | आदित्यः। | आदित्यः। |
| ३ | इदावत्सरम्। | चन्द्रमाः। | वायुः। | चन्द्रमाः। |
| ४ | अनुवत्सरम्। | वायुः। | चन्द्रमाः। | प्रजापतिः। |
| ५ | इद्वत्सरम्। | — | मृत्युः। | रुद्रः। |

**ग्रहगतिः।**

वेदाङ्गज्योतिषे सूर्यगतिश्चंद्रगतिश्चमध्यम-गतित्येन प्रस्तुते। तत्र भौमाबुधबृहस्पत्यादिनामन्यग्रहाणां विषये निर्देशोऽपि न प्राप्यते। अतश्चेतेषां गतिस्वरूपादिकं न ज्ञायते।

**ग्रहयुतिः।**

प्रायश्चित्ताध्याये ग्रहसंयोगजैः फलैरिति [२५] संदर्भः तत्कालीनसमाजे ग्रहाणां परस्परयुतिसम्बधितं फलविषयकं ज्ञानं बोधयति

**वर्षम्।**

वेदाङ्गज्योतिषे संवत्सरवर्षमब्दश्चेति संज्ञात्रयमेव प्राप्यते।

---

[२५] याज्ञवल्क्यस्मृति -१७१ मन्त्र)

## प्रथमा दृष्टिः।

**मासः।**

वेदाङ्गज्यौतिषे आमावास्यान्तो मासः आसीदित स्पष्टमेव। तत्र पूर्णिमान्तमासान्तमारम्भो कुत्रचिदपि न दृश्यते।

**मुहूर्तनामानि।**

अथर्वज्योतिषे अहोरात्र पञ्चदशैव मुहूर्ताः गृहीता। वेदाङ्गाज्यौतिषे मुहूर्तानां औष्टौनामानि प्रदत्तानि येषु अभिजिदाख्यस्य अष्टमस्य पश्चात् पूर्वङ्गनानां सप्तानां पुनर्ग्रहणात् पञ्चदशमुहूर्तानि। नामानि च

रौद्रं श्वेतं मैत्रं सारभट्टं सावित्रं वैराजं विश्वावसु अभीजिच्चेति।

**वासरनामानि।**

अर्थवेदज्यौतिषे सप्तवासरनामानि पठ्यन्ते। तद्यथा

आदित्यः सोमो भौमश्च तथा बुधबृहस्पती।

भार्गवः शनैश्चरस्यैव एते सप्त दिनाधिपाः।।

(१) आदित्यः (रविवासरः) (२) सोमवासरः (३)भौमवासरः (मंगलवासरः) (४) बुधवासरः (५) बृहस्पतीवासरः (गुरुवासरः) (६) भार्गववासरः (भृगुवासर–शुक्रवासरः) (७) शनैश्चरश्च।

**चन्द्रबलम् / ताराबलम्।**

अथर्वज्योतिर्नामके वेदाङ्गग्रन्थे यद्यपि तिथिरेकगुणा प्रोक्ता......

इति संदर्शितं तथापि यत्र कृष्णपक्षाष्टमीतः शुक्लपक्षपञ्चमीपर्यन्तं चन्द्रबलं न प्राप्यते तत्र ताराबलम् अपरनाम नक्षत्रबलं गणनायां गृह्यते। तस्यैतस्य जातकस्य स्वजन्मनः चन्द्रस्य नक्षत्रादारभ्य सप्तविंशतिनक्षत्राणां प्रथमस्य जन्मेतिर्नामदशमस्य कर्मेतिनाम एकोनविंशस्य चाधानमिति नामकरणं कृत्वा शेषाणां द्वितीयादारभ्य नवमपर्यन्तमेकदशतः एकोनविंशति पर्यन्तम् विंशत्यारभ्य च सप्तविंशति पर्यन्तं क्रमेण

(१) सम्पतकरं (२) विपत्करं (३) क्षेम्यं (४) प्रत्यरं (५) साधकं (६) नैधनं (७) मैत्रं (८) परममैत्रमिति[२६] नामानि।

---

[२६] जन्माख्यसम्पद्विपदः क्षेमप्रत्यरिसाधकाः।
वधमैत्रातिमैत्राः स्युस्ताराः नामसदृक्फलाः।। १२।। ।।मु.चि.४ /१२।।

## व्याकरणग्रन्थेषु ज्यौतिषम्।

पाणिनिविरचियातामष्टाध्यायां वर्ष (पाणि.सू. ५/१/८८,७/३१६) हायन (४/१/२७, ५/९/१३०) दिनविभागे (३/३/९) त्यादिनां सन्दर्भाः पाणिनेः समये (६०० ख्रिस्ताब्दम्) ज्यौतिषस्य न केवलं सम्पूर्णं ज्ञानमपितु तस्य दृष्ठं स्तम्भबन्धं प्रतिपादयति।

## युगपद्धति।[२७]

भगवानमनुः प्रथमाध्याये युगविषयकान् यान् सिद्धान्तान् प्रस्थापयति तानेव सिद्धान्तानन्ये स्मृतिकारः पुराणकारश्च प्रायः विनापरिवर्तनं प्रस्थापयन्ति ते पुनरेवं प्रस्थापिता।

ब्रह्मास्य तु क्षपाहस्य यत्प्रमाणं समासतः।
एकैकशो युगानां तु क्रमशस्तन्निबोधत।। ६८।।
यत्वार्याहूः सहस्राणि वर्षाणां तत्कृतं युगम्।
तस्य तावच्छती सन्ध्या सन्ध्यांशश्च तथाविधः।। ६९।।
इतरेषु ससन्धेषु ससन्ध्यांशेषु च त्रिषु।
एकोपायेन वर्तन्ते सहस्राणि शतानि च।। ७०।।
यदेतत्परिसंख्यातमादावेव चतुर्युगम्।
एतद्वादशसाहस्रं देवानां युगमुच्यते।। ७१।।
दैविकानां युगानान्तु सहस्रपरिसंख्यया।
ब्राह्ममेकमहर्ज्ञेयं तावतीं रात्रिमेव च।। ७२।।
तद्वै युगसहस्रान्तं ब्राह्मं पुण्यमहर्विदुः।
रात्रिञ्च तावतीमेव तेऽहोरात्रविदीजनाः।। ७३।।
तस्य सोऽहर्निशस्यान्ते प्रसुप्तः प्रति बुध्यते।
प्रतिबुद्धश्च सृजति मनस्सदसदात्मकम्।। ७४।।
मनः सृष्टिं विकुरुते चोद्यमानं सिसृक्षया।
आकाशं जायते तस्मात्तस्य शब्दं गुणं विदुः।। ७५।।
आकाशात्तु विकुर्वाणात् सवेगन्धवहः शुचिः।
बलवाञ्जायते वायुः स वै स्पर्शगुणो मतः।। ७६।।

---

[२७] भा.ज्यो.पृ.१४५।

वायोरपि विकुर्वाणात् वरोचिष्णु तमोनुदम्।
ज्योतिरुत्पद्यते भास्वत्तद्रूपगुणमुच्यते।। ७७।।
ज्योतिषश्च विकुर्वाणादापो रसगुणाः स्मृताः।
अद्भ्यो गन्धगुणो भूमिरित्येषा सृष्टिरादितः।। ७८।।
यत् प्राक् द्वादशसाहस्रमुदितं दैविकं युगम्।
तदेक सप्ततिगुणं मन्वन्तरमिहोच्यते।। ७९।।
मन्वन्तराण्यसंख्यानि सर्गः संहार एव च।
क्रीडान्निवैतत् कुरुते परमेष्ठी पुनः पुनः।। ८०।।
चतुष्पात् सकलो धर्मः सत्यञ्चैव कृते युगे।
नाधर्मेणागमः कश्चित् मनुष्यान्प्रतिवर्तते।। ८१।।
इतरेष्वागमाद्धर्मः पादज्ञस्त्ववरोपितः।
चौरिकानृतमायभिर्धर्मश्चापैति पादशः।। ८२।।
अरोगाः सर्वसिद्धार्थाश्चतुर्वर्षशतायुषः।
कृते त्रेतादिषु ह्येषामायुर्ह्रसति पादृशः।। ८३।।
वेदोक्तमायुर्मर्त्यानामाशिषश्चैव कर्मणाम्।
फलन्त्यनुयुगं लोके प्रभावश्च शरीरिणाम्।। ८४।।
अन्ये कृतेयुगे धर्मास्त्रेतायां द्वापरे परे।
अन्ये कलियुगे नृणां युह्रसानुरूपतः।। ८५।।
तपः परं कृतयुगे त्रेतायां ज्ञानमुच्यते।
द्वापरे यज्ञमेवाहुदनिमेकं कलौ युगे।। ८६।।

निम्नलिखित कोष्ठकात् सर्वमेतत् स्पष्टं भविष्यति।

| **युगनाम।** | **संध्या।** | **मुख्यकाल।** | **संध्याशः।** |
|---|---|---|---|
| कृतः। | ४०० | ४००० | ४००=४८०० |
| त्रेता। | ३०० | ३००० | ३००=३६०० |
| द्वापर। | २०० | २००० | १००=२४०० |
| कलिः। | १०० | १००० | १००=१२०० |

सूर्यसिद्धान्ताख्यग्रन्थे सूर्यस्य मयदानवेनाऽऽर्षः संवादो वर्तते। यत्र संवत्सरस्य मेषवृषभादि-राशयनुक्रमेण द्वादश सौरमासाः परिगणिता। तत्र च षष्ट्युत्तशतत्रयदिवसा वर्षमेकमिति गण्यते। इदं तु मानुषंवर्ष यस्यैकस्यमानं देवानां असुराणां च अहोरात्रम् । उत्तरायणे च सूर्ये देवतानामहासुराणां तु रात्रयः। दक्षिणायने सूर्ये देवानां रात्रयोऽसुराणां तु दिनानि। एतेषां अहोरात्राणां षष्ट्युत्तरत्रिशतानां वर्षमेकं देवानामितिदिव्यं वर्षम्। द्वादशसहस्राणि च दिव्यवर्षाणि एको महायुगो यत्र दशांशभागेन धर्मादिचरणयोगने गुणनं(१२०००÷१०×४) कृत्वा सत्ययुगस्य ४८०० दिव्यवर्षाणि। अनेन प्रकारेण त्रेतायुगस्य (१२००० ÷ १०×३) ३६०० दिव्यवर्षाणि। द्वापरयुगस्य (१२००० ÷ १०×२) २४४० दिव्यवर्षाणि। कलियुगस्य च (१२००० ÷ १०×१) १२०० दिव्यवर्षाणि भवन्ति। अतएव सत्ययुगस्य १२००×४×३६० सौरवर्षाणि =१७,२८,००० मनुष्यवर्षाणि, त्रेतायुगस्य १२००×३×३६० सौरवर्षाणि = १२,९६,००० मनुष्यवर्षाणि, द्वापरयुगस्य १२००×२×३६० सौरवर्षाणि = ८,६४,००० मनुष्यवर्षाणि, कलियुगस्य १२००×१×३६० सौरवर्षाणि = ४,३२,००० मनुष्यवर्षाणि भवन्ति।

एकसप्ततिर्महायुगानां मन्वन्तरमेकं गणनम्। चतुर्दशमन्वन्तराणां ब्रह्मणो दिनमेक। तावानेवकालः ब्रह्मणोरात्रिः। इत्यलं विस्तरेण।

**पारस्करसूत्रम्।**

पारस्करगुह्यसूत्रे च आग्रहायणी (मार्गशीर्षः) मासकर्म [२८] बीजवपन [२९] मूलनक्षत्रीय जातकजन्मफल[३०]-मित्यपि सन्दर्भाः पठ्यन्ते।

**कल्पग्रन्थेषुज्यौतिषम्।**

आश्वलायनीये श्रौतसूत्रे गृह्यसूत्रे च श्रवण-पूर्णमास(पूर्णिमा) [३१] मधु-माधव-ऋतु [३२] -तिथ्यादि [३३]विषयका निर्देशाः प्राप्यन्ते।

---

[२८] पा.गु.सू.३/१२।
[२९] पा.गु.सू.२/१६।
[३०] पा.गु.सू.१/२१।
[३१] आश्व.सू.२/१/१।
[३२] श्रौ.सू.४/२२।
[३३] आश्व.सू.२/३/१,२/४/१,३/५,१/४/१

## प्रथमा दृष्टिः।

### महाभारतेज्यौतिषम्।

महाभारते ऋतवः अयने मघ्वादिमासाः, तिथयः चैत्रवैशाखयोः वसंतऋतुत्वं इत्यादि विषयनिरूपणेन स्पष्टं ज्ञायते यत् तत्कालीनसमाजे फलज्योतिषविषयकं गणितज्योतिषविषयकं ज्ञानं च अत्यन्तं विकसितं दृश्यते। महाभारते नामतः केवलं जयेति चाऽभिजितेमुहूर्तद्वयं निर्दिष्टम्। महाभारते यद्यपि मेषादि द्वादशराशीनां गणना नैव वर्तते तथापि नक्षत्रमानानुसारेण ग्रहाणां स्थितिं फलकथनं च निर्धारिते अभवताम्। महाभारते सोमो बृहस्पतिः शुक्रो बुधोऽङ्गारक एव च इत्यत्र चंद्रः बृहस्पतिः(गुरु), शुक्रः बुधः अंगारकश्चेति (मंगलः) ग्रहाणां पञ्चकं निर्दिष्टं प्राप्यते। एतेषु ग्रहेषु च मंगल–बुध–गुरुणाञ्च वक्रगतित्वम् प्रदर्शितम् (कर्ण/ १८/२२, २०/१, ११/१३–१५) तत्रैव (कर्ण. ११/१, शल्य. ११/१८) जातकफलकथनापेक्षया आवश्यकरुपानुसारं मंगलादि पञ्चग्रहाणां युद्धान्यापि संदिष्टानि।

### मुहूर्तग्रन्थानां संक्षिप्तपरिचयः।

भारतीयज्यौतिषेत्याख्ये ग्रन्थे मुहूर्तग्रन्थानां तद्ग्रन्थकाराणाञ्च विशदः विस्तारः(पृष्ठानि ६१४–६२२) कृतो वर्तते। तदत्र संक्षेपेण प्रस्तूयते।

(१) **रत्नकोशनामकग्रन्थस्य** **रचयितुर्ल्लल्लस्य** कालः शकसंवत ५६० (ख्रिस्ताब्दः ६२८) अस्ति।

(२) **रत्नमालानामग्रन्थस्य** कर्तुः **श्रीपतेः** समयः शकसंवत ९६१ (ख्रिस्ताब्दः १०३९) अस्ति। स आनंदपुरनिवासीति ज्ञायते। अस्य ग्रन्थस्य टीकाकारो माधवः शाके ११८५ त्तमे (ख्रिस्ताब्दे १२६३) विद्यमानः आसीत्।

(३–४) **राजमार्तंडग्रन्थस्य** **विद्वज्जनवल्लभाख्य** ग्रन्थस्य च रचयिता **महाराजभोजा** वर्तते। तयोश्च ग्रन्थयोः रचनाकालः शकसंवत ९६४ (ख्रिस्ताब्दः १०४२) वर्तते। विद्वज्जनवल्लभे लाभालाभादि १८ प्रकरणानि सन्ति।

(५) **वाराहिसंहितासदृशस्य** **अद्भुतसागरग्रन्थलेखकः** लक्ष्मणसेनात्मजो **बल्लालसेनो**ऽस्ति। तस्य रचनाकालः शकसंवत १०९० (ख्रिस्ताब्दः ११६८) वर्तते।

(६) **व्यवहारप्रदीपग्रन्थस्य** रचयिता **पद्मनाभो**यमुनापुरनगरनिवासी आसीत्। स च शिवदासात्मज-गङ्गादासपुत्रःकृष्णदासस्य च पुत्रो आसीत्। रचनाकालश्च शकसंवत १०७२ (ख्रिस्ताब्दः ११५०) अस्ति। अस्मिन् ग्रन्थे श्रीपतिकृत रत्नमालेत्यादिमतानां निर्देशाः प्राप्यन्ते।

(७) **ज्योतिर्विदाभरण**मिति ग्रन्थस्य लेखकस्य **कालिदासस्य** समयः शकसंवत ११६४ (ख्रिस्ताब्दः १२४२) निश्चितः अस्ति । यद्यपि ग्रन्थेऽस्मिन् रघुवंशादिसाहित्यरचयितु कालिदासस्येयं कृतिरिति कल्यब्दे ३०६८ तमे मन्यते।

(८) **विवाहवृन्दावन**मित्याख्यग्रन्थस्य रचयितुः **केशवस्य** समयः शकसंवत ११६५ (ख्रिस्ताब्दः १२४३) वर्तते।

(९) **विवाहपटलेत्यपरनाम** सारसमुच्चयग्रन्थस्य कर्ता **शार्ङ्गधरः**। रचनाकालश्च शकसंवत १४०० (ख्रिस्ताब्दः १४७८) अस्ति।

(१०) **मुहूर्ततत्वइत्याख्यस्य** ग्रन्थस्यकर्ता **केशवो**नान्दिग्रामनिवासी आसीत्। रचनाकालश्च प्रायः शकसंवत १४२० (ख्रिस्ताब्दः १४९८) अस्ति। अस्मिन् ग्रन्थे नौकानिर्माणस्य नौकायात्रायाश्च मुहूर्तानि वर्णितानि सन्ति।

(११) **ज्योतिर्निबन्धाख्ये** ग्रन्थे धर्मशास्त्रीयमुहूर्तानां विचारो दृश्यते। तस्य रचयिता **शिवदासः** रचनाकालश्च प्राग् शकसंवत १४४४ (ख्रिस्ताब्दः १५२२) संभवति। यतः विवाहपटलस्य (अधोलिखितस्य १२ क्रमांकस्य) टीकायां अस्य ग्रन्थस्य परिचयः प्राप्यते।

(१२) **विवाहपटलेत्यस्य** रचयिता जगन्नाथपौत्रः रामात्मजो **पीताम्बरः** स्तम्भतीर्थ निवासी आसीत्। रचनाकालश्च शकसंवत १४४४ (ख्रिस्ताब्दः १५२२) अस्ति।

(१३) **ज्योतिदर्पणेति** ग्रन्थस्य रचयिता कोंडपल्लीग्रामस्य वत्सगोत्रोत्पन्नः काण्वशाखीय **कञ्चपल्लु** आसीत्। रचनाकालश्च शकसंवत १४७९ (ख्रिस्ताब्दः १५५७) अस्ति।

(१४) **मुहूर्तमार्तंडेत्याख्यस्य** ग्रन्थस्य कर्ता **नारायण** आसीत्। १६० पद्ययुक्तस्याऽस्य ग्रन्थस्योपरि स्वोपज्ञटीका वर्तते। रचनाकालः शकसंवत १४९३ (ख्रिस्ताब्दः १५७१) अस्ति।

(१५) **तोडरान्देत्यस्य** ग्रन्थस्य रचयिता **नीलकण्ठ** आसीत्। रचनाकालश्च प्रायः शकसंवत १५०९ (ख्रिस्ताब्दः १५८७) अस्ति।

(१६) **मुहूर्तचिन्तामणिरित्यस्य** कर्तुः **रामभट्टस्य** तद्ग्रन्थोपरि स्वोपज्ञटीका प्रमिताक्षरेति अस्ति। रचनाकालश्च शकसंवत १५२२ (ख्रिस्ताब्दः १६००) अस्ति। अपराच पियुषधारेत्याख्याटीका रामभट्टभ्रातृव्येन गोविंदेन शकसंवत १५२५ (ख्रिस्ताब्दः १६०३) लिखिता वर्तते।

(१७) **मुहूर्तचुडामणिरित्यस्य** कर्तुः **शिवज्योतिर्विदः** कालः शकसंवत १५४० (ख्रिस्ताब्दः १६२८) अस्ति।

(१८) **मुहूर्तकल्पद्रुमाख्यस्य** रचयिता कृष्णात्रिगोत्रीये**विट्ठलदीक्षित**ोऽस्ति। तद्ग्रन्थोपरि स्वोपज्ञटीकाऽपि प्राप्यते। द्वयोश्च रचनाकालः शकसंवत १५४९ (ख्रिस्ताब्दः १६२९) अस्ति।

(१९) **मुहूर्तमालानामकस्य** ग्रन्थस्य कर्ता शांण्डिल्यगोत्रीय केशवपौत्रः नृसिंहात्मजः **रघुनाथोज्योतिर्विद्** वर्तते। सोऽयं चितपावनो महाराष्ट्रीयो ब्राह्मणः काशीनिवासीचाऽऽसीत्। रचनाकालश्च शकसंवत १५८२ (ख्रिस्ताब्दः १६६०) अस्ति।

(२०) **मुहूर्तदीपका**ख्यग्रन्थस्य रचयिता कान्हजीपुत्रः **महादेवज्योतिर्विद्** भूजकच्छस्य निवासी आसीत्। तद्ग्रन्थोपरिस्वोपज्ञटीकाऽपि प्राप्यते। रचनाकालश्च शकसंवत १५८३ (ख्रिस्ताब्दः १६६१) अस्ति।

(२१) **मुहूर्तगणपतिरित्यस्य** ग्रन्थस्य कर्ता भारद्वाजगोत्रीय रावलावटंकः हरिशंकर आत्मजः **गणपतिर्ज्योतिर्विद्** औदीच्यगुर्जरविप्रः आसीत्। रचनाकालश्च शकसंवत १६०७ (ख्रिस्ताब्दः १६८५) अस्ति।

(२२) **मुहूर्तसिन्धुरित्यस्य** ग्रन्थस्य रचयिता दातारकुलोत्पन्नो **गङ्गाधरशास्त्री** पूणे निवासी शकसंवत १७४४-१८१० त्तमे काले विद्यमान आसीत्। (ख्रिस्ताब्दः १८२२-१८८८)। रचनाकालश्च शकसंवत १८०५ (ख्रिस्ताब्दः १८८३) अस्ति।

**संहिताग्रन्थानां विषयवस्तुनिरूपणम्।।**

वराहमिहिरविरचितायां चतुरधिकशताध्याय्यां बृहत्संहितायामे**एकादशश्लोक**निबद्धशास्त्रोपनयनाख्ये **प्रथमाऽध्याये मङ्गलाचरणं** सृष्ट्युत्पतिः संख्यादिमतानि ज्यौतिषशास्त्रस्वरूपं च वर्णितम्। **एकोनचत्वारिंशच्छ्लोकेषु सांवत्सरसूत्रनामके द्वितीयाऽध्याये** दैवज्ञलक्षणानि यात्राविभागः संहिताप्रशंसा तिथ्यादिनक्षत्रादि च वर्णितानि। **चत्वारिंशच्छ्लोकेषु आदित्यचाराख्ये तृतीयाऽध्याये** अयनादिविचारो वेधलक्षणं सूर्यगतविविधाऽवस्था लक्षणफलादिविचारश्च प्रदर्शिताः। **द्वात्रिंशच्छ्लोकेषु चन्द्रताराख्ये चतुर्थेऽध्याये** चन्द्रसम्बन्धि नक्षत्रयोगादि ग्रहणादि चन्द्रस्य च नक्षत्रैः सह युतिभेदादिवर्णन-मुल्कापातलक्षणानि च संकथितानि। **अष्टनवतीश्लोकेषु राहुनामके पञ्चमेऽध्याये** राहुविषयकानि विविधानिमतानि ग्रहणभेदाः पर्वविचारः स्पर्शमोक्षविचारश्च प्रकटिताः। **त्रयोदशश्लोकेषु भौमचारभिधे षष्ठाऽध्याये** पञ्चमुखमङ्गललक्षणं वर्णितमस्ति। **विंशतिश्लोकेषु बुधचारनामके सप्तमाऽध्याये** बुधस्योदयादिपराशरोक्त सप्तगतिलक्षणं निरूपितम् । **त्रिपञ्चाश**च्छ्लोकेषु **बृहस्पतिसंज्ञितेऽष्टमे**ऽध्याये बृहस्पतिवर्षविचारो नक्षत्रमाससम्बद्धलक्षणं युगादिविचारः संवत्सरादिफलं गुरुबिम्बफलं च वर्णितम्। **पञ्चचत्वारिंशच्छ्लोकेषु शुक्रचारनामकेनवमाऽध्याये** शुक्रवीथिलक्षणं शुक्रस्य मण्डलादिफलञ्च नक्षत्रानुसारेण उदयास्तफलञ्च दर्शितम्। **एकविंशतिश्लोकेषु शनैश्चरचाराभिधे दशमाऽध्याये** नक्षत्रानुसारं शनैश्चरस्यफलं गुरुयुतिफलं च कथितम्। **द्विषष्ठी**श्लोकेषु **केतुचारनामके द्वादशाऽध्याये** केतोः उदयास्तविचारश्चतुर्दशनामरूपाणि तत्फलं च निरूपितम्।

**एकविंशतिश्लोकेषु अगस्त्यचाराख्ये द्वादशेऽध्याये** समुद्रादि वर्णनमगस्त्यउदयास्तविचारस्तत् फलं च कथितानि। **एकादशश्लोकेषु सप्तर्षिचाराख्ये त्रयोदशाऽध्याये** सप्तर्षिविचारो वर्णितोऽस्ति। **द्वात्रिंशच्छ्लोकेषु नक्षत्रकूर्माभिधे चतुर्दशाऽध्याये** कूर्मचक्रे नक्षत्रविभाजनं विविधप्रदेशस्थितनक्षत्रस्थितिवर्णनं भारतवर्षस्य नवद्वीपानुसारेण विभागाश्च वर्णिताः। **द्वात्रिंशच्छ्लोकेषु नक्षत्रव्यूहनामके पञ्चदशाऽध्याये** कृतिकादिपदाथास्तत्कार्यं तत्फलनिरूपणं च वर्तते। **एकचत्वारिंशच्छ्श्लोकेषु ग्रहभक्तियोगाख्ये षोडशाऽध्याये** सूर्यादिग्रहाणां कारकत्वफलं प्रशासित

प्रदेशनिरूपणं चास्ति। **सप्तविंशतिश्लोकेषु ग्रहयुध्धाख्ये सप्तदशाऽध्याये** ग्रहाणां परस्परं बलाबलविचारस्तत्फलं च निरूपिते स्तः। **अष्टश्लोकेषु शशिग्रहसमागमनामके अष्टादशाध्याये** चन्द्रगतिश्चन्द्रस्य अन्य ग्रहैश्च सह युतिस्तत्फलं च प्रदर्शितम्। **द्वाविंशतिश्लोकेषु ग्रहवर्षफलाभिधे एकोनविंशतितमेऽध्याये** चन्द्रमङ्गलादिनां वर्षेशफलं प्रदर्शितं वर्तते। **नवश्लोकेषु ग्रहशृंगारकनामकेविंशतितमेऽध्याये** ग्रहाणामुदयास्तविचारोऽशुभसंस्थानविशेषो योगफलानि च वर्णितानि सन्ति।

**सप्तत्रिंशच्छ्लोकेषु** गर्भलक्षणाख्ये **एकविंशतितमेऽध्याये** वर्षाप्रयोजनं, मेघगर्भसमयनिश्चयवारिदवाय्वोः लक्षणं मासानुसारेण गर्भलक्षणं गर्भघातलक्षणानि च निरूपितानि वर्तन्ते। **अष्टश्लोकेषु** गर्भधारणनामके **द्वाविंशतितमेऽध्याये** वायुद्वारा गर्भधारणपरीक्षानिरूपिताऽस्ति। **दशश्लोकेषु** प्रवर्षणाख्ये **त्रयोविंशतितमेऽध्याये** प्रथमवर्षायाः नक्षत्रं तत् प्रभावलक्षणं च वर्णितं अस्ति। **षट्त्रिंशच्छ्लोकेषु रोहिणीयोगाभिधे चतुरविंशतितमेऽध्याये** योगवायुपरीक्षाविधिः भाविसस्यसम्बन्धी शुभाशुभशुकनावली रोहिणीशकटभेदविचारश्च प्रदर्शिताः सन्ति। **षट्श्लोकेषु स्वातिनामके पञ्चविंशतितमेऽध्याये** रोहिणीस्वात्योः चन्द्रयोगफलं वृष्ट्यनुसारिफलनिर्देशश्च निरूपितोस्तिः। **त्रयोदशश्लोकेषु आषाढीयोगनामके षड्विंशतितमेऽध्याये** आषाढिपूर्णिमाविचार स्तुलालक्षणं तोलनविचारः पापयोगविचारश्च वर्णिताः सन्ति। **दशश्लोकेषु वातचक्राख्ये सप्तविंशतितमेऽध्याये** दिशानुसारं वायुफलं वर्णितमस्ति। **चतुर्विंशतिश्लोकेषु सद्योवर्षणाख्येऽष्टाविंशतितमेऽध्याये** ग्रहयोगादिभिर्वर्षाविचारः प्रकटितो वर्तते। **चतुर्दशश्लोकेषु कुसुमलतानामके एकोनत्रिंशतितमेऽध्याये** अशोकपाटलेत्यादि वृक्षादीनां पुष्पफलैर्भविष्यविचारः कृतो वर्तते। **त्रयस्त्रिंशच्छ्श्लोकेषु सन्ध्यालक्षणाख्ये त्रिंशत्तमेऽध्याये** सन्ध्यालक्षणम् मृगचेष्टा पक्षिचेष्टा फलविचारः परिघरेखा सूचितशुभाशुभफलविचारश्च वर्णिताः सन्ति। **पञ्चश्लोकेषु दिग्दाहाभिधे एकत्रिंशेध्याये** वर्णभेद दिशाभेदादि सूचित दिग्दाहफलविचारः कृतो वर्तते । **एकत्रिंशत्तमेच्छ्लोकेषु भूकम्पनामके द्वात्रिंशत्तमेऽध्याये** इन्द्रवरुणवेलादिमण्डलविचारः प्राचीनार्वाचीनमतपुरःसरमुत्तरकाशी लाटूरप्रभृतिप्रदेशानुभूतभूकम्पानां वैज्ञानिकं विश्लेषणं फलानिनिरूपितानि सन्ति। **त्रिंशच्छ्लोकेषूल्कालक्षणाख्ये त्रयत्रिंशत्तमेऽध्याये** उल्कास्वरूपफल-विचारः कृतो वर्तते। **त्रयोविंशतिश्लोकेषु परिवेषलक्षणाभिधे चतुस्त्रिंशत्तमेऽध्याये** परिवेषलक्षणं नामानि तदन्तरगतग्रहाणां शुभाशुभफलविचारश्च निरूपिताः वर्तन्ते। **अष्टश्लोकेषु**

**इन्द्रधनुषलक्षणाख्ये**[३४] **पञ्चत्रिंशत्तमेऽध्याये**ऽध्यायनामानुसारं[३५] विचारः कृतो दृश्यते। **पञ्चश्लोकेषु गन्धर्वनगरलक्षणनामके षड्त्रिंशत्तमेऽध्याये**ऽध्यायनामानुसारं विचारः कृतो दृश्यते। **श्लोकत्रये प्रतिसूर्यलक्षणाभिधे सप्तत्रिंशत्तमेऽध्याये** प्रतिसूर्यवर्णानुसारं फलविचारः कृतो वर्तते। **श्लोकपञ्चके निर्घातलक्षणाख्ये अष्टत्रिंशत्तमेऽध्याये**ऽध्यायनामानुसारेण फलविचारः वर्णितोऽस्ति। **चतुर्दशश्लोकेषु सस्यजातकनामके एकोनचत्वारिंशत्तमेऽध्याये** ग्रीष्मशरदोद्भूतसस्यजातविचारः कृतो वर्तते। **त्रयोदशश्लोकेषु द्रव्यनिश्चयाख्ये चत्वारिंशत्तमेऽध्याये** मेषादिमीनपर्यंत राशिशासितद्रव्यप्रकारः फलविचारश्च निरूपितो विद्यन्ते।

**चतुर्दशश्लोकेष्वर्घ काण्डाख्ये एकचत्वारिंशत्तमेऽध्याये** महर्घसमर्घयोः मासगतविचारो मेषादि संक्रान्तिफलं च वर्णितमस्ति। **अष्टषष्टीश्लोकेषु इन्द्रध्वजसम्पदाख्ये द्वाचत्वरिंशत्तमेऽध्याये** इन्द्रध्वजमाहात्म्यं तदंगतो शास्त्रीयोविचार इन्द्रध्वजाययुक्तवृक्षादिशुभाशुभविचारस्तदर्थं होमहवनलक्षणं इन्द्रध्वजस्थापनविसर्जनेत्यादिविचारा निरूपिता वर्तन्ते। **अष्टाविंशतिश्लोकेषु नीराजनाख्ये त्रिचत्वारिंशत्तमेऽध्याये** नीराजन(नीर+अजन=जलप्रक्षेपणम्) शांतिविधिस्तदर्थ मुचितकालो यज्ञादिविधिविधानं तत्फलं च प्रदर्शितं वर्तते। **षोडशश्लोकेषु खञ्जनलक्षणाख्ये चतुश्चत्वारिंशत्तमे-ऽध्याये** खंजनदर्शनस्थानफलं अनिष्टनिवृत्ति उपायश्च वर्णितोस्ति। **अष्टनवतिश्लोकेषूत्पातनामके पञ्चचत्वारिंशत्तमेऽध्याये** अग्निवृक्षाद्युत्पातहेतुस्वरूपप्रभावफलानि देवताभेदफलं शान्तिविधानं च वर्णितमस्ति। **अष्टाविंशतिश्लोकेषु मयूरचित्रकाख्ये षट्चत्वारिंशत्तमेऽध्याये** सूर्यचन्द्रादिग्रहचार-फलं द्विचन्द्रदर्शनफलं द्विसूर्यदर्शनफलं युद्धादिषु जयपराजयविचारो गन्धर्वपुरलक्षणं[३६] च वर्णितमस्ति। **सप्तासीतिश्लोकेषु पुष्यस्नाननामके सप्तचत्वारिंशत्तमेऽध्याये** पुष्यशांतिस्तोत्रं स्नानविधिः पूजाविधिर्जलस्नानादि वैदिकपौराणिकमन्त्रा राजधर्माः च निरूपिताः सन्ति। **अष्टश्लोकेषु पट्टलक्षणाभिधे अष्टचत्वारिंशत्तमेऽध्याये** पट्ट(मुकुट) लक्षणविचारः कृतो वर्तते। **षड्विंशतिश्लोकेषु खड्गलक्षणाख्ये एकोनपञ्चाशत्तमेऽध्याये** यज्ञस्य खड्गस्य शुभाशुभवर्णादि विचारः कृतो वर्तते। **चतुश्चत्वारिंच्छ्लोकेष्वंगविद्यानामके पञ्चाशत्तमेऽध्याये अङ्गस्पर्शचेष्टाभिः** प्रश्नज्ञानं प्रश्नस्य शुभाशुभस्थानविचारो नष्टवस्तुपुनः प्राप्तिविचारो गर्भस्थशिशोः लिङ्गविचाराश्च वर्णिताः सन्ति। **दशश्लोकेषु पिटकलक्षणाख्ये एकपञ्चाशत्तमेऽध्याये**ऽध्यायानुसारेणविचारः कृतो दृश्यते।

---

[३४] एतर्थं लक्षणादि विचाराःषट्त्रिंशत्तमेऽध्याये प्रागे वर्णिताः।

[३५] यत्रयत्राऽध्याये अध्यायनान्मानुसारं एवविषयो वर्णतोऽस्ति तत्रेव "अध्यायनामानुसारविचार इति लिखित मस्ति। अपरेष्वध्यायेषु अध्यायनामतो नैकविषयाः वर्णिताः सन्ति तत्र भेदपूवर्कं प्रदर्शितमस्ति

[३६] एतदर्थं लक्षणादिविचाराः षट्त्रिंशत्तमेऽध्याये वर्णिताः।

**त्रयोविंशत्यधिकशतश्लोकेषु वास्तुविद्याख्ये द्विपञ्चाशत्तमेऽध्याये** वास्तुपुरषोत्पत्तिर्राजादि-भवनाकारविचारो विविधवास्तुप्रकाराश्च कृता वर्तन्ते। **चतुर्विंशत्यधिकशतश्लोकेषु दकार्गलाख्ये त्रिपञ्चाशत्तमेऽध्याये** दकार्गल(दक + अर्गल) प्रयोजनं पृथ्वीगतशीराः कूपादिदिशाविचारश्च वर्णिताः सन्ति। **एकत्रिंशच्छ्लोकेषु वृक्षायुर्वेदनामके चतुश्पञ्चाशत्तमेऽध्याये** वृक्षविषयका विविधा विचाराः कृताः सन्ति। **एकत्रिंशच्छ्लोकेषु प्रासादलक्षणाभिधे पञ्चपञ्चाशत्तमेऽध्याये** देवालयनिर्माणकालो विविधाः प्रकारा वर्णिताः सन्ति। **अष्टश्लोकेषु वज्रलेपाख्ये षट्पञ्चाशत्तमेऽध्याये** वज्रलेपप्रकारा वर्णिताः सन्ति। **सप्तपञ्चाशच्छ्लोकेषु प्रतिमालक्षणाख्ये सप्तपञ्चाशत्तमेऽध्याये**ऽध्यायनामानुसारं विचारः कृतो वर्तते। **चतुर्दशश्लोकेषु वनसम्प्रवेशाभिधे अष्टपञ्चाशत्तमेऽध्याये** मूर्त्यर्थं वृक्षकर्तनविधि वर्णितोस्ति। **द्वाविंशतिश्लोकेषु प्रतिमाप्रतिष्ठानामके एकोनषष्टितमे-ऽध्याये**ऽध्यायनामनुसारं विचारः कृतो वर्तते। **पञ्चदशश्लोकेषु गोललक्षणाभिधे षट्त्तमेऽध्याये** आचार्यनिर्दिष्टधेन्वादिशुभाशुभलक्षणविचारः कृतोऽस्ति।

**श्लोकद्वये कुक्कुटलक्षणाख्ये एकषष्टितमेऽध्याये**ऽध्यायनामानुसारं शुभाशुभलक्षणविचारः कृतो वर्तते। **श्लोकत्रये कूर्मलक्षणाख्ये त्रिषष्टितमेऽध्याये**ऽध्यायनामानुसारं विचारः कृतो वर्तते। **एकादशश्लोकेषु छागलक्षणाभिधे चतुःषष्टितमेऽध्याये** विविधरोगलक्षणविचारः कृतो वर्तते। **पञ्चश्लोकेषु अश्वलक्षणाख्ये पञ्चषष्टित्तमेऽध्याये**ऽध्यायनामानुसारं विचारः कृतो वर्तते। **दशश्लोकेषु हस्तिलक्षणनामके षोडशषष्टित्तमे**ऽध्यायेऽध्यायनामानुसारं विचारः कृतो वर्तते। **षोडशोत्तरशतश्लोकेषु पुरुषलक्षणनामके सप्तषष्टित्तमेऽध्याये** पुरुषादेहादि लक्षणविचारः कृतो वर्तते। **चत्वारिंशच्छ्लोकेषु पञ्चमहापुरुषाख्ये अष्टषष्टित्तमेऽध्याये** मालव्यादि- पञ्चमहापुरुष-लक्षणविचारः कृतो वर्तते। **षड्विंशतिश्लोकेषु स्त्रीलक्षणनामके एकोनसप्ततित्तमेऽध्याये** स्त्रीणां अङ्गोपाङ्गलक्षणफलं तत् शुभाशुभफलं च वर्णितेस्तः। **त्रयोदशश्लोकेषु वस्त्रच्छेदाख्ये सप्ततितमेऽध्याये** नक्षत्रोपविभागास्तदनुसारं वस्त्रच्छेदफलं पादत्राणछेदफलं तत्सम्बन्धि च पराशरमतमिति वर्णितानि सन्ति। **षट्श्लोकेषु चामरलक्षणाभिधे एकसप्ततित्तमेऽध्याये**-ऽध्यायनामानुसारं विचारः कृतो वर्तते। **षट्श्लोकेषु छत्रलक्षणाभिधे द्विसप्ततित्तमेऽध्याये-**ऽध्यायनामानुसारं विचारः कृतो वर्तते। **विंशतिश्लोकेषु स्त्रीप्रशंसानामके त्रिसप्ततित्तमेऽध्याये** स्त्रीणां माहात्म्यं गुणवर्णनं चारित्र्यप्रशंसा च वर्णिताः सन्ति। **दशश्लोकेषु सौभाग्यकरणाख्ये चतुःसप्ततित्तमेऽध्याये** स्त्रीणां प्रणयप्राप्तिनिमित्तकभाग्यदुर्भाग्यविचारश्च कृतो वर्तते। **द्वादशश्लोकेषु-कान्दर्पिकनामके पञ्चसप्ततित्तमेऽध्याये** कामशास्त्रविषयक वीर्योद्युत्पत्तिविषयको विचारः कृतो वर्तते। **सप्तत्रिंशच्छ्लोकेषु गन्धयुक्तिनामके षट्सप्तत्तमेऽध्याये** मूर्धजानां कृष्णीकरणादिकधूपगंधपानादि

विचारः कृतो वर्तते। **षड्विंशतिश्लोकेषु स्त्रीपुरुषसमागमाख्ये सप्तसप्तित्तमेऽध्याये** विविध स्त्रीलक्षणविचारस्तत्समागमसारासारविचारो गर्भाधानयोगाश्च निरूपिता: सन्ति। **एकोनचत्वारिंश-च्छ्लोकेषु शय्यासनलक्षणनामके अष्टसप्ततितत्तमेऽध्याये**ऽध्यायनामानुसारं विचारः कृतो वर्तते। **अष्टादशश्लोकेषु रत्नपरीक्षाभिधे एकोनाशीतितत्तमेऽध्याये**ऽध्यायनामानुसारं विचारः कृतो वर्तते। **षडत्रिंशत्श्लोकेषु मुक्तालक्षणनामके अशीतितमेऽध्याये**ऽध्यायनामानुसारं विचारः कृतो वर्तते।

**एकादशश्लोकेषु पद्मरागलक्षणनामके एकाशीतितमेऽध्याये**ऽध्यायनामानुसारं विचारः कृतो वर्तते। **एकस्मिन्नेवश्लोके मरकतलक्षणनामके द्व्यशीतितमेऽध्याये**ऽध्यायनामानुसारं विचारः कृतो वर्तते। **श्लोकद्वये दीपकलक्षणनामके त्र्यशीतित्तमेऽध्याये**ऽध्यायनामानुसारं विचारः कृतो वर्तते। **नवश्लोकेषु दन्तकाष्ठलक्षणाभिधे चतुरशीतितमेऽध्याये** विविधवृक्षाणां दन्तधावनकाष्ठं दन्तधावनविधिस्तत्प्रेक्षणफलविचारश्च कृताः वर्तन्ते। **अशीतिश्लोकेषु शकुनाख्ये पञ्चाशीतितमे-ऽध्याये** शकुनविषयक विविधविचाराः कृता वर्तन्ते। **पञ्चचत्वारिंशच्छ्लोकेषु अन्तरचक्रनामके षडशीतितमेऽध्याये** शान्तदिप्तदिशानां च दिग्चक्रानुसारेणफलं वर्णितमस्ति। **सप्तचत्वारिंश-च्छ्लोकेषु निरुताभिधे**(पक्षिशब्दः) **सप्ताशीतितमेऽध्याये** विहङ्गानां पशुनाञ्च रुतानुसारं शकुनफलं वर्णितं अस्ति। **विंशतिश्लोकेषु श्वचक्राभिधे अष्टाशतित्तमेऽध्याये** कुक्कुरसम्बन्धि चेष्टाविचारः कृतो वर्तते। **चतुर्दशश्लोकेषु शिवारुताख्ये एकोननवतित्तमेऽध्याये**ऽध्यायनामानुसारं विचारः कृतो वर्तते। **श्लोकेत्रये मृगचेष्टाख्ये नवतितमेऽध्याये**ऽध्यायनामानुसारं विचारः कृतो वर्तते। **श्लोकत्रये गवेङ्गितनामके एकनवतित्तमेऽध्याये**ऽध्यायनामानुसार विचारः कृतो वर्तते। **पञ्चदशश्लोकेषु अश्वेङ्गितनामके द्विनवतित्तमेऽध्याये**ऽध्यायनामानुसारं विचारः कृतो वर्तते। **चतुर्दशश्लोकेषु हस्तिचेष्टाभिधे त्रयनवतितमेऽध्याये**ऽध्यायनामनुसारं विचारः कृतो वर्तते। **द्विषष्टीश्लोकेषु वायसविरुताख्ये चतुर्णवतितमेऽध्याये**ऽध्यायनामानुसारं विचारः कृतो वर्तते। **द्वात्रिंशच्छ्लोकेषु शाकुनोत्तराख्ये पञ्चनवतित्तमेऽध्याये** वर्षादिसूचकशकुनविचारस्तात्कालिकशकुन कुण्डलीविचारश्च कृतो दृश्यते। **सप्तदशश्लोकेषु पाकाभिधे षण्णनवतितमेऽध्याये**ऽध्यायनामनुसारं विचारः कृतो वर्तते। **षोडशश्लोकेषु नक्षत्रकर्मगुणाख्ये सप्तनवतितमेऽध्याये** नक्षत्राणां तारादेवतादि गणनाविचारः सकलकार्येषु लग्नशुद्धिविचारः च कृतो वर्तते। **एकादशश्लोकेषु तिथिकरणाभिधे-ऽष्टनवतित्तमेऽध्याये** तिथिकरणयोः स्वरूपगुणकार्यादिगणनाविचारः संक्षिप्तविवाहपटलम् लग्नग्रहमासमेलापकादि शुद्धिविचाराः कृता वर्तन्ते। **एकोनविंशतिश्लोकेषु नक्षत्रशीलनामके नवनवतितमेऽध्याये**ऽध्यायनामानुसारं विचारः कृतो वर्तते। **चतुषष्टीश्लोकेषु ग्रहगोचरनामके**

## प्रथमा दृष्टिः।

**एकशतत्तमेऽध्याये** विभिन्नग्रहाणां गोचरफलादेशविचारोऽशुभग्रहादिगोचरविषये पूजादिविधानं रविवासरादि मन्दवासरपर्यन्तं विविधकार्य विचाराश्च कृता वर्तन्ते। **षोडशश्लोकेषु रूपसत्राख्ये एकाधिकशतत्तमेऽध्याये** नक्षत्रपुरुषाङ्ग विचारो रूपकालनिर्णयो व्रतफलं प्रतिमासिकविष्णुव्रतविचाराश्च कृता वर्तन्ते। **षट्श्लोकेषु उपसंहाराख्ये द्वयाधिकशततमेऽध्याये** श्रीवराहमिहिरेण स्वकीयबृहत्-संहिताया उपसंहारः प्रस्तुतः कृतो वर्तते। **त्रयोदशश्लोकेषु शास्त्रानुक्रमणीनामके त्र्यधिकशतत्तमेऽध्याये** समग्रस्य ग्रन्थस्य चर्चितविषयानुक्रमणी प्रदत्ता वर्तते। अन्ते च **त्रयोदशश्लोकेषु विवाहपटलनामके चतुरधिकशतत्तमेऽध्याये** विवाहकुण्डल्यां जातकस्य लग्नादि(प्रथमाभाव) द्वादश(व्यय)भावपर्यन्तं तत्रस्थग्रहफलं, गोधूलिप्रशंसा प्रस्थापिते स्तः।

अस्मिन् महानिबन्धे प्रथमादृष्ट्यां ज्यौतशास्त्रेतिहासनाम्ना वेदेभ्य आरभ्य अर्वाचीनकालीनानां ग्रन्थानां ग्रन्थकाराणाञ्च जीवनसमयौ विषयवस्तु च सुगृहीतो तत्र श्रीमतां शङ्करबालकृष्णदीक्षितचरणानां ''भारतीयजोतिषाख्य'' ग्रन्थस्य श्रीशिवनाथ झारखण्डीकृत हिन्दीभाषायां अनुवाद एवमूलस्त्रोतस्तत्र श्रीशङ्करबालकृष्णदीक्षितचरणैः सर्वेषां ग्रन्थानां ग्रन्थकाराणां च समयनिर्देशः शकाब्दगणनया स्वीकृतः। अत्र तु गुर्जरादिषूत्तरभारते वैक्रमाब्दानां प्रचलीतत्वात् सर्वत्र वैक्रमाब्दाः प्रथमं निर्देष्टास्तः ख्रिस्ताब्दा ततश्च शकाब्दा दर्शिताः।

**प्राचीनसिद्धान्तपञ्चकम्।**

वैदिकसाहित्यादारभ्य वेदाङ्गज्योतिषपर्यन्तकाले प्रायो ग्रहविषयकं सामान्यज्ञानमेव प्राप्यते, यद्यपि ग्रहाणां स्पष्टगतयः, स्थितिविषयकं च ज्ञानं अत्यल्पमेव प्राप्यते। किन्तु प्राचीनकाले पञ्चसिद्धान्ताः प्रचलिताः आसन्निति वराहमिहिरस्य (वैक्रमाब्दः २३ =ख्रिस्ताब्दः ३४ पूर्वे =शकाब्दः १२२ पूर्वे) पञ्चसिद्धान्तिकाग्रन्थे पठ्यन्ते।

पौलिशरोमकवसिष्ठसौरपैतामहास्तु पञ्चसिद्धान्ताः।

यद्यपि पञ्चसिद्धान्तविषयचर्चा तत्तत्सिद्धान्तकालानुसारेणाऽत्र प्रस्थाप्यते।

(अ) **पितामहसिद्धान्तः।** अस्मिन् सिद्धान्ते नक्षत्रानयनकालधनिष्ठानक्षत्रादारभ्यते। अतः पितामहसिद्धान्तस्यकालो वेदाङ्गकालसमीपतो (वैक्रमाब्दात् १३४३ पूर्वे =ख्रिस्ताब्दात् १४०० पूर्वे =शकाब्दात् १३२२ पूर्वे) इति निश्चीयते।

## प्रथमा दृष्टिः।

अस्मिन् सिद्धान्ते सूर्यचन्द्रवर्षगणनया युगमानं, अधिकमासः क्षयतिथयः, दिनमानं नक्षत्रानयनरीतिश्चेति विषयाः वर्णिता इति वराहमिहिरो लिखति।

पितामहसिद्धान्तस्य सम्प्रदायत्रयं प्रचलितं अस्ति। तेश्च ब्रह्मगुप्तोक्तः प्राचीनब्रह्मसिद्धान्तः शाकल्योक्तः विष्णुधर्मपुराणोक्तश्च पश्चात्कालीनः मन्यन्ते।

(ब) **प्राचीनवसिष्ठसिद्धान्तः।** प्राचीनवसिष्ठोऽर्वाचीनवासिष्ठश्चेति वसिष्ठसिद्धान्तस्य सम्प्रदायद्वयं प्राप्यते। प्रथमस्तावत् प्राचीनो वसिष्ठो वराहमिहिरेण (वैक्रमाब्दात् २३ =ख्रिस्ताब्दात् ३४ पूर्वे =शकाब्दात् १२२ पूर्वे) विभ्रष्ट इति कथितः अपरश्च ब्रह्मगुप्तेन (वैक्रमाब्दः ६५५ =ख्रिस्ताब्दः ५९८ =शकाब्दः ५२०) वासिष्ठसिद्धान्तः विष्णुचन्द्रकृतवासिष्ठसिद्धान्तश्चेति नाम्ना निर्दिष्टः। विष्णुचन्द्रस्य समयस्तु (वैक्रमाब्दः ५६२ =ख्रिस्ताब्दः ५०५ =शकाब्दः ४२७) मन्यते।

तत्र युगानियातवर्षाणिभगणं सूर्यचन्द्रादिनाञ्च मध्यमत्वादिविषयावर्णिताः सन्ति।

**प्राचीनपौलिशसिद्धान्तः।**

पञ्चसिद्धान्तिकायां वराहमिहिरेण प्राचीनपौलिशसिद्धान्तः प्राथम्येन कथितः। तत्र अवन्त्याः चरांशाः ७ घट्यः २० पलानि वाराणस्याश्च ९ घट्यः निर्दिष्टाः। अवन्त्याः परमाल्पदिनमानं २६ घट्यः २६ पलानि परमाधिकयदिनमानं च ३३ घट्यः ३४ पलानि प्रदत्ते। वाराणस्याश्च परमाल्पदिनमानं २६ घट्यः ०४ पलानि परमाधिक्यदिनमानञ्च ३३ घट्यः ५६ पलानि च प्रदत्ते। लाटदेवेन। अस्य सिद्धान्तस्य व्याख्याकृता ज्ञायते। भट्टोत्पलेन (वैक्रमाब्दः १०२३ =ख्रिस्ताब्दः ९६६ =शकाब्दः ८८८) बृहत्संहिताटीकायां पौलिशसिद्धान्तस्य भगणमानस्य चर्चा कृता वर्तते। अस्मिन् सिद्धान्ते अन्येषां सौरेतिसंज्ञायाः स्थाने सावन इति संज्ञा स्वीकृता दृश्यते। यद्यपि वराहमिहिरनिर्दिष्टात् वर्षमानात् भट्टोत्पल्ल निर्दिष्टं वर्षमानं भिन्नमिति कथ्यते। भट्टोत्पलानुसारेण पौलिशसिद्धान्तस्याऽपरं सम्प्रदायद्वयं प्रथितमासीत्।

**प्राचीनरोमकसिद्धान्तः।**

अस्य सिद्धान्तस्य सम्प्रदायद्वयं प्रचलीतम्। प्रथमो मूलसिद्धान्तो ग्रीकज्योतिर्विदाहिपोर्केन (वैक्रमाब्दः २०७ पूर्वे =ख्रिस्ताब्दः १५० पूर्वे =शकाब्दः २२८ पूर्वे) रचितो दृश्यते। किन्त्वत्र युगादिमानस्याभावाद् ब्रह्मगुप्तेन (वैक्रमाब्दः ६५५ =ख्रिस्ताब्दः ५९८ =शकाब्दः ५२०) नैव

स्विक्रीयते। अत एव श्रीषेण (वैक्रमाब्दः ५६२ =ख्रिस्ताब्दः ५०५ =शकाब्दः ४२७) नूतनो रोमकसिद्धान्तः प्रस्थापितो यत्र वासिष्ठसिद्धान्तात् युगादिमानस्यान्तर्भावः कृतः।

अत्र अहर्गणसाधनं, सूर्यचन्द्रग्रहसाधनं, सूर्यग्रहणं, चन्द्रग्रहणमित्यादि विषयाः वर्णिताः आसन्निति वराहमिहिरो लिखति।

**प्राचीनसूर्यसिद्धान्तः।**

वराहमिहिरकृतपञ्चसिद्धान्तिकायां सौरसिद्धान्ते सूर्यचन्द्रानयनगणना प्रदत्ता। विशेषश्च भौमादिपञ्चग्रहानयनगणनाऽपि प्रस्थापिता दृश्यते। पौलिशसिद्धान्तस्यब्रह्मगुप्तस्य च खण्डखाद्यटीकायां च वर्णिताः कतिपयसिद्धान्ताः सौरसिद्धान्तैः सह साम्यं धारयन्ति। अलबेरुनीमते सौरसिद्धान्तो लाटकृतः टॉलेमी मते नाऽयं लाटकृत इति।

अस्मिन् सिद्धान्ते सूर्यचन्द्रग्रहणविचारो भौमादिग्रहाणां वक्रित्वमार्गित्वादिविचारो युगारम्भकालश्च प्रसिद्धाः सन्ति।

**अर्वाचीनसिद्धान्तपञ्चकम्।**

**सूर्यसिद्धान्तः।**

अस्य प्रणेता मय इति ज्ञायते, यः सूर्यदेवस्य अंशरूपेणपुरुषेण म्लेच्छजातिमवाप्यरोमनगरे दृष्टः। यद्यपि ब्रह्मगुप्तः (वैक्रमाब्दः ६५५ =ख्रिस्ताब्दः ५९८ =शकाब्दः ५२०) समयात् पूर्वमेवाऽस्य पूज्यत्वेन प्रचलितत्वात् पञ्चशतकात् पूर्वकालः गण्यते। अत्र चतुर्दशाधिऽकरणानि पञ्चशती च पद्यानां प्राप्यन्ते येषु कानिचित् पद्यानि[३७] लाटकृतान्यपि विद्यन्ते।

अत्र नवविधकालमानानि, मध्यमाधिकारः, स्पष्टाधिकारो ग्रहणाधिकारः, पाताधिकारः, शृङ्गोन्नतिः त्रिप्रश्नाधिकारः, ग्रहयुत्याधिकार इत्यादि विषयाः वर्णिताः सन्ति।

[३७] यद्यपि अलबेरुनी (वैक्रमाब्दः ९९४–११०५ ख्रिस्ताब्दः ९३७–१०४८, शकाब्दः ८५९–९७०) समग्रं सूर्यसिद्धान्तलाटकृतमिति–स्वीकरोति तथापि वराहमिहिरेण (वैक्रमाब्दः २३, ख्रिस्ताब्दः ३४पूर्वे, शकाब्दः १२२पूर्वे) स्वकीयायां पञ्चसिद्धान्तिकाया इदृश उल्लेखो न कृतः।

**प्रथमा दृष्टिः।**

एतद् सिद्धान्तानुसारेण तैलङ्गणप्रदेशस्य बाविलालस्य करणग्रन्थः (वैक्रमाब्दः १३५५ =ख्रिस्ताब्दः १२९८ =शकाब्दः १२२०) ताजकसारः (वैक्रमाब्दः १५८० =ख्रिस्ताब्दः १५२३ =शकाब्दः १४४५) गणेशदैवज्ञकृतं ग्रहलाघवम् (वैक्रमाब्दः १५७६ =ख्रिस्ताब्दः १५१९ =शकाब्दः १४४२) माधवस्य भास्वतीकरणोपरिटीका (वैक्रमाब्दः १५७६ =ख्रिस्ताब्दः १५१९ =शकाब्दः १४४२) ज्योतिर्दर्पणः (वैक्रमाब्दः १६५४ =ख्रिस्ताब्दः १५९७ =शकाब्दः १४७९) कमलाकरसिद्धान्तविवेकः (वैक्रमाब्दः १७१५ =ख्रिस्ताब्दः १६५८ =शकाब्दः १५८०)।

अस्य ग्रन्थस्य रङ्गनाथकृतगूढार्थप्रकाशिका (वैक्रमाब्दः १६६० =ख्रिस्ताब्दः १६०३ =शकाब्दः १५२५) नृसिंहदैवज्ञकृतं सौरभाष्यं (वैक्रमाब्दः १६७६ =ख्रिस्ताब्दः १६१९ =शकाब्दः १५४२) विश्वनाथदैवज्ञकृतागहनार्थप्रकाशिका (वैक्रमाब्दः १६८५ =ख्रिस्ताब्दः १६२८ =शकाब्दः १५५०) दादाभाईकृता किरणावलीटीका (वैक्रमाब्दः १७७६ =ख्रिस्ताब्दः १७१९ =शकाब्दः १६४१) च प्रसिद्धाः सन्ति।

**सोमसिद्धान्तः।**

अस्य दृष्टा शौनकऋषिरिति मन्यते। अत्र सृष्टेरारम्भकालात् कलियुगारम्भपर्यन्तम् अहर्गणानयनं विशेषतया वर्तते। अस्य सिद्धान्तस्य कालः सूर्यसिद्धान्तस्य प्रायः समकालीनः स्विक्रीयते। अस्मिन् ग्रन्थे दशाऽध्यायाः पञ्चत्रिंशदधिकत्रिंशत् पद्यानि प्राप्यन्ते यत्र मध्यमाधिकारादि विषयाः सूर्यसिद्धान्तानुसारेण एव।

**वसिष्ठसिद्धान्तः।**

अस्य वृद्धवसिष्ठसिद्धान्तोलघुवसिष्ठसिद्धान्तश्चेति परम्पराद्वयं प्राप्यते। प्रथमपरम्परायां वसिष्ठेन उपदिष्टस्य माण्डवस्य संक्षिप्तो ग्रन्थः प्राप्यते यत्र पञ्चाऽध्यायाः, एकोनपञ्चाशत् पद्यानि प्राप्यन्ते। अस्मिन् ग्रन्थे ग्रहाणां कक्षामानानि पातोवेध इत्यादि विषयाः पठ्यन्ते। मध्यमाधिकारः, स्पष्टाधिकारः, छायाधिकारः इत्यादीनि प्रकरणानि प्राप्यन्ते।

द्वितीयपरम्परायां वसिष्ठेन उपदिष्टस्य वामदेवस्य सिद्धान्तग्रन्थोऽपूर्णः प्राप्यते। तत्र केवलं सृष्टिसंस्थाग्रहाणाञ्च कक्षामानानि पठ्यन्ते। अत्र च पद्यानि अनुष्टुप् छन्दोबद्धानि।

## प्रथमा दृष्टिः।

### रोमेशसिद्धान्तः।

केनचित् दाक्षिणात्येन ज्योतिर्विदा रचिते रोमशसिद्धान्ते एकादशाध्यायाः चतुः सप्तत्यधिक-शतत्रयं पद्यानि वर्तन्ते। अयं सिद्धान्तो विष्णुप्रोक्तो विसष्ठ रोमशाभ्यां चाधित इति कथ्यते। अत्र कृष्णवेणीनद्यानाम्मोल्लेखः प्राप्यते। अत्र च भगणादिविषयाः सूर्यसिद्धान्तसमाना एव।

### शाकल्योक्तब्रह्मसिद्धान्तः।

ब्रह्मणोपदिष्टे नारदे गृहीतेस्मिन् सिद्धान्ते षडाध्यायाः चतुःषष्ट्यधिकसप्तशतपद्यानि विद्यन्ते। अस्मिन् सिद्धान्ते भगणादिविषयाः सूर्यसिद्धान्तसमाना एव। अत्र तृतीयाऽध्याये सूर्यचन्द्रयोः क्रान्तिसाम्यत्वं, धर्मशास्त्रसम्बन्धिविषयाः सन्ति। सौरमतानुसारेण प्रमाथि संवत्सरगणनया अयं ग्रन्थः वैक्रमाब्दात् ८७८ (=ख्रिस्ताब्दः ८२१ = शकाब्दः ७४३) परवर्ती मन्यते।

| क्रमाङ्कः। | नाम।<br>ग्रन्थकारः/कृतिः। | वैक्रमाब्दः। | ख्रिस्ताब्दः। | शकाब्दः। |
|---|---|---|---|---|
| ०१ | **वराहमिहिरः।** | २३ | ३४ पूर्वे | १२२ पूर्वे |
| ०२ | **टॉलमी।** | १९७ | १४० | ६२ |
| ०३ | **आचार्यमीनराजः।** | चतुर्थीशताब्दी | तृतीयशताब्दी | सार्द्धद्वितीयशताब्दी |
| ०४ | **आर्यभट्टः।** | ५३३ | ४७६ | ३९८ |
| ०५ | **विष्णुगुप्तः।** | ५६२ | ५०५ | ४२७ |
| ०६ | **श्रीषेणः।** | ५६२ | ५०५ | ४२७ |
| ०७ | **ब्रह्मचन्द्रः।** | ६५५ | ५९८ | ५२० |
| ०८ | **लल्लः।** | ६९५ | ६३८ | ५६० |
| ०९ | **पद्मनाभः।** | ८३५ | ७७८ | ७०० |
| १० | **श्रीधरः।** | ९१० | ८५३ | ७७५ |
| ११ | **महावीरः।** | ९१० | ८५३ | ७७५ |
| १२ | **मनुः।** | ९३५ | ८७८ | ८०० |
| १३ | **बलभद्रः।** | ९३५ | ८७८ | ८०० |
| १४ | **पृथूदकः।** | ९३५-१००७ | ८७८-९५० | ८००-८७२ |
| १५ | **मुञ्जालः।** | ९८९ | ९३२ | ८५४ |
| १६ | **वित्तेश्वरः।** | ९९४-११०५ | ९३७-१०४८ | ८५१-९७० |
| १७ | **अल्बिरुनी।** | ९९४-११०५ | ९३७-१०४८ | ८५१-९७० |

| | | | | |
|---|---|---|---|---|
| १८ | **द्वितीयआर्यभट्टः।** | १०१० | ९३५ | ८७५ |
| १९ | **कल्याणवर्मा।** | १०२३पूर्वे | ९६६पूर्वे | ८८८पूर्वे |
| २० | **भट्टोत्पलः।** | १०२३ | ९६६ | ८८८ |
| २१ | **विजयनन्दी।** | १०२३ | ९६६ | ८८८ |
| २२ | **भानुभट्टः।** | १०३५ | ९७८ | ९०० |
| २३ | **श्रीपतिः।** | १०९६ | १०३९ | ९६१ |
| २४ | **वरुणः।** | १०९७ | १०४० | ९६२ |
| २५ | **श्रीभोजः।** | १०९९ | १०४२ | ९६४ |
| २६ | **भोजराजः।** | १०९९ | १०४२ | ९६४ |
| २७ | **राजादशबलः।** | १११५ | १०५८ | ९८० |
| २८ | **महेश्वरः।** | ११३५ | १०७८ | १००० |
| २९ | **ब्रह्मदेवः।** | ११४८ | १०९१ | १०१४ |
| ३० | **शतानन्दः।** | ११५६ | १०९९ | १०२१ |
| ३१ | **करणोत्तमग्रन्थः।** | ११७३पूर्वे | १०८५पूर्वे | १०३८पूर्वे |
| ३२ | **भास्कराचार्यः।** | ११७७ | १११४ | १०३६ |
| ३३ | **सोमेश्वरतृतीयः।** | ११८८ | ११२९ | १०५१ |
| ३४ | **अनन्तदेवः।** | १२७९ | १२२२ | ११४४ |
| ३५ | **केशवः।** | १३०४ | १२४३ | ११६५ |
| ३६ | **वाविलालः।** | १३५५ | १२९८ | १२२० |
| ३७ | **महादेवः।** | १३७३ | १३१६ | १२३८ |
| ३८ | **श्रीमन्त्रेश्वरः** | १४००–१६०० | १४००–१६०० | १३००–१५०० |
| ३९ | **महादेवः।** | १४४२ | १३६४ | १२८६ |
| ४० | **नार्मदः।** | १४३५ | १३७८ | १३०० |
| ४१ | **पद्मनाभः।** | १४५५ | १३९८ | १३२० |
| ४२ | **दामोदरः।** | १४७४ | १४२७ | १३३९ |
| ४३ | **गङ्गाधरः।** | १४९१ | १४३४ | १३५६ |
| ४४ | **मकरन्दः।** | १५३५ | १४७८ | १४०० |
| ४५ | **केशवोद्वितीयः।** | १५५३ | १४९६ | १४१८ |
| ४६ | **गणेशदैवज्ञः।** | १५५५ | १४९८ | १४२० |
| ४७ | **लक्ष्मीदासः।** | १५५५ | १४९८ | १४२० |
| ४८ | **कृपारामः।** | १५५५परवर्तीनो | १४९८ परवर्तीनो | १४२० परवर्तीनो |
| ४९ | **ज्ञानराजः।** | १५६० | १५०३ | १४२५ |
| ५० | **सूर्यदासः।** | १५६५ | १५०८ | १४३० |
| ५१ | **अनन्तः।** | १५८२ | १५२५ | १४४७ |

| | | | | |
|---|---|---|---|---|
| ५२ | **ढुण्ढीराजः।** | १५८२ | १५२५ | १४४७ |
| ५३ | **नृसिंहः।** | १६०५ | १५४८ | १४७० |
| ५४ | **अनन्तः।** | १६१५ | १५५८ | १४८० |
| ५५ | **रामचन्द्रः।** | १६१७पूर्वे | १५६०पूर्वे | १४८२पूर्वे |
| ५६ | **रघुनाथः।** | १६२० | १५६२ | १४८४ |
| ५७ | **रघुनाथः।** | १६२३ | १५६५ | १४८७ |
| ५८ | **दिनकरः।** | १६३५ | १५७८ | १५०० |
| ५९ | **नृसिंहः।** | १६४३ | १५८६ | १५०८ |
| ६० | **शिवः।** | १६४५ | १५८८ | १५१० |
| ६१ | **श्रीनाथः।** | १६४७ | १५९० | १५१२ |
| ६२ | **रामभट्टः।** | १६४७ | १५९० | १५१२ |
| ६३ | **कृष्णः।** | १६५५ | १५९८ | १५२० |
| ६४ | **मल्लारिः।** | १६५९ | १६०२ | १५२४ |
| ६५ | **रङ्गनाथः।** | १६५९ | १६०२ | १५२४ |
| ६६ | **रङ्गनाथः।** | १६६० | १६०३ | १५२५ |
| ६७ | **मुनीश्वरः।** | १६०० | १६०३ | १५२५ |
| ६८ | **दिवाकरः।** | १६६३ | १६०६ | १५२८ |
| ६९ | **विष्णुः।** | १६६५ | १६०८ | १५३० |
| ७० | **कमलाकरः।** | १६६५ | १६०८ | १५३० |
| ७१ | **नागेशः।** | १६७६ | १६१९ | १५४१ |
| ७२ | **विश्वनाथः।** | १६८६ | १६२९ | १५५१ |
| ७३ | **नित्यानन्दः।** | १६९६ | १६३९ | १५६१ |
| ७४ | **कृष्णः।** | १७१० | १६५३ | १५७५ |
| ७५ | **रत्नकण्ठः।** | १७१५ | १६५८ | १५८० |
| ७६ | **जयसिंहः।** | १७५० | १६९३ | १६१५ |
| ७७ | **जटाधरः।** | १७६१ | १७०४ | १६२६ |
| ७८ | **विद्दणः।** | १७६९ | १७१२ | १६३४ |
| ७९ | **दादाभट्टः।** | १७७६ | १७१९ | १६४१ |
| ८० | **चिंन्तामणिदीक्षितः।** | १७९३ | १७३६ | १६५८ |
| ८१ | **शङ्करः।** | १८२३ | १७६६ | १६८८ |
| ८२ | **मणिरामः।** | १८३१ | १७७४ | १६९६ |
| ८३ | **मथुरानाथः।** | १८३९ | १७८२ | १७०४ |
| ८४ | **भुला।** | १९६५ | १८०८ | १७३० |
| ८५ | **राघवः।** | १८६७ | १८१० | १७३२ |

| | | | | |
|---|---|---|---|---|
| ८६ | **दिनकरः।** | १८६९ | १८१२ | १७३४ |
| ८७ | **शिवः।** | १८७२ | १८१५ | १७३७ |
| ८८ | **यज्ञेश्वरः।** | १८९५ | १८३८ | १७६० |
| ८९ | **नृसिंहः।** | १८७८ | १८२२ | १७४३ |
| ९० | **विनायकः केरोलक्ष्मणोवा।** | १८८१ | १८२४ | १७४६ |
| ९१ | **विसाजीरघुनाथः।** | १८४४ | १८२७ | १७४९ |
| ९२ | **चिन्तामणिरघुनाथः।** | १८८५ | १८२८ | १७५० |
| ९३ | **कृष्णशास्त्रीगोडबोले।** | १८८८ | १८३१ | १७५३ |
| ९४ | **वेङ्कटेशबापूजीकेतकरः।** | १९१० | १८५३ | १७७५ |
| ९५ | **बालगङ्गाधरतिलकः।** | १९१३ | १८५६ | १७७८ |
| ९६ | **नीलाम्बरः।** | १९४० | १८८३ | १८०५ |

**वराहमिहिरः।** ज्योतिषशास्त्रस्येतिहास (हिन्दी)[३८] वराहमिहिरस्य नामातीव महत्त्वपूर्णमस्ति। वराहो वराहमिहिरो वराहमिहीर इत्यादिभिर्विविधरीत्या तस्योल्लेखो दृश्यते। तस्यपितुर्नाम आदित्यदासः। स एव तस्य गुरुरपि। पितापि ज्यौतिषशास्त्रनिष्णात आसीत्। कापित्थकनगरे सूर्योपासनया तेन पितुः सकाशात् ज्योतिषशास्त्रस्य ज्ञानं प्राप्तम्। अवन्तिकानगर्यां उज्जयिन्यां राज्ञः सम्मानं संप्राप्य राज्यसभां स्वपाण्डित्येनालंकृतवान्। विषयेऽस्मिन् बृहज्जातक उपसंहाराध्याये स्पष्टतयोक्तम्।

आदित्यदासतनयादवाप्तबोधः
कापित्थके सवितृलब्धवरप्रसादः।
आवन्तिको मुनिमतान्यवलोक्यसम्य-
ग्होरां वराहमिहिरो रुचिरां चकार।। २८/९।।

एवमेव तेन निर्दिष्टम्-

दिनकरमुनिगुरुचरणप्रणिपातकृतप्रसादमतिनेदम्।
शास्त्रमुपसङ्गहीनं नमोऽस्तु पूर्वप्रणेतृभ्यः।। बृ.जा.२८/१०।।

तेन वराहमिहिरेण लघुजातकं बृहज्जातकं विवाहपटलं योगयात्रा पञ्चसिद्धान्तिका-इत्येते ग्रन्थाः प्रणीताः। एवं ज्योतिषशास्त्रस्य त्रिस्कन्धरूपस्य गणितं-संहिता-होरा इति त्रयाणामपि विषयाणामुपरि

[३८] भा.ज्यो.पृ.२९०-२९७।

वराहमिहिरस्य विवेचनं प्राप्यते। यद्यपि तस्य समयः प्रायेण ख्रिस्ताब्दात् ५०९ तः ५८५ पर्यन्तं षटशताब्द्यां मन्येत एवं दीक्षित महोदयाः स्वकीये ''भारतीय ज्यौतिष का इतिहास (पृ. २९०)'' लिखितं वर्तते। किन्तु महाकविकालिदासविरचिते ज्योतिर्विदाभरणाख्यग्रन्थे पद्यमेतत् पठ्यते।

धन्वन्तरिक्षपणकामरसिंहशङ्कुवेतालभट्टघटकर्परकालिदासाः।
ख्यातो वराहमिहिरो नृपतेः सभायां रत्नानि वै वररुचिर्नवविक्रमस्य।।

तत्र च महाकविना ग्रन्थरचनाकालो निर्दिष्टः।

वर्षैः सिन्धुदर्शनाम्बुगुणै ३०६८र्याते कलौ संमिते।
मासे माधवसंज्ञिते च विहितो ग्रन्थक्रियोपक्रमः।।

अस्याऽयमर्थः कलौ कलियुगे सिन्धुराः अष्टौ दिग्गजाः (८)
दर्शनानि षष्ट् (६) अम्बरं शून्यमेव (०) गुणाश्च सत्त्वरजस्तमांसि त्रीणि (३)
(अत्र अङ्कानां वामतो गतिरीति न्यायेन ३०६८) वर्षैः सम्मिते याते गते........।

अधुना (वैक्रमाब्दात् २०६६ =ख्रिस्ताब्दात् २०१० =शकाब्दात् १९३१-१९३२ =कल्याब्दाः ५१११ तेभ्यः ३०३८ (ज्योतिर्विदाभरणस्य) अब्देषु निस्कासितेषु सत्सु २०४३ वैक्रमाब्दाः अवशिष्टाः। ते च यदा वैक्रमाब्देभ्यः २०६६ तः निष्कासिता यदा तदा ०२३ अवशिष्टाः। ख्रिस्ताब्दात् पूर्वे ३४ मिते वर्षे शकाब्दाश्च १२२ वर्षेभ्य पूर्वेऽस्य समयो निर्णीतो भवति। स एव महाकविकालिदास्य ज्योतिर्विदाभरणस्य रचनाकालो यः विक्रमादित्यस्य कालेन सहाऽत्यन्तम् सामिप्यं धारयति। अतः वराहमिहिरो महाकविकालिदासस्य विक्रमादित्यस्य च समकालीन एवेती न शङ्कालेशः।

बृहत्संहितायां सप्तोत्तरशतेषु अध्यायेषु विविधा विषया विचारिताः। ग्रहाणां चारादिकम्, प्रवर्षविचारः, अङ्गविद्या, वास्तुविचारः मूर्तिकलाविचारः, गन्धयुक्तिः, रत्नपरीक्षा, विविधपुरुषादि-लक्षणविचारः इत्यादया महत्त्वपूर्णा बहवो विषयाः पूर्वाचार्यविचाराननुसृत्य विवेचिताः। सिद्धान्ता संगृहीताः बृहज्जातके अष्टाविंशतितमे जातकविषयस्य होराविषयस्य वा विवेचनं दरीदृश्यते। पञ्चसिद्धान्तिकायां अष्टादशाध्यायेषु ४४२ श्लोकेषु खगोलविद्याविषयस्य पैतामह-वशिष्ठ-रोमक-पौलिश-सौर इति पञ्च सिद्धान्तानां विवरणं सम्प्राप्यते। विवाहपटलग्रन्थे विवाहस्य तथा योगयात्रायां

यात्राविषयस्य विवेचनं वराहमिहिरेण कृतम्। लघुजातकस्य श्लोकैके लघुजातकं नाम वराहस्यैवान्यो जातकविषयस्य होरायां वान्यः संक्षिप्तो ग्रन्थ इति सुस्पष्टं भवति।

होराशास्त्रे वृत्तैर्मया निबद्धे निरीक्ष्य शास्त्राणि।
यत्तस्याप्यार्याभिः सारमहं संप्रवक्ष्यामि।।

उत्पलेन व्याख्यायां वराहमिहिरस्य समाससंहितानामकस्य ग्रन्थस्योल्लेखः कृतः।

एवं ज्योतिषस्य प्रायेण सर्वं गणितं संहिता होरा अथवा खगोलज्योतिषं फलज्योतिषं च एतयोर्द्वयोरपि वराहमिहरेण विशिष्टं सम्पूर्णं च विवेचनं कृतम्।

**टोलेमी** (Ptolemy)। ग्रीसदेशस्य खगोलशास्त्रीणां एरिस्टोटलस्य (वैक्रमाब्दीयात् सार्द्धतृतीय शतकात् =ख्रिस्ताब्दीयात् चतुर्थशतकात् पूर्वे =शकाब्देः, पादोनपञ्चमशतकात् पूर्वं) एपोलोनियसः (वैक्रमाब्दीयात् द्वितीयार्द्ध शतकात् पूर्वे =ख्रिस्ताब्देः, सार्द्धतृतीयशतकात् पूर्वं =शकाब्दीयात् पादोनतृतीयशतकात्) हिपार्कसः (वैक्रमाब्दीये सार्द्धशतके =ख्रिस्ताब्दीये द्वितीयशतके =शकाब्दीये सपादप्रथमशतके) च अनुगामीति पठ्यते।[३९] टोलेमिनाऽपि पुरोगामीनां परम्परामनुसृत्य चन्द्रग्रहतारा-नक्षत्रादिनां भ्रमणादिगतिसिद्धान्तः प्रस्थापितोऽस्ति। तदानीन्तनानां मान्यतां पृथ्वीति समग्रसृष्टेः केन्द्रबिन्दु सर्वाणि च खगोलीय तेजपुञ्जानि मनुष्यसेवायां ईश्वरेणस्थापितानीति टोलेमीनाऽपि स्वीकृतमासीत्।

टोलेमीकृते एल्मजेस्टेतिग्रन्थे हिपार्कसेन्यऽसानञ्च सिद्धान्ताः समाविष्टाः सन्ति। समग्रसृष्टेः पृथ्वीकेन्द्रबिन्दुरिति टॉलमीसिद्धान्तः युरोपे आरबेषु च तथा स्वीकृतोऽचलद् यथा कोपरनिक्सनिकोलसेन (ख्रिस्ताब्दः १४७३-१५४३) सूर्यः केन्द्रबिन्दुरिति सप्रयोगं प्रस्थापितमिति आङ्ग्लकविना ज्हॉनमिल्टनेन स्वरचिते पॅरेडाइझ लोस्ट आख्ये काव्ये स एव टोलेमी सिद्धान्तः अन्तग्रथितः पठ्यते।

**आचार्यमीनराजः।** अस्य समयो विक्रमार्कस्य चतुर्थशताब्दी = ख्रिस्ताब्दस्य तृतीयशताब्दी = शकाब्दस्य च सार्द्धद्वितीय शताब्दी मन्यते। यवनोजातीयोऽयं विदेशीज्योतिर्विद् स्वकीये वृद्धयवनजातकाख्ये ग्रन्थे रणप्रदेशस्थ पशूनां उष्ट्रगर्दभादीनां नैकशो निर्देशैः पश्चिमभारतस्य सौराष्ट्रराजस्थानेति प्रदेशनिवासी इति स्वीक्रियते। अस्य ग्रन्थे ७१ प्रकरणेषु अष्टकवर्गफलविचारः सूर्यादिग्रहाणां दृष्टिविचारः लग्नादिभावेषु ग्रहाणां फलविचारः राजमार्गाः शकुनादि विषया वर्णिताः

[३९] गुजरातीविश्वकोशः, पृ. २२६। स्तभः प्रथमः (खण्ड-१ अ-आ)

सन्ति। अयं भारतीय संस्कृति प्रशंसको देवब्राह्मणानुरागीचाऽसीद्। अतएव मङ्गलचरणे ब्रह्मविष्णुमहेशादीनां नमस्कारान् कृतवान्।

**प्रथमआर्यभट्टः।** आर्यभट्टस्य समयो वैक्रमाब्दः ५३३ =ख्रिस्ताब्दः ४७६ =शकाब्दः ३९८ स्वीक्रीयते। तस्याऽऽर्यभट्टीयाख्यग्रन्थः सर्वेषु प्राचीनेषु ज्यौतिषशास्त्रविषयकग्रन्थेषु अत्यन्तमहत्वं धारयति। तस्य रचनाकालः शकाब्दः ४२१ (ख्रिस्ताब्दः ४९९) ज्ञायते। एतस्य द्वौ भागौ। प्रथमभागे प्रकरणमेकमेव तस्य मङ्गलाचरणं तस्य गीति श्लोकाः अन्ते च संख्या परिभाषाश्लोकाः इति सम्मिल्य १२ पद्यानि सन्ति। द्वितीये तु भागे त्रीणिप्रकराणाणि सम्मिल्य १०८ पद्यानि सन्ति। साम्प्रतं प्रचलितेषु सौरं आर्यं ब्राह्मचेत्याख्येषु त्रिषुज्योतिःशास्त्रसिद्धान्तेषु मध्यमपक्ष आर्यभट्टस्यैव संक्षेपेणवस्तुनिर्देशार्थ-मार्यभट्टेन कादिवर्णानामकद्वित्रिचतुरिति स्वराणां च १-१०-१००-१००० इत्यादि ग्रहणं कृतं वर्तते। तस्यमते एकस्यमनोः महायुगानां संख्या ७१ प्रदत्ता[४०] प्रतिकल्पञ्च संधिकालः स्विकृतः। तस्याऽऽर्य सिद्धांताख्ये ग्रन्थे चत्वारः पादाः सन्ति। तेषु (१) दशगीतिके ग्रहाणां भगणादिमानम्, (२) गणित अङ्कगणितबीजगणित-भूमिति-त्रिकोणमित्यादिविवेचनम् (३) कालक्रिया, (४) गोलाख्यपादे च ज्यौतिषशास्त्रविषयकं गणितं दृश्यते।

**विष्णुचन्द्रः।** विष्णुचन्द्रः वराहमिहिरस्य (वैक्रमाब्दात् २३ = ख्रिस्ताब्दात् ३४पूर्वे =शकाब्दात् १२२ पूर्वे) परवर्ती। ब्रह्मगुप्तस्य (वैक्रमाब्दात् ६५५ = ख्रिस्ताब्दात् ५९८ = शकाब्दात् ५२०) पूर्ववर्ती मन्यते।[४१] अतः श्रीषेणस्य समकालीन।

**श्रीषेणः।** श्रीषेणः वराहमिहिरस्य वैक्रमाब्दात् २३ =ख्रिस्ताब्दात् ३४ पूर्वे =शकाब्दात् १२२ पूर्वे परवर्ती ब्रह्मगुप्तस्य (शकाब्दात् ५२० =ख्रिस्ताब्दात् ५९८ =वैक्रमाब्दात् ५६२) च पूर्ववर्ती मन्यते।[४२]

**ब्रह्मगुप्तः।** ब्रह्मगुप्तस्य जन्मकालो वैक्रमाब्दः ६५५ =ख्रिस्ताब्दः ५९८ = शकाब्दः ५२० स्विक्रीयते। तस्य पिता जिष्णुरिति ज्ञायते। स च मारवाडप्रान्तस्य भीमपालनिवासी। तस्य

---

[४०] यत्प्रग्द्वादशसाहस्त्रमुदितं दैविकं युगम्।
तदेकसप्ततिगुणं मन्वन्तरमिहोच्यते।। मनुस्मृति प्र. अ. ७९।।

[४१] विशेषार्थं श्रीशङ्करबालकृष्णदीक्षितस्य भारतीयज्योतिषेत्यत्र पृ. २९७ द्रष्टव्यम्।

[४२] विशेषार्थं श्रीशङ्करबालकृष्णदीक्षितस्य भारतीयज्योतिषेत्यत्र पृ. २९७ द्रष्टव्यम्।

ब्रह्मसिद्धान्ताख्यस्य ग्रन्थस्य रचनाकालः शकाब्दः ५५० (ख्रिस्ताब्दः ६२८) इति प्राप्यते। तस्य खण्डखाद्यस्य रचनाकालः शकाब्दः ५८७ (ख्रिस्ताब्दः ६६५) इति लभ्यते।

अरबदेशवासिनः टोलमी (ख्रिस्ताब्दः ९५०) महोदयस्य ज्यौतिषशास्त्रविषयकग्रन्थस्य पठनादपूर्वं ब्रह्मगुप्तस्य शकाशात् ज्यौतिषशास्त्रं पठितवन्त इति अलबेरुनी (ख्रिस्ताब्दः ९५०) महाशयेन स्पष्टमुल्लिखितम्। तुरीययंन्त्राविष्कारो ब्रह्मगुप्तस्य स्वतन्त्रो वैयक्तिकस्य स्विक्रीयते। सूर्यचन्द्र-चन्द्रोच्चादि भगणादिमानं, सौरमासचान्द्रमासादिमानं वेधादिविवेकज्ञानं च प्राप्यन्ते।

अत्र २४ (चतुरविंशत्यध्यायेषु) १००८ आर्यासु अङ्कगणितं, बीजगणितं, यन्त्रज्ञानं क्षेत्रफलज्ञानं, ग्रहाणां मध्यमाधिकारो योगाद्युन्नयनं चेत्यादि विषयाः वर्णिताः।

खण्डखाद्यग्रन्थे पूर्वाधिकारे उत्तराधिकारे च सम्मिलय १४ अधिकाराः सन्ति, तत्र च १६५ आर्याछन्दोबद्धपद्यानि सन्ति। मूलसूर्यसिद्धान्तानुसारेण वर्षस्यमानं स्वीकृतं दृश्यते। एतस्मिन् ग्रन्थे वरुणस्य (शकाब्दः ९६२) भट्टोत्पलस्य (शकाब्दः ८८८) च टीकाद्वयं प्राप्यते।

**लल्लः।** ज्योतिर्विदो लल्लस्य जन्मसमयो वैक्रमाब्दः ६९५ = ख्रिस्ताब्दः ६३८ = शकाब्दः ५६० मन्यते। तस्य (१) श्रीवृद्धिदतन्त्रे ग्रहगणितविषयकं वस्तु वर्तते। (२) रन्तकोषाख्यमूलग्रन्थे मुहूर्तविषयो वर्तते स च वेधानवेषको यः, प्रथमार्यसिद्धान्तं संस्कृत्यनूतनग्रहानयनं स्थापितवान्।

**पद्मनाभः।** तस्य समयः पूर्ववर्ति-पश्चात्वर्ति ज्योतिर्विदाम् उल्लेखानुसारेण वैक्रमाब्दः ८३५ = ख्रिस्ताब्दः ७७८ = शकाब्दः ७०० अस्ति।[४३] तत्प्रणीतो ग्रन्थोऽधुना न प्राप्यते किन्तु भास्कराचार्यादीनां ग्रन्थेषु तस्य नामोल्लेखः प्राप्यते।

**श्रीधरः।** महावीरस्य सारसंग्रहे श्रीधरस्य पद्यानां निर्देशादस्य समयो वैक्रमाब्दात् ९१० =ख्रिस्ताब्दात् प्राक् ८५३ = शकाब्दात् ७७५ तः भवितुमर्हति। अङ्कगणितं क्षेत्रगणितं पाटीगणितं जातकपद्धतिश्चेति ग्रन्थचतुष्टयं तस्य नाम्ना सङ्केतितम्। एतेन स्वकीयेषुग्रन्थेषु विभिन्ना एव संज्ञाः स्तम्भोदेशः (=इष्टकर्म) गुणनं (=प्रत्युत्पन्नम्) इति स्वीकृताः।

[४३] विशेषार्थं श्रीशङ्करबालकृष्णदीक्षितस्य भारतीयज्योतिषेत्यत्र पृ. ३१४ द्रष्टव्यम्।

**महावीरः।** तस्य समयो वैक्रमाब्दः ९१० =ख्रिस्ताब्दः ८५३=शकाब्दः ७७५ वर्तते। अयं जैनधर्मावलम्बी राष्ट्रकूटवंशीयस्य जैननृपस्याऽमोघवर्षस्य राज्याश्रितः आसीत्। तस्य सारसंग्रहाख्यो ग्रन्थोऽङ्कगणितक्षेत्रगणितादि विषयवस्तु समाश्रयते।

**मनुः।** अस्य समयो वैक्रमाब्दात् ९३५ =ख्रिस्ताब्दात् ८७८ = शकाब्दात् ८०० प्राग् भवितुमर्हति यतोऽस्य बृहन्मानसकरणाख्ये ग्रन्थे भट्टोत्पलस्य (वैक्रमाब्दः १०२३ =ख्रिस्ताब्दः ९६६ = शकाब्दः ८८८) टीका प्राप्यते। अथ च अलबेरुनी (वैक्रमाब्दः ९९४-११०५ = ख्रिस्ताब्दः९३७-१०४८ शकाब्दः८५१-९७०) निर्दिशति यत् मुञ्जालेन (वैक्रमाब्दः९८९ = ख्रिस्ताब्दः ९३२ = शकाब्दः ८५४) बृहन्मानसकरणस्य लघुमानसं रचितवान्।

**बलभद्रः।** कनैज स्थाण्वीश्वरः (आधुनिकं थानेश्वर) प्रान्तनिवासी ज्यौतिषशास्त्राचार्यस्य समयो वैक्रमाब्दः ९३५ = ख्रिस्ताब्दः ८७८ =शकाब्दः ८०० विद्वद्भिः निश्चीयते यतः भट्टोत्पलेन (वैक्रमाब्दः १०२३ ) टीकाकारेण पृथूदकेन (वैक्रमाब्दः ९३५-१००७) अलबेरुनिना च (वैक्रमाब्दः ९९४-११०५) बलभद्रस्य आर्यापद्यानि, अनुष्टुप् श्लोकाश्च प्रचूरतया स्वीकृताः। यस्य ग्रन्थानां एकस्यापिप्राप्तिरधुना नास्ति।

**पृथूदकः।** अस्य अपरनाम पृथूदकस्वामी[४४] । मधुसूदनोऽस्य पिता। खण्डखाद्यस्य टीकाकारो वरुणः (वैक्रमाब्दः १०९७) पृथूदकं नाम्ना निर्दिशति। अलबेरुनी (वैक्रमाब्दः ९९४-११०५) एनं ज्योतिषग्रन्थकारः इति निर्दिशति। पृथूदकेन च बलभद्र (वैक्रमाब्दः ९३५) ब्रह्मसिद्धान्तटीकायां नैकश उद्धृतः। द्वितीयाऽर्यभट्टस्य (वैक्रमाब्दाः १०१०) ग्रन्थे पृथूदकस्य नामोल्लेखोऽपि न दृश्यते। अतः पृथूदकस्यकालो वैक्रमाब्दः ९३५-१००७ =ख्रिस्ताब्दः ८७८-९५०=शकाब्दः ८००-८७२ समयः मध्यवर्ती। द्वितीय आर्यभट्टस्य समकालीनो भवेत्।

**मुञ्जालः।** मुञ्जालभट्टो लघुमानसं विरचितवान्। स भारद्वाजीगोत्रीयो दाक्षिण्यात्यो ब्राह्मणः आसीत्। तेनैव ग्रन्थारम्भे लिखितम्।

---

[४४] श्रीशङ्करबालकृष्णदीक्षितमहोदयः स्वकीये भारतीय ज्योतिषशास्त्रेऽति ग्रन्थ (पृ. ३२३) स्वामी शब्दस्य प्रयोगात् एनं चतुर्थाश्रमी सन्यासीति मन्यते।

प्रकाशादित्यवत् ख्यातो भारद्वाजो द्विजोत्तमः।
लघुपूर्वं स्फुटोपायं वक्ष्येऽन्यल्लघुमानसम्।।

ज्यौतिषशास्त्रविषयकान् अत्यंतमहत्त्वपूर्णान् सिद्धान्तान् प्रस्थाप्य स विलक्षणोऽन्वेक्षकः चिन्तनशीलश्चेति बहुमन्यते। तस्य समयो वैक्रमाब्दः ९८९ = ख्रिस्ताब्दः ९३२= शकाब्दः ८५४ इति निश्चीयते यतोऽबेरुनी (वैक्रमाब्दः ९९४-११०५) लिखति यत् स बृहन्मानसस्य लघुमानसाख्यो ग्रन्थः विरचितवान् यत्र ६० अनुष्टुप् छन्दोबद्धाः श्लोका इति गणकतरङ्गिणीकाराणां (वैक्रमाब्दाः ९८९) वचनम्। कोलब्रूकोपि तमेव समयं स्वीकरोति। उत्तरकालवर्ती भास्कराचार्यः (वैक्रमाब्दः ११७७) मुञ्जालभट्टस्यैव अयनगति मनुसरति।

लघुमानसाख्ये ग्रन्थे (१) मध्यमः, (२) स्पष्टः (३) तिथिसाधनप्रकारः (४) त्रिप्रश्नाः (५) ग्रहयुतिः (६) सूर्यग्रहणम् (७) चन्द्रग्रहणम् (८) शृङ्गोन्नति रित्यादयोधिकाराः सन्ति।

**वित्तेश्वरः।** वित्तेश्वरः काश्मीरनिवासी भदत्त(भीदत्त)स्य पुत्र आसीत्। अलबेरुनिना (वैक्रमाब्दः ९९४-११०५ = ख्रिस्ताब्दः ९३७-१०४८ = शकाब्दः ८५१-९७०) वित्तेश्वरेतिनाम्ना[४५] उल्लेखः कृतः। अतः तस्य समयो वैक्रमाब्दः ९५६ = ख्रिस्ताब्दः ८९९= शकाब्दः ८२१ योग्य एव भवति।

**अलबिरुनी।** अर्वाचीनोझ्बेकिस्तानस्य तत्कालीनखारिझ्मराज्यस्य काथापरनाम्नां कासेत्याख्य जिलायां बेरुनगरे अबूरेहानमहम्मद इति नाम्ना जातोऽसौ अहमदस्य पुत्रः आसीत्। अलबेरुनीति नगरनिवासेत्यनाऽस्य नाम प्रतिभाति सोऽयमरबस्तानीयः। तस्य समयो वैक्रमाब्दाः ९९४-११०५ = ख्रिस्ताब्दः ९७३-१०४८ = शकाब्दाश्च ८५१-९७०[४६] प्राप्यन्ते। अयं ज्योतिर्विद् इतिहासकारश्चेति प्रसिद्धः। तस्य गुरोः मन्सूर इति। एतेन 'रे-पर्वते' वेधशाला स्थापिताऽऽसीत् । अनेन १०५४ वैक्रमाब्दस्य वैशाखीपूर्णिमायां[४७] कासनगरे जातेन चन्द्रग्रहणेन तस्य स्थलस्य रेखांशो निर्णीतः।

अलबेरुनिना विरचिते अथ-हरल-बकीयाहेति प्राचीन राष्ट्रवंशावेलीतिहास ग्रन्थे अष्टमशताब्द्यां प्राप्तानि पञ्चाङ्गानि, दशांशसङ्ख्या, खगोलनिरीक्षणानि तथा च तत्कालीन सांस्कृतिकादि वृत्तान्तानि प्राप्यन्ते। १०७९ वैक्रमाब्दे गुजरातस्य विख्यात सोमनाथज्योतिर्लिङ्गस्योपरि महम्मदगजनी

---

[४५] ज्यौतिषशास्त्र का इतिहास पृ. ३१७

[४६] गुजराती विश्वकोशे (खण्डम्-१ अ-आ), पृष्ठम्-४८७, स्तम्भः २

[४७] विशेषस्तु गुजराती विश्वकोशे २४--९९७ इति आङ्ग्ल दिनाङ्कः प्रदत्तोऽस्ति।(खण्डम्-१ अ-आ)

आक्रमणकाले अलबेरुनी गजनिना सह भारतदेशमायातः। ततश्च भारतभूमौ निवसन् संस्कृतवाङ्मया-भ्यासकर्ता प्रथमोयं मुस्लीमोजन इति प्रख्यातः। १०८१ वैक्रमाब्दे अलबेरुनी तुर्कीयैः वणिजैः सम्पर्कमाप्य उत्तरध्रुवीय प्रदेशेषु षण्मासिकदिवसस्य तावत्कालीनरात्रेश्च रहस्यमपिज्ञात्वा लिखितवान् स अरबी-तुर्की-हिब्रू-सिरियेकी-संस्कृतं चैतासा भाषाणां प्रभूत्वमधारयत्। स विधविधविषयेषु नैकान् ग्रन्थान् रचयामास तेभ्यः २७ ग्रन्थाऽवाद्य प्राप्यन्ते।[४८]

**द्वितीय आर्यभट्टः।** अलबेरुनी (वैक्रमाब्दः ९९४-११०५ =ख्रिस्ताब्दः ९३७-१०४८=शकाब्दः ८५१-९७०) निर्दिष्टोऽयं कुसुमपुरनिवासी ज्योतिर्विद्। तस्य समयो वैक्रमाब्दः १०१० =ख्रिस्ताब्दः ९५३=शकाब्दः ८७५ निश्चीयते। तस्य ग्रन्थनाम्नि लघुसिद्धान्तेऽस्मिन् १८ अध्यायाः प्रायः ६२५ आर्याः सन्ति। अत्र करणग्रन्थविषयाः गोलविषयाः पाटीगणितं भुवनकोषग्रहाणां मध्यमगतिः बीजगणितं कुटुम्बगणितम् चेत्यादिविषयाः चर्चिताः।

**कल्याणवर्मा।** अस्य समयो वराहमिहिरस्य (वैकमाब्दः २३ = ख्रिस्ताब्दः ३४ पूर्वे = शकाब्दः १२२ पूर्वे[४९]) पश्चातवर्ती भट्टोपला (वैक्रमाब्दः १०२३ = ख्रिस्ताब्दः ९६६ = शकाब्दः ८८८) च प्राक् प्राप्यते। अयं गुराजप्रान्तस्य पाटणनगर समीपवर्तिव्याघ्रपल्लीश्वर (व्याघ्रपदीश्वर) निवासी। अनेन सारावली इत्याख्यो ग्रन्थो रचितोयत्र २५०० आर्या छन्दोबद्धाः श्लोकाः प्राप्यन्ते तत्र ५५ प्रकरणेषु राशिभेदो ग्रहगुणोयोगकारकोऽरिष्ट विचारो द्विग्रहयुतिस्त्रिग्रह युतिः पञ्चग्रहयुतिः प्रवज्यायोगोनाभस-योगश्चेत्यादि विषया वर्णिताः सन्ति।

**भट्टोत्तपलः।** प्रायः काश्मीरनिवासी ज्योतिषशास्त्रस्योऽयं प्रकाण्डः पण्डितः। स प्राचीन ज्योतिष-ग्रन्थानां सिद्धान्तान् स्वलिखितासु टीकासु पूर्णतया उद्धतवान्। वराहमिहिरविरचित बृहज्जातकग्रन्थस्य टीकायां वस्वष्टाष्टति (८८८) निर्देशेनाऽस्य समयो वैक्रमाब्दः १०२३ =ख्रिस्ताब्दः ९६६ = शकाब्दः ८८८ स्वीक्रियते। एतेन गणितस्कन्धः २. प्रश्नग्रन्थः, ३. राहुन्नाकरणम्, ४. कर्णपातश्च स्वतन्त्रगन्थाः, ५. बृहज्जातकटीका, ६. यात्राटीका, ७. लघुजातकटीका, ८. बृहत्संहिताटीका, ९. बृहन्मानसटीका, १०. षट्पञ्चाशिकाटीका च विरचिताः।

---

[४८] विशेषसर्थं गुजराती विश्वकोशे पृ. द्रष्टव्यम्।

[४९] ज्योतिशास्त्रेतिहासकाराणां शङ्करबालकृष्णदीक्षितानां निश्चितसमयानुसारेणाऽयं समयः प्रदत्तः।

## प्रथमा दृष्टिः।

**विजयनन्दी।** अस्यकालः प्रायो वैक्रमाब्दः १०२३ =ख्रिस्ताब्दः ९६६=शकाब्दः ८८८ मन्यते। अयं काशीनिवासी ज्योतिर्विद्। अस्य करणतिलकाख्येग्रन्थे अहर्गणं, मध्यमग्रहसाधनं, रविचन्द्रबिम्ब–साधनम्, महापातगणितम् च इत्यादि विषयाः सन्ति।

**भानुभट्टः।** अस्याऽपरनाम भानुयशो वा भानुरजो वा भवेत्। वरुणः (वैक्रमाब्दः १०९७ =ख्रिस्ताब्दः १०४०=शकाब्दः ९६२) स्वटीकायां भानुभट्टस्य उद्धरणानि ददाति। अतोऽस्य समयः प्रायो वैक्रमाब्दः १०३५ =ख्रिस्ताब्दः ९७८=शकाब्दः ९०० मन्यते। अधुनाऽस्य ग्रन्थो न प्राप्यते।

**श्रीपतिः।** अयं ज्योतिर्विद् कश्पगोत्रोत्पन्नः केशवपौत्रो नागदेवसूनुश्चेति। अस्य समयो वैक्रमाब्दः १०९६ =ख्रिस्ताब्दः १०३९=शकाब्दः ९६१ इति रत्नमालाटीकाकारेण महादेवेन लिखितं वर्तते। एतेन सिद्धान्तशेखरे धीकोटिदकरणं रत्नमाला, जातकपद्धतिः रत्नासारश्चेति ग्रन्थाः रचिताः।

**वरुणः।** अस्य समयो वैक्रमाब्दः १०९७ =ख्रिस्ताब्दः १०४०=शकाब्दः ९६२। अयं काश्मीरप्रान्ते उरुषाजिलायाः चोरेय्याटसरीखेग्रामवासी। अस्य च एतेन ब्रह्मगुप्त विरचित खण्डखाद्यग्रन्थस्य टीका रचितेति प्राप्यते।

**श्रीभोजः। (राजमृगाङ्कः)** अस्य समयो वैक्रमाब्दः१०९९ =ख्रिस्ताब्दः १०४२=शकाब्दः ९६४। केचन विद्वांसः एवं भोजराजः एते कथयन्ति किन्तु धारानरेशस्य भोजराजस्य समयः ख्रिस्ताब्दः १०००–१०५५ सर्वस्वीकृतः। राजमृगाङ्के प्राप्तानि पद्यानि ब्रह्मगुप्तस्य (वैक्रमाब्दः ६५५ =ख्रिस्ताब्दः ५९८=शकाब्दः ५२०) ब्रह्मसिद्धान्तग्रन्थाद् उद्धृतानि अस्य च राजमृगाङ्कस्य कतिचिद् पद्यानि महादेवीसारण्यां (वैक्रमाब्दः १३७३ =ख्रिस्ताब्दः १३१६=शकाब्दः १२३८) प्राप्यन्ते। अतः श्रीभोजस्य भोजराज इति न युक्तम्।

**भोजराजः।** सम्भवतः प्रमारवंशीयोऽयमिति ज्ञायते। अस्य समयो वैक्रमाब्दः १०९९ =ख्रिस्ताब्दः १०४२=शकाब्दः ९६४ इत्यनुमीयते। यतोऽनेन रचित ग्रन्थस्योल्लेखो महादेव (शकाब्दः ११८५) कृतटीकायां प्राप्यते। अस्य ग्रन्थस्तु न प्राप्यते।

## प्रथमा दृष्टिः।

**राजादशबलः। (कमलाकरमार्तण्डः)** अस्य समयो वैक्रमाब्दः ११९५ =ख्रिस्ताब्दः १०५८=शकाब्दः ९८०। वल्लभवंशीयो विरोचनसूत आसीत्। अस्य ग्रन्थनाम कमलाकरमार्तण्ड इति। तत्र मध्यमाधिकारः स्पष्टाधिकारस्त्रिप्रश्नाधिकारश्चन्द्रग्रहणमित्यादि विषया वर्णिताः सन्ति।

**महेश्वरः।** शाण्डिल्यगोत्रोत्पन्नोऽयं मनोरथस्य पुत्रः प्रभाकरस्य पौत्रो गोविन्दस्य च प्रपौत्रः ज्योतिर्विदामग्रगण्यस्य भास्कराचार्यस्य पिता। अस्य समयः प्रायो वैक्रमाब्दः ११३५ =ख्रिस्ताब्दः १०७८=शकाब्दः १००० मन्यते। अनेन शेखराख्यकरणग्रन्थः, लघुजातकटीका, प्रतिष्ठादीपकश्चेति ग्रन्था रचिताः। तेषां रचनाकालस्य वैक्रमाब्दः ११६५-११७५ =ख्रिस्ताब्दः ११०८-१११८=शकाब्दः १०३० तः १०४० निश्चीयते।

**ब्रह्मदेवः।** मथुरानिवासी चन्द्रनामकपितुः पुत्रः। अयं करणप्रकाशः इति ग्रन्थस्य रचयिता। अस्य समयो वैक्रमाब्दः ११४८=ख्रिस्ताब्दः १०९१=शकाब्दः १०१४ मन्यते। अस्मिन् ग्रन्थे मध्यमाधिकारः, स्पष्टाधिकारः पञ्चतारास्पष्टाधिकारः चन्द्रग्रहणम्, सूर्यग्रहणम्, उदयास्तविचारः, शृङ्गोन्नतिः, ग्रहयुत्यधिकारः, एते ग्रहयुत्य विषयाः वर्णिताः सन्ति।

ग्रहलाघवकारेण ग्रहाणां आर्यपक्षानुसारेण स्वीकृताः सिद्धान्ताः करणप्रकाशदेव गृहीता इति सर्वसम्मतम्।

**शतानन्दः।** अस्य ज्योतिर्विदः समयो वैक्रमाब्दः ११५६ =ख्रिस्ताब्दः १०९९=शकाब्दः १०२१ अस्ति। जगन्नाथपुरी वास्तव्योऽयं वैष्णव आसीत्। अस्य ग्रन्थस्य नाम भास्वतीकरणम्। अस्य अष्टाधिकारेषु षष्टिश्लोका यत्र तिथिग्रहध्रुवा त्रिप्रश्नाः, सूर्यग्रहणं, चन्द्रग्रहणं चेत्यादि विषयाः वर्णिताः सन्ति। अत्र मध्यमग्रहसाधनं वर्षगणमानेन स्थापितम्। यत्र क्षेपकस्य ग्रहगतेश्च गुणनभाजनसंस्कारः शतांशपद्धत्यां दशितः। एतद् ग्रन्थोपरि माधवस्य (वैक्रमाब्दाः १५७६ =ख्रिस्ताब्दाः १५१९=शकाब्दाः १४४२) अनिरुद्धस्य (वैक्रमाब्दाः १५५२ =ख्रिस्ताब्दाः १४९५=शकाब्दाः १४१७) टीकाद्वयं प्राप्यते।

## प्रथमा दृष्टिः।

**अज्ञातकर्तृकः करणोत्तमो ग्रन्थः।** अस्य ग्रन्थस्य रचनाकालो वैक्रमाब्दात् ११७३ (=ख्रिस्ताब्दात् १०८५=शकाब्दात् १०३८) पूर्वीयो मन्यते यतोऽस्य नामोल्लेखो रत्नमालायाः महादेवकृतटीकायां प्राप्यते (महादेवस्य समयो वैक्रमाब्दः १३२० निश्चितोऽस्ति।)

**भास्कराचार्यः।** ज्योतिर्विदां मूर्धन्यस्य शाण्डिल्यगोत्रोत्पन्नस्य ज्योतिर्विदो भास्कराचार्यस्य समयो वैक्रमाब्दः ११७७ =ख्रिस्ताब्दः १११४=शकाब्दः १०३६ प्रसिद्धोऽस्ति। अयं सह्याद्रिसमीपस्थ विज्जड्विडीति ग्रामनिवासी। अस्य पिता महेश्वरोऽपि (गतक्रमाङ्कः२८) महान् ज्योतिर्विदासीत्। भास्कराचार्यस्य पौत्रः चङ्गदेव इति ख्यातोऽस्य परिचयः खानदेशस्य पारणग्रामे प्राप्तशिलालेखानुसारं प्रायो द्वादशशताब्दी प्राप्यते।

लीलावतीनाम्नाप्रसिद्धो ग्रन्थो (२७८ पद्यानि) भास्कराचार्यस्य वैक्रमाब्दे १२०७ (ख्रिस्ताब्दे ११५०=शकाब्दे १०७२) लिखितस्य सिद्धान्तशिरोमणिरित्यस्य महाग्रन्थस्य प्रथमखण्डोऽस्ति यश्चाध्यायोऽपि कथ्यते। तत्राऽन्ये त्रयोऽध्यायाः खण्डा वा प्राप्यन्ते। अस्मिन् ग्रन्थे परिक्रमाष्टकं, पूर्णाङ्कयोगाः, ऋणफलपद्धतिः, पूर्णापूर्णाङ्करूपं, वर्गतन्मूलं, घनतन्मूलानि परार्धादि संख्यानामानि। अहर्गणसाधनम्, मध्यमाधिकारः स्पष्टाधिकारः बीजगणितस्य, धनार्णयोगाः विविधानिसमीकरणानि कुट्टकगणितम्, गणिताध्यायो गोलाध्यायश्चेति विषयाणां चर्चा विद्यते। यद्यपि सिद्धान्तशिरोमणौ ब्रह्मगुप्तसिद्धान्तविविधनामानि, राजमृगाङ्काश्च बीजसंस्काराः गृहीतास्तथापि इष्टदिगादि छायासाधनं स्वतन्त्रमेवभाति।

अस्य ग्रन्थस्य वासनाभाष्यमिति स्वोपज्ञटीका ततश्च सूर्यदासस्य (वैक्रमाब्दः १५९८ =ख्रिस्ताब्दः १५४१=शकाब्दः १४६३) रङ्गनाथस्य (वैक्रमाब्दः १७१५ =ख्रिस्ताब्दः १६५८=शकाब्दः १५८०) मितभाषिणीत्येकेत्याद्या नैकटीकाग्रन्थाः वर्तन्ते। भास्कराचार्येण करणकुतूहलम् इति ग्रन्थो वैक्रमाब्दे १२४०(ख्रिस्ताब्दे ११८३ =शकाब्दे ११०५) विरचितो यत्र दशाध्यायेषु १३९ पद्यानि सन्ति। अस्मिन् ग्रन्थे मध्यमाधिकारः, स्पष्टाधिकारः, त्रिप्रश्नाधिकारः, सूर्यग्रहणं, चन्द्रग्रहणं, उदयास्तविचारः, शृङ्गान्नतिश्चेत्यादि विषयाः प्राप्यन्ते।

**सोमेश्वरस्तृतीयः।** उत्तरचालुक्यवंशीयस्याऽस्य भूलोकमल्लः सर्वज्ञभूपालश्चेति नामद्वयं इतिहासे प्रसिद्धम्। तस्य समयो वैक्रमाब्दः ११८८ =ख्रिस्ताब्दः ११२९=शकाब्दः १०५१ प्राप्यते।

अस्यैवग्रन्थो मानसोल्लासोऽभिलषितार्थचिन्तामणिरिति नामाभ्यां प्रचलितः। अस्मिन् ग्रन्थे प्रतिपादितविषयेषु ज्यौतिषशास्त्रविषयकोल्लेखोऽपि प्राप्यते। यत्राऽहर्गणविषयो महत्त्वपूर्णो वर्तते।

**अनन्तदेवः।** अयं ज्योतिर्विदभास्कराचार्यस्य वंशज इति ज्ञायते। बहालग्रामनिवासितोऽस्य समयो वैक्रमाब्दः १२७९ =ख्रिस्ताब्दः १२२२=शकाब्दः ११४४ निश्चीयते। अनेन ब्रह्मगुप्तसिद्धान्तस्य छन्दश्चित्युत्तर नामकस्य विंशतितमाध्यायस्य उपरि बृहज्जातकस्य चोपरि टीकाद्वयं लिखितम्।

**केशवः।** गुजरातराज्यस्य नर्मदातटे विराजमानस्य भृगुकच्छप्रदेशस्य(भरुचः) निवासी भारद्वाजगोत्रोत्पन्नो ज्योतिर्विद् यस्य प्रपितामहो जनार्दनः पितामहः श्रियादित्य पिता च रणग इति प्रसिद्धः। अस्य समयो वैक्रमाब्दः १३०४ =ख्रिस्ताब्दः १२४३=शकाब्दः ११६५ इति ज्ञायते।

औदिच्यज्ञाति यस्याऽस्य ग्रन्थो विवाहवृन्दावनो नाम अस्य ग्रन्थस्योपरि ग्रहलाघवकारस्य गणेशदैवज्ञस्य टीका वर्तते। अपरं च पीताम्बरकृत निर्णयामृतटीकायामस्य ग्रन्थस्य उल्लेखः प्राप्यते।

**वाविलालः।** तैलङ्गणदेशीयस्याऽस्य समयः वैक्रमाब्दः १३५५ =ख्रिस्ताब्दः १२९८=शकाब्दः १२२० इत्यनुमीयते यतोऽस्य ग्रन्थो न प्राप्यते किन्तु तस्य करणग्रन्थगतक्षेपकस्याऽनुसारेण वर्तमानेऽपि काले तैलङ्गणे सिद्धान्तचान्द्रपञ्चाङ्गग्रन्थाः रच्यन्ते।

**महादेवः।** अस्य ज्योतिर्विदः समयो वैक्रमाब्दः १३७३ =ख्रिस्ताब्दः १३१६=शकाब्दः १२३८ आसीत्। गोदावरीसमीपस्थ रासिनग्रामनिवासीनोऽस्य गौतमगोत्रोत्पन्नस्य पितामहः माधवः पिता च पद्मनाभ ब्राह्मणज्ञातीयोऽस्य संभवतः गुजरातप्रान्तीयो यतोऽनेन स्वकीयायां महादेवसारण्यां ग्रहसिद्धौ वा ४ १/२ पलभामानं[५०] स्वीकृतं वर्तते। अनेनैव ज्योतिर्विदो चक्रधरेण विरचितायाः ग्रहसिद्धिरीत्याख्याः अपूर्णरचनायापूर्णता कृता। अस्मिन् ग्रन्थे ४३ पद्यानि सन्ति। मध्यमस्पष्टग्रहानयनप्रकारः पठ्यते।

**श्रीमन्त्रेश्वरः।** अयं नम्बुद्री ब्राह्मणो दक्षिणभारतस्य तमिलप्रन्तस्य शालवीटीग्रामनिवासी आसीत।अस्य कलो विक्रमस्य खिस्ताब्दस्य च चतुर्दश-षोडशशतके=शकस्य त्रयोदश-पञ्चदशतके

---

[५०] सामान्यतः ४.१/२ तः ०५ पर्यन्तं पलभामानं गुर्जरराज्यस्यसूर्यपुरनगरस्य(सूरत) समीपवर्तिनः प्रदेशस्य गृह्यते विशेषस्तु गणेशदैवज्ञस्य ग्रहलाघवपुस्तके पृ.२५८ दृष्टव्यम्।

प्राप्यते। अनेन फलदीपिका नामकहोरा ग्रन्थस्य रचनाकृता। अत्र सप्तविसत्यध्यायेषु राशिभेदग्रहभेदग्रहाणां षड्बलादि विषया चर्चिताः सन्ति।

**महादेवः।** अयं कौण्डिन्यगोत्रोत्पन्नस्य वैयाकरणमूर्धन्यस्य बोपदेवस्य पुत्र आसीत्। तस्य समयो वैक्रमाब्दः १४४२ =ख्रिस्ताब्दः १३६४=शकाब्दः १२८६ निश्चितोऽस्ति। महादेवः गोदातीरवासी त्र्यम्बकनृपतेः आश्रितः पण्डितः आसीत्। अनेन कामधेनुरीति नाम ज्यौतिर्विषयको ग्रन्थो रचितस्तत्र पञ्चत्रिंशच्छ्लोकाः कतिचित् सराण्यश्च प्राप्यन्ते।

**नार्मदः (नर्मदादेवः)।** नार्मदः अस्याऽपरनाम नर्मदादेव[५१] इत्यपि प्राप्यते। अस्यैव पुत्रः पद्मनाभः पौत्रश्च दामोदरो यस्य भटतुल्य नामको ग्रन्थः प्रसिद्धोऽस्ति। नार्मदस्य समयो वैक्रमाब्दः १४३५ =ख्रिस्ताब्दः १३७८=शकाब्दः १३०० आसीत्। अनेन सूर्यसिद्धान्तस्य टीका लिखितेति ज्ञायते।

**पद्मनाभः।** अयं नार्मदस्य (वैक्रमाब्दः १४३५) पुत्रः। अस्य च पुत्रो दामोदराभिधः। अस्य समयो वैक्रमाब्दः १४५५ =ख्रिस्ताब्दः १३९८=शकाब्दः १३२० निश्चीयते। अनेन यन्त्ररत्नावली-नामक ग्रन्थो विरचितो यत्र ध्रुवभ्रमयन्त्रस्य वर्णनं वर्तते। तत्र एकत्रिंशत् श्लोकेषु मुख्यतया सायनलग्नपद्धति कालज्ञानं च निर्णीते[५२]।

**दामोदरः।** अयं पद्मनाभस्य (वैक्रमाब्दः १४५५) पुत्रः नार्मदस्य (वैक्रमाब्दः १४३५) च पौत्र आसीत्। अतोऽस्य वैक्रमाब्दः १४७४ =ख्रिस्ताब्दः १४१७=शकाब्दः १३३९ आसीत्। अनेन भटतुल्यनामकग्रन्थः विरचितः। अस्मिन् ग्रन्थे ४०० पद्येषु मध्यमाधिकारः, स्पष्टाधिकारः, भौमादिपञ्चतारकाधिकारः चन्द्रग्रहणमित्यादि विषयाः विद्यन्ते।

---

[५१] श्रीनर्मदादेवसुतस्य मत्पितुः
श्रीपद्मनाभस्य समस्य भावतः।
यस्मात् सुसम्पन्नमनुग्रहाद्गुरो-
र्भूयादिहैतत् पठनात् पदं श्रियः।। १६।। (भटतुल्यग्रन्थस्य उपसंहारः)

[५२] विशेषस्तु श्रीशंकरबालकृष्णदीक्षित विरचितो भारतीय ज्योतिषशास्त्रेतिहासे (पृ. ४५७) दृष्टव्यम्।

## प्रथमा दृष्टिः।

**गङ्गाधरः।** जामदग्न्यगोत्रीयस्य चन्द्रभट्टस्य पुत्रो भट्टाचार्यस्य पौत्रो विठ्ठलस्य च प्रपौत्रः, तस्य श्रीशैलस्य पश्चिमे कृष्णवेणी भीरथ्योः अन्तरालस्थिते सगरनामक नगरस्य निवासमासीत्। अस्य समयो वैक्रमाब्दः १४९१ =ख्रिस्ताब्दः १४३४=शकाब्दः १३५६ इति निश्चीयते। अनेन सूर्यसिद्धान्तानुसारी चन्द्रमानाख्यो ग्रन्थो रचिताः। तत्र २०० पद्यानि सन्ति। अस्य वंशजेन चन्द्रलपुत्रेण विश्वनाथेन चन्द्रमानाख्यग्रन्थस्योपरि सुबोध पद्यानि लिखितानीति ज्ञायते।

**मकरन्दः।** अस्य रचनाकालो वैक्रमाब्दः १५३५ =ख्रिस्ताब्दः १४७८=शकाब्दः १४०० मन्यते। अस्य ग्रन्थस्य टीकाद्वयं प्राप्यते। दिवाकरेण वैक्रमाब्दे १७७५ =ख्रिस्ताब्दे १६१८=शकाब्दे १५४० मकरन्दविवरणाख्याटीका लिखिता। गोकुलदैवज्ञेन वैक्रमाब्दे १८२३ =ख्रिस्ताब्दे १७६६=शकाब्दे १६८८ च मकरग्रन्थस्य सारणिनां उत्पत्तयो रचिताः।

**केशवोद्वितीयः।** अयं कौशीयगोत्रीयोऽस्यपिता कमलकरो गुरुवैजनाथश्चेति। अस्य समयो वैक्रमाब्दः १५५३ =ख्रिस्ताब्दः १४९६=शकाब्दः १४१८ ज्ञायते। अयं कोकणान्तर्गत (नांदगावस्य सम्प्रति नंदिगावस्य) निवासी कथ्यते। अनेन ग्रहकौतुके जातकपद्धतिः ताजिकपद्धत्यपरनामकेशवपद्धतिः मुहूर्ततत्त्वं चेति ग्रन्था रचिता।

**गणेशदैवज्ञः।** अयं कौशीकगोत्रीयस्य केशवद्वितीयस्य लक्ष्मीरिति मातुश्चपुत्रः। अयं अपि नन्दिग्रामनिवासी। अस्य समयो वैक्रमाब्दः १५५५ =ख्रिस्ताब्दः १४९८=शकाब्दः १४२० इति प्राप्यते। अनेन ग्रहलाघवं, लघुतिथिः, चिन्तामणिः, बृहत्तितिथिचिन्तामणिः, श्राद्धनिर्णयः, तर्जनीयन्त्रं, कृष्णाष्टमीनिर्णयः, होलिकानिर्णयश्चेति ग्रन्थाः सिद्धान्तशिरोमणिटीका, लीलावतीटीक। विवाह–वृन्दावनटीका, मुहूर्ततत्त्वटीका छन्दर्णटीकाश्चेति विरचिताः।

अस्य ग्रन्थेषु विषयाणां वैविध्यं दृश्यते तद्यथा मध्यमाधिकारः, स्पष्टाधिकारः, पञ्चताराधिकारः त्रिप्रश्नाधिकारः, चन्द्रग्रहणं, सूर्यग्रहणं, मासग्रहणं, उदयास्तश्चेत्यादि प्राप्यन्ते। अद्यावधि नैकप्रान्तेषु गणेशदैवज्ञस्य भारतस्य करणसम्बन्धिसिद्धान्ताः स्वीकृताः सन्ति।

**लक्ष्मीदासः।** उपमन्युगोत्रोत्पन्नोऽयं केशवदासस्य पौत्रो वाचस्पतिमिश्रस्य पुत्र इति प्राप्यते। अस्य समयो वैक्रमाब्दः १५५५ =ख्रिस्ताब्दः १४९८=शकाब्दः १४२० ज्ञायते। अनेन भास्कराचार्यविरचित

## प्रथमा दृष्टिः।

सिद्धान्तशिरोमणिग्रन्थस्य गणिताध्यायगोलाध्यायोपरि गणिततत्त्वचिन्तामणिरिति नाम्निटीका यत्र ८५०० ग्रन्थसंख्या वर्तन्ते।

**कृपारामः।** अस्य समयो वैक्रमाब्दात् १५५५ =ख्रिस्ताब्दात् १४९८=शकाब्दात् १४२० (अर्वाचीनो) परवर्तिनी निश्चीयते। अनेन वास्तुचन्द्रिकेत्याख्यो ग्रन्थो रचितः। अनेन सर्वार्थचिन्तामणिरिति पञ्चपक्षी इति मुहूर्ततत्वमिति ग्रन्थानां टीका: रचिता:।

**रामचन्द्रः।** अस्य समयो वैक्रमाब्दात् १६१७ =ख्रिस्ताब्दात् १५६०=शकाब्दात् १४८२ पूर्वीय इति ज्ञायते। यतोऽस्य नामोल्लेखोऽन्नतदुर्गेण करणकुतूहलस्य टीकायां प्राप्यते। अनेन कल्पद्रुमकरणग्रन्थो रचितः।

**ज्ञानराजः।** भारद्वाजगोत्रीयोऽयं नृसिंहस्य पौत्रो नागनाथस्य च पुत्रः। अयं गोदावर्या उत्तरतीरस्थ पार्थपुरमित्याख्य ग्रामनिवासी। अस्य समयो वैक्रमाब्द: १५६० =ख्रिस्ताब्द: १५०३=शकाब्द: १४२५ प्राप्यते।

अनेन सिद्धान्तसुन्दर इत्याख्यग्रन्थो विरचिता। तत्र गणिताध्यायः, मध्यमाधिकारः, स्पष्टाधिकारः, त्रिप्रश्नाधिकार इत्यादिविषया एकादशेष्वधिकारेषु वर्णिता: सन्ति।

**सूर्यदासः।** सूर्येत्यपरनामाऽयं भारद्वाजगोत्रोत्पन्नो नृसिंहस्य प्रपौत्रो नागनाथस्य पौत्रो ज्ञानराजस्य पुत्र इति प्रथितः। अस्य समयो वैक्रमाब्द: १५६५ =ख्रिस्ताब्द: १५०८=शकाब्द: १४३० प्राप्यते।

अनेन सूर्यप्रकाशः, सिद्धान्तसारसमुच्चयः, श्रीपतिगणितं, बीजगणितं, ताजिकालङ्कारः, काव्यद्वयं (काव्याष्टकं वा)चेति ग्रन्था: रचिता: सन्ति। बोधसुधाकर इति चाध्यात्मिकविषयको ग्रन्थोऽपि रचित इति ज्ञायते। अनेन भास्कराचार्यस्य लीलावती सिद्धान्तशिरोमणिग्रन्थद्वयोपरि टीका विरचिता।

**अनन्तः।** अयं श्रीकान्तस्य पुत्रः। अस्य समयो वैक्रमाब्द: १५८२ =ख्रिस्ताब्द: १५२५=शकाब्द: १४४७ प्राप्यते। अनेन अनन्तसुधारसनामक पञ्चाङ्गसारणिगणितग्रन्थो रचितः। अस्योपरि ढुण्ढीराजस्य सुधारसकरणचषकाख्याटीका प्राप्यते।

## प्रथमा दृष्टिः।

**ढुण्ढीराजः।** भारद्वाजगोत्रोत्पन्नोऽयं नीलकण्ठस्य प्रपौत्रोनागनाथस्य पौत्र नृसिंहस्यपुत्र इति प्राप्यते। अयं गोदावर्या उत्तरतीरस्थ पार्थपुरमित्याख्यग्रामनिवासी। अस्य समयो वैक्रमाब्दः १५८२ =ख्रिस्ताब्दः १५२५=शकाब्दः १४४७ प्राप्यते।

अनेन जातकाभरणं, ग्रहलाघवोदाहरणं, ग्रहफलोत्पत्तिः, पञ्चाङ्गफलं, कुण्डकल्पलता चेति ग्रन्था विरचिताः। अनन्तकृत (वैक्रमाब्दः १४४७) सुधाकरकरणग्रन्थस्य सुधारसचषकटीकाऽपि लिखितेति ज्ञायते।

**नृसिंहः।** कौशीकगोत्रोत्पन्नस्याऽस्य केशवस्य पौत्रो रामस्यपुत्रः गणेशदैवज्ञस्य च भ्रातुव्य आसीत्। अस्य जन्मसमयो वैक्रमाब्दः १६०५ =ख्रिस्ताब्दः १५४८=शकाब्दः १४७० प्राप्यते। अनेन मध्यमग्रहसिद्धिरितिनामको ग्रन्थो विरचितः।

**अनन्तः।** गार्ग्यगोत्रोत्पन्नोऽयं चिन्तामणेः पुत्रः। अस्य समयो वैक्रमाब्दः १६१५ =ख्रिस्ताब्दः १५५८=शकाब्दः १४८० प्राप्यते। बोपदेवात्मज-महादेवेन (वैक्रमाब्दः १४४२) विरचितस्य ग्रन्थस्योपरि टिका लिखिता।

**रघुनाथः।** अस्य समयो वैक्रमाब्दः १६२० =ख्रिस्ताब्दः १५६२=शकाब्दः १४८४ प्राप्यते। अनेन ब्रह्मसिद्धान्तानुसारं सुबोधमञ्जरीत्याख्यो ग्रन्थो विरचितो यत्र ग्रहसाधनमहर्गणेन कथितम्।

**रघुनाथः।** सोमभटात्मजस्य रघुनाथस्याऽस्य समयो वैक्रमाब्दः १६२३ =ख्रिस्ताब्दः १५६५=शकाब्दः १४८७ इति ज्ञायते। अनेन मणिप्रदीपनामको ग्रन्थो रचितः।

**दिनकरः।** कौशीकगोत्रोत्पन्नोऽयं मोढब्राह्मणज्ञातियः ऊन्दाक्षपुत्रः गुर्जरराज्ये साभ्रमतीतटसमीप-वर्तिनि बारेजाख्येग्रामे वसति स्म। अस्य समयो वैक्रमाब्दः १६३५ =ख्रिस्ताब्दः १५७८=शकाब्दः १५०० ज्ञायते।

अनेन विरचिते लघुखेटकसिद्धिरितिचन्द्रार्कीति ग्रन्थद्वये स्वपरिचयः प्रदत्तो वर्तते। यत्र गुर्जरराज्यान्तर्गतस्य खेटकस्य (आधुनिक खेडा) क्षेपक इति परिगणितः।

## प्रथमा दृष्टिः।

**नृसिंहः।** तैत्तिरीयशाखाध्यायी भारद्वाजगोत्रोत्पन्नोऽयं महाराष्ट्रीयो विदर्भसमीपस्थ गोलेतिग्रामनिवासी आसीत्। अयं भट्टाचार्यस्य प्रपौत्रो दिवाकरस्य पौत्रो विष्णाज्ज्येष्ठभ्रातुः कृष्णस्य च पुत्रः आसीत्। अस्य समयो वैक्रमाब्दः १६४३ =ख्रिस्ताब्दः १५८६=शकाब्दः १५०८ इति निश्चीयते। अस्य सूर्यसिद्धान्तस्य सौरभाष्यटीका सिद्धान्तशिरोमणेः वासनावार्तिकेति टीके प्राप्येते।

**शिवः।** तैत्तिरीयशाखाध्यायी भारद्वाजगोत्रोत्पन्नोऽयं महाराष्ट्रीयो विदर्भसमीपस्थ गोलेति ग्रामनिवासी आसीत्। अयं भट्टाचार्यस्य प्रपौत्रो दिवाकरस्य पौत्रः कृष्णस्य च कनिष्ठः पुत्रः। अस्य जन्मसमयो वैक्रमाब्दः १६४५ =ख्रिस्ताब्दः १५८४=शकाब्दः १५१० प्राप्यते। अनेन मुहूर्तचूडामणिरीत्याख्यो ग्रन्थो रचितः।

**श्रीनाथः।** अयं रामस्य पुत्रः। अस्य समयो वैक्रमाब्दः १६४६ =ख्रिस्ताब्दः १५८९=शकाब्दः १५१२ ज्ञायते। अनेनाऽध्यायद्वयात्मके ग्रहचिन्तामणिरीत्याख्यः करणग्रन्थो विरचितः।

**रामभट्टः।** गार्ग्यगोत्रोत्पन्नास्याऽस्य पितामह चिन्तामणिः पिताऽनन्तो जननी च पद्मेति प्राप्यते। अस्य समयो वैक्रमाब्दः १६४७ =ख्रिस्ताब्दः १५९०=शकाब्दः १५१२ इति निश्चीयते।

अनेन रामविनोद इति ग्रन्थो रचितो यत्र एकादशाऽधिकाराः २८० पद्यानि सन्ति। अस्य सहायको ग्रन्थोऽपि विरचितो यस्याऽऽधारं गृहीत्वा पञ्चाङ्गरचना क्रियते। रामदैवज्ञ(वैक्रमाब्दः) मुहूर्तचिन्तामणिग्रन्थोपरि रामभट्टस्य प्रतिमाक्षरीति टीका प्राप्यते।

**कृष्णः।** अयं देवरातगोत्रोत्पन्नो यजुर्वेदीयः त्रिमल्लस्य पौत्रो वल्लालस्य गोज्याश्च पुत्र इति ज्ञायते। अयं विदर्भदेशान्तर्गते पयोष्णीतटसमीपस्थे दधिग्रामेन्यवसत्। अस्य समयः वैक्रमाब्दः १६५५ =ख्रिस्ताब्दः १५९८=शकाब्दः १५२० ज्ञायते।

अनेन भास्कराचार्यस्य (वैक्रमाब्दः११७७) बीजगणितमित्यस्योपरि बीजनवाङ्कुरमित्याख्याटीका विरचिता श्रीपति (वैक्रमाब्दः१०३५) जातकपद्धतिरीत्याख्यग्रन्थस्योपरि सोदाहरणटीकाऽपि विरचिता।

**मल्लारिः।** तैत्तिरीयशाखाध्यायी भारद्वाजगोत्रोत्पन्नोऽयं महाराष्ट्रीयो विदर्भसमीस्थ गोलेतिग्रामनिवासी आसीत्। अयं विष्णोर्लघुभ्राता। अस्य समयः वैक्रमाब्दः १६५९ =ख्रिस्ताब्दः १६०२=शकाब्दः १५२४ ज्ञायते। अनेन गणेशदैवज्ञस्य ग्रहलाघवोपरि सोदाहरणीटीका विरचिता।

## प्रथमा दृष्टिः।

**रङ्गनाथः।** अयं तैत्तिरीयशाखाध्यायी भारद्वाजगोत्रीयमहाराष्ट्रीयो विदर्भसमीस्थ गोलेतिग्रामनिवासी। अयं दिवाकरस्य प्रपौत्रः कृष्णस्य पौत्रो नृसिंहस्य च पुत्रः। अस्य जन्मकालो वैक्रमाब्दः १६५९ =ख्रिस्ताब्दः १६०२=शकाब्दः १५२४ इति ज्ञायते।

अनेन विरचिते सिद्धान्तचूडामणिरितिग्रन्थे द्वादशाधिकाराः ४०० पद्यानि च सन्ति। भास्कराचार्यकृत सिद्धान्तशिरोमणेरुपरि मितभाषिणीटीका रचिता।

**रङ्गनाथः।** देवरातगोत्रोत्पन्नो यजुर्वेदीयः श्रीत्रिमल्लस्य पौत्रो वल्लालस्य गोज्याश्च पुत्रः कृष्णस्य च लघुभ्राता। अस्य समयः वैक्रमाब्दः १६६० =ख्रिस्ताब्दः १६०३=शकाब्दः १५२५ इति प्राप्यते। अनेन सूर्यसिद्धान्तस्य गूढार्थप्रकाशेति टीका रचिता।

**मुनीश्वरः।** देवरातगोत्रोत्पन्नोऽयं त्रिमल्लस्य प्रपौत्रो वल्लालस्य पौत्रो रङ्गनाथस्य पुत्रः कृष्णस्य च भ्रातृव्यः। स्वपितृव्यस्य गोविन्दस्य पुत्रो नारायणोऽस्य गुरुरासीत्। अस्य जन्मकालः वैक्रमाब्दः १६६० =ख्रिस्ताब्दः १६०३=शकाब्दः १५२५ इति प्राप्यते।

अनेन सिद्धान्तसार्वभौम इति स्वतन्त्रो ग्रन्थो विरचितः। भास्कराचार्यकृत लीलावती ग्रन्थस्योपरि निसृष्टार्थदूती लीलावतीविवृती च रचिते। भास्कराचार्यकृत सिद्धान्तशिरोमणेः गणिताध्यायस्य गोलाध्यायस्य चोपरि मरीचीरित्याख्या टीका रचिता।

**दिवाकरः।** तैत्तिरीयशाखाध्यायी भारद्वाजगोत्रोत्पन्नोऽयं महाराष्ट्रीयो विदर्भसमीस्थ गोलेतिग्राम-निवासी। अयं दिवाकरस्य प्रपौत्रः कृष्णस्यपौत्रो नृसिंहस्य च पुत्रः। अस्य जन्मकालः वैक्रमाब्दः १६६३ =ख्रिस्ताब्दः १६०६=शकाब्दः १५२८ इति निश्चीयते।

अनेन जातकमार्गेति ग्रन्थो विरचितः। केशवकृतजातकपद्धतिग्रन्थस्योपरि प्रोढमनोरमेति स्वकीयजातकपद्धत्तेरुपरि च गणिततत्वचिन्तामणिरिति टीके रचिते।

**विष्णुः।** तैत्तिरीयशाखाध्यायी भारद्वाजगोत्रोत्पन्नोऽयं महाराष्ट्रीयो विदर्भसमीपस्थ गोलेतिग्रामनिवासी आसीत्।

अयं रामस्य प्रपौत्रो भट्टाचार्यस्य पौत्रो दिवाकरस्य च पुत्र इति प्राप्यते। अस्य समयो वैक्रमाब्दः १६६५ =ख्रिस्ताब्दः १६०८=शकाब्दः १५३० इति निश्चीयते। अनेन सौरपक्षीयः करणग्रन्थो गणेशदेवज्ञस्य बृहत् चिन्तामणेश्चटीका च विरचिता।

**कमलाकरः।** तैत्तिरीयशाखाध्यायी भारद्वाजगोत्रोत्पन्नोऽयं दिवाकरस्य प्रपौत्रः कृष्णस्य पौत्रो नृसिंहस्य द्वितीयः पुत्रो दिवाकरस्य च भ्राता। अयं विदर्भसमीपस्थ गोलेतिग्रामनिवासी। अस्य जन्मसमयः प्रायो वैक्रमाब्दः १६६५ =ख्रिस्ताब्दः १६०८=शकाब्दः १५३० इति ज्ञायते।

अनेन 'सिद्धान्ततत्त्वविवेक' इत्याख्यो ग्रन्थः काश्यां विरचित इति प्राप्यते। तत्र ग्रन्थे १३ अधिकारेषु सिद्धान्तविषयाः वर्णिताः।

**नागेशः।** अयं तुकेश्वरस्य पौत्रः शिवस्य च पुत्रः। तस्य समयो वैक्रमाब्दः १६७६ =ख्रिस्ताब्दः १६१९= शकाब्दः १५४१ इति निश्चीयते। अनेन ३८ पद्यबद्धो 'ग्रहप्रबोध' इत्याख्यः करणग्रन्थो विरचितः।

**विश्वनाथः।** तैत्तीरीयशाखाध्यायी भारद्वाजगोत्रोत्पन्नोऽयं महाराष्ट्रीयो विदर्भसमीपस्थ गोलेतिग्राम निवासी आसीत्। अयं रामस्य प्रपौत्रो भट्टाचार्यस्यपौत्रो दिवाकरस्य च पुत्रः। अस्य समयो वैक्रमाब्दः १६८६ =ख्रिस्ताब्दः १६२९=शकाब्दः १५५१ निश्चीयते। अनेन सूर्यसिद्धान्तस्य सोदाहरणीटीका ग्रहलाघवः ताजिकनिकण्ठीतयोरुपरि टीकाद्वयमपि विरचितम्।

**नित्यानन्दः।** मुद्गलगोत्रोत्पन्नो गौडब्राह्मणोऽयं लक्ष्मणस्य प्रपौत्रो नारायणस्य पौत्रो देवदत्तस्य च पुत्रः।

अयं कुरुक्षेत्रसमीपस्थेन्द्रपुरी निवासी। अस्य समयः वैक्रमाब्दः १६९६ =ख्रिस्ताब्दः १६३९=शकाब्दः १५६१ इति निश्चीयते। अनेन विरचिते सर्वसिद्धान्तराज इति ग्रन्थे गणिताध्यायस्य नवाधिकाराः गोलाध्यायस्य च त्रयोऽधिकाराः सन्ति यत्र सिद्धान्तविषयावर्णिताः।

**कृष्णः।** काश्यपगोत्रोत्पन्नोऽयं देशस्थमहाराष्ट्रीयब्राह्मणो महादेवस्य पुत्रः। अयं सह्याद्रिनिकटस्थ मालवाप्रान्तनिवासी। अस्य समयः वैक्रमाब्दः १७१० =ख्रिस्ताब्दः १६५३=शकाब्दः १५७५ निश्चीयते। अनेन कारणकौस्तुभाख्योग्रन्थो रचितः।

**रत्नकण्ठः।** अयं शङ्करस्य पुत्रः काश्मीरप्रान्तनिवासी। अस्य समयः वैक्रमाब्दः १७१५ =ख्रिस्ताब्दः १६५८=शकाब्दः १५८० इति प्राप्यते। अनेन पञ्चाङ्गकौस्तुभाख्योग्रन्थो रचितो यत्र पञ्चाङ्गनिर्माणविषयाः सन्ति।

**जयसिंहः।** राजाजयसिंह आमेरस्य(राजस्थान) नृपतिरयम्। अयं गणितज्ञो ज्योतिषज्ञो वेधकुशलश्चासीत्। अस्य समयः वैक्रमाब्दः १७५० =ख्रिस्ताब्दः १६९३=शकाब्दः १६१५ प्राप्यते।

अनेनैव जयपुरं स्थापितम्। ततश्च जयपुरे, दिल्हीनगरे, उज्जैन्यां, काश्यां, मथुरायाञ्च वेधशालानां निर्माणं कारितम्। अनेन जयप्रकाशो यन्त्रसम्राटभित्तियन्त्रं वृत्तषष्ठांशश्चैतन्नामकानि विशिष्टयन्त्राणि कारितानि। अस्यैवनृपतेरादेशं गृहीत्वा जगन्नाथाख्यपण्डितः सिद्धान्तसम्राट् युक्लिडस्य च भूमेतेः संस्कृतानुवादं कृतवान्।

**जटाधरः।** गर्गगोत्रोत्पन्नोऽयं उद्धवस्य प्रपौत्रो दुर्गामिश्रस्य पौत्रो वनमालीत्यस्य पुत्रः। अयं सरहिन्द निवासी। अस्य समयः वैक्रमाब्दः १७६१ =ख्रिस्ताब्दः १७०४=शकाब्दः १६२६ इति निश्चीयते। अनेन फतेहशाहप्रकाशाख्यो ग्रन्थो रचितः।

**विद्दणः।** कौडिन्यगोत्रोत्पन्नोऽयं मल्लस्य पुत्रः। अयं धारवाडप्रान्तस्य बङ्कापुर निवासी। अस्य समयः वैक्रमाब्दः १७६९ =ख्रिस्ताब्दः १७१२=शकाब्दः १६३४ प्राप्यते। अनेन वार्षिकतन्त्रनामको ग्रन्थो रचितो यत्र कलियुगारम्भगणितस्य चर्चाकृता वर्तते।

**दादाभट्टः।** अयं माधवस्य पुत्रः चितपावनमहाराष्ट्रीयब्राह्मण आसीत्। अस्य समयः वैक्रमाब्दः १७७६ =ख्रिस्ताब्दः १७१९=शकाब्दः १६४१ प्राप्यते। अनेन सूर्यसिद्धान्तस्य कीरणावलीटीका विरचिता।

**प्रथमा दृष्टिः।**

**चिन्तामणिदीक्षितः।** वत्सगोत्रोत्पन्नोऽयं विनायकस्य पुत्रः। अयं चिपलूणग्रामनिवासी। अस्य जन्मकालो वैक्रमाब्दः १७९३ =ख्रिस्ताब्दः १७३६=शकाब्दः १६५८ प्राप्यते। अनेन गोलानन्दनामको ग्रन्थो रचितो यत्र वेधयन्त्रविषया वर्णिताः। सूर्यसिद्धान्तस्य सारण्योऽपिनिर्मिताः।

**शङ्करः।** वसिष्ठगोत्रोत्पन्नोऽयं रामस्य प्रपौत्रो धनेश्वरस्य पौत्रो शुक्रस्य च पुत्रः। अस्य समयः वैक्रमाब्दः १८२३ =ख्रिस्ताब्दः १७६६=शकाब्दः १६८८ प्राप्यते। अनेन वैष्णवकरणग्रन्थो रचितः।

**मणिरामः।** यजुर्वेदीयो भारद्वाजगोत्रोत्पन्नोऽयं लीलाधरस्य प्रपौत्रो लालमणेः पौत्रो देवीदासस्य वत्सराजस्य पुत्रः कश्यपगोत्रीयस्य वत्सराजस्य शिष्योऽयम्। अस्य समयः वैक्रमाब्दः १८३१ =ख्रिस्ताब्दः १७७४=शकाब्दः १६९६ प्राप्यते। अनेन ग्रहगणितचिन्तामणीरित्याख्यो ग्रन्थो रचितो यत्र द्वादशाधिकारेषु १२० पद्यानि सन्ति। तत्र मध्यमग्रहसाधनं, स्पष्टग्रहसाधनं, लग्नसाधनेत्यादि विषयाः वर्णिताः।

**मथुरानाथः।** अयं सदानन्दस्य पुत्रो मालवाप्रान्तीयः। अस्य समयो वैक्रमाब्दः १८३९ =ख्रिस्ताब्दः १७८२=शकाब्दः १७०४ प्राप्यते। अनेन ज्यौतिषसिद्धान्तसाराख्यो ग्रन्थो रचितो यत्राऽष्टाध्यायाः सन्ति। यन्त्रराजघटनाख्यो ग्रन्थोऽपि रचितः।

**भुला।** गार्ग्यगोत्रोत्पन्नोऽयं नारायणस्य पुत्रः। अयं नर्मदासङ्गमस्थानात् पूर्वदेशे दधीचेत्याख्यग्राम-निवासी। अस्य समयः वैक्रमाब्दः १९६५ =ख्रिस्ताब्दः १८०८=शकाब्दः १७३० इति निश्चीयते। अनेन ब्रह्मसिद्धान्तसार इत्याख्यो ग्रन्थो रचितो यत्र द्वादशाधिकारेषु १२४ पद्यानि सन्ति। तत्र अहर्गणानयन्ति ग्रहसाधनं इत्यादयः विषया वर्णिताः।

**राघवः।** खाण्डेकरो उपाह्वोऽयं आपापन्तस्य पुत्रः खानदेशप्रान्तस्य पारोले ग्रामनिवासी। अस्य समयो वैक्रमाब्दः १८६७ =ख्रिस्ताब्दः १८१०=शकाब्दः १७३२ प्राप्यते। अनेन खेटकृतिनामकोग्रन्थो रचितो यत्र ग्रहलाघवसमानविषयावर्णिताः सन्ति। अनेन 'पञ्चाङ्गार्क' इत्याख्यो ग्रन्थः स्वोपज्ञटीकासह रचितः। जातकविषयको ग्रन्थोऽपि रचितः।

## प्रथमा दृष्टिः।

**दिनकरः।** शाण्डिल्यगोत्रोत्पन्नोऽयं अनन्तस्य पुत्रः पूणे निवासी। अस्य समयो वैक्रमाब्दः १८६९ =ख्रिस्ताब्दः १८१२=शकाब्दः १७३४ निश्चीयते। अनेन चक्रधरकृतयन्त्रग्रन्थस्योपरि यन्त्रचिन्तामणे-रित्याख्याटीका विरचिता यत्र सोदाहरणात् ग्रहविज्ञानमासप्रवेशाद्या विविधा सारण्यः प्रदत्ताः।

**शिवः।** विश्वामित्रगोत्रोत्पन्नोऽयं महादेवस्य पुत्रो लक्ष्मेश्वर निवासी। अस्य समयो वैक्रमाब्दः १८७२ =ख्रिस्ताब्दः १८१५=शकाब्दः १७३७ प्राप्यते। अनेन तिथिपारिजाताख्यो ग्रन्थो रचितो यत्र तिथिसाधनार्थं सारण्यः प्रदत्ता।

**यज्ञेश्वरः।** शाण्डिल्यगोत्रोत्पन्नोऽयं रामस्य पौत्रः सदाशिवस्य च पुत्रः। अयं बाबाजोशीरोडै इति नाम्नाऽपि प्रसिद्धोऽस्ति। अस्य समयो[५३] वैक्रमाब्दः १८९५=ख्रिस्ताब्दः १८३८=शकाब्दः १७६० प्राप्यते। अनेन यन्त्रराजग्रन्थस्योपरि यन्त्रराजवासनेत्याख्या चिन्तामणिदीक्षितकृतं गोलानन्दग्रन्थस्योपरि अनुभाविकेटीकाद्वयं विरचितम्।

**नृसिंहः।** ऋग्वेदीचितपावनज्ञातीयोब्राह्मणः सीतारामसत्यभामयोः पुत्रः। अस्य जन्मकालो वैक्रमाब्दः १८७८=ख्रिस्ताब्दः १८२१=शकाब्दः १७४३ प्राप्यते। अयं गोदातस्थाऽहमदनगरसमीपे टोकग्राम निवासी। अनेन रेखागणितं त्रिकोणमिति, तत्वविवेकपरीक्षा चलनकलनसिद्धान्तबोधकइत्यादयो बह्वोग्रन्थाः रचिताः।

अनेन सूर्यसिद्धान्तस्याऽङ्लभाषायामनुवादोऽपि कृतः। अस्य प्रायः सर्वेऽपि ग्रन्थाः प्रकाशिताः सन्ति।

**विनायकः केरोलक्ष्मणो वा।** कश्यपगोत्रोत्पन्नोऽयं तपावनो महाराष्ट्रीयब्राह्मणः। अस्य जन्मकालो वैक्रमाब्दः १८८१ =ख्रिस्ताब्दः १८२४=शकाब्दः १७४६ प्राप्यते। अयं मुम्बापुर्यादक्षिणे समुद्रतटवर्तिनो नागांवस्यनिवासी। अनेन ग्रहसाधनकोष्ठकमित्याख्योग्रन्थो रचितो यत्र सूर्यसिद्धान्तानुसारेण वर्षमानं, ग्रहगणितं चेत्यादिविषया निरूपिताः सन्ति।

---

[५३] उपरिनिर्दिष्टः समयो यज्ञेश्वरस्य संस्कृतपाठशालातो निवृत्तिसमय इति विचार्य तस्य नृसिंहात् (बापुदेवशास्त्रीतः) पूर्व एव भवेत्। यज्ञश्वरस्य जन्मकालो वैक्रमाब्दः १८३७=ख्रिस्ताब्दः १९८०=शकाब्दः १७०२ भवेदित्यलम्।

## प्रथमा दृष्टिः।

**विसाजीरघुनाथलेले।** कश्यपगोत्रोत्पन्नोऽयं कृष्णयजुर्वेदस्य हिरण्यकेशिशाखाध्यायीमहाराष्ट्रीयो चितपावनो ब्राह्मणः। अस्य जन्मकालो वैक्रमाब्दः १८८४ =ख्रिस्ताब्दः १८२७=शकाब्दः १७४९ प्राप्यते। अयं महाराष्ट्रप्रान्तस्य नासिकनगरनिवासी। अनेन सायनमतानुसारेण पञ्चाङ्गनिर्माणं कृतमिति प्राप्यते।

**चिन्तामणिरघुनाथः।** अस्य जन्मकालो वैक्रमाब्दः १८८५=ख्रिस्ताब्दः १८२८=शकाब्दः १७५० प्राप्यते। अयं द्रविडदेशीयो ज्योतिर्विदाम्कुले जातो ब्राह्मणः।

अनेन ज्यौतिषचिन्तामणिरिति नामको ग्रन्थो विरचितो यत्र पृथ्वी आकाशादिग्रहाणां चाकारविस्तारगत्यादि विषयावर्णिताः। अनेन दृग्गणित पञ्चाङ्गनिर्माणमपिकृतम्।

रूपविकारीणस्ताराद्वयस्याऽनेन नूतनमन्वेषणं कृतं तेन भारतीयज्योतिर्विदां प्रथमोऽयमिति प्रसिद्धिर्यावच्चन्द्रदिवाकरौ स्थापयति।

**कृष्णशास्त्रीगोडबोले।** कौशिकगोत्रोत्पन्नोऽयं कृष्णयजुर्वेदस्य हिरण्यकेशि शाखाध्यायी चितपावनो महाराष्ट्रीय ब्राह्मणः। अस्य गुरुर्नामशङ्करजोशी।

अस्य जन्मकालो वेक्रमाब्दः १८८८=ख्रिस्ताब्दः १८३१=शकाब्दः १७५३ प्राप्यते।

अनेन ग्रहलाघवं हडन्नामकस्य लेखकस्य बीजगणीतम्, युक्लिडस्य च रेखागणितमित्येषां महाराष्ट्रीय भाषायामनुवादाः कृता।

**वेङ्कटेशबापूजीकेतकरः।** गार्ग्यगोत्रोत्पन्नोऽयं ऋग्वेदीयोमहाराष्ट्रीयो चितपावनो ब्राह्मणः। अस्य जन्मकालो वैक्रमाब्दः १९१०=ख्रिस्ताब्दः १८५३=शकाब्दः १७७५ प्राप्यते।

अनेन ज्यौतिर्गणितमित्याख्यो ग्रन्थो रचितो यत्र पञ्चाङ्गं, ग्रहस्थापनगणितं, ग्रहाणामुदयास्तो लग्नानयनमित्यादि विषया निरूपिताः सन्ति।

**बालगङ्गाधरतिलकः।** अस्य जन्मकालो वैक्रमाब्दः १९१३=ख्रिस्ताब्दः १८५६=शकाब्दः १७७८ प्राप्यते।

अयं गणितज्यौतिषस्याऽध्यापक आसीत् अनेनैव मृगशीर्षनक्षत्रे वसन्तसम्पातस्य गणनं कृत्वा ऋग्वेदस्य कतिपयसूक्तानां दर्शनकालः ३९२२ वैक्रमाब्दात् (३९४२ ख्रिस्ताब्दात् = ४००० शकाब्दात्) पूर्वे निर्धारित इति तस्य महत्तमं प्रशस्यं प्रदानमित्यलम्।

**नीलाम्बरः।** मैथिलब्राह्मणोऽयं शम्भुनाथस्यपुत्रो जीवनाथस्य च लघुभ्राता। अयं चालवरनरेशस्य शिवस्य प्रधान ज्यौतिर्विदाऽसीत्। अस्य जन्मकालो वैक्रमाब्दः १९४०=ख्रिस्ताब्दः १८८३=शकाब्दः १८०५ प्राप्यते।

**अर्वाचीन ज्यौतिर्विदानां परिचयः।**

**अमृतलालशास्त्री।** कुशिकस्गोत्रोत्पन्नोऽयं शुक्लयजुर्वेदस्य माध्यादिनी शाखध्यायी श्रीगौडब्राह्मणो दुर्लभरामस्यप्रपौत्रः केशवस्य पौत्रो नारायणस्य पुत्रः। अस्य जन्मकालो वैक्रमाब्दः =१९१७ = ख्रिस्ताब्दः १८६० =शकाब्दः १९८२ अयं गुजरातराज्यस्य वडोदरा ग्रामस्य निवासी।

अनेन प्रथमं वडोदरानगरे संस्कृतपाठशालायां प्राथमिकज्ञानं गृहीत्वा विशेषाभ्यासार्थे काशीनगरे गत्वा ज्यौतिषशास्त्रस्य उपाध्यायपदवीं सयाजिरावमहाराजा द्वारा आर्थिकसाहाय्येन प्राप्तास्मः।
ख्रिस्ताब्दः १९०४ वर्षे जगद्गुरु शंकराचार्य श्री माधवतीर्थस्य प्रमुखपदे ज्यौतिषानां सभायां ज्यौतिषमार्तंड पदवीं प्राप्तास्मः।

**श्यामलालः।** अयं गौडकुलोत्पन्नो गोविन्दरामस्य प्रपौत्रो घनश्यामदासपण्डितस्य पौत्रः। बलदेवप्रसादस्य पुत्रः आसीत्। अस्य समयो वैक्रमाब्दः १८५२ = ख्रिस्ताब्दः १८९६ = शकाब्दः १८१८ प्राप्यते । अयं वंशवरेलिस्थ राजज्यौतिषासीत् अस्य गुरुः श्रीलालजीरामगुरुरासीत्। अनेन ज्योतिषश्यामसङ्ग्रहोग्रन्थो स्वकीय श्यामसुन्दरीभाषाटीका रचिता।

**रतीनाथशास्त्री।** कुशिकस् गोत्रोत्पन्नोऽयं शुक्लयजुर्वेदस्य माध्यदिनी शाखाध्यायी श्रीगौडब्राह्मणो जगन्नाथस्य प्रपौत्रो विश्वनाथस्य पौत्रो लक्ष्मीनाथस्य पुत्र आसीत्। अयं गुजरातप्रान्तस्य वटोदरनगरस्य निवासी आसीत्। अस्य जन्मसमयो वैक्रमाब्दः १८५४ = ख्रिस्ताब्दः १८९७ = शकाब्दः १८१९ प्राप्यते। अनेन ज्यौतिषशास्त्रस्याऽभ्यासो लोककल्याणार्थं कृतः। अस्य शिष्यसमूदायो वटोदरनगरे वसति।

**आचार्यकनैयालालजोशी।** भारद्वाजगोत्रोत्पन्नोऽयं सामवेदस्य कौथुमीशाखाध्यायी केशवस्य प्रपौत्रो जगन्नाथस्य पौत्रो माधवलालस्य पुत्रः। अस्य समयो वैक्रमाब्दः १९५९ = ख्रिस्ताब्दः १९०३

= शकाब्दः १८२४ प्राप्यते। अयं गुजरातप्रान्तस्य वडोदरानगरस्य निवासी। वेदवेदान्तपुराणज्यौतिष–तन्त्रादिशास्त्रे पारङ्गत आसीत्। अनेन ज्यौतिषालङ्कार इति सम्मानीत पदवीमलभत। अयं वडोदरा–संस्कृतविद्वत्सभायां राजकीय संस्कृत पाठशालायां (=आधुनिके वडोदरा संस्कृत महाविद्यालये) जैनपाठशालाषु च वैदुष्यपूर्ण प्रवचनैः चर्चा सभाभिश्च प्रवचन केसरीति प्रथितनामाऽसीत।

**जगन्नाथ पदेशास्त्री।** वत्सस् गोत्रोत्पन्नोऽयं शुक्लयजुर्वेदस्य माध्ययिनी शाखाध्यायी महाराष्ट्रीयो ब्राह्मणः श्री त्र्यम्बकस्य प्रपौत्रो लक्ष्मणस्य पौत्रः श्रीधरस्य च पुत्र आसीत्। अस्य जन्मकालो वैक्रमाब्दः १९६९ = खिस्ताब्दः १९१२ = शकाब्दः १८३४ प्राप्यते। अयं शुक्लयजुर्वेदघनपाठी वैयाकरणो धर्मशास्त्रप्रवीणः संस्कृतरचना कुशलश्चा सीत्। असौ भरतमुनिविरचितप्रश्नविद्यानामक ज्यौतिष शास्त्रेतिग्रन्थस्य टीकां कृतवान्। असौ ज्यौतिषशास्त्र – न्याय – सांख्ययोग – मीमांसादि षट्शास्त्री इति ख्यातिं लब्धवान्।

**केदारदत्त जोशी।** अयं अलमोडामंडलस्य शण्डयुऽयार (शाण्डिल्याश्रम) निवासी। गर्गगोत्रोत्पन्नोऽयं कौशल्यामातुहरिदत्त पितुश्च पुत्रः। अनेन स्वकीयानां पूर्वजानांनोमोल्लेखकृतः। गोवर्धनस्य गणशो गोकुलानन्दोहरजीवा विनायको वीरभद्र इतिपञ्चपुत्रास्तेषां पञ्चमस्य वीरभद्रस्य पुत्रः चन्द्रमणिस्तस्यपुत्रो भवानीदत्तस्तस्यपुत्रः पद्मापतिः [५४] तस्यपुत्रो वासुदेवो यस्य पुत्रो हरिदत्तेव केदारदत्तस्य पिता। अस्य समयः वैक्रमाब्दः १९७२ = खिस्ताब्दः १९१५ = शकाब्दः १८३७ इति ज्ञायते। अनेन स्वकीयां बृहज्जातकोपरिलिखितभट्टोपलस्य व्याख्यायाः टीका कृता दृश्यते तत्र ज्यौतिषशास्त्रस्य संक्षिप्तेतिहास सिद्धान्तगणितमित्यादि विषयाः प्रस्तावनायां प्रदत्ता। अन्ये च विषयाः बृहज्जातकानुसारेणैव हिन्दी टीकायां प्रदत्ता।

**लक्ष्मीकान्तझा।** कश्यपगोत्रोत्पन्नोऽयं शुक्लयजुर्वेदस्य माध्यदिनीशाखाध्यायी मैथिलब्राह्मणो विष्णुदत्तस्य पौत्रो झोटोःपुत्र आसीत्। अस्य जन्मकालो वैक्रमाब्दः १९९२=खिस्ताब्दः १९१५=शकाब्दः १८३७ प्राप्यते। अयं बिहारराज्यस्य मधुबनी प्रान्तस्य गजहराग्रामस्य निवासी आसीत्। अनेन वाराणस्यां वाराणसेय संस्कृत विश्वविद्यालये ज्यौतिषशास्त्रे गणितं फलितं चेत्यध्यनं कृतं। पं. लक्ष्मीकान्त झा महोदयानां परिचयस्तेषां पुत्रवैर्यः डॉ. प्रतापनारायण झा महोदयैः प्रदत्तः। डॉ. झा महोदयानामपुकामत्र स्मरामि।

---

[५४] अयं किकैकदा व्याघ्रेणगृहीतो गिर्काचपुनः प्राप्तोऽथास्य व्याघ्रदेवेति नामाऽपि प्रसिद्धम्।

## प्रथमा दृष्टिः।

**डॉ. निरञ्जनशुक्लः।** गर्गस्गोत्रोत्पन्नोऽयं शुक्लयजुर्वेदस्य माध्यदिनी शाखाध्यायी श्रीगौडब्राह्मणः कृपाशङ्करस्य प्रपौत्रो नाथुभाईशुक्लस्य प्रौत्रौश्चन्द्रशङ्करस्य च पुत्रः। अस्य जन्मकालो वैक्रमाब्दः १९९५ = ख्रिस्ताब्दः १९३८ = शकाब्दः १८६० अस्ति। अयं गुजरातप्रान्तस्य वटोदरनगरस्य निवासी। अस्य विद्याभ्यासो वडोदरा संस्कृत महाविद्यालये पण्डित शिरोमणिर्लक्ष्मीकान्त झा शास्त्री महादेवप्रसाद जानी शास्त्री महादेवप्रसाद काशीनाथ भट्ट शास्त्री रतीनाथ भट्ट श्चेत्येतेषां जातः।

वाचस्पति (पी.एच.डी.) रित्युपाधिं धारयता डॉ. निरञ्जनशुक्लेन ज्यौतिषशास्त्रे धर्मशास्त्रे साहित्यशास्त्रे चाऽऽर्यस्योपाधयोपि समासादिताः। अनेन 'जैमिनिसूत्रम्-एकमध्ययनम्' इति शीर्षकमाश्रित्य वाचस्पति निबंधस्तत्कालीनानां प्रधानाचार्याणां प्रो. डॉ. प्रभाकर केशव डोंगरे महानुभावानां निपूणेमार्गदर्शने प्रसाधितः। १९७५ ख्रिस्ताब्दात् १९९८ पर्यन्तम् वडोदरा संस्कृत महाविद्यालयेऽध्यापकत्वे कार्यं कुर्वाणोऽयं १९९५ ख्रिस्ताब्दात् १९९१ पर्यन्तं तत्रैव प्रधानाचार्यपदमपि समलङ्कृतवान्। साम्प्रतं डॉ. निरञ्जनशुक्ल महाभागाः जयौतिषशास्त्र वैशारद्यं समाजोपयोगे ग्रहफलिते विविधयज्ञादिषु विवाहादिषु पौरोहित्यकर्मणा निरतः।

**डॉ. सुरेशचन्द्रमिश्राः।** भारद्वाजगोत्रोत्पन्नोऽयं शुक्लयजुर्वेदस्य माध्यादिनी शाखाध्यायी अखिलेशस्य पुत्रः। अयं दिल्ली राज्यस्य दिल्लीनगरस्य निवासी। अस्य विद्याभ्यासे कास्यां श्री सम्पूर्णानन्द संस्कृत विश्वविद्यालये ज्यौतिषशास्त्रे अभवत्। अनन्तरं ज्यौतिषशास्त्रे Ph.D. पदवीं गृहीत्वा ज्यौतिषशास्त्रविषयक बृहत्तपाराशहोराशास्त्रंजातकपारिजातःसर्वार्थचिन्तामणिर्बृद्धयवनजाकादि ६० अधिकग्रन्थानां व्याख्या कृतवान्।

**चन्द्रकान्त जोशी।** शाण्डिल्यगोत्रोत्पन्नोऽयं शुक्लयजुर्वेदस्यमाध्यादिनी शाखाध्यायी औदिच्य ब्राह्मणः पुरुषोत्तमस्य पौत्रो बेचरस्य पुत्रः। अस्य जन्मकालो वैक्रमाब्दः १९९७=ख्रिस्ताब्दः १९४० = शकाब्दः १८६२ प्राप्यते। अयं गुजरातराज्यस्य वडोदरा प्रान्तस्य करजणग्रामस्य निवासी। अस्य विद्याभ्यासो वडोदरा संस्कृत महाविद्यालये (एम.एस.युनि. वडोदरा) पण्डित शिरोमणिर्लक्ष्मीकान्त झा शास्त्री महादेवप्रसाद जानी महोदयोः मार्गदर्शनेन अभवत्। १९८३ ख्रिस्ताब्दात् २००० पर्यन्तम् वडोदरा संस्कृत महाविद्यालयेऽध्यापकत्वे कार्य कृतवान्।

**प्रथमा दृष्टिः।**

**शान्तिलाल जोशी।** गर्गगोत्रोत्पन्नोऽयं शुक्लयजुर्वेदस्य माध्यदिनी शाखाध्यायी औदिच्य सहस्त्रज्ञातियो ब्राह्मणः शिवरामस्य प्रपौत्रो रामजीभाई पौत्रो हिंमतलालस्य पुत्रोऽस्ति। अस्य समयो वैक्रमाब्दः २०१३ = ख्रिस्ताब्दः १९५३ = शकाब्दः १८७६। अस्य विद्याभ्यासो वाराणस्यां सम्पूर्णानन्द संस्कृत विश्वविद्यालये सम्पन्नो जातः। अनेन ज्यौतिषशास्त्रे आचार्यपदवीं गृहीत्वा गुजरातप्रान्तस्य खेडानगरसमीपे पेटलादग्रामे राजकीयसंस्कृतपाठशालायां ख्रिस्ताब्दात् १९८७ तः ज्यौतिषशास्त्रविभागे अध्यापनं क्रियते। अयं गुजरातमाध्यमिकशिक्षणसंस्थायां सोमनाथसंस्कृत–विश्वविद्यालये महाराजा सयाजिरावविश्वविद्यालये च ज्यौतिशास्त्रस्य विशिष्ट सेवार्थे नियुक्तोऽस्ति।

अनेन गोलप्रकाशाख्यो ग्रन्थो रचितो यत्र ज्यासमुत्पत्तिस्त्रिकोणमितिसिद्धान्तश्चापीयरेखागणितमित्या–द्याविषयावर्णिता। अनेन भास्करविरचितानां नैकेषां ग्रन्थानां टीकाकृताः।

**गङ्गाधरः।** कौशीकगोत्रोत्पन्नस्य वाजसनेयी माध्यन्दिनीशाखाध्यायीनोऽस्य पितामह अनन्तः पिता च नारायणेति ज्ञायते। सोऽयं देवगिरि (आधुनिकं दोलताबाद) समीपस्थस्य घश्मेश्वरज्योतिर्लिङ्गस्य समीपस्थे टापरेतिग्रामे निवसति स्म।

अनेन गणेशदैवज्ञ (वैक्रमाब्दः १५५५) विरचितस्य ग्रहलाघवस्योपरि मनोरमेति टीका लिखिता। 'मधुरेण समापयेऽदिति' लोकिकन्यायानुसारं काशीपरम्परायाः पण्डितवर्या लक्ष्मीपतिः (वैक्रमाब्दः १८०५= खिस्ताब्दः १७४८= शकाब्दः १६७०) कृष्णदेव लक्ष्मीपतिः (वैक्रमाब्दः १८३२= खिस्ताब्दः १७७५= शकाब्दः १६९७) लज्जाशङ्करशर्मा गुजरती मोढज्ञातियो ब्राह्मणः (वैक्रमाब्दः १८६१= खिस्ताब्दः १८०४= शकाब्दः १७२६) नन्दलालशर्मा सरयूपारीणो ब्राह्मणः (वैक्रमाब्दः१८०५=खिस्ताब्दः१७४८=शकाब्दः१६७०) देवकृष्णशर्मा (वैक्रमाब्दः १८७५= खिस्ताब्दः १८१८= शकाब्दः१७४०) चैते ज्यौतिषशास्त्रगगनस्थाः प्रचण्डदिवाकरा येषां नामानि पुण्यानि प्रातस्मरणियानि च।

उपसंहारः। वैदिककालिकं ज्यौतिषशास्त्रविषयकमध्ययनं ज्यौतिषशास्त्रवृक्षस्य बीजम्। वेदाङ्गकालिकं ज्यौतिषमङ्कुरः। कल्पसूत्रादिकालिकं ज्यौतिषं पल्लवः। पुराणकालिकं ज्यौतिषं स्कन्धः। वराहमिहिराचार्यभट्टादीनां प्रदानमेव ज्यौतिस्य पुष्पाणिफलानि चेति सुष्ठु फलितमत्र प्रकरणे।

## प्रथमा दृष्टिः।

अत्र वराहमिहिरादारभ्यैकविंशतिशतक पर्यन्तां ज्योतिर्विदां जीवनं प्रदानञ्च प्रस्तूयते। अतः परं पण्डितवर्याणां आचार्यश्री शिरोमणीनां श्रीमतां बलदेवोपाध्यायानां 'काशी कि पाण्डित्य परम्परा' नामक ग्रन्थस्य निर्देशोऽवश्यतया करणीयोत्राऽऽधुनिककालपर्यन्तानां परिचयः प्राप्यते। गुजरातप्रान्तस्य विख्याताणां कतिपय ज्योतिविर्दामपि परिचयोऽत्र संक्षेपेण प्रदत्तः।

-x-x-x-

# द्वितीया दृष्टिः।

## जन्मकुण्डल्यां भावविचारः।
(६१-१०९)

## जन्मकुण्डल्यां भावविचारः।

**आदित्यादिग्रहाः सर्वे सनक्षत्राः सराशयः।**
**सर्वान्कामान्प्रयच्छन्तु यस्यैषा जन्मपत्रिका।।**

उपरिनिर्दिष्टः श्लोको जन्मपत्रिकाया अतएव जन्मकुण्डल्या महत्वं निर्दिशति। जन्मकुण्डली जातकस्य भूतभविष्यद्वर्तमानजीवनस्य दर्पणं इति मन्यत स्विक्रीयते च । अतः जातकस्य जन्मकुण्डली-मनुसारेण प्रारम्भिकरूपेण यत् सामान्यज्ञानमावश्यकं तदत्र द्वितीयादृट्यां प्रस्तूयते।

### ।। जन्मकुण्डल्यां लग्नादिद्वादशभावेषु सूर्यादिग्रहाणां साधारणफलम्।।[१]

**जन्मकुण्डल्यां द्वादशभावेषु सूर्यस्य साधारणफलम्।**

**प्रथमभावस्थसूर्यफलम्।**

जातकोऽत्र तुङ्गयष्टिर्जन्मतःसुखी सुशीलो नटो ज्ञानी आचाररत आकर्षकनेत्रवान् यशस्वी स्वप्रयास-जन्योच्चस्थानप्राप्तकर्ताऽल्पभाषी यद्यपि स्त्रीपुत्रादिसमूहान्मनःसन्तापसहो वात्तपित्तजाशरीरपीडितो विदेशे पर्यटनशीलो धनन्यूनत्वाधिकत्वकारणात् स्थिरलक्ष्म्याभावोऽल्पसन्ततिर्निर्धनः स्वल्पाशी नेत्ररोगी रणभूमौ श्लाघी नीचसेवानुरतोऽल्पकेशः प्रमादी क्रोधी मानी अक्षमः कृशशरीरो वृकोदरो मूर्खश्च भवति।

**द्वितीयभावस्थसूर्यफलम्।**

जातकोऽत्र सौभाग्यवान् गजाश्वादिसौख्यवान् धर्मे वाऽन्यमार्गे धनव्ययकर्ता त्यागी वाग्मी यद्यपि क्लेशयुक्तकुटुम्बवान् लाभार्थं क्रियानिष्फलभाग् गृहसुखहीनो द्विपदग्क् मुखरोगी पूर्ववैभवसौख्यहीनो विद्याहीन उद्धतः स्खलितवागिष्टशत्रुः कृशतनू रतिहीनो रक्तनेत्रः कुकेशश्च भवति।

**तृतीयभावस्थसूर्यफलम्।**

जातकोऽत्र प्रतापी पराक्रमी नृपतिसन्मानभाग् धनिको धैर्यवान् प्रियजनहितकारी पुत्रदारादियुक्तः सहिष्णुर्मधुरभाषी वाहनसुखयुक्तः सदाचारी बली बुद्धिमान् नीरोगी सुशीलो दयालुर्नृपोऽ-

---

[१] अत्र तत्तद् भावादिषु उच्चनीचक्रूरादि राश्याधिपानां स्थित्यनुसारं फलं ग्रन्थबाहुल्यभयात् न प्रदत्तं किन्तु तत्सर्वं सर्वांगीणतया कुटुम्ब-सुत-कलत्रभावानां विचारविमर्शावसरे प्रदर्शनं प्रस्तोष्यते। यद्यपि विशेषबलाबलफलमन्यशास्त्रीयग्रन्थेषु द्रष्टव्यम्।

नुचरसौख्यभागल्पानुजः कामिनीजनप्रियस्तीर्थगामी यद्यपि दुर्जनसेवितो भ्रातृहीनो ज्येष्ठभ्रातृनाशकः सर्वजनशत्रुश्च भवति।

**चतुर्थभावस्थसूर्यफलम्।**

जातकोऽत्रातिशोभाधिकारी नृपाद् धनसम्मानभाक् लोकप्रियः सहृदयः सङ्गीतप्रियो युद्धेऽग्रजः स्त्रीसौख्यवान् प्रवासी यद्यपि बन्धुभिः क्लेशकारी चिन्ताकुलः सुखहीनो निर्धनो मूर्खो दुर्बलो भूमिहीनो हृदयरोगी क्रूरो वाहनहीनो गणिकासक्तो हीनाङ्गोऽहङ्कारी जनविरोधी उष्णदेहो मन्दबुद्धिः पितृवैमनस्यभाजी च भवति।

**पञ्चमभावस्थसूर्यफलम्।**

जातकोऽत्र कुशाग्रमतिर्मान्त्रिकः पर्वतवनवासी राजप्रियः शिवभक्तो यद्यपि पूर्वजापत्यतापी कपटी प्रमादी धनहीनो बलहीनोऽल्पायुषश्चञ्चलः शैशवे दुःखभाग्यौवने व्याधियुक्तः परगृहवासी कुचेता निःसन्तानो वाऽल्पसन्ततिमान् स्थूलदेहः परधनहरणे निपुणोऽल्पकालिक शुभकर्मकर्ता उदररोगी च भवति।

**षष्ठभावस्थसूर्यफलम्।**

जातकोऽत्र रिपुध्वंसकारी बलवान् सुखी धनिको वाहनस्वामी मानी शुचिर्नृपो नृपसदृशो वा मन्त्री सेनापतिर्न्यायाधीशो योगी मतिमान् गृहमेधी सुन्दरो नीरोगी प्रबलमदनोदराग्निर्यद्यपि कृशदेहो मातृपीडकः पशुनिषादेभ्य आपत्तिभयको राजतो मित्रेणाऽपि धनव्ययी च भवति।

**सप्तमभावस्थसूर्यफलम्।**

जातकोऽत्र स्त्रीक्लेशयुक्तो मनोरोगी कुरूपः क्रयविक्रयेऽपितुच्छलब्धि नृपभयपीडितो गुप्तरोगी पापो निर्धनः कुमार्गगामी बहुस्त्रीभोगेन क्षीणशरीरो विलम्बिविवाहः परदाररतः शत्रुपीडितो द्विभार्योऽभक्ष्यभक्षणरतोऽल्पनिद्रालुश्च भवति।

**अष्टमभावस्थसूर्यफलम्।**

जातकोऽत्र कान्तिमान् दानी बुधजनसेवी यद्यपि व्यवहारे धूर्तः कष्टभाग्विदेशीयदारागामी अभक्ष्याभक्षी विदेशवासी मन्दनेत्री अल्पसंततिवानल्पायुः कलहप्रवीणो मिथ्याभाषी नीचजनसेवी मूर्खः पशुनाशको दस्युभयत्रस्तो बहुशत्रुमान् प्रियजनविरहसन्तप्तश्च भवति।

**नवमभावस्थसूर्यफलम्।**

जातकोऽत्र पुत्रवान् धनी सत्यवक्ता सुकेशी कुलजनहितकारी रूपवान् धर्मकर्मरतो यद्यपि दुष्टो दाम्भिक चिन्ताशीलो बन्धुभिः संतप्तः परदेशी विद्याविवेकहीनो भाग्यवर्जितो रोगी दीनः पितृगुरुद्वेषी विधर्मी मातुलघाती च भवति।

**दशमभावस्थसूर्यफलम्।**

जातकोऽत्रातुलकीर्तिमान् विद्वान् बली गुणवान् पवित्रो नृत्यगीतानुरागी राजमान्यः सुखी सन्ततिवान् निर्भयो वेदशास्त्रज्ञः पराक्रमेण सिद्धिमान् वाहनसौख्यवान् यद्यपि मातृपितृकष्टकारी उत्तरवयसि व्याधिग्रस्तश्च भवति।

**एकादशभावस्थसूर्यफलम्।**

जातकोऽत्रोच्चाधिकारी दण्डाधिकारी गायको गीतरचनाकुशलो ज्ञानी लोकमान्यो दासादिसौख्यवान् कामिनीचित्तहारी दीर्घायुर्यशस्वी धार्मिको नृपप्रसादाद् धनवान् यद्यपि सन्तानहीनश्च भवति।

**द्वादशभावस्थसूर्यफलम्।**

जातकोऽत्र बहुसन्ततिमान् यद्यपि परदेशी नेत्ररोगी शत्रुविजयी विधर्मी निर्धनो नृपचौरभयग्रस्तः कामी यात्रायामापत्तिभाक् पितृव्यमनस्त्रस्तश्च भवति।

## जन्मकुण्डल्यां द्वादशभावेषु चन्द्रस्य साधारणफलम्।

**प्रथमभावस्थचन्द्रफलम्।**

जातकोऽत्र धनवान् पवित्रः प्रसन्नो धार्मिकः स्त्रीवल्लभो दीर्घायुः सुखी चञ्चलो यद्यपि मूर्खः प्रमादी कृतघ्नी मूकः कृशदेहो विकृतविचारवान्, बधिरो दासो नेत्रहीनोऽनुचितकार्यकारी च भवति।

**द्वितीयभावस्थचन्द्रफलम्।**

जातकोऽत्र विशालकुटुम्बवान् व्याधिहीनः सुन्दरशरीरी दानी बुद्धिमान् यशस्वी सहिष्णुः सन्ततिमान् मधुरभाषी विद्वान् गुणवान् राजमान्यो जनाभिरामः स्त्रीवर्गलाभवान् यद्यपि परस्त्रीगामी पत्न्या सहाऽल्परतिमांश्च भवति।

**तृतीयभावस्थचन्द्रफलम्।**

जातकोऽत्र तपस्वी धर्माचरणेन कीर्तिमान् सहजसौख्ययुक्तः प्रसन्नमना विद्यावस्त्रान्नादिसंग्रहशीलः सात्त्विको वंशाग्रजः स्वपराक्रमेण धनवान् यद्यपि कामी कृपणो वातकफरोगी च भवति।

**चतुर्थभावस्थचन्द्रफलम्।**

जातकोऽत्र बली प्रतापी नृपः कोषाध्यक्षो यौवने पूर्णसुखी विद्वान् प्रासादवासी भ्रातृसौख्यवान् देवविप्रभक्तो गजाश्वादिसौख्यवान् धनवान् जलजोत्पन्नपदार्थक्रयविक्रयकारी जलसञ्चारानुरतो भूमिजन्यपदार्थलाभवान् यद्यपि युवावस्थायामल्पसौख्यवान् परस्त्रीलोलुपो मांसमत्स्यादिभोजी रोगी परभृतः[२] च भवति।

**पञ्चमभावस्थचन्द्रफलम्।**

जातकोऽत्रोत्तमसन्ततिमान् निर्मलबुद्धिमान् रत्नभूमिलाभवान् कुसीदेन द्रव्यलाभवान् प्रसिद्ध-विद्वानुत्तमस्त्रीसुखयुक्तो नृपात् भूमिद्रव्यवस्त्रादिलाभवान् जितेन्द्रियः सत्यव्रतपरायणः प्रसन्नमनाः स्त्रीदेवताराधनेन सिद्धिभाक् सङ्गीतकलादिनिपुणः सुशीलो यद्यपि भीरुः कामी च भवति।

**षष्ठभावस्थचन्द्रफलम्।**

जातकोऽत्र प्रबलशत्रुनाशको मृदुदेहः प्रतापी यद्यपि मातृवैरी प्रमादी मन्दाग्निरोगी अल्पकामी निर्धनो बन्धुविग्रही वातकफरोगी क्रूरश्च भवति।

**सप्तमभावस्थचन्द्रफलम्।**

जातकोऽत्रनीरोगी स्त्रीसौख्यवान् विदेशव्यवसायाद्धनिको मिष्टान्नप्रियः स्वस्त्रीकुलेन धनवान् गम्भीरवाग् धीमान् क्रयविक्रयेण धनवान् मृदुभाषी, सुन्दरो विनम्रः कीर्तिमान् यशस्वी नीरोगा यद्यपि दुर्बलोऽतिकामी ईर्ष्याशीलो भ्रमणशील:स्त्रीवश्यो विषमनेत्रो लुब्धचेता[३]श्च भवति।

**अष्टमभावस्थचन्द्रफलम्।**

जातकोऽत्र सदारोगी दीनोऽल्पायुः पाप उद्विग्नमनाः श्वासरोगी नेत्ररोगी शीतज्वरपीडितो मूर्च्छारोगग्रस्तो जलभयग्रस्तो भवति।

---

[२] (परभृतः) अभिज्ञानशाकुन्तले ५/२३

स्त्रीणामशिक्षित पटुत्वममानुषीषु, संदृश्यते किमुत याः प्रतिबोध्यवन्यः।

प्रागन्तरिक्षगमनात् स्वमपत्यजात मन्यैर् द्विजैः परभृताः खलु पोषयन्ति।।

[३] शर्माव्रजविहारिलालमतेन लुब्धचेता इत्यस्य आकर्षकचित्तवानित्यर्थः।।च.चि.सं.६/पृ.११३।।

**नवमभावस्थचन्द्रफलम्।**

जातकोऽत्र यौवनेभाग्यवान् चन्द्रवत्पराक्रमी शत्रुनाशको धनवान् पुत्रवान् सुन्दरस्तीर्थगामी युवतीप्रियः शास्त्रज्ञो ज्ञानी योगी आत्मज्ञानी निष्पापो वापीकूपतडागदेवालयादिनिर्माणकर्ता ब्राह्मणबन्दिजनादिपूजितो धार्मिकश्च भवति।

**दशमभावस्थचन्द्रफलम्।**

जातकोऽत्र धार्मिको यौवनावस्थायां पूर्णसुखी विजयी सिद्धारम्भी पराक्रमी दानशीलः शूरः सत्वगुणी शीलवान् पण्डितो वैश्यवृत्या लाभवान् नृपसदृशधनसंपत्तिमान् बन्धुसौख्यवान् यद्यपि बाल्यावस्थायामल्पसुखी ज्येष्ठपुत्रेण दुःखी वधूजनविलासी च भवति।

**एकादशभावस्थचन्द्रफलम्।**

जातकोऽत्र लब्धनृपसम्मानो धनवान् स्त्रीसौख्यवान् धनाध्यक्षः कीर्तिमान् लज्जाशीलः प्रतापी, अश्वगजादिसौख्यवान् दीर्घायुः पुत्रवाननुचरभृत्यादिसौख्यवान् रत्नसुवर्णजनादिसंपाग्मान् प्रसन्नचित्तः प्रगल्भवाग् बहुश्रुतः क्षेत्रवान् दानी च भवति।

**द्वादशभावस्थचन्द्रफलम्।**

जातकोऽत्र पण्डितो मङ्गलकार्ये द्रव्यव्ययी यद्यपि मातुलपितृव्यकुलाल्लब्धमनःसन्तापः शत्रुपीडितो नेत्ररोगी अल्पस्त्रीस्नेही चिन्तितमना बहुभक्षी पापबुद्धिर्नीचवृत्तिरतो रोगी मद्यपानी जीवहिंसकः क्रूरः प्रमादी विदेशवासी परजातो निर्धनः कृपणो मन्दाग्निरोगी च भवति।

**जन्मकुण्डल्यां द्वादशभावेषु मङ्गलस्य साधारणफलम्।**

**प्रथमभावस्थमङ्गलफलम्।**

जातकोऽत्र सिंहवत्पराक्रमी दृढशरीरो यद्यपि अग्निलोहदण्डजनितव्रणः सन्तप्तमना भ्रान्तचित्तः प्रियबन्धुस्त्रीसौख्यहीनः कुरूपवान् रोगी परस्त्रीगामी भ्रमणशीलः क्रूरोऽल्पायुर्मूढः पिशुनमतिः पापरतः कुष्ठरोगी कृष्णवर्णी व्यङ्गी बृहन्नाभी रक्तपाणिश्चित्ररोगी दुर्जनः शिरोवेदनापीडितो नेत्ररोगी कार्येषु विघ्नबाहुल्यवान् रक्तविकारपीडितो नीचजनसेवी कुचैलः कुष्टरोगी च भवति।

**द्वितीयभावस्थमङ्गलफलम्।**

जातकोऽत्र सत्यवादी कृषिकर्मकृत् पुत्रवान् सहिष्णुर्यद्यपि निर्धनः कुटुम्बसौख्यहीनः कुत्सितभोजी वादविवादरतो नित्यप्रवासी क्रोधी निर्दयः कुमुखी नीचजनाश्रितः क्रियाहीनो द्युतरतः कृशतनुर्नित्यऋणी विद्याहीनश्च भवति।

**तृतीयभावस्थमङ्गलफलम्।**

जातकोऽत्र अतुलबलपराक्रमः स्वपराक्रमेण लक्ष्मीवांस्तपस्वी गुणवान्नीरोगी नृपमान्यः प्रसिद्धः सहोदरसौख्यवान् यद्यपि भ्रातृपीडकोऽस्थिभङ्गविषभयग्रस्तश्च भवति।

**चतुर्थभावस्थमङ्गलफलम्।**

जातकोऽत्र नृपसंमानभागाजानुबाहुः कृषिजन्यलाभवान् यद्यपि शत्रुपीडाभयग्रस्तो विदेशवासी वस्त्रहीनो वाहनहीनो गृहहीनः सन्तप्तमना व्यङ्गी बन्धुहीनो नीचसेवानुरतः कृष्णवर्णी परधनपरनारीलुब्धचित्तः पित्तपीडितः पुत्रहीनोऽतिकामी भूमिहीनो विकलधीः स्वजनदुःखेनदुःखितो ग्रहप्रतिकूलताभाक् मित्रसुखवञ्चितो वाहनजनितदुःखभागृणकर्ता रोगी क्षामदेहवांश्च भवति।

**पञ्चमभावस्थ मङ्गलफलम्।**

जातकोऽत्र प्रबलजाठराग्निमान् बहुभोजी दानी अधिकारी यद्यपि सन्तप्तमना निर्धनः खलो नीचो विधर्मी दीनो भ्रमणशीलः कफवातरोगी रोगग्रस्तसन्ततिमान् पितृसौख्यवञ्चितो बुद्धिस्त्रीपुत्रधनसौख्य-वञ्चितश्च भवति।

**षष्ठभावस्थ मङ्गलफलम्।**

जातकोऽत्र रणेऽतुलितबलधामा समाजाग्रणीः प्राज्ञः शत्रुनाशकः मनोहरो यशस्वी व्यायतदेहवान् लक्ष्मीवान् यद्यपि क्रोधी प्रबलमदनोदराग्निरग्निविषशस्त्रादिभयग्रस्तो युद्धमृत्युश्च प्राप्नोति।

**सप्तमभावस्थ मङ्गलफलम्।**

जातकोऽत्र विवाहव्यवसायकारणाद् दीर्घकालपर्यन्तं विदेशवासी स्त्रीघ्नो भार्याहीनो वा परवधूनिरतः पुत्रस्त्रीनाशेन संतप्तो निर्धनो दुर्बलोऽनुचितकर्मकर्ता रोगग्रस्तः कुकर्मनिरतः स्त्रीवशश्च भवति।

**अष्टमभावस्थ मङ्गलफलम्।**

जातकोऽत्र भाग्यहीनो मित्रेभ्यो दुःखीः प्रारब्धजन्यविघ्नेनसंतप्तोऽसाध्यरोगग्रस्तः स्त्रीसुखहीनोऽल्पायुः कुष्ठरोगी नेत्ररोगी कुरूपो रक्तविकारी अल्पसन्ततिमान् हितशत्रुपीडितः पितृपीडाकारी मूत्रव्याधिग्रस्तश्च भवति।

**नवमभावस्थ मङ्गलफलम्।**

जातकोऽत्र महामतिर्धनवान्, राजमान्यो वन्दनीयो यद्यपि पापः परस्त्रीगामी व्यर्थभ्रमणशीलो धर्महीनः रोगी पितृसौख्यहीनः कुचैलः क्रूरो हिंसाप्रियो विषाग्निभयवांश्च भवति।

**दशमभावस्थ मङ्गलफलम्।**

जातकोऽत्राल्पोद्यमोऽपि सिद्धकार्यः कुलदीपको मङ्गलकारी रत्नभृत्यादिसौख्यवान् सिंहवत् पराक्रमी अग्रगण्यः सुखी परोपकारी संयमी स्त्रीप्रियो दानी द्विजगुरुजनभक्तः सत्पुत्रवान् यद्यपि नीलवर्णो मध्यमदेहोऽभिमानी मातुलघाती च भवति।

**एकादशभावस्थ मङ्गलफलम्।**

जातकोऽत्र शत्रुहीनो गोऽश्वादिव्यापारेण धनिको गुणवान् सुखी नीरोगी चतुरवाक् सत्यवाक् देवब्राह्मणभक्तो विविधभोजनरसिको भूमेर्लाभवान् ताम्रादिपदार्थैर्धनवान् कुमुखोऽपि धनसम्पदा सुमुखत्वम् धारयति यद्यपि दस्युभयेन निर्धनताग्रस्तो व्यवसायेपरधनेन द्रव्यहानियुक्तः कामी उदरशूलग्रस्तश्च भवति।

**द्वादशभावस्थ मङ्गलफलम्।**

जातकोऽत्रार्थनाशकः शस्त्रघाती दस्युभयपीडितो विवादी वैमनस्यकारी पराधीनत्वेनदुःखी परधनहारी पतितश्चञ्चलाक्षो विहारी भृत्यसंतापतप्तः स्त्रीहीनः परस्त्रीगामी क्रोधी नेत्ररोगी जायाघ्नः पिशुनः कटुवचनेनकुटुम्बक्लेशी कुमार्गे धनव्ययी विदेशवासी बन्धुद्वेषी विविधबन्धनग्रस्तः कर्णादिरोगग्रस्तोऽग्निभयग्रस्तश्च भवति।

## जन्मकुण्डल्यां द्वादशभावेषु बुधस्य साधारणफलम्।

**प्रथमभावस्थबुधफलम्।**

जातकोऽत्र बुद्धिमान् वैखरीवृत्तिभाग् लेखकः कान्तियुक्तः कूटनीतिज्ञः शिल्पगणितकलादि-विषयेनिपुणो मधुरभाषी पुत्रवान् गुणवास्तपस्वी राजमान्यो दीर्घायुर्धर्मानुरागी विदेशवासी स्वल्पहारी मन्त्रज्ञो यन्त्रज्ञस्तन्त्रज्ञोऽन्यभावस्थग्रहारिष्टनाशक आयुर्वेदनिष्णातः स्त्रीसौख्यवान् यद्यपि असाध्यरोगी वातरोगी पिप्लुतिलादिचिह्नयुक्तो गुल्मोदरव्याधीग्रस्तश्च भवति।

**द्वितीयभावस्थबुधफलम्।**

जातकोऽत्र बुद्धिमान् स्वपराक्रमेणप्रतापी राजमान्यः शुभकर्मरतः सदाचारी शीलवान् स्वबुद्ध्या धनी कविर्मिष्टान्नभोजी गुरुवत्सल उन्नतियुक्तः पितृभक्तः पापभीरु दीर्घकेशी सत्यप्रियः शास्त्रपण्डितः सेवकसेवितः स्त्रीसौख्यवान् सर्वजनाभिरामो महादानी भ्रमरवद्भोगी यद्यपि त्वचारोगी च भवति।

**तृतीयभावस्थबुधफलम्।**

जातकोऽत्र कुशलव्यवसायी यशस्वी देवगुरुभक्तः स्वजनयुक्तो वेदाभ्यासी यद्यपि विषयासक्तो वा सन्यासी कुमनाश्चञ्चलो  मध्यमायुः सुखहीनः पापमतिरनुजाश्रितो निर्धनश्च भवति।

**चतुर्थभावस्थबुधफलम्।**

जातकोऽत्र नृपो वा विशेषाधिकृतो वा सन्मित्रयुक्तो लेखकः स्वपराक्रमेणधनी बहुभृत्यवान् भाग्यवान् सत्यवक्ता सङ्गीतज्ञः प्रवासी गृहसौख्यवान् गणितज्ञो मनोहरः पुत्रवान् विशालाक्षश्चारुवाग् जनकसाहाय्येन भाग्यवान् यद्यपि पैतृकसम्पत्तिरहितश्च भवति।

**पञ्चमभावस्थबुधफलम्।**

जातकोऽत्र स्वबुद्ध्या धनिको मन्त्री बली सुखी पुत्रपौत्रवान् मन्त्रज्ञः कुशलो रूपवान् पवित्रोऽनेकमित्रवान् देवगुरुभक्तश्चारुवाक् यद्यपि प्रथमेवयसिपुत्रसन्ततियुक्तः पुत्रसन्ततिरहितो वा प्रथमगर्भपातदुःखी अतीवदुष्टः च भवति।

**षष्ठभावस्थबुधफलम्।**

जातकोऽत्र शत्रुनिरोधकृत् ज्ञानी तर्कनिपुणः सद्व्ययी नित्यपरिभूतो यद्यपि वातरोगी गुह्यरोगी उदररोगी कुष्ठरोगी संग्रहणीरोगग्रस्तो बन्धुद्वेषी निष्ठुरः प्रमादी कलहप्रियः सन्तप्तचित्तः कामी क्रोधहीनो दाम्भिको मन्दाग्निपीडितो विवादरतश्च भवति।

**सप्तमभावस्थबुधफलम्।**

जातकोऽत्र सुन्दरस्त्रीसौख्यवान् धर्मज्ञ ऐश्वर्यवान् सत्यवादी नारीमान्यो मधुरभाषी शिल्पज्ञो मातृसौख्यवान् क्रयविक्रयाभ्यां लाभवान् कान्तिमान् धनवान् प्रयत्नेन बहुपुत्रवान् यद्यपि विचित्रवीर्यो युद्धेविवादेपराजितश्चञ्चलाक्षोऽभक्ष्यभक्षणकर्ता च भवति।

**अष्टमभावस्थबुधफलम्।**

जातकोऽत्र दीर्घायुषर्देशविदेशविख्यातो नृपप्रसादात् वाणिज्येन वा लाभवान् स्त्रीसौख्यवान् यशस्वी कुलपालको न्यायाधीशो विनीतोऽतिथिपूजकः पुत्रवान् रिपुक्षयकर्ता भूरिभूमिपतिश्च भवति।

**नवमभावस्थबुधफलम्।**

जातकोऽत्र धार्मिको विद्वान् गङ्गास्नानव्रती प्रतापी पूर्णधनी सन्ततिमान् सत्यव्रती जितेन्द्रियो भृत्यादिसौख्यवान् दानी तीर्थभ्रमणशीलो भाषाशास्त्रप्रवीणो वेदज्ञः सङ्गीतज्ञस्तन्त्रशास्त्रवेत्ता स्ववंशप्रदीपो दुष्टजननियन्ता कूपारामादिकारको यद्यपि रोगग्रस्तो भवति।

**दशमभावस्थबुधफलम्।**

जातकोऽत्र मितभाषी अश्वहस्तिधनादिसकलसौख्यवान् शूरो रूपवान् धैर्यवान् धार्मिकः सात्विको विद्वान् बलवान् सिद्धारम्भो गुरुभक्तः कविः शिल्पज्ञो भाषाशास्त्रकलाप्रवीणः पैतृकसम्मपत्तिनृपप्रसाद–नीतिनिपुणताराजकीयनिग्रहानुग्रहशक्यादि कारणाल्लोके विख्यातश्च भवति।

**एकादशभावस्थबुधफलम्।**

जातकोऽत्र कन्याविवाहे दास्यादिवैभवदाता सिद्धसकलमनोरथः प्रभूतधनवान् मनोहरः स्त्रीवल्लभो दीर्घायुषर्बुद्धिमान् स्वजनप्रियः प्रसन्नचित्तः सुशीलः प्रतिपालको नीरोगी यशस्वी ब्राह्मणप्रियो भृत्ययुक्तो विद्याभ्यासी स्वकुलहितेच्छुर्यद्यपि मन्दाग्निरोगग्रस्तो भोगासक्तोऽधिककन्यायुक्तो निर्बलदेहः श्यामवर्णो च भवति।

**द्वादशभावस्थबुधफलम्।**

जातकोऽत्र ब्राह्मणभक्तः शत्रुनाशको बन्धुयुक्तः सद्व्ययी धनिको विद्वान् स्वकर्मयुक्तो व्यसनमुक्तो यद्यपि निर्दयी मलिनो रोगी प्रमादी खञ्जो लोभी परवादेन पीडितः स्वजनपरित्यक्तो लोकनिन्दया दुःखी स्त्रीलोलुपश्च भवति।

## जन्मकुण्डल्यां द्वादशभावेषु गुरोः साधारणफलम्।

### प्रथमभावस्थगुरुफलम्।

जातकोऽत्र सुवेशी सुखी विद्वान् सत्कर्मरतः सद्गुणैः प्रसिद्धः दीर्घायुर्निर्भयो राजपूज्यः सुतरामुदारः स्त्रीसौख्यवान् धीरो रत्नवस्त्रभूषणादिसौख्ययुक्तः कविश्चिरञ्जीविपुत्रोपेतो गायकः पवित्रः प्रबलशत्रु-नाशकः सर्वलोकहितकरो वाहनस्वामी उपभोगेन द्रव्यव्ययी[४] यद्यपि अल्पबलः श्लेष्मरोगग्रस्तश्च भवति।

### द्वितीयभावस्थगुरुफलम्।

जातकोऽत्र कवित्वमतिर्न्यायाधीशः कान्तिमानश्वादिपशुधनेन युक्तः सुमुखः सर्वजनप्रिय उत्तमभोजनप्रियो विद्वान् मन्त्री प्रगल्भवाक् धनैश्वर्यवान् स्वजनप्रियो बन्धुयुक्तः कृतज्ञः शत्रुहीनो यद्यपि वक्त्ररोगी शीघ्रभोगेच्छुः[५] अधिकारिश्रमेण धनवानल्पपितृसौख्यवांश्च भवति।

### तृतीयभावस्थगुरुफलम्।

जातकोऽत्र भ्रातुसौख्यवान् यद्यपि अतिशूद्रः कृतघ्नोऽविश्वसनीयो भाग्योदयेऽपि सौख्यहीनो न्यूनधनो नीचकर्मरतः कृपणो मन्दाग्निरोगग्रस्तः स्त्रीजितः प्रमादी तीर्थभ्रमणशीलोतिलुब्धः सुतप्रीतिरहितश्च भवति।

### चतुर्थभावस्थगुरुफलम्।

जातकोऽत्र वेदज्ञः पवित्रो गृहस्वामी अश्वादिसौख्ययुक्तो ब्राह्मणभक्तो मातृपितृस्त्रीपुत्रवस्त्रधान्यादि-सौख्यवान् वाग्मी मनोहरः शठः सेनापतिः क्षेत्रवान् कुलाग्रणीर्नृपात् प्राप्तधनः प्रतिस्पर्द्धिपरिचर्या-सौख्यवान् यद्यपि सन्तप्तमनाश्च भवति।

### पञ्चमभावस्थगुरुफलम्।

जातकोऽत्र कल्पनाशील उत्तमवक्ता कुशलस्तार्किको लिपिकरः प्रसिद्धलेखको योगाभ्यासरतो रूपवान् सचिवो धार्मिकः शुद्धचित्तो मन्त्रज्ञो मधुरभाषी कुलप्रियो यद्यपि पुत्रपौत्रादितः क्लेशवान् विलासी सन्ततिहीनश्च भवति।

---

[४] नारायणभट्टेनाऽत्रगृहीतस्य शीघ्रभोगार्तः, इत्यस्यस्थाने टीकाकारेण मालवीयदैवज्ञेन शीघ्रभोगान्त इति पाठं गृहीत्वा तस्यावधी विवेचितः शीघ्रस्खलन इति।

[५] उपभोगेन नारायणेनाऽत्र ''संवलेन वसूनि नश्यन्ति'', इत्युक्तमत्रतु संवलशब्दस्य उपभोगार्थत्वमेवयुक्तं नतु प्रवास निमित्तकी व्ययः (आप्टे पृ. ५९१) रत्नवस्त्रभूषणादिसौख्ययुक्त इति अग्रे पठितत्वात्।

**षष्ठभावस्थगुरुफलम्।**

जातकोऽत्र युद्धे विजयी पशुधनयुक्तः सुन्दरस्त्रीसौख्यवान् सङ्गीतप्रियः पौत्रादिसौख्ययुक्तो यद्यपि मातुलसौख्यहीनः प्रमादी कामी मारणादिमन्त्रज्ञो बलोद्धतो रोगग्रस्तश्च भवति।

**सप्तमभावस्थगुरुफलम्।**

जातकोऽत्र कुशाग्रबुद्धिः कुलदीपको रूपवान् नृपाल्लाभवान् पितृतोऽप्यधिकसत्वगुणवान् श्रेष्ठी वा मनोहरः कविः सेनाध्यक्षः सुनाभिकटिमानासक्तिरहितो विवेकी वित्तैश्वर्यवान् सभाग्रणी र्विनम्रः शास्त्राभ्यासासक्तो धैर्यवान् मधुरवाग् गर्विष्ठश्च भवति।

**अष्टमभावस्थगुरुफलम्।**

जातकोऽत्र विमलतीर्थवासी मोक्षप्राप्तिकर्ता यद्यपि रोगग्रस्तोऽन्यगृहवासी कुलपरंपरात्यागी अयोग्यकर्मरतः प्रमादी दुर्बलो दीनो विवेकहीनः कुरूपो नीचस्त्रीरतश्चञ्चलो बन्धनयुक्तः पितृसौख्यहीनश्च भवति।

**नवमभावस्थगुरुफलम्।**

जातकोऽत्र चतुःशालगृहस्वामी नृपमान्यो यज्ञकर्ता तपस्वी विद्वान् शास्त्रज्ञः कलानिपुणो ब्राह्मणभक्तो ब्रह्मवेत्ता स्वकुलधर्मपरायण पितृभक्तो गुणी यशस्वी सेवकयुक्तो विनीतबान्धव-स्तीर्थभ्रमणशीलः सुदेहो यद्यपि सन्ततिचिन्ताग्रस्तो भवति।

**दशमभावस्थगुरुफलम्।**

जातकोऽत्र पितृतोऽप्यधिकसद्गुणी यशस्वी च धनसम्पन्नो ब्राह्मणभक्तो नृपमान्यो दयालू राजचिह्नयुक्तोऽश्वादिवाहनयुक्तो विजयी सिद्धारम्भः साधुवृत्तो रत्नादिधनेन युक्तो नीतिज्ञः सत्यव्रतो बहुजनपूज्यः सुहृत्पुत्रस्त्रीसौख्यवान् यद्यपि स्वदुष्टपुत्रेण सन्तप्तश्च भवति।

**एकादशभावस्थगुरुफलम्।**

जातकोऽत्र औरसपुत्रवान् परार्थव्ययी ब्राह्मणैर्धनिकश्चस्तुत्यः शत्रुनाशको वाहनपुत्रादिसौख्यवान् प्रख्यातो मनोहरो गुणवान् नीरोगी मन्त्रज्ञः परशास्त्रज्ञो राजमान्यो निजकुलवृद्धिकरो धार्मिको दीर्घायू रत्नादिधनयुक्तः पितृसेवको यद्यपि स्वयमनुकृपणश्च भवति।

**द्वादशभावस्थगुरुफलम्।**

जातकोऽत्र परधनहारी गुरुद्वेषी खलो भाग्यहीनः सेवको नेत्ररोगी पराजितो व्यसनी बन्धुवैरी नीचजनसेवी चित्तोद्वेगेन कुपितः पापरतो मतिर्हीनो भ्रमणशीलो लोकविग्रही गुप्तरोगी दम्भयुक्तसत्कर्मकर्ता, उद्धतवाक् च भवति।

## जन्मकुण्डल्यां द्वादशभावेषु शुक्रस्य साधारणफलम्।

**प्रथमभावस्थशुक्रफलम्।**

जातकोऽत्र सज्जनसङ्गी अनल्पसुन्दरस्त्रीभोगी शोभनाङ्गः सत्कर्मरतः प्रबलशत्रुनाशकः श्वेतवर्णः शिल्पकार उपदेशकारी दीर्घायुः सन्ततिमान् कविः स्थिरस्वभावः पवित्रो विद्वान् सर्वप्रियो नीरोगी गणितशास्त्रज्ञो दारप्रियः कान्तिमान् यद्यपि वातरोगी कृतघ्नो नेत्ररोगी च भवति।

**द्वितीयभावस्थशुक्रफलम्।**

जातकोऽत्र कुशाग्रबुद्धिश्चारुवेषो मधुरवाक् सुमुखः कुलधर्मपरायण उत्तमभोगभाक् कलाज्ञो धनिको बहुमान्यो नृपपूज्यो गुरुभक्तो धैर्यवान् सुन्दरीलुब्धो वाहनसौख्यवांश्चभवति।

**तृतीयभावस्थशुक्रफलम्।**

जातकोऽत्र बन्धुयुक्तो यद्यपि अल्पस्त्रीरतियुक्तः संग्रामभीरुर्दाने कृपणः परुषवाक् बहुभगिनीयुक्तः कुकामी बहुप्रजाकांक्षी बहुशत्रुपीडितः प्रायो रोगग्रस्तः किन्तु तद्द्वितीयभावे सूर्योपस्थित्या नीरोगी च भवति।

**चतुर्थभावस्थशुक्रफलम्।**

जातकोऽत्र देवसेवारतः स्थितप्रज्ञो राजमान्यः पण्डितो गजाऽश्वगोगृहवस्त्राद्यैरैश्वर्यवान् मनोहरो दीर्घायुर्भूमिपतिर्गायकः प्रख्यातो महोत्सवप्रियो मातृभक्तो वेदज्ञो ग्रामणीश्च भवति।

**पञ्चमभावस्थशुक्रफलम्।**

जातकोऽत्र सुपुत्रवान् धनसम्पन्नः कविर्मन्त्रज्ञो मिष्टान्नप्रियो जपसिद्धिमान् न्यायाधीशो राजमन्त्री सुखी सेनापतिरश्वपतिः पण्डितः कलाकुशलो राजमान्यो राजनीतिज्ञो दानी जामातृपूजितो ग्रामणीश्च भवति।

**षष्ठभावस्थशुक्रफलम्।**

जातकोऽत्र भूरिशत्रुग्रस्तः सन्तप्तमना व्ययी ऋणी कुलनाशको मातृपितृगुरुजनसौख्यहीनो नीचकर्मरतो रोगग्रस्तो बुद्धिहीनः कुकामी ऐश्वर्यवान् कुमन्त्रजपे दुःखी च भवति।

**सप्तमभावस्थशुक्रफलम्।**

जातकोऽत्र स्त्रीसौख्यवान् कलाज्ञः सुपुत्रवान् मनोहरः प्रवासी मोहिताकृतिः प्रमदाभोगी विदेशगमनशीलो यद्यपि कटिरोगपीडितः कलहप्रियः स्वल्पोद्यमी च भवति।

**अष्टमभावस्थशुक्रफलम्।**

जातकोऽत्र पशुधनयुक्तो दीर्घायुः सुखी भूमिपतिर्विशालनेत्रो भृत्यादिसेवितो यद्यपि व्यर्थवादी कष्टेन धनिको नीचकर्मरतो रोगग्रस्तो मांसभोजप्रियः क्षुद्रविवादी ऋणकर्ता स्त्रीपुत्रादिचिन्तायुक्तश्च भवति।

**नवमभावस्थशुक्रफलम्।**

जातकोऽत्र धार्मिकः सदाव्रती प्रख्यातः शरीरसौख्यवान् तपस्वी गुरुजनसेवानुरागी अतिथिपालकः कुसीदोपजीवी स्त्रीसौख्यवान् पुत्रवान् गुणवान् ब्राह्मणभक्तः स्वबलेन धनिकः पितृधनेनसत्कर्मकर्ता पवित्रात्मा ज्ञानी लोकप्रियः शुभसामुद्रिकलक्षणयुक्तो भृत्यादिसौख्यवांश्च भवति।

**दशमभावस्थशुक्रफलम्।**

जातकोऽत्र यशस्वी भाग्यवान् स्नानादिपवित्रकार्यरतः कविः स्वबुध्या विख्यातः कृषिस्त्रीसाहाय्येन धनवान् यद्यपि कर्मविघ्नकरो बधिरो वंशनाशको विचित्रवीर्यो भ्रान्तचित्तः स्वकार्यनाशक आडम्बरमाश्रितो विप्रवृत्या सुवर्णसंग्रही च भवति।

**एकादशभावस्थशुक्रफलम्।**

जातकोऽत्र गुणवान् सुशीलः सत्यानुरागी कीर्तिमान् प्रभूतसामर्थ्यवान् सदाचारी प्रवासी स्त्रीसौख्यवानग्निपूजक ईश्वरभक्तो विद्वान् भूमिलाभवान् वाहनयुक्तो द्रव्यलाभकर्ता स्त्रीसाहाय्येन नाट्यादिना धनिकः सकलभोगैश्वर्यवान् भृत्यादिसेवितो यद्यपि परस्त्रीलोलुपश्च भवति।

**द्वादशभावस्थशुक्रफलम्।**

जातकोऽत्र शुभकार्ये धनव्ययी यद्यपि व्याधिग्रस्तो मित्रद्वेषी खलो बन्धुनाशकः कुकामी कलहप्रियः कृपणः प्रायो निर्धनश्च भवति।

## जन्मकुण्डल्यां द्वादशभावेषु शनैश्चरस्य साधारणफलम्।

### प्रथमभावस्थशनैश्चरफलम्।

जातकोऽत्र धनी रिपुनाशको ग्रामणी: पैतृकसम्पत्तिलाभवान् यद्यपि व्यर्थवादी विषादी वातरोगी द्वेषी असंतुष्टो दुर्बल: कामी प्रमादी अङ्गहीन: केशहीनो मूर्खो व्रणी प्रौढस्त्रीस्वामी स्थूलबुद्धिर्व्यग्रमनाश्च भवति।

### द्वितीयभावस्थशनैश्चरफलम्।

जातकोऽत्र धनवान् न्यायप्रिय: काष्ठाङ्गारलोहव्यवसायाद्धनवान् स्वजनविरहेण स्वदेशत्यागेन वा धनादिसुखभोक्ता यद्यपि कटुवचनी स्वार्थी मुखरोगी असत्यवादी वातपित्तकफास्थिररोगग्रस्तो व्यसनी नीचविद्यारत: परगृहवासी चौर्यकर्मपरायणो राज्यदण्डेन निर्धनश्च भवति।

### तृतीयभावस्थशनैश्चरफलम्।

जातकोऽत्र शूर: कुशाग्रबुद्धिर्गुणवान् कुलीन: स्त्रीसौख्यवान् विदेशप्रवासी अल्पाशी यद्यपि अल्पलाभवानसन्तुष्टोऽप्रसन्न: कटुवचनी कृतघ्नोऽल्पभाग्यवान् श्यामवर्णो मलिनशरीरो नीचो भ्रातृनाशक: प्रमादी सहोदरकारणात् दु:खी असिद्धकार्येण सन्तप्तश्च भवति।

### चतुर्थभावस्थशनैश्चरफलम्।

जातकोऽत्र शत्रुतो लाभवान् गृहादिपैतृकसम्पत्तिवञ्चित: स्वजननिन्दितो वातरोगी पशुभयग्रस्त: शरीरसौख्यहीनो दु:खी चिन्तितमना: प्रमादी हृदयरोगी धूर्तो मातृपितृसन्तापकारी दुर्बल: प्रकृत्याखल: कुकर्मरतो दीर्घनखरोमवान् द्वैमातुरो बाल्येवार्धके च रोगी देहपीडितश्च भवति।

### पञ्चमभावस्थशनैश्चरफलम्।

जातकोऽत्र प्रमादी मूर्ख उदररोगी अनपत्यतोऽहङ्कारी निर्धनो भ्रमणशीलो भ्रान्तबुद्धि: कुरूपो दुर्बुद्धिरल्पकामी देवशास्त्रेऽरतिमान् निर्बलो मित्रद्रोही मन्त्रानुष्ठाने अल्पसिद्धिमान् च भवति।

### षष्ठभावस्थशनैश्चरफलम्।

जातकोऽत्र शत्रुनृपचौरभयहीनो महाबलवान् सदाचारी न्यायशीलस्तार्किको महिषादिपशुधनयुक्तो लोहादिधातुविक्रयेण लाभवान् बहुभोक्ता यशस्वी बन्धुयुक्त: सेवकभृत्यादिसौख्यवान् कविर्वाग्मी यद्यपि मधुप्रमेहरोगी गुप्तरोगी कुटिलचित्तोऽभिमानी कामी मातुलनाशकारी च भवति।

**सप्तमभावस्थशनैश्चरफलम्।**

जातकोऽत्र उत्साहहीनो दु:खी चञ्चलमतिर्निर्बलो गृहसुखहीनो रोगी निर्धन: कुरूपो मलीनवस्त्रधारी नीचजनसङ्गी कुलटानिरत: सुन्दरस्त्रीधनमित्रादिवञ्चित उद्यमहीनो दम्पती च उभौरोगग्रस्तौ, हीनमना: परभोग्योपरजीवी पुनर्भूदोषग्रस्तश्च[६] भवति।

**अष्टमभावस्थशनैश्चरफलम्।**

जातकोऽत्र सत्सङ्गवञ्चितो दुष्टजनसङ्गी धनव्ययी क्षुद्रहृदयी धूर्त: कुटिलमतिश्चतुर: प्रमादी कृपणोऽल्पसन्ततिमान् सन्तोषहीन: क्रोधी निर्धन: कुष्ठरोगी भगन्दरादिरोगपीडित उत्साहहीन: परदेशवासी चौर्यापराधेन दण्डितो मिथ्याविवादी वातरोगी धान्यहीन: स्वजनशत्रु: कृशकायश्चभवति।

**नवमभावस्थशनैश्चरफलम्।**

जातकोऽत्रोत्तरवयसिविरक्तो विषयवासनाहीन: सन्यासी तीर्थगामी इन्द्रियदमनशीलो दानी पुत्रवान् धनी सुखी मनोहारो निर्मलस्वभावो योगाभ्यासी यद्यपि सुहृद्वर्गैर्दु:खी पितृवैरी स्त्रीहीन: कुबुद्धिर्विकलाङ्गश्च भवति।

**दशमभावस्थशनैश्चरफलम्।**

जातकोऽत्र राज्यमन्त्री नीतिज्ञो विनीतो धनसम्पन्नश्चतुर: शूर: सुखी जनाध्यक्षो राजमान्य: सम्मान्यो विख्यात: सेनाध्यक्षो विदेशसौख्ययुक्तो मानी लोकसेवारत: कृषिकार्यरतो यद्यपि वाहनसुखहीनोऽदण्ड्य-दण्डको दण्डकरक्षक: पैतृकसम्पत्तिहीनो मातृपितृसौख्यवञ्चितो दुष्टपुत्रवान् विलम्बेन कार्यसिद्धिमांश्च भवति।

**एकादशभावस्थशनैश्चरफलम्।**

जातकोऽत्र धनवान् दीर्घायु: शूर: स्थिरबुद्धिरल्परोगी प्रायो नीरोगी यशस्वी स्थावरसौख्यवान् सन्तोषप्रियो विद्वान् राजमान्य: शिल्पकलाज्ञो सुभाग्यवान् वाहनसौख्यवान् यद्यपि रागद्वेषादिविषये निपुणोऽल्पसन्ततिमान् च भवति।

---

[६] पुनर्भूदोष एवमस्ति प्रथमपत्न्या: निधने जाते द्वितीयचाहीनाङ्ग्या वा क्रोधयुक्त्या वा भार्यापीडित:।

**द्वादशभावस्थशनैश्चरफलम्।**

जातकोऽत्र जनाध्यक्षो यद्यपि कातरः निर्लज्जो मन्ददृष्टियुक्तः परदेशवासी निर्दयो निर्धनो व्ययेन दुःखी प्रमादी नीचकर्मरतोऽङ्गहीनः सुखहीनः कुक्षिरोगपीडितो धूर्तः पुत्रहीनो बन्धुवैरी पतितो–ऽस्थिभङ्गेन दुःखी पप्तिघातकश्च भवति।

**जन्मकुण्डल्यां द्वादशभावेषु राहोः साधारणफलम्।**

**प्रथमभावस्थराहुफलम्।**

जातकोऽत्र अन्यप्रतापातत्स्वकार्यकरणसमर्थः शत्रुविजयी धनवान् बलवान् सत्यप्रतिज्ञः कामकलासमर्थो यद्यपि मृतवत्सः स्वजनवञ्चको दयाहीनोऽधार्मिको रोगग्रस्तो रक्तनेत्रो कृतघ्नश्चञ्चलो मुखेचिह्नयुक्तः स्त्रीहीनः पुत्रहीनो मार्गेजलभयग्रस्तो वातरोगी दुष्टस्वभावः शिरोरोगग्रस्तश्च भवति।

**द्वितीयभावस्थराहुफलम्।**

जातकोऽत्र निर्भयमतिर्मत्स्यमांसपशुपालनेन धनवान् गौरवाधिक्ययुतो यद्यपि असत्यवादी शत्रुभयग्रस्तः शत्रुपीडितः पराधीनो धननाशकः स्वार्थी स्वदेशे निर्धनः परदेशे धनिको मुखरोगी आजीविकार्थे भ्रमणशीलः कटुवचनो नखचर्म–व्यवसायरतश्चौरकार्येण धनिकः कुदन्तो वातरोगी अनेककान्ताभोगी पुत्रशोकसन्तप्तो दुर्जनसङ्गोत्थराजकीयभयग्रस्तः संकष्टकार्यसिद्धिमांश्च भवति।

**तृतीयभावस्थराहुफलम्।**

जातकोऽत्रातिबलवान् सहजभाग्यवान् कीर्तिमान् विजयी ऐश्वर्यमान् पवित्रो दीर्घायुः शत्रो ऐश्वर्यनाशकः सर्वजनाभिरामः पराक्रमी उद्यमी नृपपूज्यः परदेशवासी यद्यपि भ्रातृनाशको व्यङ्गी पशुधनहानिकर्ता च भवति।

**चतुर्थभावस्थराहुफलम्।**

जातकोऽत्र मनःसन्तप्तो दुःखी परदेशवासी सुखहीनो मित्रहीनो नीचजनसङ्गी पुत्रहीनो वा पुत्रैकभागी अल्पायुः स्वजनहीन उद्धतः कामातुरः प्रमादी प्रतापवान् कृशभार्योऽलङ्कारकामी अनेककान्ताभोगी प्रवासी पशुनाशकस्तस्यमाताप्रायो रोगग्रस्ता च भवति।

**पञ्चमभावस्थराहुफलम्।**

जातकोऽत्र पुत्रविषयेविलम्बादिप्रसङ्गवान् उदरशूलग्रस्तो दु:खी भीरुर्निर्धन: कुक्षिरोगी मन्दाग्नि र्नीचजनसङ्गी मलिनो मन्दभाग्यो मन्दबुद्धि: कलत्रदु:खितोऽल्पमित्रश्च भवति।

**षष्ठभावस्थवफलम्।**

जातकोऽत्र प्रबलशत्रुनाशको दीर्घायुरचलबुद्धिबलैश्वर्यवानद्वितीयो म्लेच्छनृपपूज्यो मनोहरो मतिमान् विख्यातो धैर्यवान् यद्यपि परस्त्रीगामी मातुलपितृव्यसौख्यहीन: कटिरोगपीडित: पशुभयभीतो मातृस्वस्त्रीनाशको यस्याऽनपत्यो मातुल: कन्यासन्ततिमांश्च भवति।

**सप्तमभावस्थराहुफलम्।**

जातकोऽत्र स्वतन्त्रो यद्यपि बन्धुवियोगेन दु:खी व्यभिचाररतो रोगी स्त्रीसङ्गकारणेन निर्धनो ऽल्पवीर्योऽल्पमती रुग्णभार्याया मरणेन दु:खी लोकनिन्दको रतिसुखहीनो यस्य च भार्याकुरूपा भवति।

**अष्टमभावस्थराहुफलम्।**

जातकोऽत्र राजमान्य: पण्डितवन्दितो धनसम्पन्न: शत्रुतो लाभवान् यद्यपि अतिपरिश्रमात् उदरेगुल्मी वा वातरोगो वा कुटुम्बवियोगेन दु:खी पैतृकसम्पत्तिहीन: सुकृतभाग्यवान् भाग्यहानिर्मुर्हुमुहु: स्त्रीसुखहीन: क्रोधी दरिद्र: कृशो विदेशवासी भीरुर्मायावी अल्पायुरधीरोऽतिधूर्तर्बन्धुद्वेषी अतिव्ययी कुकर्मरत: प्रमेहवातादिददुरप्रभृतिरोगग्रस्त: प्रायो  भाग्यरहित: स्वजननिन्दितश्च भवति।

**नवमभावस्थराहुफलम्।**

जातकोऽत्र बुद्धिमान् स्वगुणै: प्रख्यात आदरणीयो दयालुर्देवतीर्थसेवारत: कृतज्ञ: कुटुम्बपालक: सभापण्डित: कीर्तिमान् सदर्थानां दाता रत्नादिसौख्यवान् धनिको धर्मज्ञो भृत्यादिसौख्यवान् ग्रामणीर्यद्यपि भ्रमणशील: पितृद्वेषी पवित्राचरणहीनो मन्दमतिर्भाग्यहीन: स्वधर्मनाशको नीचधर्मानुरक्त: पिशुन: कुचैल: शत्रुभयग्रस्त: पुत्रहीन: सेवको विदेशवासी रतिक्रीडाकुशलश्च भवति।

**दशमभावस्थराहुफलम्।**

जातकोऽत्र ग्रामणीर्मन्त्री सेनापति: शत्रुनाशको बुद्धिमान् धनवान् विरक्तोऽभयो मानिनीकामिनीस्त्रीभोगी चपलो यद्यपि अनर्थव्ययी दुष्टकार्यरतो व्याकुलो दु:खी म्लेच्छसङ्गी अभिमानी

विधवास्त्रीगामी पितृसुखहीनो वातरोगी वाहनभयग्रस्तश्चौर्यकार्यरतो दीनः सत्कर्महीनोऽन्यकार्यरतो भूमिहीनो युद्धप्रियः परद्रव्योपहारी अल्पपुत्रो मातृपीडापीडितश्च भवति।

**एकादशभावस्थराहुफलम्।**

जातकोऽत्र पुत्रवान् मतिमान् राजमान्योऽभिमानी भृत्यादिसौख्यवान् म्लेच्छतो लाभमान् मनोहरो नीलवपुर्मितभाषी देश-विदेशप्रवासी शास्त्रज्ञश्चपलः कविर्भोगी अपराजितर्दीर्घायुः स्वदेशे पूर्णसुखी च भवति।

**द्वादशभावस्थराहुफलम्।**

जातकोऽत्र धनिको विदेशवासी शत्रुनाशकोऽन्तेसिद्धमनोरथो यद्यपि दीनो हृदयपार्श्वयो र्वातजन्यशूलग्रस्तो दुष्टजनसङ्गी कीलपादो मलिनवस्त्रः प्रच्छन्नाघरतः कार्यविघ्नकरः सज्जनद्वेषी कलहप्रियो नेत्ररोगी शीलहीनो नीचकर्मरतोऽसद्व्ययी पापबुद्धिः सकपटः कुलदूषको धर्महीनो दुःखी कान्ताविमुक्तः कुनखी जलोदररोगग्रस्तो मन्दबुद्धिर्बन्धुवैरी अल्पपुत्रो नृपपीडितश्च भवति।

**जन्मकुण्डल्यां द्वादशभावेषु केतोः साधारणफलम्।**

**प्रथमभावस्थकेतुफलम्।**

जातकोऽत्र बान्धवैः क्लेशकारी दुर्जनपीडितः स्त्रीपुत्रादिचिन्तायुक्तो भीरु उद्विग्नः प्रथमपत्नीवियुक्तो बाहुव्याधिग्रस्तः कृतघ्नो निस्तेजाः पदच्युतो मातुलकष्टकारी तन्तुवायोऽव्यवस्थित-चित्तो वातरोगी अनृतवादी आत्मघाती च भवति।

**द्वितीयभावस्थकेतुफलम्।**

जातकोऽत्र राजभयग्रस्तोऽशान्तस्वभावः कुटुम्बक्लेशी मित्रद्रोही कटुवचनी जनापराधी नीचजनसङ्गी भाग्यहीनो मुखरोगी धनधान्यनाशकारी अल्पविद्यः परान्नभोजी स्त्रीसुखहीन आश्रितनाशपीडितश्च भवति।

**तृतीयभावस्थकेतुफलम्।**

जातकोऽत्रैश्वर्यवान् तेजस्वी गुणवान् धनसम्पन्नः शत्रुनाशको बलवान् सत्सङ्गी दीर्घायुः

शत्रुस्त्रीभोक्ता यद्यपि व्यर्थवादी विषयासक्तो मित्रनाशकारी अव्यवस्थितचित्तो भ्रातृकष्टकारी उदासीनो हृदयरोगी बधिरो बाहुव्याधिग्रस्तश्च भवति।

**चतुर्थभावस्थकेतुफलम्।**

जातकोऽत्र मातृसुखहीनो मित्रसौख्यरहितः पैतृकसम्पत्तिनाशकोऽन्यगृहवासी स्वगृहेव्याकुलोनिन्दको मातृपितृकष्टकारी जन्मभूमिंत्यक्त्वा परदेशनिवासी च भवति।

**पञ्चमभावस्थकेतुफलम्।**

जातकोऽत्र पशुधनयुक्तो विदेशगमनोत्सुको यद्यपि पराक्रमयुक्तोऽपिसेवकः प्रेतपिशाचादिकैः पीडितो बुद्धिकल्पितभ्रमपीडितो मानसरोगी पुत्रसुखहीनो जलभीरुः शठ उदरशूलग्रस्तोऽल्पसन्ततिः शस्त्रवातरोगबन्धुप्रभृतिभिः क्लेशितश्च भवति।

**षष्ठभावस्थकेतुफलम्।**

जातकोऽत्र नीरोगी पशुधनयुक्तो गुणवान् प्रख्यातो यशस्वी विद्वान् इष्टसिद्धिकामः शत्रुनाशकः श्रेष्ठी यद्यपि मातुलद्वेषी दन्तरोगी ओष्ठरोगी च भवति।

**सप्तमभावस्थकेतुफलम्।**

जातकोऽत्र स्त्रीपुत्रादिभिर्दुःखी यात्रादिचिन्तापीडितो व्यग्रमानसो धनव्यये दुःखी सदाप्रवासी पत्नी-वियुक्तो विचित्रवीर्य आन्त्ररोगी कुलटागामी नष्टधनो दुःशीलो निद्रालुः शत्रुतोधननाशचिन्तितश्च भवति।

**अष्टमभावस्थकेतुफलम्।**

जातकोऽत्र गुदरोगी परधनासक्तः परस्त्रीरतो दुराचारी अतिलुब्धोऽल्पायुः शस्त्रघातेन पीडितो मुखरोगी वाहनादिपातभयग्रस्तः स्वद्रव्यावरुद्धः स्वकर्मविरोधी च भवति।

**नवमभावस्थकेतुफलम्।**

जातकोऽत्र म्लेच्छेन भाग्यवान्[७] क्लेशशामको वक्ता शूरो यद्यपि पुत्रसन्तानरहितो दाम्भिकः क्रोधी

---

[७] यद्यपिम्लेच्छशब्दः इस्लामधर्मिणां कृते उपयुज्यते तथापि म्लेच्छाः यवनाः विदेशीयाः आधुनिकानामाचार्याणां मतम्।

परनिन्दकः पितृद्वेषी उत्साहहीनोऽभिमानी पितृसुखहीनः स्वधर्मद्वेषी परधर्मानुरागी सोदरपीडितो बाहुव्याधिपीडितश्च भवति।

**दशमभावस्थकेतुफलम्।**

जातकोऽत्र शिल्पज्ञ आत्मज्ञानी वीणावादको यद्यपि भाग्यहीनः कष्टभाक् पितृसुखहीनः कुरूपो भ्रमणशीलो गुदरोगी परस्त्रीरतः शुभकर्मघाती दस्युभयग्रस्तः कफरोगपीडितश्च भवति।

**एकादशभावस्थकेतुफलम्।**

जातकोऽत्र विद्वान् मनोहरस्तेजस्वी सुवस्त्रो मधुरभाषी प्रतापी अधिकारी सन्तुष्टः सदाचारः सर्वैश्वर्यवान् लोकप्रियो यद्यपि गुदरोगी पुत्रकर्मक्लेशितो वातरोगपीडितश्च भवति।

**द्वादशभावस्थकेतुफलम्।**

जातकोऽत्र नृपसदृशो धनवान् यशस्वी सद्व्ययी शत्रुनाशको यद्यपि मातुलसुखहीनः पूर्वसम्पत्ति-नाशको नृपतुल्यव्ययी अनर्थधननाशको दुःशीलो गुप्तपापो गुह्यबस्तिनाभिपादचक्षूरोगग्रस्तो दुःशीलश्च भवति।

**स्त्रीजातकस्यजन्मकुण्डल्यां लग्नादिद्वादशभावेषु सूर्यादिग्रहाणांसाधारणफलम् ।**

**जन्मकुण्डल्यां द्वादशभावेषु सूर्यस्य साधारणफलम्।**

**प्रथमभावस्थसूर्यफलम्।**

यदा स्त्रीजातकस्य प्रभमभावे सूर्यो भवेत्तदा सा रुग्णा दुःखिनी दुष्टा कृशा कृतघ्ना परान्नरता प्रभावहीना च भवति।

**द्वितीयभावस्थसूर्यफलम्।**

यदा स्त्रीजातकस्य द्वितीयभावे सूर्यो भवेत्तदा सा धनधान्यहीना कठोरवचना भक्तिहीना युद्धप्रिया द्वेषयुक्ता खलस्वभावा सुहृद्हीना च भवति।

**तृतीयभावस्थसूर्यफलम्।**

यदा स्त्रीजातकस्य तृतीयभावे सूर्यो भवेत्तदा सा सुखिनी स्वस्था नीरोगा रूपवती विशालनेत्रा सन्ततियुक्ता च भवति।

**चतर्थभावस्थसूर्यफलम्।**

यदा स्त्रीजातकस्य चतुर्थभावे सूर्यो भवेत्तदा सा नारी दु:खिनी दीनवृत्तियुक्ता रुग्णा विकरालदंष्ट्रा प्रभावहीना लोकविरुद्धा च भवति।

**पञ्चमभावस्थसूर्यफलम्।**

यदा स्त्रीजातकस्य पञ्चमभावे सूर्यो भवेत्तदा साऽल्पसन्ततियुक्ता व्रतानुरागिणी स्थूलदन्ता मातृपितृवत्सला प्रियंवदा विप्रभक्ता च भवति।

**षष्ठभावस्थसूर्यफलम्।**

यदा स्त्रीजातकस्य षष्ठभावे सूर्यो भवेत्तदा सा धर्मानुरक्ता सौभाग्ययुक्ता रूपवती विशिष्टस्व-भावयुक्ता उत्तमाचरणरता रिपुनाशिनी च भवति।

**सप्तमभावस्थसूर्यफलम्।**

यदा स्त्रीजातकस्य सप्तमभावे सूर्यो भवेत्तदा सा पतित्यक्ता सुखहीना क्रोधिनी प्रणयहीना कफरोगी कुरूपा पापरता च भवति।

**अष्टमभावस्थसूर्यफलम्।**

यदा स्त्रीजातकस्य अष्टमभावे सूर्यो भवेत्तदा सा दु:खिनी धनहीना कुधर्मान्विता विषादयुक्ता क्षतजीर्णाङ्गा बान्धवयुक्ता च भवति।

**नवमभावस्थ सूर्यफलम्।**

यदा स्त्रीजातकस्य नवमभावे सूर्यो भवेत्तदा सा कुकर्मरता साहसप्रिया भाग्यहीना बहुशत्रुवती क्रोधिनी ऐश्वर्यहीना च भवति।

**दशमभावस्थसूर्यफलम्।**

यदा स्त्रीजातकस्य दशमभावे सूर्यो भवेत्तदा सा नारी कुकर्मरता प्रभावहीना स्वकल्याणेऽपि प्रमादिनी मलिनस्वभावा च भवति।

**एकदशभावस्थसूर्यफलम्।**

यदा स्त्रीजातकस्य एकादशभावे सूर्यो भवेत्तदा सा नारी कलाज्ञा पुत्रवती पौत्रवती जितेन्द्रिया क्षमान्विता बान्धवपूजिता च भवति।

**द्वादशभावस्थसूर्यफलम्।**

यदा स्त्रीजातकस्य द्वादशभावे सूर्यो भवेत्तदा सा नारी अविनययुक्ता, बहुदुःखयुक्ता पापरता निर्दयस्वभावा पवित्रहीना बहुपुरुषगामिनी च भवति।

**जन्मकुण्डल्यां द्वादशभावेषु चन्द्रस्य साधारणफलम्।**

**प्रथमभावस्थचन्द्रफलम्।**

यदा स्त्रीजातकस्य प्रथमभावे शुक्लपक्षस्य चन्द्रो भवेत्तदा सा नारी रूपवती  तत्र च कृष्णपक्षस्य चन्द्रो भवेत्तदा सा कृशाङ्गना रुग्णा विवादशीला कुचैला च भवति।

**द्वितीयभावस्थचन्द्रफलम्।**

यदा स्त्रीजातकस्य द्वितीयभावे चन्द्रो भवेत्तदा सा नारी धनिका धर्मशीला पतिकार्यदक्षा नीतिकुशला ब्राह्मणप्रिया च भवति।

**तृतीयभावस्थचन्द्रफलम्।**

यदा स्त्रीजातकस्य तृतीयभावे चन्द्रो भवेत्तदा सा कफवायुरोगी कठोरवचनी दुष्टसङ्गिनी नीतिहीना कृपणा कृतघ्ना दुष्टा च भवति।

**चतुर्थभावस्थचन्द्रफलम्।**

यदा स्त्रीजातकस्य चतुर्थभावे चन्द्रो भवेत्तदा सा बहुसुखभोत्री स्थिरस्वभावा व्यवहारकुशला देवगुरुपूजका बहुभोगशीला च भवति।

**पञ्चमभावस्थचन्द्रफलम्।**

यदा स्त्रीजातकस्य पञ्चमभावे चन्द्रो भवेत्तदा सा सुपुत्रवती गुणगौरवयुक्ता भृत्यवती सुखी सत्याचरणा पतिपरायणा सुसंयमितजीवननिर्वाहकुशला, रूपवती च भवति।

**षष्ठभावस्थचन्द्रफलम्।**

यदा स्त्रीजातकस्य षष्ठभावे चन्द्रो भवेत्तदा सा अल्पधनिका बहुशत्रुयुक्ता अविनया चञ्चला रुग्णा दुर्बला क्षतगात्रयुक्ता च भवति।

**सप्तमभावस्थचन्द्रफलम्।**

यदा स्त्रीजातकस्य सप्तमभावे चन्द्रो भवेत्तदा सा शुद्धाचरणरता पतिप्रिया धर्मपरायणा विवेकशीला मधुरभाषिणी बहुसुखभोक्त्री तेजस्विनी पवित्रकार्यरता च भवति।

**अष्टमभावस्थचन्द्रफलम्।**

यदा स्त्रीजातकस्य अष्टमभावे चन्द्रो भवेत्तदा सा कुनेत्रा विकृतस्तनी दुषितभगयुक्ता रुग्णा निन्दिता कुवस्त्राभूषणयुक्ता कठोरस्वभावा च भवति।

**नवमभावस्थचन्द्रफलम्।**

यदा स्त्रीजातकस्य नवमभावे चन्द्रो भवेत्तदा सा धर्मपरायणा सुकटियुक्ता सकलभोगैश्वर्यभोक्त्री मनोहरा सुपुत्रवती भृत्यसुखयुक्ता सुखी च भवति।

**दशमभावस्थचन्द्रफलम्।**

यदा स्त्रीजातकस्य दशमभावे चन्द्रो भवेत्तदा सा सुवर्णा दिधनयुक्ता प्रसिद्धा कुलेमान्या न्यायप्रिया पुण्यवती सत्याचरणा च भवति।

**एकदशभावस्थ चन्द्रफलम्।**

यदा स्त्रीजातकस्य एकादशभावे चन्द्रो भवेत्तदा सा सुन्दरी बहुलाभववती व्याधिहीना नीरोगी सुशीला च भवति।

**द्वादशभावस्थ चन्द्रफलम्।**

यदा स्त्रीजातकस्य द्वादशभावे चन्द्रो भवेत्तदा सा धनव्ययेन सन्तप्तमना प्रभावहीना उग्रा नीतिहीना निर्धना च भवति।

**जन्मकुण्डल्यां द्वादशभावेषु मङ्गलस्य साधारणफलम्।**

**प्रथमभावस्थमङ्गलफलम्।**

यदा स्त्रीजातकस्य प्रथमभावे मङ्गलो भवेत्तदा सा रक्तविकारपीडिता प्रभावहीना प्राय: पतिना परित्यक्ता दौर्भाग्ययुक्ता स्त्रीस्वभावहीना गर्वान्विता च भवति।

**द्वितीयभावस्थमङ्गलफलम्।**

यदा स्त्रीजातकस्य द्वितीयभावे मङ्गलो भवेत्तदा सा चरित्रहीना धनरहिता कुकान्ता कामयुक्ता रुग्णा स्वपतिना वयसा ज्येष्ठा च भवति।

**तृतीयभावस्थमङ्गलफलम्।**

यदा स्त्रीजातकस्य तृतीयभावे मङ्गलो भवेत्तदा सा सौभाग्यशालिनी सुशीला बान्धवप्रिया सज्जनसङ्गी प्रशस्ताचरणरता नीरोगा प्रभावयुक्ता च भवति।

**चतुर्थभावस्थमङ्गलफलम्।**

यदा स्त्रीजातकस्य चतुर्थभावे मङ्गलो भवेत्तदा सा कार्यध्वंसिनी दु:खिनी धनहीनोग्रा कुशीला लोकविरोधिनी च भवति।

**पञ्चमभावस्थमङ्गलफलम्।**

यदा स्त्रीजातकस्य पञ्चमभावे मङ्गलो भवेत्तदा सा कुपुत्रयुक्ता लज्जाहीना पापरता ज्ञानरहिता बन्धुहीना च भवति।

**षष्ठभावस्थमङ्गलफलम्।**

यदा स्त्रीजातकस्य षष्ठभावे मङ्गलो भवेत्तदा सा पतिप्रिया शत्रुनाशिनी सञ्चितधनेन सुखी सज्जनानुरागिणी प्रबुद्धा रोगरहिता च भवति।

**सप्तमभावस्थमङ्गलफलम्।**

यदा स्त्रीजातकस्य सप्तमभावे मङ्गलो भवेत्तदा सा दुष्टस्वभावा वैभवहीना कुत्सितशरीरा गुणहीना वैधव्येन दु:खिनी च भवति।

**अष्टमभावस्थमङ्गलफलम्।**

यदा स्त्रीजातकस्य अष्टमभावे मङ्गलो भवेत्तदा सा रुग्णा दुर्बला प्रायो निराश्रिता दारिद्र्यदु:खशोकसन्तप्ता हिंसका कान्तिहीना च भवति।

**नवममभावस्थमङ्गलफलम्।**

यदा स्त्रीजातकस्य नवमभावे मङ्गलो भवेत्तदा सा धर्महीना सुखरहिता दूषितमना कुलटा विधर्मरता लज्जाहीना बुद्धिहीना च भवति।

**दशमभावस्थ मङ्गलफलम्।**

यदा स्त्रीजातकस्य दशमभावे मङ्गलो भवेत्तदा सा कुकर्मरता दुषितमना कुलटा विधर्मरता लज्जाहीना बुद्धिरहिता च भवति।

**एकादशभावस्थमङ्गलफलम्।**

यदा स्त्रीजातकस्यैकादशभावे मङ्गलो भवेत्तदा सा सुशीला पतिवत्सला सद्धर्मरता च भवति।

**द्वादशभावस्थमङ्गलफलम्।**

यदा स्त्रीजातकस्य द्वादशभावे मङ्गलो भवेत्तदा सा नारी कृतघ्नी गुणहीना मद्यपानरता निर्दयस्वभावा सदातुरा शक्तिहीना च भवति।

**जन्मकुण्डल्यां द्वादशभावेषु बुधस्य साधारणफलम्।**

**प्रथमभावस्थबुधफलम्।**

यदा स्त्रीजातकस्य प्रथमभावे बुधो भवेत्तदा सा रूपशालिनी पतिव्रता नीतिधर्मपरायणा सुलोचना भौतिकसमृद्धियुक्ता सत्याचरणा सुशीला च भवति।

**द्वितीयभावस्थबुधफलम्।**

यदा स्त्रीजातकस्य द्वितीयभावे बुधो भवेत्तदा सा सदाचारिणी गुणयुक्ता धर्मरता द्विजसज्जनसेवारता धनिका च भवति।

**तृतीयभावस्थबुधफलम्।**

यदा स्त्रीजातकस्य तृतीयभावे बुधो भवेत्तदा सा सशक्ता सुभाषिणी प्रभुत्वशालिनी जनानु- कूलाचरणरता पुत्रवती धनवती सम्मानभोक्त्री च भवति।

**चतुर्थभावस्थबुधफलम्।**

यदा स्त्रीजातकस्य चतुर्थभावे बुधो भवेत्तदा सा देवद्विजाराधनातत्परा विख्यात्कुलोत्पन्ना सुभृत्या सुखभोक्त्री बन्धुषु विशेषप्रिया सुजनप्रशंसायुक्ता च भवति।

**पञ्चमभावस्थबुधफलम्।**

यदा स्त्रीजातकस्य पञ्चमभावे बुधो भवेत्तदा सा कलहप्रिया धनान्नहीना वृथाटनशीला सर्वकार्यविनाशिनी सज्जनविरोधिनी अल्पसन्ततियुक्ता च भवति।

**षष्ठभावस्थबुधफलम्।**

यदा स्त्रीजातकस्य षष्ठभावे बुधो भवेत्तदा सा शत्रुधातिनी मद्यपा अल्पायु: शीघ्रकार्यकर्त्री परोपकारिणी च भवति।

**सप्तमभावस्थबुधफलम्।**

यदा स्त्रीजातकस्य सप्तमभावे बुधो भवेत्तदा सा विदुषी विदग्धा शास्त्रानुरक्ता प्रीतिपरायणा शुभभर्तृका नियमोपेता च भवति।

**अष्टमभावस्थ बुधफलम्।**

यदा स्त्रीजातकस्याष्टमभावे बुधो भवेत्तदा सा कृतघ्ना निरस्तधर्मा जनविरुद्धकार्यकत्री सदातुरा भयग्रस्ता च भवति।

**नवमभावस्थबुधफलम्।**

यदा स्त्रीजातकस्य नवमभावे बुधो भवेत्तदा सा सद्धर्मपरायणा सुविनीता भाग्यशालिनी व्यवहारदक्षा कीर्तिमति: क्षमाशीला सत्याचाररता च भवति।

**दशमभावस्थबुधफलम्।**

यदा स्त्रीजातकस्य दशमभावे बुधो भवेत्तदा सा सुकर्मरता प्रीतिप्रधाना नीतिपरायणा विनीता प्रभूतकोशाश्वसुवर्णसुखभाक् च भवति।

**एकादशभावस्थबुधफलम्।**

यदा स्त्रीजातकस्य एकादशभावे बुधो भवेत्तदा सा पतिव्रता पतिप्रिया भर्तृसमृद्ध्या सन्तुष्टा लाभान्विता वस्त्रालङ्कारप्रिया च भवति।

**द्वादशभावस्थबुधफलम्।**

यदा स्त्रीजातकस्य द्वादशभावे बुधो भवेत्तदा सोद्विग्नमना गुणहीना विवादप्रिया विलक्ष्या प्रभावप्रतापरहिता कृशाङ्गी सज्जननिरस्ता च भवति।

## जन्मकुण्डल्यां द्वादशभावेषु गुरोः साधारणफलम्।

### प्रथमभावस्थगुरुफलम्।

यदा स्त्रीजातकस्य प्रथमभावे गुरुर्भवेत्तदा सा स्त्री सत्याचरणायुक्ता अत्यन्त मनोहरभोक्त्री गम्भीरवाणीयुक्ता सज्जनानां पक्षे स्वमत प्रदर्शिका सुशरिणी एवं उत्तमाङ्गी च भवति।

### द्वितीयभावस्थगुरुफलम्।

यदा स्त्रीजातकस्य द्वितीयभावे गुरुर्भवेत्तदा सा अधिकसमृद्धा सौभाग्यशालिनी मनोहरा सद्धर्मपरायणा नीतिविचारशीला गौरवशालिनी स्पृहाहीना हानिरहिता च भवति ।

### तृतीयभावस्थगुरुफलम्।

यदा स्त्रीजातकस्य तृतीयेभावे गुरुर्भवेत्तदा सा प्रभावशालिजीवनरहिता दोषयुक्तशरीरः:कुकर्मरता धनहीना हीनङ्गा च भवति।

### चतुर्थभावस्थगुरुफलम्।

यदा स्त्रीजातकस्य चतुर्थेभावे गुरुर्भवेत्तदा सा नैकसुखभोक्त्री प्रभूतसमृद्धनीधियुक्ता नैकभृत्ययुक्ता प्रख्याता पूजिता अनेकगुणैर्गौरवान्विता च भवति।

### पञ्चमभावस्थगुरुफलम्।

यदा स्त्रीजातकस्य पञ्चभावे गुरुर्भवेत्तदा सा सत्पुत्रैः युक्ता पापकृत्यहीना अनुकूलाचरणकर्त्री व्रतधर्माचरणानुरागिणी सत्यव्यवहारकर्त्री सभाचतुरा भव्याकृति च भवति।

### षष्ठभावस्थगुरुफलम्।

यदा स्त्रीजातकस्य षष्ठभावे गुरुर्भवेत्तदा सा नैकविरोधीयुक्ता नीतिविचारशीला अनेककष्टभोक्त्री त्रस्तजीवनयापिनी मुख्यकार्यकारिणी व्यवहारदक्षा च भवति।

**सप्तमभावस्थगुरुफलम्।**

यदा स्त्रीजातकस्य सप्तमभावे गुरुर्भवेत्तदा सा सद्भवानायुक्ता पुण्यरता ज्ञानरता अनेकशास्त्रज्ञा पतिप्रिया कीर्तिमती च भवति।

**अष्टमभावस्थगुरुफलम्।**

यदा स्त्रीजातकस्य अष्टमभावे गुरुर्भवेत्तदा सा अल्पसत्याचरणकर्त्री हीनचरिता पतिना परित्यक्ता दीर्घहस्तपादयुक्ता व्यसनयुक्ता अतिभोजनशीला रोगिणी च भवति।

**नवमभावस्थगुरुफलम्।**

यदा स्त्रीजातकस्य नवमभावे गुरुर्भवेत्तदा सा वाटिकामन्दिरादिनिर्माणकर्त्री सत्याचरणा जनसुविधोपयोगिरचनाभि: सन्तुष्टा अतिधनिका नीचजनानां प्रति उपकारिणी भवति।

**दशमभावस्थगुरुफलम्।**

यदा स्त्रीजातकस्य दशमभावे गुरुर्भवेत्तदा सा अत्यन्तविनम्रा अनुशासिता कीर्तिमती शोभाशालिनी कलानुरक्ता सत्याचरणप्रिया प्रसिद्धकार्यकर्त्री विशिष्टगुणयुक्ता गुणिजनानामादरप्रदात्री च भवति।

**एकादशभावस्थगुरुफलम्।**

यदा स्त्रीजातकस्य एकादशभावे गुरुर्भवेत्तदा सा नैकपरिचारिकायुक्ता विनीता प्रगल्भा अद्भुतकार्यकर्त्री सदैव स्वप्रशंसाश्रवणेऽनुरक्ता च भवति।

**द्वादशभावस्थगुरुफलम्।**

यदा स्त्रीजातकस्य द्वादशभावे गुरुर्भवेत्तदा सत्कार्येषु धनव्ययकर्त्री प्रेमभावयक्ता नैकलाभान्विता कुलधर्महीना दुष्टस्वभावा परधर्मरता च भवति।

**जन्मकुण्डल्यां द्वादशभावेषु शुक्रस्य साधारणफलम्।**

**प्रथमभावस्थशुक्रफलम्।**

यदा स्त्रीजातकस्य प्रथमभावे  शुक्रो भवेत्तदा सा स्त्री अतिमनोहराकृति: सौभाग्यशालिनी विदुषी धनसमृद्धा दोषमुक्तशरीरवती शत्रुजिता सुशीला च भवति।

**द्वितीयभावस्थशुक्रफलम्।**

यदा स्त्रीजातकस्य द्वितीयभावे शुक्रो भवेत्तदा सा धनाढ्या विदग्धचेष्टा सरलया नोपलब्धा धर्मध्वजभूता विख्यातकर्मकर्त्री मृदुभाषिणी च भवति।

**तृतीयभावस्थशुक्रफलम्।**

यदा स्त्रीजातकस्य तृतीयभावे शुक्रो भवेत्तदा सा दीनबान्धवयुक्ता सञ्चितधनयुक्ता पतिना परित्यक्ता अतिनिर्दया गद्गद्भाषिणी च भवति।

**चतुर्थभावस्थशुक्रफलम्।**

यदा स्त्रीजातकस्य चतुर्थभावे शुक्रो भवेत्तदा साऽतिसुखभोक्त्री धनाढ्या विलासिनी धार्मिककर्मप्रिया जितेन्द्रिया वंशे विभूषणा च भवति।

**पञ्चमभावस्थशुक्रफलम्।**

यदा स्त्रीजातकस्य पञ्चमभावे शुक्रो भवेत्तदा सा समृद्धा नैककन्यामाता रम्यकार्यपद्धतिप्रिया, दु:संगहीना स्वगृहे सदैव प्राधान्यं भजमाना च भवति।

**षष्ठभावस्थशुक्रफलम्।**

यदा स्त्रीजातकस्य षष्ठभावे शुक्रो भवेत्तदा साऽधिकईर्ष्याप्रधानाऽतिकोपयुक्ता प्रकृत्या ऽतितीक्ष्णा शत्रुजिता पतिपुत्रैश्चोपिक्षिता भवति।

**सप्तमभावस्थशुक्रफलम्।**

यदा स्त्रीजातकस्य सप्तमभावे शुक्रो भवेत्तदा साऽतिधनवती प्रभावशालिनी स्वपतिप्रिया शास्त्ररता विप्रप्रियकारिणी लोकप्रिया च भवति।

**अष्टमभावस्थशुक्रफलम्।**

यदा स्त्रीजातकस्य अष्टमभावे शुक्रो भवेत्तदा सा प्रमत्ताऽसावधाना विषादयुक्ता वैभवहीना दयाहीना परवञ्चिता कुचैला धर्महीन च भवति।

**नवममभावस्थशुक्रफलम्।**

यदा स्त्रीजातकस्य नवमभावे शुक्रो भवेत्तदा सुमुख्या वस्त्रादिसमृद्धिभोक्त्री सन्तुष्टा सबलमना पुरुषमना पुरुषवदाचरणसक्ता च भवति।

**दशमभावस्थशुक्रफलम्।**

यदा स्त्रीजातकस्य दशमभावे शुक्रो भवेत्तदा सा यशस्विनी अतिधनवती प्रसिद्धकार्यकर्त्री सन्मानभोक्त्री बुद्धिमती  सत्याचरणप्रिया च भवति।

**एकादशभावस्थशुक्रफलम्।**

यदा स्त्रीजातकस्य एकादशभावे शुक्रो भवेत्तदा नैकलाभान्विता दोषरहिताऽनेकशास्त्रेषु सहजाकर्षणवती अतिप्रभावशालिनी अनेकजनाश्रयदात्री च भवति।

**द्वादशभावस्थशुक्रफलम्।**

यदा स्त्रीजातकस्य द्वादशभावे  शुक्रो भवेत्तदाऽशुभकार्येषु धनव्ययकर्त्री दु:खभाक् कामुकी मायाविनी व्यवहारकर्त्री कृत्रिमभाषिणी रोगग्रस्ता बुद्धिहीना च भवति।

**जन्मकुण्डल्यां द्वादशभावेषु शनैश्चरस्य साधारणफलम्।**

**प्रथमभावस्थशनैश्चरफलम्।**

यदा स्त्रीजातकस्य प्रथमभावे शनैश्चरो भवेत्तदा सा स्त्री कुरूपाऽतिपरिश्रमा कीर्तिरहिता दीर्घहस्तपादास्थियुक्ता दीर्घन्तनेत्रवती च भवति।

**द्वितीयभावस्थशनैश्चरफलम्।**

यदा स्त्रीजातकस्य द्वितीयभावे शनैश्चरो भवेत्तदा सा धनहीना सर्वत्रोपेक्षिता सर्वनिरस्ता प्रणयभावरहिता निर्दयस्वभाववती नीतिनियमविचारैः संकुला च भवति।

**तृतीयभावस्थशनैश्चरफलम्।**

यदा स्त्रीजातकस्य तृतीयभावे शनैश्चरो भवेत्तदा सा कार्यदक्षा सर्वत्र प्राधान्यं भजमाना ऽतिधनभाग्यवती अनेकसन्तानवती शासनस्वभावा सज्जनमान्या च भवति।

**चतुर्थभावस्थशनैश्चरफलम्।**

यदा स्त्रीजातकस्य चतुर्थभावे शनैश्चरो भवेत्तदा सा ससुखजीवनयापिनी किन्तु बुद्धिहीना कृतघ्नी चञ्चलस्वभावा वैभवरहिता नीचसङ्गत्या व्याकुला च भवति।

**पञ्चमभावस्थशनैश्चरफलम्।**

यदा स्त्रीजातकस्य पञ्चमभावे शनैश्चरो भवेत्तदा सा दयाहीना दर्पवती सज्जनसङ्गरहिता वेश्यानुकारिणी पुत्रहीना च भवति।

**षष्टभावस्थशनैश्चरफलम्।**

यदा स्त्रीजातकस्य षष्ठभावे शनैश्चरो भवेत्तदा सा गुणानुरागिणी मन्दस्वभावा पुत्रप्रधाना वस्त्राभरणयुक्ता पुत्रप्रिया च भवति।

**सप्तमभावस्थशनैश्चरफलम्।**

यदा स्त्रीजातकस्य सप्तमभावे शनैश्चरो भवेत्तदा सा दोषयुक्ता बहुकुटुम्बभाग्विधवा सर्वविवर्जिता रुग्णा कुमित्रा च भवति।

**अष्टमभावस्थशनैश्चरफलम्।**

यदा स्त्रीजातकस्य अष्टमभावे शनैश्चरो भवेत्तदा सा धर्महीनाऽसत्यप्रिया कपटप्रिया निजकर्मदोष-युक्ता च भवति।

**नवमभावस्थशनैश्चरफलम्।**

यदा स्त्रीजातकस्य नवमभावे शनैश्चरो भवेत्तदा सा कुकर्मरताऽत्यधिकधनव्यया लुब्धमित्रावृता विद्याहीना गर्विणी च भवति।

**दशमभावस्थशनैश्चरफलम्।**

यदा स्त्रीजातकस्य दशमभावे शनैश्चरोभवेत्तदा सा कुकर्मसङ्गा विकृतकार्यकर्त्री कुशास्त्राध्यनप्रियः स्वभावदुष्टा धनहीना च भवति।

**एकादशभावस्थशनैश्चरफलम्।**

यदा स्त्रीजातकस्य एकादशभावे शनैश्चरो भवेत्तदा सा सुपुत्रवती सद्धनवती सुन्दरमुखाकृतियुक्ता सर्वसुखभाल्लाभान्विता भयग्रस्ता च भवति।

**द्वादशभावस्थशनैश्चरफलम्।**

यदा स्त्रीजातकस्य द्वादशभावे शनैश्चरो भवेत्तदा सा रक्तस्रावा रक्तविकारग्रस्ता वातपीडिता कफरोगिणी विवेकहीना कुटिला व्यसनप्रिया च भवति।

**जन्मकुण्डल्यां द्वादशभावेषु प्रजापतेः (हर्षलस्य) साधारणफलम्।**

**प्रथमभावस्थप्रजापतिफलम्।**

यदा जातकस्य जन्मकुण्डल्यां प्रथमभावे प्रजापतिर्भवेत्तदा जातकोऽविश्वसनीयो विचित्रप्रकार-श्चञ्चलः साहसिकस्तत्त्वज्ञ उग्रस्वभावः शीघ्रगोऽन्वेषकश्च भवति।

**द्वितीयभावस्थप्रजापतिफलम्।**

यदा द्वितीयभावे प्रजापतिर्भवेत्तदा जातको नेत्ररोगी वक्त्ररोगी धनचिन्तायुक्तश्च भवति।

**तृतीयभावस्थप्रजापतिफलम्।**

यदा तृतीयभावे प्रजापतिर्भवेत्तदा जातको विचित्रस्वभावः प्राज्ञः कुशाग्रबुद्धिश्च भवति।

**चतुर्थभावस्थप्रजापतिफलम्।**

यदा चतुर्थभावे प्रजापतिर्भवेत्तदा जातको गृहसुखरहितो मातृपितृवियोगी कुटुम्बचिन्तायुक्तश्च भवति।

**पञ्चमभावस्थप्रजापतिफलम्।**

यदा पञ्चमभावे प्रजापतिर्भवेत्तदा जातको विचित्रस्वभावो भाग्यसम्बन्धिव्यवसायेनाल्पलाभः सन्ताहीनः सन्ततिचिन्तायुक्तो विकलाङ्गसन्ततिमांश्च भवति।

**षष्ठभावस्थप्रजापतिफलम्।**

यदा षष्ठभावे प्रजापतिर्भवेत्तदा जातको विविधरोगग्रस्तो भवति।

**सप्तमभावस्थप्रजापतिफलम्।**

यदा सप्तमभावे प्रजापतिर्भवेत्तदा जातकः शठो हिंसक उग्रः स्त्रीपीडितो भवति। जातकस्य विवाहो विलम्बेनाथवा प्रथमविवाहभङ्गपूर्वकं द्वितीयविवाहो भवति। संयुक्तव्यवसायीऽल्पलाभो महानुभावैः सह जातकस्याकारणं शत्रुत्वमुत्पद्यते।

**अष्टमभावस्थप्रजापतिफलम्।**

यदा अष्टमभावे प्रजापतिर्भवेत्तदा जातको रोगी मित्रेभ्यः प्रवञ्चनावान् द्रव्यचिन्तायुक्तः कदाचिदाकस्मिकमृत्युं प्राप्नोति।

**नवमभावस्थप्रजापतिफलम्।**

यदा नवमभावे प्रजापतिर्भवेत्तदा जातकः सुदूरप्रवासी सत्सङ्गी दूरद्रष्टा लब्धकीर्तिः पत्नीसम्बन्धिभिर्जनैः पीडितश्च भवति।

**दशमभावस्थप्रजापतिफलम्।**

यदा दशमभावे प्रजापतिर्भवेत्तदा जातको लोकप्रसिद्धो राजकारणे सक्रियश्चञ्चलः कल्पकः कार्यशीलो महाजनाश्रयवांश्च भवति।

**एकादशभावस्थप्रजापतिफलम्।**

यदैकादशभावे प्रजापतिर्भवेत्तदा जातक आकस्मिकलब्धधनः क्वचित् मित्रैः सङ्कटपतितः प्रसिद्धजनाश्रयवान् कीर्तिसम्पन्नश्च भवति।

**द्वादशभावस्थप्रजापतिफलम्।**

यदा द्वादशभावे प्रजापतिर्भवेत्तदा जातको नित्यधनचिन्तायुक्तो भग्नमनोरथो व्यवसाये उच्चाधिकारी स्वजनपराङ्मुख दस्युसङ्गी राजदण्डभाक् च भवति।

**जन्मकुण्डल्यां द्वादशभावेषु वरुणस्य (नेपच्यूनस्य) साधारणफलम्।**

**प्रथमेभावस्थवरुणफलम्।**

यदा प्रथमेभावे वरुणो भवेत्तदा जातकः स्वाभिमानी उन्मत्तः कल्पकोऽस्थिरो मत्सरी दीर्घचिन्तकः सुवस्त्रधारी विकाराधीनः समुद्रप्रवासेच्छुकः प्रियसङ्गीतोऽध्यात्मनिष्ठः स्वप्नप्रलापी च भवति।

**द्वितीयभावस्थवरुणफलम्।**

यदा द्वितीयभावे वरुणो भवेत्तदा जातको न्यूनसम्पतिकोऽव्यवस्थितः पिशाचविद्यासेवी नानाव्यवसाय तत्परो ललितकलावान् लेखको वक्ता कलाद्वाराद्रव्यलाभी च भवति।

**तृतीयभावस्थवरुणफलम्।**

यदा तृतीयभावे वरुणो भवेत्तदा जातक उत्तमलेखकः प्रगल्भोऽध्यात्मरतः सूचकस्वप्नद्रष्टा बन्धुसौख्यहीनश्च भवति।

**चतुर्थभावस्थवरुणफलम्।**

यदा चतुर्थभावे वरुणो भवेत्तदा जातको वृद्धस्त्रीभिः कुटुम्बक्लेशभाक् मातृकष्टदायी स्वेष्टजन-मृत्युकारणात् स्वयमपि उद्विग्नदशामृत्युश्च भवति।

**पञ्चमभावस्थवरुणफलम्।**

यदा पञ्चमभावे वरुणो भवेत्तदा जातकस्तन्तुवाद्यकुशलो ललितकलासेवी विद्याव्यासङ्गी अन्वेषकः प्रेमविवाहयोगवान् अध्यात्मप्रेमी अल्पकालिकनमित्रसुखवाहो बहुप्रजावाँश्च भवति।

**षष्ठभावस्थवरुणफलम् ।**

यदा षष्ठभावे वरुणो भवेत्तदा जातक औषधानामत्यधिकसेवनेन रोगी प्राय उदररोगी गुह्यरोगी वा भवति।

**सप्तमभम्स्थवरुणफलम्।**

यदा सप्तमभावे वरुणो भवेत्तदा जातको द्विभार्यावान् कदाचित् गुप्तविवाहसम्बधवान् विवाहकर्मणि बहुविधपीडितो विश्वासघातुकमित्रवान् संयुक्तव्यवसाया लाभहीनो भवति।

**अष्टमभावस्थवरुणफलम्।**

यदाऽष्टमभावे वरुणो भवेत्तदा जातको जलघातेनपीडितो भोजनौषधादिप्रमादे न पीडितो मृतान् प्रतिसमादरयुक्तो मृत्युपत्रविषयकपित्र्यसम्पतिविषये संयुक्तव्यवसायसमये सम्बन्धे बहुलविघ्नवांश्च भवति। स कदाचित् समाधि द्वारामोक्षसुखलाभवान् भवति।

**नवमभावस्थवरुणफलम्।**

यदा नवमभावे वरुणो भवेत्तदा जातकोऽध्यात्मशास्त्रव्यासङ्गी गूढतत्त्वजिज्ञासुर्नूतनान्वेषण तत्पर: प्राक्तनजन्मयोगभ्रष्ट इव शास्त्रस्फुरणशील: क्वचित् स्वप्नेऽपिलाभवान् काव्यनाटकादि ललितकलानिपुणो भवति।

**दशमभावस्थवरुणफलम्।**

यदा दशमभावे वरुणो भवेत्तदा जातको व्यवहारकुशलो जलसम्बधिव्यवसायनिपुणो क्वचित् न्निम्नव्यवसाययोगी चित्रसङ्गीतादिललितकलाप्रिय: परमनोविकारज्ञो भवति।

**एकादशभावस्थवरुणफलम्।**

यदैकादशभावे वरुणो भवेत्तदा जातको मित्र–नैकटिक–परिचितजनादिभि: कार्यसाधनकुशलो भवति।

**द्वादशभावस्थवरुणफलम्।**

यदा द्वादशभावे वरुणो भवेत्तदा जातकश्चिकित्सालय–कारागृह–दूरमन्त्रस्थान–संशोधन–स्थानैर्लाभवांश्च भवति।

**जन्मकण्डल्यां द्वादशभावेषु यमस्य(प्लुटोग्रहस्य) साधारणफलम्।**

**प्रथमभावस्थयमफलम्।**

यदा प्रथमभावे यमो[८] भवेत्तदा जातकोऽनुयायिसम्पन्नो नम्रः परमेश्वरे गाढश्रद्धावान् दैववादी सद्वर्तनश्च भवति।

**द्वितीयभावस्थयमफलम्।**

यदा द्वितीयभावे यमो भवेत्तदा जातकः सम्पत्या समृद्धः शास्त्राध्यायी च भवति।

**तृतीयभावस्थयमफलम्।**

यदा तृतीयभावे यमो भवेत्तदा जातको ज्ञानपिपासु शास्त्रानुसारिजीवनयापने प्रयत्नशीलः सम्बधिजनसौख्यरहितश्च भवति।

**चतुर्थभावस्थयमफलम्।**

यदा चतुर्थभावे यमो भवेत्तदा जातको भूमि–कृषि–आकरादिभिर्लाभवान् चिन्तनशीलः प्रत्यक्षव्यवहारेऽनिपुणश्च भवति।

**पञ्चमभावस्थयमफलम्।**

यदा पञ्चमभावे यमो भवेत्तदा जातको नानासाधनैः सुखं प्राप्तुमिच्छुर्ज्ञानग्रहणतत्परो हर्षवृत्तिकः कार्यक्षमः सततोत्साहवान् च भवति।

---

[८] विशेषार्थं परिशिष्टम्–०३ द्रष्टव्यम्।

**षष्ठभावस्थयमफलम्।**

यदा षष्ठभावे यमो भवेत्तदा जातकोऽस्वस्थ परजनैः स्वकार्यसाधनकुशलः संस्थादि कार्यसंचालननिपुणः सेवापरायणः श्रद्धावान् साधुवृत्तिश्च भवति।

**सप्तमभावस्थयमफलम्।**

यदा सप्तमभावे यमो भवेत्तदा जातकोऽस्वस्थदाम्पत्यजीवनः स्नेहशून्यः सामाजिकप्रतिष्ठाविषये प्रमत्तो भवति। तस्य सामाजिक समस्या जायन्ते सामाजिकजनेभ्यश्च विरोधपीडाश्च प्राप्यन्ते।

**अष्टमभावस्थयमफलम्।**

यदाऽष्टमभावे यमो भवेत्तदा जातकः संस्मरणीयं मृत्यंमरणोत्तर संमानभाक् उन्नतध्येयार्थं स्वबलिदानतत्परोऽध्यात्मनिष्ठो दैवसामर्थ्यविषये भौतिकेतरविषयेऽध्ययनशीलो वशीकरणरुचिश्च भवति।

**नवमभावस्थयमफलम्।**

यदा नवमभावे यमो भवेत्तदा जातको दूरदेशप्रवासशीलो विश्वबन्धुत्वभावनासम्पन्न आध्यात्मिकज्ञानसम्पन्नो व्यवहारकुशलश्च भवति।

**दशमभावस्थयमफलम्।**

यदा दशमभावे यमो भवेत्तदा जातकोऽग्रणीः कुशलकार्यकर्ता नानाविधान्दोलनकारी विरोधप्रकटनपूर्वं प्रतिपक्षपराजयकर्ता स्फूर्तिसम्पन्नो ध्येयवादी नानोद्योगव्यवसायादिषु लब्धप्रसरो भवति।

**एकादशभावस्थयमफलम्।**

यदैकादशभावे यमो भवेत्तदा जातको मित्रार्थं स्वार्थत्यागशील आकस्मिकमधनलाभवान् सर्वाजनिककार्येषु दत्तचित्तश्च भवति।

**द्वादशभावस्थयमफलम्।**

यदा द्वादशभावे यमो भवेत्तदा जातकः प्रतिबोधनिपुणो दैवसामर्थ्यप्राप्तये कृतोद्यमोऽध्यात्मप्रचारे च तत्परो भवति। परिणामे च कीर्तिं लभते।

## लग्नादिद्वादशभावेषु चापनामकोपग्रहस्य(इन्द्रधनुषस्य) साधारणफलम्।

### प्रथमभावस्थचापफलम्।

यदा प्रथमभावे चापग्रहो[१] भवेत्तदा जातको दोषरहितः कृतज्ञो धनधान्याभिः परिपूर्णः सज्जनसङ्गी च भवति।

### द्वितीयभावस्थचापफलम्।

यदा द्वितीयभावे चापग्रहो भवेत्तदा जातको विनीतः प्रगल्भो विद्वान् मनोहरो धार्मिकः प्रियवक्ता च भवति।

### तृतीयभावस्थचापफलम्।

यदा तृतीयभावे चापो भवेत्तदा जातकः कृपणः कालनिपुणः सदातस्करकर्मरतश्च भवति।

### चतुर्थभावस्थचापफलम्।

यदा चतुर्थभावे चापो भवेत्तदा जातको नीरोगी सुखी गोयुक्तो धनिको धान्यसम्पन्नो नृपसमानभाक् च भवति।

### पञ्चमभावस्थचापफलम्।

यदा पञ्चमभावे चापो भवेत्तदा जातको दीर्घदर्शी कान्तिमान् देवभक्तः प्रियवक्ता कर्मवृद्धिकरश्च भवति।

### षष्ठभावस्थचापफलम्।

यदा षष्ठभावे चापो भवेत्तदा जातकः सरलस्वभावः पवित्रः सुखी कार्ये लब्धसमृद्धिः शत्रुनाशकश्च भवति।

---

[१] विशेषार्थं परिशिष्टम्–०३ द्रष्टव्यम्।

**सप्तमभावस्थचापफलम्।**

यदा सप्तमभावे चापो भवेत्तदा जातकः शास्त्रज्ञ ईश्वरसदृशगुणवान् धार्मिकः प्रियभाषी च भवति।

**अष्टमभावस्थचापफलम्।**

यदाऽष्टमभावे चापो भवेत्तदा जातकः क्रूरः परकार्यरतः परस्त्रीरतः कष्टलब्धमृत्युश्च भवति।

**नवमभावस्थचापफलम्।**

यदा नवमभावे चापो भवेत्तदा जातकस्तपस्वी व्रतासक्तो विद्वान् लोकप्रसिद्धश्च भवति।

**दशमभावस्थचापफलम्।**

यदा दशमभावे चापो भवेत्तदा जातको लोकप्रसिद्धो बहुधनवान् गोमहिषीधनैश्वर्ययुक्तश्च भवति।

**एकादशभावस्थचापफलम्।**

यदैकादशभावे चापो भवेत्तदा जातको नीरोगी सुदृढदेहः कोपाग्निमन्त्रपरमास्त्रज्ञः स्त्रीनिपुणो लाभयुक्तश्च भवति।

**द्वादशभावस्थचापफलम्।**

यदा द्वादशभावे चापो भवेत्तदा जातको दुष्टोऽभिमानी दुर्बुद्धिर्निर्लज्जो निर्धनः परस्त्रीलोलुपश्च भवति।

**लग्नादि द्वादशभावेषु परिधिनामकोपग्रहस्य (परिवेषस्य) साधारणफलम्।**

**प्रथमभावस्थपरिधिफलम्।**

यदा प्रथमभावे परिधिः[१०] भवेत्तदा जातकः सत्यवादी विद्वान् शान्तस्वभावो दानी धनिकः पवित्रः पुत्रवान् गुरुभक्तश्च भवति।

---

[१०] विशेषार्थं परिशिष्टम्-०३ द्रष्टव्यम्।

द्वितीया दृष्टिः।

**द्वितीयभावस्थपरिधिफलम्।**

यदा द्वितीयभावे परिधिर्भवेत्तदा जातको धर्मपरायणः समर्थः सुखी भोगी रूपवान् च भवति।

**तृतीयभावस्थपरिधिफलम्।**

यदा तृतीयभावे परिधिर्भवेत्तदा जातको मनोहरः स्त्रीप्रियो देवभक्तः स्वजनयुक्तो धनिको भृत्यवत्सलश्च भवति।

**चतुर्थभावस्थपरिधिफलम्।**

यदा चतुर्थभावे परिधिर्भवेत्तदा जातकोऽक्रूरः सरलचित्तो गीतसङ्गीतज्ञश्च भवति।

**पञ्चभावस्थपरिधिफलम्।**

यदा पञ्चमभावे परिधिर्भवेत्तदा जातको धार्मिकः शीलवान् लक्ष्मीवान् स्त्रीप्रियश्च भवति।

**षष्ठभावस्थपरिधिफलम्।**

यदा षष्ठभावे परिधिर्भवेत्तदा जातकः प्रख्यातो भोगी सर्वजनहितकारी शत्रुयुक्तोऽपिशत्रुनाशकः पुत्रवान् धनिकश्च भवति।

**सप्तमभावस्थपरिधिफलम्।**

यदा सप्तमभावे परिधिग्रहो भवेत्तदा जातको मन्दबुद्धि उग्रस्वभावोऽल्पसन्ततियुक्तः सुखहीन स्त्रीदुःखेन दुःखी च भवति।

**अष्टमभावस्थपरिधिफलम्।**

यदाऽष्टमभावे परिधिर्भवेत्तदा जातकः शान्तस्वभावो वेदान्ती दृढनिश्चयी दृढकार्यकर्ता धार्मिको बलवांश्च भवति।

**नवमभावस्थपरिधिफलम्।**

यदा नवमभावे परिधिर्भवेत्तदा जातको मनोहरो धनिकोऽचञ्चल सुखी पुत्रयुक्तः सन्तोषी च भवति।

**दशमभावस्थपरिधिफलम्।**

यदा दशमभावे परिधिर्भवेत्तदा जातको भोगी बलवान् द्वेषरहितः सर्वशास्त्रविशारदश्च भवति।

**एकादशभावस्थपरिधिफलम्।**

यदैकादशभावे परिधिर्भवेत्तदा जातको गुणवान् मन्दाग्निर्बुद्धिमान् बन्धुप्रियः स्त्रीभोगी रोगपीडितश्च भवति।

**द्वादशभावस्थपरिधिफलम्।**

यदा द्वादशभावे परिधिर्भवेत्तदा जातको गुरुनिन्दको दुःखी अतिक्रोधी व्यर्थव्ययी च भवति।

**लग्नादि द्वादशभावेषु पातनामकोपग्रहस्य (व्यतिपातस्य) साधारणफलम्।**

**प्रथमभावस्थपातफलम्।**

यदा प्रथमभावे पातो[११] भवेत्तदा जातकः पीडिताङ्गो दुःखी क्रूरो मूर्खो बन्धुद्वेषी च भवति।

**द्वितीयभावस्थपातफलम्।**

यदा द्वितीयभावे पातो भवेत्तदा जातकः कुटिलः पित्तरोगी निर्लज्जः कृतघ्नो दुष्टात्मा पापश्च भवति।

**तृतीयभावस्थपातफलम्।**

यदा तृतीयभावे पातो भवेत्तदा जातकः स्थिरबुद्धिर्दानी धनिकः सेनापतिर्नृपप्रियश्च भवति।

**चतुर्थभावस्थपातफलम्।**

यदा चतुर्थभावे पातो भवेत्तदा जातको व्याधियुक्तो प्राप्तबन्धनो भाग्यहीनः पुत्रहीनश्च भवति।

**पञ्चमभावस्थपातफलम्।**

यदा पञ्चमभावे पातो भवेत्तदा जातको दयाहीनो निर्लज्ज कफपित्तवायुरोगी दरिद्रो रूपवाश्च भवति।

---

[११] विशेषार्थं परिशिष्टम्–०३ द्रष्टव्यम्।

**षष्टभावस्थपातफलम्।**

यदा षष्ठभावे पातो भवेत्तदा जातको दृढदेहः कलानिपुणः शान्तस्वभावः सकलास्त्रधारी शत्रुनाशकश्च भवति।

**सप्तमभावस्थपातफलम्।**

यदा सप्तमभावे पातो भवेत्तदा जातको धनपुत्रस्त्रीरहितो द्यूतप्रियः कामी निर्लज्जः कष्टजीविकश्च भवति।

**अष्टमभावस्थपातफलम्।**

यदाऽष्टमभावे पातो भवेत्तदा जातकः कुरूपो हीनाङ्गोअङ्गहीनो दरिद्रो ब्राह्मणनिन्दको रक्तपीडितश्च भवति।

**नवमभावस्थपातफलम्।**

यदा नवमभावे पातो भवेत्तदा जातको बुद्धिमान् मधुरभाषी बहुव्यवसायरतो बहुशास्त्रविद् स्त्रीप्रियश्च भवति।

**दशमभावस्थपातफलम्।**

यदा दशमभावे पातो भवेत्तदा जातको धार्मिकः सततधर्माचरणरतः प्रख्यातः पण्डितश्च भवति।

**एकादशभावस्थपातफलम्।**

यदैकादशभावे पातो भवेत्तदा जातको दृढप्रतिज्ञः सत्यवादी धनिको गीतकलानिपुणोऽश्वादि-वाहनयुक्तश्च भवति।

**द्वादशभावस्थपातफलम्।**

यदा द्वादशभावे पातो भवेत्तदा जातकोऽङ्गहीनः क्रोधी धर्मनिन्दको बन्धुद्वेषी बहुकार्यसंलग्नश्च भवति।

## लग्नादि द्वादशभावेषु धूमनामकोपग्रहस्य साधारणफलम्।

### प्रथमभावस्थधूमफलम्।

यदा प्रथमभावे धूमग्रहो[१२] भवेत्तदा जातकः क्रोधी दुष्टो मूर्खो निर्लज्जः शूरो विमलनेत्रवान् दृढस्कन्धश्च भवति।

### द्वितीयभावस्थधूमफलम्।

यदा द्वितीयभावे धूमो भवेत्तदा जातकोऽपहृतमानसो मन्दबुद्धिर्नपुंसको विकलाङ्गो रोगग्रस्तो धनिकश्च भवति।

### तृतीयभावस्थधूमफलम्।

यदा तृतीयभावे धूमो भवेत्तदा जातकः शुद्धचित्तो बुद्धिमान् मधुरवचनी पराक्रमी धनसंग्रही धनिकश्च भवति।

### चतुर्थभावस्थधूमफलम्।

यदा चतुर्थभावे धूमो भवेत्तदा जातकः सर्वशास्त्रार्थचिन्तको नित्यदुःखी स्त्रीपुत्ररहितश्च भवति।

### पञ्चमभावस्थधूमफलम्।

यदा पञ्चमभावे धूमो भवेत्तदा जातको गौरवयुक्तः सर्वपदार्थभक्षी अल्पसन्ततिमान् सुहृन्मित्ररहितश्च भवति।

### षष्ठभावस्थधूमफलम्।

यदा षष्ठभावे धूमो भवेत्तदा जातकस्तेजस्वी प्रख्यातो नीरोगी शत्रुनाशकश्च भवति।

### सप्तमभावस्थधूमफलम्।

यदा सप्तमभावे धूमो भवेत्तदा जातको निस्तेजाः कामसन्तप्तः परस्त्रीगमनेच्छुकश्च भवति।

---

[१२] विशेषार्थं परिशिष्टम्–०३ द्रष्टव्यम्।

**अष्टमभावस्थधूमफलम्।**

यदाऽष्टमभावे धूमो भवेत्तदा जातक उत्साही सत्संकल्पवान्निष्ठुरोऽप्रियः पराक्रमहीनश्च भवति।

**नवममभावस्थधूमफलम्।**

यदा नवमेभावे धूमो भवेत्तदा जातको भाग्यवान् दयालुर्धनिको बन्धुप्रियो पुत्रवांश्च भवति।

**दशमभावस्थधूमफलम्।**

यदा दशमभावे धूमो भवेत्तदा जातको दृढसत्यवादी भाग्यवान् बुद्धिमान् सुखी पुत्रवांश्च भवति।

**एकादशभावस्थधूमफलम्।**

यदैकादशभावे धूमो भवेत्तदा जातको रूपवान् गीतसङ्गीतज्ञो धनधान्यादिपूर्णश्च भवति।

**द्वादशभावस्थधूमफलम्।**

यदा द्वादशभावे धूमो भवेत्तदा जातकः पतितः पापः परस्त्रीरतो निर्लज्जो व्यसनी च भवति।

**लग्नादि द्वादशभावेषु गुलिकनामकोपग्रहस्य साधारणफलम्।**

**प्रथमभावस्थगुलिकफलम्।**

यदा प्रथमभावे गुलिको[१३] भवेत्तदा जातको रोगी कामी मूर्खो दुःखी दुराचाररतश्च  भवति ।

**द्वितीयभावस्थगुलिकफलम्।**

यदा द्वितीयभावे गुलिको भवेत्तदा जातको निर्धनो व्यसनशीलः प्रवासी क्रोधी च भवति।

**तृतीयभावस्थगुलिकफलम्।**

यदा तृतीयभावे गुलिको भवेत्तदा जातको मनोहरो ग्रामणीः सज्जनः सम्मानितश्च भवति।

---

१३ विशेषार्थं परिशिष्टम्-०३ द्रष्टव्यम्।

**चतुर्थभावस्थगुलिकफलम्।**

यदा चतुर्थभावे गुलिको भवेत्तदा जातको रोगग्रस्तो दुःखी पापो विद्वान् धनिकश्च भवति।

**पञ्चमभावस्थगुलिकफलम्।**

यदा पञ्चमभावे गुलिको भवेत्तदा जातकोऽल्पपुत्रवाननपत्यो वा निर्धनोऽल्पायुर्नास्तिकश्च भवति।

**षष्ठभावस्थगुलिकफलम्।**

यदा षष्ठभावे गुलिको भवेत्तदा जातकः प्रेतविद्यानिपुणो विनोदी स्त्रीरतश्च भवति।

**सप्तमभावस्थगुलिकफलम्।**

यदा सप्तमभावे गुलिको भवेत्तदा जातको द्वेषी कृतघ्नो विवादप्रियश्च भवति।

**अष्टमभावस्थगुलिकफलम्।**

यदाऽष्टमभावे गुलिको भवेत्तदा जातको मुखरोगी नेत्ररोगी च भवति।

**नवमभावस्थगुलिकफलम्।**

यदा नवमभावे गुलिको भवेत्तदा जातको दुःखी दुर्बलो दुष्टो निर्लज्जः कृपणः पिशुनश्च भवति।

**दशमभावस्थगुलिकफलम्।**

यदा दशमभावे गुलिको भवेत्तदा जातको धर्मानुरागी सुखी देवद्विजभक्तश्च भवति।

**एकदशभावस्थगुलिकफलम्।**

यदैकाशभावे  गुलिको भवेत्तदा जातको मनोहरो तेजस्वी पुत्रवान् स्त्रीसुखयुक्तो भवति।

**द्वादशभावस्थगुलिकफलम्।**

यदा द्वादशभावे गुलिको भवेत्तदा जातको नीचःपापः कुब्जः प्रमादी च भवति।

## लग्नादि द्वादशभावेषु शिखिनामकोपग्रहस्य साधारणफलम्।

शिखिनामकस्यउपग्रहस्य केतुरुकेतुरितिनामद्वयमपिप्राप्यते।

### प्रथमभावस्थशिखिफलम्[१४]।

यदा प्रथमभावे शिखिर्भवेत्तदा जातको विद्वानुत्तमवक्ता क्रियानिपुणश्च भवति।

### द्वितीयभावस्थशिखिफलम्।

यदा द्वितीयभावे शिखिर्भवेत्तदा जातको वक्ता मनोहरः कविः पण्डितः सम्मानभाक् वाहनस्वामी सुखी च भवति।

### तृतीयभावस्थशिखिफलम्।

यदा तृतीयभावे शिखिर्भवेत्तदा जातकः कामी क्रूरः कृशाङ्गो निर्धनो रोगी च भवति।

### चतुर्थभावस्थशिखिफलम्।

यदा चतुर्थभावे शिखिर्भवेत्तदा जातकः सद्गुणसम्पन्नः सात्विकः कीर्तमान् मनोहरः सुखी च भवति।

### पञ्चमभावस्थशिखिफलम्।

यदा पञ्चमभावे शिखिर्भवेत्तदा जातको बुद्धिमान् शास्त्रपण्डितो वाग्मी कलानिपुणश्च भवति।

### षष्ठभावस्थशिखिफलम्।

यदा षष्ठभावे शिखिर्भवेत्तदा जातको मातुलद्वेषी बन्धुयुकतः प्रतापी च भवति।

### सप्तमभावस्थशिखिफलम्।

यदा सप्तमभावे शिखिर्भवेत्तदा जातकः कामी विविधभोगयुक्तो रक्तविकारग्रस्तो गणिकागामी च भवति।

---

[१४] विशेषार्थं परिशिष्टम्–०३ द्रष्टव्यम्।

**अष्टमभावस्थशिखिफलम्।**

यदाऽष्टमभावे शिखिर्भवेत्तदा जातको नीचः पापरतो निर्ल्लजो निन्दकः स्त्रीसुखहीनश्च भवति।

**नवमभावस्थशिखिफलम्।**

यदा नवमभावे शिखिर्भवेत्तदा जातकः परहितकारी धर्मात्मा प्रसन्नचित्तश्च भवति।

**दशमभावस्थशिखिफलम्।**

यदा दशमभावे शिखिर्भवेत्तदा जातको दानी प्रमदाप्रियः सौभाग्यवान् सुखी च भवति।

**एकादशभावस्थशिखिफलम्।**

यदैकादशभावे शिखिर्भवेत्तदा जातको धनसम्पन्नो धार्मिको भाग्यवान् प्रतापी च भवति।

**द्वादशभावस्थशिखिफलम्।**

यदा द्वादशभावे शिखिर्भवेत्तदा जातको बलवान् पापरतः स्त्रीलम्पटो लज्जाहीनो नास्तिकश्च भवति।

**उपसंहारः-** अत्र द्वितीयायां दृष्ट्यां सूयादिकेतूपर्यनतानां नवानं मुख्यग्रहाणां जन्मकुण्डल्यां स्थित्यनुसारेण यद्यद्विविदं फलं दिश्यते तत्तत्फलं निरूपितम्। तदन्तरमाधुनिक ज्यौतिषशास्त्रे स्वीकृतानां प्रजापति(हर्षल)यम(प्लुटौ)वरुण(नेपच्यून)ग्रहाणामपि सामान्यफळविचारः प्रस्तुतः। अनेकशो विशिष्टफलविचारे चाप–धूम–गुलिक–पात–शिखि नामकानामुपग्रहाणामपि समावेशः कृतो वर्तते।

-x-x-

# तृतीया दृष्टिः।

## जन्मकुण्डल्यां ग्रहाणां युतिविचारः।
(११०-१३६)

## तृतीया दृष्टिः।

### जन्मकुण्डल्यां ग्रहाणांयुतिविचारः।

यत्र यत्र युतिर्जाता तत्र तत्राऽधिकं फलम्।
भवेद् सुबद्धं द्विर्बद्धं किमुयत्रनवग्रहाः।।

जन्मकुण्डल्यां प्रथमभावादारभ्य द्वादशभावपर्यन्तेषु कुटुम्बसुतकलत्राख्यानां सूर्यादिसप्तग्रहाणां एकैकस्य फलविचारः प्रस्तुतः। अधुना तत्रैव स्थितानां सूर्यादिग्रहाणां युतिविचारःप्रस्तूयते तत्र च सूर्यचन्द्रयोश्चन्द्र–मडलश्चेति ग्रहद्वयस्य सूर्यचन्द्रमङ्गलानां चन्द्रमङ्गलबुधानाञ्चेतिग्रहत्रयस्येत्यादिक्रमेण सप्तग्रहपर्यन्तं विचारः प्रस्तूयते।

द्वयोर्ग्रहयोः त्रयाणां तदधिकानाञ्चांशात्मके सामीप्यजाते युतिफलविचारः क्रियते। अत्र ग्रहयुतिविचारेराहुकेतुग्रहयोः सम्पर्कः पूर्वाचार्यैः न गृहीतो यत एतयोः फलकथनेऽतीव भिन्नभिन्नमतानि प्रवर्तन्ते । अत्र राहुफलकथनेशनैश्चरवत् विचारः कर्तव्यः । केतुफलकथने च मङ्गलवत् विचारः कर्तव्य इति पूर्वाचार्यादेशः

**०१/०१ सामान्ययुतिफलविचारः।**

**०१/०२ ग्रहद्वययुतिफलविचारः।**

यदा सूर्यचन्द्रयोर्युतिर्यत्रकुत्रापिभवेत्तदा जातको विनयरहितः पापकर्मरतः कार्यनिपुणो मद्यविक्रयी स्त्रीवशो विशेषतस्तुपाषाणशिल्पी वा यन्त्रज्ञः प्रतापी च भवति। यदा सूर्यमङ्गलयोर्युतिर्यत्रकुत्रापि भवेत्तदा जातकः पापमतिरसत्यवादी हिंसकवृत्तिर्बलवान् मूर्खः प्रतापी तेजस्वी च भवति। यदा सूर्यबुधयोर्युतिर्यत्रकुत्रापि भवेत्तदा जातकः कुशलो विद्वान् स्वधर्मप्रियः सुखयुक्तः शास्त्रवचनपालनकर्ता सेवाशीलो रूपवान् च भवति। यदा सूर्यगुर्वोर्युतिर्यत्रकुत्रापि भवेत्तदाजातकः क्रूरस्वभावो धर्मरतोऽ–ध्यापकः प्रसिद्धो धनिको मित्रवान् मित्रेण धनिकः परकार्यरतश्च भवति । यदासूर्यशुक्रयोर्युतिर्यत्रकुत्रापि भवेत्तदा जातको नृत्यविद्यायां निपुणः शस्त्रादिक्रयविक्रयेण नृत्यादिकर्मणा परस्त्रीसङ्गेन धनिको नेत्ररोगी

क्वचित्शस्त्रेण पीडितश्च भवति । यदा सूर्यशनैश्चरयोर्युतिर्यत्रकुत्रापि भवेत्तदा जातकः प्रायो मन्दबुद्धिः शुद्धाचरणो धर्मपरायण:स्त्रीपुत्रसुखरहित:शत्रुपरयणश्च भवति। यदा चन्द्रमङ्गलयोर्युतिर्यत्रकुत्रापि भवेत्तदा जातको मातृद्वेषी सङ्गामशूरः रक्तविकारेणपीडितः स्त्रीपण्यकर्ता मद्यविक्रयी कुम्भकारश्चर्मकारो धातुशिल्पी धनिकश्च भवति[१]। यदा चन्द्रबुधयोर्युतिर्यत्रकुत्रापि भवेत्तदा जातको गुणवान् धर्मरतः शास्त्रज्ञो यशस्वी मधुरभाषी कविः सुन्दरः स्त्रीप्रियश्च भवति। यदा चन्द्रगुर्वोर्युतिर्यत्रकुत्रापि भवेत्तदा जातकः सुशीलो विनीतो धनवान् कुलदीपको बन्धुप्रियश्च भवति। यदा चन्द्रशुक्रयोर्युतिर्यत्रकुत्रापि भवेत्तदा जातकः पापमतिः कलहप्रिय प्रमादी मालावस्त्रसुगन्धीतपदार्थसेवी वाणिज्यकर्मणि कुशलश्च भवति। यदा चन्द्रशनैश्चरयोर्युतिर्यत्रकुत्रापि भवेत्तदा जातको वेश्याकर्मणा धनिकोऽश्वगजपालकः कुलटापतिः कुलटापुत्रो वृद्धस्त्रीपतिर्वा पराजितश्च भवति। यदा मङ्गलबुधयोर्युतिर्यत्रकुत्रापि भवेत्तदा जातको दुष्टः शास्त्रज्ञः औषधिज्ञः धातुशिल्पी वणिकोऽल्पधनयुक्तो विधवापतिश्च भवति। यदा मङ्गलगुर्वोर्युतिर्यत्रकुत्रापि भवेत्तदाजातकः शस्त्रप्रियो मेधावी वेदज्ञो गणितज्ञः कामी धनिको ग्रामणीर्नृपः पूजनीयश्च भवति। यदा मङ्गलशुक्रयोर्युतिर्यत्रकुत्रापि भवेत्तदाजातकोऽनृतभाषी शठो द्युतकुशलो गोसंरक्षको ज्योतिर्विद् धातुव्यवसायी परस्त्रीरतश्च भवति। यदा मङ्गलशनैश्चरयोर्युतिर्यत्रकुत्रापि भवेत्तदा जातकोऽनृतभाषी कलहप्रियो मूढ इन्द्रजालविद्यानिपुणः परधर्मरतो शस्त्रेण विषेण वा पीडितो दुःखी च भवति। यदा बुधगुर्वोर्युतिर्यत्रकुत्रापि भवेत्तदा जातको धैर्यवान् पण्डितो गीतप्रियो मनोहरः सुखी नृत्यकारो बहुधनिश्च भवति। यदा बुधशुक्रर्योर्युतिर्यत्रकुत्रापि भवेत्तदा जातको गानप्रियः शास्त्रज्ञो वाक्चतुरो बहुधनिको लोकनेता नृपश्च भवति। यदा बुधशनैश्चरर्योर्युतिर्यत्रकुत्रापि भवेत्तदा जातको गुणवान् दाम्भिको धार्मिको विद्वान् कार्यकुशलो रतिप्रियश्चारुवाक् यात्राकुशलश्च भवति। यदा गुरुशुक्रर्योर्युतिर्यत्रकुत्रापि भवेत्तदा जातको विद्वान् धर्मपरायणः विद्यया धनिकः स्त्रीपुत्रादियुक्तश्च भवति। यदा गुरुशनैश्चरर्योर्युतिर्यत्रकुत्रापि भवेत्तदा जातकः शूरो बलवान् शिल्पी सेनाध्यक्षो नगरस्वामी नेता च भवति । यदा शुक्रशनैश्चरयोर्युतिर्यत्रकुत्रापि भवेत्तदा जातकः शिल्पी मल्लविद्यानिपुणो लेखकश्चित्रकारो मन्दनेत्रवान् स्त्रीसहाय्येन धनिकः पशुपालकश्च भवति।

---

[१] वैद्यनाथमतेन धर्मात्मा गुणवान् कुलीनश्च भवति। शूरः सत्कुलधर्मवित्तगुणवानिन्दौ धराजान्विते ।। जा.पा.८/०२।।

## तृतीया दृष्टिः।

### ०१/०३ ग्रहत्रययुतिफलविचारः।

यदा सूर्यचन्द्रमङ्गलग्रहाणां युतिर्यत्रकुत्रापि भवेत्तदा जातको शूर:पापरत:कूटनीतिज्ञोऽश्वकुशला यन्त्रज्ञो रक्तविकारेण पीडित:पुत्रहीनश्च भवति । यदा सूर्यचन्द्रबुधग्रहाणां युतिर्यत्रकुत्रापि भवेत्तदा जातको भगवद्कथानुरागी विद्वान् मधुरभाषी सुन्दरो महाधनिको विद्वद्प्रियो नृपप्रियश्च भवति। यदा सूर्यचन्द्रगुरूणां युतिर्यत्रकुत्रापि भवेत्तदा जातको धर्मनिष्ठः स्थिरबुद्धिर्देवब्राह्मणवाक्यपालको बन्धुसुखदाता राज्यसचिव विदेशनिवासी च भवति। यदा सूर्यचन्द्रशुक्राणां युतिर्यत्रकुत्रापि भवेत्तदा जातकः क्रूरः शोभनदेहो दन्तरोगी तेजस्वी नृपसदृशधनिक:परस्त्रगामी परधनहरणेकुशलः शत्रुनाशकश्च भवति।यदा सूर्यचन्द्रशनैश्चराणां युतिर्यत्रकुत्रापि भवेत्तदा जातको धर्मपरायणः सत्कर्मलीनश्चारित्रहीनो मूर्खोऽश्वपालको विदेशनिवासी। यदा सूर्यमङ्गबुधनांयुतिर्यत्रकुत्रापि भवेत्तदा जातको निष्ठुरो लज्जाहीन:प्रतापी विख्यातो धनपुत्रस्त्रीयुक्तश्च भवति। यदा सूर्यमङ्गलगुरूणांयुतिर्यत्रकुत्रापि भवेत्तदाजातकः सत्यवक्ता सुन्दरवाक् प्रचण्डो नृपसचिवश्च भवति । यदा सूर्यमङ्गलशुक्राणांयुतिर्यत्र–कुत्रापि भवेत्तदाजातकः कुलीनः कठोरवाक् सुभगो नेत्ररोगेणपीडितः स्वपरिवारानुरागी विषयासक्तश्च भवति। यदा सूर्यमङ्गलशनैश्चराणां युतिर्यत्रकुत्रापि भवेत्तदा जातको द्वेषी मूर्खो नपुंसको विकलाङ्गो रुग्णो निर्धनो स्वजनहीनश्च भवति। यदा सूर्यबुधगुरूणां युतिर्यत्रकुत्रापि भवेत्तदा जातको बुद्धिमान् चित्रकर्मकुशलो लेखको नेत्ररोगी यशस्वी धनिकश्च भवति। यदा सूर्यबुधशुक्राणां युतिर्यत्रकुत्रापि भवेत्तदा जातकोऽतृप्तो गुरुद्वेषेण सन्तप्तः कोमलाङ्गः कुशाग्रो यशस्वी सुखभाक् स्त्रीहेतो:पीडितश्च भवति । यदा सूर्यबुधशनैश्चरणां युतिर्यत्रकुत्रापि भवेत्तदा जातको दुराचारी सर्वजनद्वेषकारी नपुसंको बन्धुभि:परित्यक्तश्च भवति । यदासूर्यगुरुशुक्राणां युतिर्यत्रकुत्रापि भवेत्तदा जातकः शूरो विद्वान् नेत्रविकारेण पीडितो निर्धनः सचिवः परकार्यरतः स्त्रीपुत्रयुक्तश्च भवति। यदा सूर्यगुरुशनैश्चराणां युतिर्यत्रकुत्रापि भवेत्तदा जातकः सात्विको निर्भयो बन्धुप्रिय:स्त्रीपुत्रमित्रवान् च भवति। यदा सूर्यगुरुशुक्राणां युतिर्यत्रकुत्रापि भवेत्तदा जातको दुराचारी चर्मरोगी संमानकलाकाव्यवर्जितः शत्रुभयेनपीडितश्च भवति।

यदा चन्द्रमङ्गलबुधानां युतिर्यत्रकुत्रापि भवेत्तदा जातको दुराचारी पापरतो भोजनरतो बन्धुहीनः आजीविकारहितश्च भवति । यदा चन्द्रमङ्गलगुरूणां युतिर्यत्रकुत्रापि भवेत्तदाजातकः कामातुर उग्रवचनी स्त्रीलोलुपः सुन्दराकृतिः स्त्रीप्रियश्च भवति। यदा चन्द्रमङ्गलशुक्राणां युतिर्यत्रकुत्रापिभवेत्तदा जातको भ्रमणशीलः शीतप्रकोपेन पीडितो दुष्टपुत्रजनकः कुलटापतिश्च भवति । यदा चन्द्रमङ्गलशनैश्चराणां युतिर्यत्रकुत्रापि भवेत्तदा जातकश्चञ्चलो दुष्टात्मा सर्वजनद्वेषी बाल्यवस्थायामेवजननीवियोगी च भवति।

## तृतीया दृष्टिः।

यदा चन्द्रबुधगुरूणां युतिर्यत्रकुत्रापि भवेत्तदा जातको वाक्पटुस्तेजस्वी प्रसिद्धो बहुकीर्तिमान् पुत्रवान् नृपप्रियश्च भवति। यदा चन्द्रबुधशुक्राणां युतिर्यत्रकुत्रापि भवेत्तदा जातको दुष्ट इर्ष्यालुर्धनलोभी बहुविद्यायुक्तो सेवकश्च भवति। यदा चन्द्रबुधशनैश्चराणां युतिर्यत्रकुत्रापि भवेत्तदा जातको दानी पण्डितः प्रांशुर्वक्ता पुष्टदेहो नृपसन्मानभाक् च भवति। यदा चन्द्रगुरुशुक्राणां युतिर्यत्रकुत्रापि भवेत्तदा जातकः कलाज्ञः सुन्दरः सुभगः पुत्रवान् पतिव्रतास्त्रीयुक्तो लोकप्रियश्च भवति। यदा चन्द्रगुरुशनैश्चराणां युतिर्यत्रकुत्रापि भवेत्तदाजातकःशास्त्रज्ञो निरोगी वृद्धस्त्रीरतो ग्रामरक्षको नगररक्षकश्च भवति। यदाचन्द्रशुक्रशनैश्चराणां युतिर्यत्रकुत्रापि भवेत्तदाजातको वेदज्ञो लेखकः पुरोहितकुल्लोत्पन्नोऽध्यापकः पुराणादिकथावाचकश्च भवति। यदा मङ्गलबुधगुरूणां युतिर्यत्रकुत्रापि भवेत्तदाजातकः सुकविर्बुद्धिमान् गीतसङ्गीतज्ञः नृपतिः सुकलत्रवान् परोपकारी च भवति। यदा मङ्गलबुधशुक्राणां युतिर्यत्रकुत्रापि भवेत्तदा जातको नीचः प्रेष्यो व्यर्थाटनशीलो दुष्टः प्रसन्नचित्तो नेत्ररोगी हीनाङ्गश्च भवति। यदा मङ्गलबुधशनैश्चराणां युतिर्यत्रकुत्रापि भवेत्तदाजातको हास्यप्रियो नेत्रपीडितो मुखरोगग्रस्तो दासोऽन्यदेशनिवासी च भवति। यदा मङ्गलगुरुशुक्राणां युतिर्यत्रकुत्रापि भवेत्तदा जातकः आन्ददायकः सुखी सुन्दरस्त्रीपतिः सत्पुत्रवान् नृपप्रियश्च भवति। यदा मङ्गलगुरुशनैश्चराणां युतिर्यत्रकुत्रापि भवेत्तदा जातको दुष्टाचरणरतः कुष्ठरोगी निर्धनो नृपतिसंमानभाक् मित्ररहितश्च भवति। यदा बुधगुरुशुक्राणां युतिर्यत्रकुत्रापि भवेत्तदा जातकः सत्यवक्ता सुन्दरतनुर्यशस्वी नृपपूजितः शत्रुजिच्च भवति। यदा बुधगुरुशनैश्चराणां युतिर्यत्रकुत्रापि भवेत्तदा जातको धैर्यवान् विद्वान् मानी सुखी धनसम्पन्नः स्वदाररतः सर्वजनप्रियश्च भवति। यदा बुधशुक्रशनैश्चराणां युतिर्यत्रकुत्रापि भवेत्तदा जातको नीचजनसङ्गी कटुवचनी असत्यवादी धूर्तो जल्पकः कलानिपुणः स्वदेशरतश्च भवति। यदा गुरुशुक्रशनैश्चराणां युतिर्यत्रकुत्रापि भवेत्तदा जातकःसुशीलो विपुलकीर्तिर्नीचकुलोत्पन्नोऽपि राजसदृशसुखी च भवति।

प्रायो नैसर्गिक शुभग्रहा जन्मकुण्डल्यां एकस्मिन्स्थानेस्युः तदा जातको धनैश्वर्ययशः कीर्तिपुत्रपौत्रादिसुखं लभते। तथा एकस्मिन्स्थाने त्रयाधिकनैसर्गिकपापग्रहाः सन्ति तदा प्रायो दुःख-रोगभयपीडाकुटिलस्वभावयुक्तो जातको भवति ।

### ०१/०३ ग्रहचतुष्टययुतिफलविचारः।

यदा सूर्यचन्द्रमङ्गलबुधनां युतिर्यत्रकुत्रापिभवेत्तदा जातको मायावी प्रपञ्चकुशलो वक्ता लिपिकारो रुग्णस्तस्करश्च भवति। यदा सूर्यचन्द्रमङ्गलगुरूणां युतिर्यत्रकुत्रापि भवेत्तदा जातको विगतशोको नीतिमान्

तेजस्वी कर्मकुशलो धनिकश्च भवति। यदा सूर्यचन्द्रमङ्गलशुक्राणां युतिर्यत्रकुत्रापि भवेत्तदा जातको वाग्वृतिर्विद्याप्रियो धनसञ्चयकर्ता स्त्रीसुखयुक्तो पुत्रवान् सज्जनश्च भवति। यदा सूर्यचन्द्रमङ्गलशनैश्चराणां युतिर्यत्रकुत्रापि भवेत्तदा जातको मूर्खो वामनो विषमदेहो निर्धनो भिक्षुकः पराजितश्च भवति। यदा सूर्यचन्द्रबुधगुरूणां युतिर्यत्रकुत्रापि भवेत्तदा जातको धैर्यशीलो निरोगी सुन्दराकृतिर्विशालनेत्री धनिकः सुवर्णकारः शिल्पकारश्च भवति। यदा सूर्यचन्द्रबुधशुक्राणां युतिर्यत्रकुत्रापि भवेत्तदा जातकः श्रेष्ठवक्ता सुभगो ह्रस्वदेहो विकलाङ्गो नृपसन्मानभाक् च भवति । यदा सूर्यचन्द्रबुधशनैश्चराणां युतिर्यत्रकुत्रापि भवेत्तदा जातको व्यर्थाटनाशीलो नेत्ररोगी निर्धनो भिक्षुको जननीजनकसौख्यभाक् च भवति । यदा सूर्यचन्द्रगुरुशुक्राणां युतिर्यत्रकुत्रापि भवेत्तदा जातको निपुणः पशुवनतडागादिस्वामी सुखी नृपसन्मानभाक् च भवति। यदा सूर्यचन्द्रगुरुशनैश्चराणां युतिर्यत्रकुत्रापि भवेत्तदा जातकः समदर्शी श्यामनेत्रवान् प्रसिद्धो धनिकः पुत्रवान् वनिताप्रियश्च भवति। यदा सूर्यचन्द्रशुक्रशनैश्चराणां युतिर्यत्र कुत्रापि भवेत्तदा जातको भीरुर्दुबलदेहः स्त्रैणोऽग्रगण्यश्च भवति।

यदा सूर्यमङ्गलबुधगरूणां युतिर्यत्रकुत्रापि भवेत्तदा जातकः शूरो भ्रमणशीलो दुःखी तन्तूवायो निर्धनः परस्त्रीलोलुपश्च भवति। यदा सूर्यमङ्गलबुधशुक्राणां युतिर्यत्रकुत्रापि भवेत्तदा जातको दुर्जनो विषमाङ्गस्तस्करश्च भवति। यदा सूर्यमङ्गलबुधशनैश्चराणां युतिर्यत्रकुत्रापि भवेत्तदा जातको नीचकर्मरतो भोगरतः कविश्रेष्ठो मंत्री सेनापतिर्नृपश्च भवति। यदा सूर्यमङ्गलगुरुशुक्राणां युतिर्यत्रकुत्रापि भवेत्तदा जातकः प्रसिद्धो नीतिज्ञो धनिकः पूजनीयो लोकनेता राज्यमान्यश्च भवति । यदा सूर्यमङ्गलगुरुशनैश्चराणां युतिर्यत्र कुत्रापि भवेत्तदा जातको भ्रान्तो धनिको बन्धुमित्रवान् नृपप्रियश्च भवति । यदा सूर्यमङ्गलशुक्रशनैश्चराणां युतिर्यत्रकुत्रापि भवेत्तदा जातको नीचकर्मरतो बन्धुद्वेषी विकलो विषमाक्षः पराजितश्च भवति। यदा सूर्यबुधगुरुशुक्राणां युतिर्यत्रकुत्रापि भवेत्तदा जातको धनयुक्तो बन्धुयुक्तः सुखसम्पन्नश्च भवति। यदा सूर्यबुधगुरुशनैश्चराणां युतिर्यत्रकुत्रापि भवेत्तदा जातकः कलहप्रियो निरुत्साहो बन्धुयुक्तो मानी षण्ढश्च भवति। यदा सूर्यबुधशुक्रशनैश्चराणां युतिर्यत्रकुत्रापि भवेत्तदा जातको धैर्यवान् पवित्रः सत्वगुणसम्पन्नो जल्पकः प्राज्ञो भाग्यवांश्च भवति। यदा सूर्यगुरुशुक्रशनैश्चराणां युतिर्यत्रकुत्रापि भवेत्तदा जातको नीचजनानामधिपतिः कविः शिल्पकुशलः प्रधानो नृपप्रियश्च भवति ।

यदा चन्द्रमङ्गलबुधगुरूणां युतिर्यत्रकुत्रापि भवेत्तदा जातकः शास्त्रपण्डितो विद्वान् विशिष्टसन्मानभाक् नृपश्च भवति। यदा चन्द्रमङ्गलबुधशुक्राणां युतिर्यत्रकुत्रापि भवेत्तदा जातको निद्रालुर्नीचो बन्धुद्वेषी कलहप्रियो वन्ध्यापतिः कुलटापतिश्च भवति। यदा चन्द्रमङ्गलबुधशनैश्चराणां

युतिर्यत्रकुत्रापि भवेत्तदा जातक:शूर: पुत्रवान् स्त्रीसुखसम्पन्नो द्वैमातुरौ पितरौ वा भवति। यदा चन्द्रमङ्गलगुरुशुक्राणां युतिर्यत्रकुत्रापि भवेत्तदा जातको मानी प्राज्ञ: पण्डित: पराक्रमी अङ्गहीनो धनिक: पुत्रवान् च भवति। यदा चन्द्रमङ्गलगुरुशनैश्चराणां युतिर्यत्रकुत्रापि भवेत्तदा जातक:शूरो दृढप्रतिज्ञो बुद्धिमानौदार्यगुणयुक्त: सोन्मादो धनिको बधिरश्च भवति।

यदा चन्द्रमङ्गलशुक्रशनैश्चराणां युतिर्यत्रकुत्रापि भवेत्तदा जातको मलिन: शोकसन्तप्त: सर्पाक्ष: कुलटापतिश्च भवति। यदा चन्द्रबुधगुरुशुक्राणां युतिर्यत्रकुत्रापि भवेत्तदा जातक: पण्डितो भाग्यवान् धनवान् शत्रुहीनश्च भवति। यदा चन्द्रबुधगुरुशनैश्चराणां युतिर्यत्रकुत्रापि भवेत्तदा जातको धार्मिको कविर्विद्वान् तेजस्वी यशस्वी राज्यमन्त्री च भवति । यदा चन्द्रबुधशुक्रशनैश्चराणां युतिर्यत्रकुत्रापि भवेत्तदा जातको विद्वान् नेत्ररोगी धनिको नृपसन्मानभाक् लोकनिन्दक: परस्त्रीरतश्च भवति। यदा चन्द्रगुरुशुक्रशनैश्चराणां युतिर्यत्रकुत्रापि भवेत्तदा जातक: सत्याचरणरतो भ्रमणशीलस्त्वचारोगी दु:खी मनोहरो बन्धुयुक्त: स्थूलभार्य: परस्त्रीगामी च भवति। यदा मङ्गलबुधगुरुशुक्राणां युतिर्यत्रकुत्रापि भवेत्तदा जातक: स्त्रीकलहप्रियो निरोगी धनिक: पूजनीयश्च भवति । यदा मङ्गलबुधगुरुशनैश्चराणां युतिर्यत्रकुत्रापि भवेत्तदा जातक: सत्यवादी शूर: पवित्रो दीनो वाग्मी विद्वांश्च भवति। यदा मङ्गलबुधशुक्रशनैश्चराणां युतिर्यत्रकुत्रापि भवेत्तदा जातको बलवान् दृढदेह: प्रसिद्धो विजयी श्वानपालकश्च भवति। यदा बुधगुरुशुक्रशनैश्चराणां युतिर्यत्रकुत्रापि भवेत्तदा जातक: शास्त्ररत: कामी सत्याचरणरतो मेधावी धर्मात्मा च भवति।

### ०१/०५ ग्रहपञ्चकयुतिफलविचार:।

यदा सूर्यचन्द्रमङ्गलबुधगुरूणां युतिर्यत्रकुत्रापि भवेत्तदा जातको दु:खी बहुप्रपञ्चयुक्त–स्त्रीदु:खसन्तप्तश्च भवति। यदा सूर्यचन्द्रमङ्गलबुधशुक्राणां युतिर्यत्रकुत्रापि भवेत्तदा जातकोऽसत्यवादी बन्धुहीनो क्लीबबन्धुरन्यजनकर्मरतश्च भवति। यदा सूर्यचन्द्रमङ्गलबुधशनैश्चराणां युतिर्यत्रकुत्रापि भवेत्तदा जातको विकलो दु:खी अल्पायु: पुत्रहीनश्च भवति। यदा सूर्यचन्द्रमङ्गलगुरुशुक्राणां युतिर्यत्रकुत्रापि भवेत्तदा जातको गानप्रियो दु:खी अन्धको मातृपितृहीनश्च भवति । यदा सूर्यचन्द्रमङ्गलगुरुशनैश्चराणां युतिर्यत्रकुत्रापि भवेत्तदा जातक: पिशुनो खलो युद्धकुशल: समर्थ: परवित्तहर: परपीडितश्च भवति। यदा सूर्यचन्द्रमङ्गलशुक्रशनैश्चराणां युतिर्यत्रकुत्रापि भवेत्तदा जातको मलिनो नीचो धनमानरहित: परस्त्रीरतश्च भवति। यदा सूर्यचन्द्रबुधगुरुशुक्राणां युतिर्यत्रकुत्रापि भवेत्तदा जातको यन्त्रज्ञो दण्डनायक: कीर्तिमान्

प्रसिद्धो बहुविभवो नृपसचिवश्च भवति। यदा सूर्यचन्द्रबुधगुरुशनैश्चराणां युतिर्यत्रकुत्रापि भवेत्तदा जातको भीरुः शठः पापरतो वञ्चनाकुशल उग्रः प्रियसन्त्यक्तः परान्नभोक्ता च भवति । यदा सूर्यचन्द्रबुधशुक्रशनैश्चराणां युतिर्यत्रकुत्रापि भवेत्तदा जातको निर्भयो मरणोत्साही रोगी दीर्घकायोऽधिकरोमयुक्तःपुत्रहीनश्च भवति। यदा सूर्यचन्द्रगुरुशुक्रशनैश्चराणां युतिर्यत्रकुत्रापि भवेत्तदा जातको निर्भयश्चञ्चलधी इन्द्रजालक्रियाकुशलो वाग्पटुर्स्त्रीप्रियो बहुशत्रुश्च भवति। यदा सूर्यमङ्गलबुधगुरुशुक्राणां युतिर्यत्रकुत्रापि भवेत्तदा जातकःकामी शोकरहितः[२] सेनापतिर्नृपप्रियो नेता परस्त्रीरतश्च भवति। यदा सूर्यमङ्गलबुधगुरुशनैश्चराणां युतिर्यत्रकुत्रापि भवेत्तदा जातको मलिनवेषी उद्विग्नमनो रुग्णो भिक्षुकःशत्रुग्रस्तश्च भवति। यदा सूर्यमङ्गलबुधशुक्रशनैश्चराणां युतिर्यत्रकुत्रापि भवेत्तदा जातको भ्रमणशील दुःखी रुग्णः स्थानभ्रष्टः प्रतिष्ठाभ्रष्टःशत्रुभयग्रस्तश्च भवति। यदा सूर्यमङ्गलगुरुशुक्रशनैश्चराणां युतिर्यत्रकुत्रापि भवेत्तदा जातको भ्रमणशीलो विचारशीलः पारदादि रसायणनिर्माणकार्यकुशलो धातुज्ञो जलयन्त्रज्ञश्च भवति।यदा सूर्यबुधगुरुशुक्रशनैश्चराणां युतिर्यत्रकुत्रापि भवेत्तदा जातको दयालुर्धर्मपरायणो सर्वशास्त्रज्ञो गुरुमान्यो हितमित्रश्च भवति।

यदा चन्द्रमङ्गलबुधगुरुशुक्राणां युतिर्यत्रकुत्रापि भवेत्तदा जातकः सत्यवक्ता स्वस्थो विद्यावान् सज्जनो धनिकः सुखी बन्धुहितकारी पुत्रवान् बहुमित्रवांश्च भवति[३]। यदा चन्द्रमङ्गलगुरुशुक्रशनैश्चराणां युतिर्यत्रकुत्रापि भवेत्तदा जातको मूर्खो नीचकर्मरतो विकलोऽन्धः कुरूपो मलिनवेषी धनहीनस्तस्करश्च भवति । यदा चन्द्रमङ्गलबुधशुक्रशनैश्चराणां युतिर्यत्रकुत्रापि भवेत्तदा जातकोऽज्ञेयशीलोऽभिमानी मित्रवान् शत्रुयुक्तः परजनहितकारी च भवति । यदा चन्द्रमङ्गलबुधगुरुशनैश्चराणां युतिर्यत्रकुत्रापि भवेत्तदा जातको दीनो द्वेषी परान्नभक्षी नेत्ररोगी दरिद्रश्च भवति। यदा चन्द्रबुधगुरुशुक्रशनैश्चराणां युतिर्यत्रकुत्रापि भवेत्तदा जातको विकलनेत्रवान् नृपसचिवो नृपसंमानभाक् लोकपूज्यश्च भवति। यदा मङ्गलबुधगुरुशुक्रशनैश्चराणां युतिर्यत्रकुत्रापि भवेत्तदा जातकः क्रोधी निद्रातुरः शोकरहितः सुमनस्को विक्षिप्तचित्तो दरिद्रो राजवल्लभश्च भवति।

---

[२] मानसागरीग्रन्थमते शोकयुक्तो भवति।

[३] मानसागरीग्रन्थमते कल्याणहीन इत्यधिकं फलं प्रदर्शितम्।

## तृतीया दृष्टिः।

### ०१/०६ ग्रहषट्कयुतिफलविचारः।

यदा सूर्यचन्द्रमङ्गलबुधगुरुशुक्राणां युतिर्यत्रकुत्रापि भवेत्तदा जातको विशिष्टमतिर्जल्पकः विद्याकुशलो धर्मप्रियः कृशाङ्गश्च भवति । यदा सूर्यचन्द्रमङ्गलबुधशनैश्चराणां युतिर्यत्रकुत्रापि भवेत्तदा जातकश्चञ्चलवृत्तिर्दानी विशुद्धमना एकान्तप्रियः सेवकश्च भवति। यदा सूर्यचन्द्रमङ्गलशुक्रशनैश्चराणां युतिर्यत्रकुत्रापि भवेत्तदा जातकः कुष्ठरोगी स्थानभ्रष्टः पुत्रहीनः स्वजनैस्तिरस्कृतः परस्त्रीरतश्च भवति। यदा सूर्यचन्द्रमङ्गलगुरुशुक्रशनैश्चराणां युतिर्यत्रकुत्रापि भवेत्तदा जातको नीचकर्मरतः क्षयरोगी बन्धुनिन्दकश्च भवति।

यदा सूर्यचन्द्रबुधगुरुशुक्रशनैश्चराणां युतिर्यत्रकुत्रापि भवेत्तदा जातकः क्षमावान् शोकपरितप्तः स्त्रीधनरहितश्च भवति। यदा सूर्यमङ्गलबुधगुरुशुक्रशनैश्चराणां युतिर्यत्रकुत्रापि भवेत्तदा जातको वनोपवनभ्रमणशीलस्तीर्थाटनप्रियः पुत्रधनरहितश्च भवति। यदा चन्द्रमङ्गलबुधगुरुशुक्रशनैश्चराणां युतिर्यत्रकुत्रापि भवेत्तदा जातकः पवित्रः प्रतापी सुभगो धनिको बहुयुवतीरतो मन्त्री नृपप्रियश्च भवति।

### ०१/०७ ग्रहसप्तकयुतिफलविचारः ।

यदा सूर्यचन्द्रमङ्गलबुधगुरुशुक्रशनैश्चराणां युतिर्यत्रकुत्रापि भवेत्तदा जातको दानी सूर्यवत्तेजस्वी शिवभक्तो धनिको नृपमान्यश्च भवति।

द्वयोर्ग्रहयोःत्रयाणां तदधिकाणाञ्चांशात्मके सामीप्यजाते कुटुम्ब–सुत–कलत्रभावेषु युतिफलविचारः क्रियते ।

### ०२/०१ कुटुम्बभावेयुतिविचारः ।
### ०२/०२ कुटुम्बभावेग्रहद्वययुतिफलम् ।

यदा द्वितीयभावे[४] सूर्यचन्द्रयोर्युतिर्भवेत्तदा जातको दुष्टः कृतघ्नो रोगी भयग्रस्तः कान्तिरहितो निर्धनश्च भवति। यदा सूर्यमङ्गलयोर्युतिर्भवेत्तदा जातको निर्दयो विह्वलः पापबुद्धिर्लज्जाहीनश्च भवति । यदा सूर्यबुधयोर्युतिर्भवेत्तदा जातको दुष्टमतिरतिशोकग्रस्तो व्रणादिचिह्नयुक्तो भाग्यहीनो निर्धनः

[४] अत्र लग्नादिभावेषु स्थितानामुच्चादिराशीपतिनां विचारविशेषरुपेणपश्चातवर्तिनीषु दृष्टिषु करिष्यते।

परपराजितश्च भवति। यदा सूर्यगुर्वोर्युतिर्भवेत्तदा जातकः पापमतिर्विनयहीनो वाचाल उदररोगी विदेशाश्रयेणकष्टभाक् च भवति । यदा सूर्यशुक्रयोर्युतिर्भवेत्तदा जातको नीचजनसङ्गी कुस्वभावी भयङ्करस्तेजोहीनश्च भवति । यदा सूर्यशनैश्चरयोर्युतिर्भवेत्तदा जातकः कुसङ्गी निर्दयः क्रोधीव्यर्थपरिश्रमी प्रसिद्धश्च भवति ।

यदा चन्द्रमङ्गलयोर्युतिर्भवेत्तदा जातकः कठोरः कृतघ्नो दुष्टः सहिष्णुर्तेजोहीनो विरक्तदारः सेवकवृत्तिश्च भवति। यदा चन्द्रबुधयोर्युतिर्भवेत्तदा जातको व्यसनमुक्तो धनिकः सुखी नृपप्रियश्च भवति। यदा चन्द्रगुर्वोर्युतिर्भवेत्तदा जातकस्तेजस्वी धार्मिकः पुत्रवान् लोकप्रियश्च भवति। यदा चन्द्रशुक्रयोर्युतिर्भवेत्तदा जातकः सरलो धनवान् शास्त्रविद् श्रुतलालसो नृपप्रधानो बहुमित्रवान् शत्रुहन्ता च भवति। यदा चन्द्रशनैश्चरयोर्युतिर्भवेत्तदा जातको धर्महीनो विवादी प्रभाहीनो भ्रातृरहितो बहुशत्रुयुक्तश्च भवति।

यदा मङ्गलबुधयोर्युतिर्भवेत्तदा जातको दोषयुक्तः सद्गुणरहितो रुग्णो निर्धनो बन्धुकार्यविनाशी च भवति । यदा मङ्गलगुर्वोर्युतिर्भवेत्तदा जातको विवेकहीनः कुस्वभावी रोगग्रस्तोऽल्पसन्ततियुक्तो बान्धवनिन्दितश्च भवति। यदा मङ्गलशुक्रयोर्युतिर्भवेत्तदा जातको नीचानुरतः कुस्वभावो विवेकहीनोऽसत्यभाषी व्यसनश्रमार्तो वेदार्थानुरागी च भवति। यदा मङ्गलशनैश्चरयोर्युतिर्भवेत्तदा जातकः कृतकस्वभावश्चरित्रहीनो रुग्णो दरिद्रः परस्त्रीरतश्च भवति। यदा बुधगुर्वोर्युतिर्भवेत्तदा जातकः शान्तचित्तः सन्तोषवान् तीर्थाटनप्रियो धनिको रत्नादियुक्तः स्त्रिवर्गप्रियश्च भवति। यदा बुधशुक्रयोर्युतिर्भवेत्तदा जातको धार्मिकः सत्यवक्ता विद्वान् धनवानश्वगजैश्वर्यवांश्च भवति। यदा बुधशनैश्चरयोर्युतिर्भवेत्तदा जातकः क्रोधी खलः कुसङ्गी वैभवहीनो निर्धनो दुखी परनिन्दितश्च भवति। यदा गुरुशुक्रयोर्युतिर्भवेत्तदा जातकः शूरो विनयी नम्रो धार्मिको मानी धनिकश्च भवति । यदा गुरुशुक्रयोर्युतिर्भवेत्तदा जातको महारोगी सुखहीनः शत्रुपीडितो नृपपीडितश्च भवति। यदा शुक्रशनैश्चरयोर्युतिर्भवेत्तदा जातकः क्रोधी कुकर्मरतस्तेजोहीनो मलिनो गुह्यरोगी निर्धनः पुत्रहीनश्च भवति।

## ०२/०३ कुटुम्बभावे ग्रहत्रययुतिफलम् ।

यदा द्वितीयभावे सूर्यचन्द्रमङ्गलग्रहाणां युतिर्भवेत्तदा जातकः क्रूरस्तेजोहीनो भयग्रस्तः शत्रुपराजितश्च भवति। यदा सूर्यचन्द्रबुधनां युतिर्भवेत्तदा जातको भीरुर्बुद्धिहीनो नीचकर्मरतो निर्बलो निर्धनो दुःखी च

भवति। यदा सूर्यचन्द्रगुरूणां युतिर्भवेत्तदा जातकः कामी कृतघ्नी हिंसको निष्ठुरोऽधमो गुरुपीडकश्च भवति। यदा सूर्यचन्द्रशुक्राणां युतिर्भवेत्तदा जातकः क्रोधी बहुभक्षी वृद्धसदृशो मित्रद्वेषी कुरूपोऽल्पधनिको वृद्धवत्सलश्च भवति । यदा सूर्यचन्द्रशनैश्चराणां युतिर्भवेत्तदा जातको कृतघ्नी क्रोधी सद्गुणरहितो द्युतप्रियोऽतिश्रमी अल्पधनिकः परदेशप्रियश्च भवति। यदा सूर्यमङ्गलबुधानां युतिर्भवेत्तदा जातको निर्लज्जो बुद्धिहीनो भययुक्तोऽतिव्ययी अमित्रः कुपुत्रश्च भवति। यदा सूर्यमङ्गलगुरूणां युतिर्भवेत्तदा जातको दुष्टः क्रोधी कुरूपो दुर्बलो नीचसेवको वैरियुक्तश्च भवति। यदा सूर्यमङ्गलशुक्राणां युतिर्भवेत्तदा जातको विवेकहीनः कलहप्रियस्तेजोहीनो निर्धनो नीचजनदासः सुजनैर्तिरस्कृतश्च भवति। यदा सूर्यमङ्गलगशनैश्चराणां युतिर्भवेत्तदा जातको गुणहीनः कलहप्रियो निन्दितो निर्धनश्च भवति। यदा सूर्यबुधगुरूणां युतिर्भवेत्तदा जातको लुब्धकः कुमतिर्दुष्टप्रभावको निन्दकोऽपमानसहः कामी परधनहर्ता च भवति। यदा सूर्यबुधशुक्राणां युतिर्भवेत्तदा जातको दुष्टो निन्दितो व्रणी जनपराजितः परतर्ककश्च भवति। यदा सूर्यबुधशनैश्चराणां युतिर्भवेत्तदा जातको गुणहीनो जडो मूर्खः क्रोधी दरिद्रश्च भवति । यदा सूर्यगुरुशुक्राणां युतिर्भवेत्तदा जातको जडोऽज्ञोऽविवेकी चञ्चलो लोभी निर्धनः शत्रुपराजितश्च भवति। यदा सूर्यगुरुशनैश्चराणां युतिर्भवेत्तदा जातकोऽतिक्रोधी अधार्मिकः पिशुनो रुग्णो दरिद्रश्च भवति। यदा सूर्यशुक्रशनैश्चराणां युतिर्भवेत्तदा जातकोऽतिक्रोधी दुराचारी दुष्टोऽधार्मिकोऽतिपरिश्रमी च भवति।

यदा द्वितीयभावे चन्द्रमङ्गलबुधग्रहाणां युतिर्भवेत्तदा जातको खलः क्रोधी दुष्टवक्ता द्वन्द्वयुक्तो रोगी निर्धनो निसन्तानः स्वकुटुम्बत्यक्तश्च भवति। यदा चन्द्रमङ्गलगुरूणां युतिर्भवेत्तदा जातको मलिनोऽतीच्छुको दरिद्रो महारोगी सन्ततिधनस्त्रीहीनश्च भवति। यदा चन्द्रमङ्गलशुक्राणां युतिर्भवेत्तदा जातको नीतिहीनः शास्त्रहीनो गुरुद्वेषी रुग्णो दुःखी कफरोगी च भवति । यदा चन्द्रमङ्गलशनैश्चराणां युतिर्भवेत्तदा जातको दुष्टो विरक्तो द्युतप्रियो मद्यपी कुटुम्बहीनश्च भवति। यदा चन्द्रबुधगुरूणां युतिर्भवेत्तदा जातको विद्यावान् प्रभावी सौभाग्यवान् सुखभाक् सर्वानन्ददाता च भवति। यदा चन्द्रबुधशुक्राणां युतिर्भवेत्तदा जातको विद्वान् शास्त्रज्ञो धर्मज्ञः सर्वस्नेहदाता च भवति । यदा चन्द्रबुधशनैश्चराणां युतिर्भवेत्तदा जातकः शठो वाचालः प्रभावहीनोऽतीव्ययी च भवति । यदा चन्द्रगुरुशुक्राणां युतिर्भवेत्तदा जातको सुशीलो बुद्धिमान् यशस्वी सुखी कुत्सिकर्ममुक्तो नृपश्च भवति। यदा चन्द्रगुरुशनैश्चराणां युतिर्भवेत्तदा जातकोऽक्रोधी आनन्दी वेदार्थजिज्ञासु मधुरस्वभावो मनोहरश्च भवति। यदा चन्द्रशुक्रशनैश्चराणां युतिर्भवेत्तदा जातको वेदज्ञो लेखको याज्ञिकोऽध्यापकः पुराणादिकथाकर्ता च भवति।

## तृतीया दृष्टिः।

यदा मङ्गलबुधगुरूणां युतिर्भवेत्तदा जातको दुष्टोऽटनशील: कामपीडितो निर्धन: परस्त्रप्रियश्च भवति। यदा मङ्गलबुधशुक्राणां युतिर्भवेत्तदा जातको बुद्धिमान् नीतिप्रिय: कृषको गवादिपशूनां सुखभोक्ता सम्मृद्धश्च भवति। यदा मङ्गलबुधशनैश्चराणां युतिर्भवेत्तदा जातक: कोधी शास्त्रप्रियो हिंसको मांसभक्षी कुटुम्बक्लेशकरोऽतिव्ययी च भवति। यदा मङ्गलगुरुशुक्राणां युतिर्भवेत्तदा जातको निर्भयो मनोहरो धार्मिकस्तपस्वी दीक्षित: शिल्पकलाकुशलश्च भवति। यदा मङ्गलगुरुशनैश्चराणां युतिर्भवेत्तदा जातको दाम्भिक:सत्यभाषी प्रसन्नचित्त: स्थुलरद उदररोगी पित्तरोगी जनसमर्थहीनश्च भवति। यदा मङ्गलशुक्रशनैश्चराणां युतिर्भवेत्तदा जातको गम्भीरगुणयुक्त: शास्त्रज्ञो धनिक: स्वरूपवान् सुवस्त्रप्रिय: स्त्रीप्रियो नानाविधसुखभाक् च भवति । यदा बुधगुरुशुक्राणां युतिर्भवेत्तदा जातक:कुटुम्बोपकरी सुवस्त्रधारी गजाश्वादियुक्तो धनवांश्च भवति। यदा बुधगुरुशनैश्चराणां युतिर्भवेत्तदा जातको दयालु: पुण्यशाली प्रसिद्ध: कीर्तिमान् बहुमित्रवांश्च भवति। यदा बुधशुक्रशनैश्चराणां युतिर्भवेत्तदा जातक: सत्यवादी वेदज्ञो बहुशास्त्रविद् सुन्दराङ्ग: पुत्रवान् देवपूजकश्च भवति। यदा गुरुशुक्रशनैश्चराणां युतिर्भवेत्तदा जातको नीतिमान् बुद्धिमान् कान्तिमान् सुखी सन्ततिवान् क्रियाधिकश्च भवति।

## ०२/ ०४ कुटुम्बभावे ग्रहचतुष्टययुतिफलम् ।

यदा द्वितीयभावे सूर्यचन्द्रमङ्गलबुधग्रहाणां युतिर्भवेत्तदा जातकोऽधर्मपालक: कुदेशप्रिय: कुलटाप्रिय: कुपुत्रसंतप्तश्च भवति। यदा सूर्यचन्द्रमङ्गलगुरूणां युतिर्भवेत्तदाजातको दुष्टो धर्महीनोऽसत्यवादी कामी कुटुम्बद्वेषी कफरोगी च भवति। यदा सूर्यचन्द्रमङ्गलशुक्राणां युतिर्भवेत्तदा जातको कृतघ्नो दु:खी मलिनो विवादी ख्यातिरहित: परिश्रमकष्टवांश्च भवति। यदा सूर्यचन्द्रमङ्गलशनैश्चराणां युतिर्भवेत्तदा जातकोऽसत्यवादी बुद्धिहीनो विकल्पवक्ता सिद्धिरहितोऽल्पकेशी कुदन्ती जर्जरदेहो लम्बोदरश्च भवति। यदा सूर्यचन्द्रबुधगुरूणां युतिर्भवेत्तदा जातकोऽतिलोभी कलहप्रिय नीचजनाश्रयी अतिपरिश्रमी सर्वभक्षी वातकफरोगी सर्वनाशकरश्च भवति । यदा सूर्यचन्द्रबुधशुक्राणां युतिर्भवेत्तदा जातक: कुस्वभावी सत्कार्यहीनो गुप्तरोगी अल्पप्रजश्च भवति। यदा सूर्यचन्द्रबुधशनैश्चराणां युतिर्भवेत्तदा जातको बन्धुद्वेषी मलिनो वातपित्तरोगी मस्तकरोगी च भवति। यदा सूर्यचन्द्रगुरुशुक्राणां युतिर्भवेत्तदा जातक: कठोरो भ्रान्तचित्तो जडो दु:खी नागरिकमानरहितश्च भवति। यदा सूर्यचन्द्रगुरुशनैश्चराणां युतिर्भवेत्तदा जाताको साधुगुरुविप्रनिन्दक: परान्नपुष्टो नृपपीडितोऽल्पधनिकश्च भवति। यदा सूर्यचन्द्रशुक्रशनैश्चराणां युतिर्भवेत्तदा जातक: कुविचारी हीनाधिकाङ्ग: सुखरहितश्च भवति। यदा सूर्यमङ्गलबुधगुरूणां युतिर्भवेत्तदा जातक: कुस्वभावी चिन्ताशील: पापश्चरित्रहीनो नेत्ररोगी व्ययी

स्त्रीलोलुप: सन्ततिरहितश्च भवति। यदा सूर्यमङ्गलबुधशुक्राणां युतिर्भवेत्तदा जातक: कुमति: पापासक्तो बन्धुहीन: सुकलत्रहीनश्च भवति । यदा सूर्यमङ्गलबुधशनैश्चराणां युतिर्भवेत्तदा जातको दाम्भिको भयग्रस्तोऽविनित: क्षतदग्धदेहश्च भवति। यदा सूर्यमङ्गलगुरुशुक्राणां युतिर्भवेत्तदा जातक: क्रोधी कृतघ्न: कर्णेजपो नेत्ररोगी दोषपूर्णो धर्महीनश्च भवति। यदा सूर्यमङ्गलगुरुशनैश्चराणां युतिर्भवेत्तदा जातक उग्र: कुमति: क्रूरो निर्लज्ज: स्त्रीहीनो लोकत्यक्तश्च भवति। यदा सूर्यमङ्गलशुक्रशनैश्चराणां युतिर्भवेत्तदा जातक:पापो वेदविद्याहीनो धर्महीनश्च भवति। यदा सूर्यबुधगुरुशुक्राणां युतिर्भवेत्तदा जातको जडोऽसत्यवादी प्रमादी दुष्टकर्मशीलो दोषान्वेषी रोगी दुर्बलश्च भवति। यदा सूर्यबुधगुरुशनैश्चराणां युतिर्भवेत्तदा जातक: कामी सौहार्दशून्य: कुरूप: कुनेत्री निर्धनश्च भवति। यदा द्वितीयभावे चन्द्रमङ्गलबुधगुरूणां युतिर्भवेत्तदा जातको भगवत्कथानुरागी ब्राह्मणभक्तो मुनिप्रियो लोकप्रियश्च भवति। यदा चन्द्रमङ्गलबुधशुक्राणां युतिर्भवेत्तदा जातको व्रती शास्त्रानुरागी तीर्थाटनशीलो राजमान्यश्च भवति । यदा चन्द्रमङ्गलबुधशनैश्चराणां युतिर्भवेत्तदा जातको धार्मिक: कविर्धान्याश्ववृषभवस्त्रसुवर्णभोक्ता च भवति । यदा चन्द्रमङ्गलगुरुशुक्राणां युतिर्भवेत्तदा जातको विनयी दैवज्ञो बुद्धिमान् ब्राह्मणप्रियो नेता च भवति ।यदा चन्द्रमङ्गलगुरुशनैश्चराणां युतिर्भवेत्तदा जातको व्रतरत: सुकेशी धनकुबेरो विजयी राज्यपूज्यश्च भवति । यदा चन्द्रमङ्गलशुक्रशनैश्चराणां युतिर्भवेत्तदा जातको गुणवान् रोगमुक्तो वाहनवस्त्रधनसुखयुक्तश्च भवति। यदा चन्द्रबुधुगुरुशुक्राणां युतिर्भवेत्तदा जातको गम्भीर: सत्पुरुषचरणानुरागी शास्त्ररतो याज्ञिको धनवांश्च भवति। यदा चन्द्रबुधगुरुशनैश्चराणां युतिर्भवेत्तदा जातक: प्रसन्नमुखाकृति: प्रसन्नचित्त: सुन्दर: रसिको ब्राह्मणप्रियो नृपप्रियश्च भवति । यदा चन्द्रबुधशुक्रशनैश्चराणां युतिर्भवेत्तदा जातको धार्मिको बहुधनिको राज्यप्रधान: शत्रुभिर्वन्दनीयश्च भवति । यदा चन्द्रगुरुशुक्रशनैश्चराणां युतिर्भवेत्तदा जातक: सुस्वभावयुक्तय: आनन्दरत उच्चपदाधिकारी प्रधानो नृपपूज्यो महापुरुषश्च भवति। यदा मङ्गलबुधगुरुशुक्राणां युतिर्भवेत्तदा जातक: क्षमाशील: सुखी प्रसिद्धपराक्रमी नृपकार्यनिपुणश्च भवति । यदा मङ्गलबुधगुरुशनैश्चराणां युतिर्भवेत्तदा जातक: सत्सङ्गी विदेशव्यवसायसम्पर्काद्धनिको वापीवाटिकादिनिर्माणेन नृपकार्येण वा सुखी च भवति । यदा मङ्गलबुधशुक्रशनैश्चराणां युतिर्भवेत्तदा जातक: सुन्दर: सत्सङ्गी सज्जनप्रिय: स्त्रीयुक्तो बहुधनिको धान्येन परिपूर्णश्च भवति। यदा मङ्गलगुरुशुक्रशनैश्चराणां युतिर्भवेत्तदा जातको नियमवाननुशासनप्रियो वेदज्ञो महाकविर्धनकुबेरश्च भवति। यदा बुधगुरुशुक्रशनैश्चराणां युतिर्भवेत्तदा जातक: कलानिपुणो जनवल्लभ: कीर्तिमान् शत्रुनाशकरश्च भवति।

## तृतीया दृष्टिः।

### ०२/ ०५ कुटुम्बभावे ग्रहपञ्चकयुतिफलम् ।

यदा सूर्यचन्द्रमङ्गलबुधगुरूणां युतिर्भवेत्तदा जातको ह्रस्वदेहो बुद्धिमान् लोभी विवेकहीनः कलहप्रियः शूरश्च भवति । यदा सूर्यचन्द्रमङ्गलबुधशुक्राणां युतिर्भवेत्तदा जातको निष्ठुरः पापबुद्धिस्तेजोहीनो दुःखी च भवति । यदा सूर्यचन्द्रमङ्गलबुधशनैश्चराणां युतिर्भवेत्तदा जातको निशान्धः कामी ज्ञानहीनो बुद्धिहीनो निर्धनो बहुशत्रुयुक्तश्च भवति । यदा सूर्यचन्द्रमङ्गलगुरुशुक्राणां युतिर्भवेत्तदा जातको रुग्णो दुष्टः प्रमादी मलिनः क्रियाहीनो निर्धनो परदेशानुरक्तश्च भवति। यदा सूर्यचन्द्रमङ्गलगुरुशनैश्चराणां युतिर्भवेत्तदा जातकः पुरुषार्थहीनो दीनो मित्रविरोधी परकार्येषूदासीनश्च भवति। यदा सूर्यचन्द्रमङ्गलशुक्रशनैश्चराणां युतिर्भवेत्तदा जातको हतदेहः क्रोधी व्ययी पापरतो दुष्टजनप्रियश्च भवति । यदा सूर्यचन्द्रबुधगुरुशुक्राणां युतिर्भवेत्तदा जातकोऽभिमानी धैर्यहीनो नीतिहीनो लज्जाहीनो निर्दयी दयाहीनश्च भवति । यदा सूर्यचन्द्रबुधगुरुशनैश्चराणां युतिर्भवेत्तदा जातकः कुलधर्मरतो लोकद्वेषी सत्यहीनो निर्धनः पापरतश्च भवति। यदा सूर्यचन्द्रबुधगुरुशुक्राणां युतिर्भवेत्तदा जातको बहुतृष्णावान् क्रोधी भीरुर्निराशो धर्महीनश्च भवति। यदा सूर्यचन्द्रगुरुशुक्रशनैश्चराणां युतिर्भवेत्तदा जातको निन्दितो लोभी पापरतो भययुक्तो व्यवसायरतो निर्धनश्च भवति। यदा सूर्यमङ्गलबुधगुरुशुक्राणां युतिर्भवेत्तदा जातकः कृतघ्नी निंद्यः पुरुषार्थहीनः कुलटापीडितो निर्धनः परकर्मोपजीवी च भवति। यदा सूर्यमङ्गलबुधगुरुशनैश्चराणां युतिर्भवेत्तदा जातकः शठः कृतघ्नो नीचकर्मरतो विरुद्धदारो लोकविरोधी च भवति। यदा सूर्यमङ्गलबुधशुक्रशनैश्चराणां युतिर्भवेत्तदा जातकोऽतिक्रोधी दाम्भिकः क्रूरो वेदशास्त्रविहीनश्च भवति। यदा सूर्यमङ्गलबुधगुरुशुक्रर्शनैश्चराणां युतिर्भवेत्तदा जातको व्यसनी निर्दयः शास्त्रपराङ्गमुखो धनहीनश्च भवति। यदा चन्द्रमङ्गलबुधगुरुशुक्राणां युतिर्भवेत्तदा जातको धनवान् नृपप्रियो ब्राह्मणद्वेषी च भवति। यदा चन्द्रमङ्गलबुधगुरुशनैश्चराणां युतिर्भवेत्तदा जातको धनिको बन्धुहितकरो रथादिवाहनसमृद्धश्च भवति। यदा चन्द्रमङ्गलबुधशुक्रशनैश्चराणां युतिर्भवेत्तदा जातको विनम्रः सद्वचनग्राही सद्वचनानुमंता सचिवो नृपो वा कठोरबुद्धिश्च भवति। यदा चन्द्रमङ्गलगुरुशुक्रशनैश्चराणां युतिर्भवेत्तदा जातकः कृतज्ञः सुस्वभावयुक्तः सन्तुष्टो व्रतोपवासरतश्च भवति । यदा चन्द्रबुधगुरुशुक्रशनैश्चराणां युतिर्भवेत्तदा जातकः सुमनो धार्मिको गुरुविप्रपूजकश्च भवति। यदा मङ्गलबुधगुरुशुक्रशनैश्चराणां युतिर्भवेत्तदा जातकोऽल्पक्रोधी साहसिकः शास्त्रप्रियो बहुमित्रवान् च भवति।

## तृतीया दृष्टिः।

### ०२/०६ कुटुम्बभावे ग्रहषट्कयुतिफलम् ।

यदा सूर्यचन्द्रमङ्गलबुधगुरुशुक्राणां युतिर्भवेत्तदा जातकः शठोऽसत्यवादी निर्धनः कलहप्रियः सेवको दुर्जनप्रियश्च भवति। यदा सूर्यचन्द्रमङ्गलबुधगुरुशनैश्चराणां युतिर्भवेत्तदा जातको दुष्टः कुविद्याप्रियः पुत्रधनधान्यहीनः कुमित्रवान् निष्फलयत्नः कुसेवकयुक्तश्च भवति। यदा सूर्यचन्द्रमङ्गलबुधशुक्रशनैश्चराणां युतिर्भवेत्तदा जातकः शठः क्रोधी मित्रवत्सलो नेता निर्धनश्च भवति। यदा सूर्यचन्द्रमङ्गलगुरुशुक्रशनैश्चराणां युतिर्भवेत्तदा जातको दाम्भिको धार्मिकोऽतीशोकाकुलः पापकार्येषु चञ्चलाधी च भवति। यदा सूर्यचन्द्रबुधगुरुशुक्रशनैश्चराणां युतिर्भवेत्तदा जातकोऽविनयी लोकनिन्दितो धनहीनः कीर्तिरहितश्च भवति। यदा सूर्यमङ्गलबुधगुरुशुक्रशनैश्चराणां युतिर्भवेत्तदा जातको विह्वलो बुद्धिहीनः कुकर्मी दुःखी कलहप्रिय निर्धनश्च भवति। यदा चन्द्रमङ्गलबुधगुरुशुक्रशनैश्चराणां युतिर्भवेत्तदा जातको धर्मकेतुर्यशस्वी चक्रवर्तीनृपश्च भवति।

### ०२/०७ कुटुम्बभावेग्रहसप्तकयुतिफलम् ।

यदा सूर्यचन्द्रमङ्गलबुधगुरुशुक्रशनैश्चराणां युतिर्भवेत्तदा जातको धर्मशीलो धनवान् गजाश्वादिसुख-युक्तो नृपसदृशधनिकश्च भवति।

### ०३/०१ सुतभावे युतिविचारः ।
### ०३/०२ सुतभावे ग्रहद्वयुतिफलम् ।

यदा पञ्चमभावे सूर्यचन्द्रयोर्युतिर्भवेत्तदा जातको निराभिमानी दुःखी स्वभाववक्रः कुभोजनरतः कुपुत्रपिता अतीकष्टभाक् च भवति। यदा सूर्यमङ्गलयोर्युतिर्भवेत्तदा जाातकः क्रूरो भीरुः पापग्रस्तो बहुसंततिमान् बहुस्त्रीयुक्तः पापरतश्च भवति। यदा सूर्यबुधयोर्युतिर्भवेत्तदा जातको दुष्टः क्रूरः पापप्रियो भार्यात्यक्तः कुकर्मरतश्च भवति। यदा सूर्यगुर्वोर्युतिर्भवेत्तदा जातकः स्तुतिवाक्यहीनो निगुणः कठीनदेहः परान्नभोजी परस्त्रीरतश्च भवति। यदा सूर्यशुक्रयोर्युतिर्भवेत्तदा मायावी नीतिज्ञो निर्धनो बन्धुहीनः कुकर्मी च भवति। यदा सूर्यशनैश्चरयोर्युतिर्भवेत्तदा जातकोऽनृतभाषी बुद्धिहीनः कृशदेहः देहकष्टभाक् बहुधनव्ययकर्ता शास्त्रपराङ्मुखश्च भवति। यदा चन्द्रमङ्गलयोर्युतिर्भवेत्तदा जातको विद्वान् देवद्विजपूजाप्रसन्नो वादविवादयुद्धादिकर्मभिर्धनिकश्च भवति । यदा चन्द्रबुधयोर्युतिर्भवेत्तदा जातको

गौरवशाली बह्वान्नपानादिभोक्ता बहुमित्रमान् देवगुरुप्रसादयुक्तश्च भवति। यदा चन्द्रगुर्वोर्युतिर्भवेत्तदा जातक: प्रभावी प्रकृत्या सुखी शास्त्रदक्ष: शत्रुहन्ता च भवति। यदा चन्द्रशुक्रयोर्युतिर्भवेत्तदा स्त्रीप्रियो धनी च भवति। यदा चन्द्रशनैश्चरयोर्युतिर्भवेत्तदा जातक: कुबुद्धि: प्रपञ्ची दाम्भिकोऽपुत्र: शास्त्रविमुखश्च भवति।

यदा मङ्गलबुधयोर्युतिर्भवेत्तदा जातक उद्विग्नमना कुसङ्गी मानधनपुत्रादिरहितो दु:खी च भवति। यदा मङ्गलगुर्वोर्युतिर्भवेत्तदा जातकोऽविनयी क्रोधी दाम्भिक:परदेशानुरत: कर्मणा कृषिवल: कुपुत्रवान् निर्धनश्च भवति।

यदा मङ्गलशुक्रयोर्युतिर्भवेत्तदा जातक: परिश्रमी ब्राह्मणद्वेषी विद्वच्छत्रुर्नीचजनपराजितोऽनेकशत्रु–पीडितश्च भवति। यदा बुधगुर्वोयुतिर्भवेत्तदा जातकोऽलोलुप: मनोहरो जयाभिलाषी स्त्रीप्रियो मनोज्ञ: सुन्दरभाग्यवान् पिताऽमान्यश्च भवति। यदा बुधशुक्रयोर्युतिर्भवेत्तदा जातक: प्रगल्भो ज्ञानी निपुण: सुवचनी ब्राह्मणप्रियोऽद्भुतकर्मकुशलश्च भवति। यदा बुधशनैश्चरयोर्युतिर्भवेत्तदा कुरूपो विकृताङ्गो नपुंसको निर्धन: सज्जनद्वेषी च भवति। यदा गुरुशुक्रयोर्युतिर्भवेत्तदा जातको निष्पाप: स्त्रीप्रियो: कुपुत्रकन्याजनको वंशवर्धको धनकुबेरश्च भवति। यदा गुरुशनैश्चरयोर्युतिर्भवेत्तदा जातकोऽधार्मिको बहुवञ्चक: प्रमादी दुष्टो निंद्यजनो मलिनवेषी मद्यपश्च भवति। यदा शुक्रशनैश्चरयोर्युतिर्भवेत्तदा जातक: स्त्रीलोलुप: कृतघ्न: कुरूप: पापकथानुरक्तो वन्ध्यापुत्रीजनकश्च भवति।

### ०३/०३ सुतभावे ग्रहत्रययुतिफलम् ।

यदा सूर्यचन्द्रमङ्गलग्रहाणां युतिर्भवेत्तदा जातको दाम्भिकोऽनेकविकारपीडितो व्रणदेह: पुण्यहीन: कीर्तिमांश्च भवति। यदा सूर्यचन्द्रबुधानां युतिर्भवेत्तदा जातकश्चञ्चलो मद्यादिपानयुक्तोऽतिपापी स्त्रीतर्जितोऽपुत्रो निर्धनश्च भवति। यदा सूर्यचन्द्रगुरूणां युतिर्भवेत्तदा जातक: प्रमादी कुटिलो बहुप्रपञ्चकारी बह्वाशी निर्दयकर्मरत: शास्त्रपराङ्मुखश्च भवति ।यदा सूर्यचन्द्रशुक्राणां युतिर्भवेत्तदा जातकोऽक्षमो निर्दयो गुणहीन: परधनलोलुपोऽनेकशत्रुपीडितश्च भवति। यदा सूर्यचन्द्रशनैश्चराणां युतिर्भवेत्तदा जातको भीरुर्व्यसनी बहुप्रपञ्चकारी बन्धुविमुखश्च भवति। यदा सूर्यमङ्गलबुधानां युतिर्भवेत्तदा जातको दुष्टोऽतिदीनस्तेजोविहीनौ निराशो व्रणदेहो विवादी च भवति। यदा सूर्यमङ्गलगुरूणां युतिर्भवेत्तदा जातक: कठोरो निराशो दानेच्छारहित: पौरुषहीन: स्त्रीविमुखश्च भवति। यदा

## तृतीया दृष्टिः।

सूर्यमङ्गलशुक्राणां युतिर्भवेत्तदा जातकः कठोरोऽतीदुःखी सर्वाशुभोपेतो लोकतिरस्कृतश्च भवति। यदा सूर्यमङ्गलशनैश्चराणां युर्तिर्भवेत्तदा जातको वेदशास्त्रविमुखो विरक्तभार्यः कुसन्ततियुकतः सज्जनशत्रुश्च भवति। यदा सूर्यबुधगुरूणां युतिर्भवेत्तदा जातकोऽतिक्रोधी दुर्जनः पापरतः क्लीबः परस्त्रीलोलुपो मित्रस्वजनदुःखदायी च भवति। यदा सूर्यबुधशुक्राणां युतिर्भवेत्तदा जातको भीरुः पापनिरतः कृतघ्नो वन्ध्याजनकः क्लेशभाक् धनधान्यभोगवञ्चितश्च भवति। यदा सूर्यबुधशनैश्चराणां युतिर्भवेत्तदा जातको बहुभोजी लम्बोदरो दीर्घदेहः कुरूपोऽतीदीर्घजङघो लघुपादश्च भवति। यदा सूर्यगुरुशुक्राणां युतिर्भवेत्तदा जातकः स्वधर्मविमुखपरधर्मसेवी  इन्द्रजालानुरक्त अन्योपार्जितधनिकश्च भवति। यदा सूर्यगुरुशनैश्चराणां युतिर्भवेत्तदा जातको युद्धप्रियो निर्भयो निर्धनो बान्धवतिरस्कृतश्च भवति। यदा सूर्यशुक्रशनैश्चराणां युतिर्भवेत्तदा जातको बुद्धिहीनो धनहीनो दुष्टो विदेशरतश्च भवति। यदा चन्द्रमङ्गलबुधानां युतिर्भवेत्तदा जातकोऽतिकामी द्युतप्रियो विधर्मी दीनः क्लीबः पराक्रमहीनश्च भवति। यदा चन्द्रमङ्गलगुरूणां युतिर्भवेत्तदा जातकोऽतिक्रोधी गर्विष्ठो जनापहरणवधकार्यरतो जडोऽसद्व्ययी निर्धनश्च भवति। यदा चन्द्रमङ्गलशुक्राणां युतिर्भवेत्तदा जातको वातप्रकृतिः कुरूपो निर्बलः कुसङ्गी कीर्तिरहितो जनतिरस्कृतः सर्वजनपराजितश्च भवति। यदा चन्द्रमङ्गलशनैश्चराणां युतिर्भवेत्तदा जातको निर्भयो दुष्टो निद्रालुः कुरूपोऽसत्यवादी सुखरहितो निर्धनश्च भवति। यदा चन्द्रबुधगुरूणां युतिर्भवेत्तदा जातकः प्राज्ञः सुमतिस्तीर्थसेवी पितृभक्तो धनसमृद्धिवांश्च भवति। यदा चन्द्रबुधगुरूणां युतिर्भवेत्तदा जातकः स्थिरबुद्धिनिर्लोभी निष्पापः प्रभावी पीनदेहः परिश्रमी च भवति। यदा चन्द्रगुरुशुक्राणां युतिर्भवेत्तदा जातको धर्मपरायणः सुकेशी अमान्यो जितशत्रुच्च भवति। यदा चन्द्रगुरुशनैश्चराणां युतिर्भवेत्तदा जातकः सन्तुष्टो बुद्धिमान् सुनयनः सुमुखो महाकविः प्रसिद्धो जितशत्रुच्च भवति। यदा चन्द्रशुक्रशनैश्चराणां युतिर्भवेत्तदा जातको गुणवान् रागद्वेषविमुक्तो भगवद्कथानुरागी दैवज्ञोऽभिमानी च भवति।

यदा मङ्गलबुधगुरूणां युतिर्भवेत्तदा जातको लज्जालुः सत्यप्रियोत्साही बुद्धिमान् शूरो धर्माग्रणीश्च भवति। यदा मङ्गलबुधशुक्राणां युतिर्भवेत्तदा जातको धार्मिकः सौभाग्यवान् वस्त्रधनाभरणयुक्तः सत्सङ्गी विप्रप्रियश्च भवति। यदा मङ्गलबुधशनैश्चराणां युतिर्भवेत्तदा जातको निर्दयो गुणहीनः क्लीबः श्रमक्लान्तः कुलटापतिः बन्धुपरित्यक्तश्च भवति। यदा मङ्गलगुरुशुक्राणां युतिर्भवेत्तदा बुद्धिमान् दृढप्रतिज्ञः सुसूक्ष्मवस्त्राभरणाप्रियः शत्रुहन्ता च भवति। यदा मङ्गलगुरुशनैश्चराणां युतिर्भवेत्तदा जातको दयालुः क्षमावान् विद्यावान् शास्त्रज्ञो वाणिज्यरतः सज्जनप्रियः वेददेवगुरुभक्तश्च भवति। यदा मङ्गलशुक्रशनैश्चराणां युतिर्भर्वेत्तदा जातकः कुबुद्धि निर्लज्जो नीतिरहितोऽगविष्ठश्च भवति। यदा बुधगुरुशुक्राणां युतिर्भवेत्तदा जातकः स्वर्गवत्सुखी प्रसिद्धो ब्राह्मणपूजकः शत्रुहीनश्च भवति। यदा

बुधगुरुशनैश्चराणां युतिर्भवेत्तदा जातको दृढमित्रो विद्याप्राप्तितत्परो गुरुहितकारी कुलश्रेष्ठश्च भवति। यदा बुधशुक्रशनैश्चराणां युतिर्भवेत्तदा जातकः शठो द्युतप्रियः स्थूलदेहो दीर्घहस्तो दीर्घग्रीवः कुकर्णश्च भवति। यदा गुरुशुक्रशनैश्चराणां युतिर्भवेत्तदा जातकोऽतिप्रसिद्धः शस्त्रक्रयविक्रयेणधनी शस्त्रार्जनधी वा धनधान्ययुक्तः परजनावासकर्ता च भवति।

## ०३/०४ सुतभावे ग्रहचतुष्टययुतिफलम् ।

यदा सूर्यचन्द्रमङ्गलबुधग्रहाणां युतिर्भवेत्तदा जातकोऽनेकदोषयुक्तः क्रोधी निर्लज्जः कुस्वभावी नियमरहितश्च भवति। यदा सूर्यचन्द्रमङ्गलगुरूणां युतिर्भवेत्तदा जातकः प्रलम्बलिङ्गो व्रणयुक्तोरुः परस्त्रीलोलुपो धनहीनश्च भवति। यदा सूर्यचन्द्रमङ्गलशुक्राणां युतिर्भवेत्तदा जातको गुणहीनः सत्यहीनो यशहीनो विदेशरतश्च भवति। यदा सूर्यचन्द्रमङ्गलशनैश्चराणां युतिर्भवेत्तदा जातकः कृतघ्नः कृशदेहो हर्षविकारपीडिताङ्गो बन्धुपरित्यक्तो दीनवृत्तिश्च भवति । यदा सूर्यचन्द्रबुधगुरूणां युतिर्भवेत्तदा जातकः प्रहृष्टः कामी सदाकुलिनो नयहीनश्च भवति। यदा सूर्यचन्द्रबुधशुक्राणां युतिर्भवेत्तदा जातकः पिशुनो द्वेष्टा स्वधर्महीनः सज्जनद्वेषी च भवति। यदा सूर्यचन्द्रबुधशनैश्चराणां युतिर्भवेत्तदा जातको निर्दयो जडो भीरुः पापबुद्धिर्निरभिमानी च भवति। यदा सूर्यचन्द्रगुरुशुक्राणां युतिर्भवेत्तदा जातकोऽविनयी यथार्थसक्तो व्यवहारकुशलश्चन्दनादिलिप्ताङ्गश्च भवति। यदा सूर्यचन्द्रगुरुर्शनैश्चराणां युतिर्भवेत्तदा जातकश्चञ्चलो निर्दयो दुष्टश्च भवति। यदा सूर्यचन्द्रशुक्रशनैश्चराणां युतिर्भवेत्तदा जातको रुक्षोव्यर्थश्रमी अपुत्रोऽमित्रश्च भवति। सूर्यमङ्गलबुधगुरूणां युतिर्भवेत्तदा जातको निर्बलोऽतिक्रोधी विरुद्धचेष्टः कुकर्मी च भवति। यदा सूर्यमङ्गलबुधशुक्राणां युतिर्भवेत्तदा जातको बुद्धिहीनः कुटिलः कुकर्मरतोऽधार्मिको नयरहितश्च भवति । यदा सूर्यमङ्गलबुधशनैश्चराणां युतिर्भवेत्तदा जातको निर्बलः पौरुषहीनः कामचर्चारतो दासस्तस्करश्च भवति। यदा सूर्यमङ्गलगुरुशुक्राणां युतिर्भवेत्तदा जातकोऽधार्मिकः कुशास्त्ररतो बहुक्षतपीडिताङ्गो नष्टधनश्च भवति।

यदा सूर्यमङ्गलगुरुशुक्राणां युतिर्भवेत्तदा जातकः कठोरोदाम्भिको विवर्णो महारोगी शास्त्रज्ञानहीनश्च भवति। यदा सूर्यमङ्गलशुक्रशनैश्चराणां युतिर्भवेत्तदा जातको दुव्यसनी दुःखी वाहनसुखवञ्चितश्च भवति। यदा सूर्यबुधगुरुशुक्राणां युतिर्भवेत्तदा जातको निष्प्रभः कुकीर्तिमान् नीचार्जनधीश्च भवति। यदा सूर्यबुधगुरुशनैश्चराणां युतिर्भवेत्तदा जातकः शठो दुःखी मलिनः कुचैलः शत्रुपराजितश्च भवति। यदा सूर्यबुधशुक्रशनैश्चराणां युतिर्भवेत्तदा जातको निर्दयः कुस्त्रीरतः कुसेवारतो विप्रद्वेषी दुष्टजनसङ्गी च

भवति। यदा सूर्यगुरुशुक्रशनैश्चराणां युतिर्भवेत्तदा जातकः पक्षपाती दुर्बुद्धिः कुकर्मरतः कुकाव्यरतश्च भवति।

यदा चन्द्रमङ्गलबुधगुरूणां युतिर्भवेत्तदा जातको विनयी सज्जनवत्सलो वेदशास्त्रज्ञो भाग्यवान् कार्यकुशलश्च भवति। यदा चन्द्रमङ्गलबुधशुक्राणां युतिर्भवेत्तदा जातको विनयी शास्त्रप्रिय विद्यावान् दक्षो भाग्यवान् दृढमित्रवान् शत्रुहन्ता च भवति। यदा चन्द्रमङ्गलबुधशनैश्चराणां युतिर्भवेत्तदा जातकः स्वधर्मवर्धको नम्रवेषी गौरवशाली दानी अतिपराक्रमी च भवति। यदा चन्द्रमङ्गलगुरुशुक्राणां युतिर्भवेत्तदा जातको विप्ररक्षकः सद्गुणसम्पन्नो वेदशास्त्रमर्मज्ञः प्रसिद्धो मानी च भवति। यदा चन्द्रमङ्गलगुरुशनैश्चराणां युतिर्भवेत्तदा जातकः शान्तः सुशीलः शास्त्रज्ञो लोकप्रियश्च भवति। यदा चन्द्रमङ्गलशुक्रशनैश्चराणां युतिर्भवेत्तदा जातकः क्षमावान् कुशाग्रमतिर्धर्मचतुरो धनसमृद्धो विप्रहितकारी च भवति। यदा चन्द्रबुधगुरुशुक्राणां युतिर्भवेत्तदा जातको भोजनप्रियः सुवस्त्रधारी पुत्रवान् धनिकः परोपकारी च भवति। यदा चन्द्रबुधगुरुशनैश्चराणां युतिर्भवेत्तदा जातकः सत्यवादी धार्मिको विनयीपण्डितमान्यश्च भवति। यदा चन्द्रबुधशुक्रशनैश्चराणां युतिर्भवेत्तदा जातको निर्लोभी पवित्रः रूपवान् बलवान् सौभाग्यशाली जितेन्द्रियश्च भवति। यदा चन्द्रगुरुशुक्रशनैश्चराणां युतिर्भवेत्तदा जातको धार्मिको बुद्धिमान् शास्त्रशिक्षणतत्परः पुत्रवान् नृपपूज्यश्च भवति। यदा मङ्गलबुधगुरुशुक्राणां युतिर्भवेत्तदा जातकः सन्तुष्टोऽऽत्मज्ञानी नृपप्रियः शत्रुरहितश्च भवति। यदा मङ्गलबुधगुरुशनैश्चराणां युतिर्भवेत्तदा जातकः क्षमावान् सुशीलो धार्मिकः पितृकार्यदक्षः पितृसेवको लोकप्रियश्च भवति। यदा मङ्गलबुधशुक्रशनैश्चराणां युतिर्भवेत्तदा जातको निर्लोभी नियमबद्धः शुद्धमनः मनोहरो तृष्णाहीनः कुलश्रेष्ठश्च भवति।

यदा मङ्गलगुरुशुक्रशनैश्चराणां युतिर्भवेत्तदा जातको वेदगुरुविप्रभक्त इष्टलाभभोक्ता सज्जन-प्रीतिकरश्च भवति। यदा बुधगुरुशुक्रशनैश्चराणां युतिर्भवेत्तदा जातकः पावनः श्रद्धालुः कलानिपूणो वेदार्थज्ञो धनिकः कीर्तिमांश्च भवति।

## ०३/०५ सुतभावे ग्रहपञ्चकयुतिफलम्।

यदा सूर्यचन्द्रमङ्गलबुधगुरूणां युतिर्भवेत्तदा जातकः कुरूपो मलिनो बहुदोषवान् सन्ततिवत्सलश्च भवति। यदा सूर्यचन्द्रमङ्गलबुधशुक्राणां युतिर्भवेत्तदा जातक उग्रो रात्र्यन्धः सदारोगी निष्कृष्टाङ्गो गणिकागामी च भवति। यदा सूर्यचन्द्रमङ्गलबुधशनैश्चराणां युतिर्भवेत्तदा जातको गुणहीनो विवर्णः क्लीबो

निष्ठुराङ्गः शास्त्रवेदरहितश्च भवति। यदा सूर्यचन्द्रमङ्गलगुरुशुक्राणां युतिर्भवेत्तदा जातकोऽतिक्रोधी व्यर्थाटनशीलो दीनो बन्धुपरित्यक्तश्च भवति। यदा सूर्यचन्द्रमङ्गलगुरुशनैश्चराणां युतिर्भवेत्तदा जातको दाम्भिकोऽसत्यवादी बहुक्रोधी चारित्रहीनो नीचकर्मरतो दुष्टजनसङ्गी चभवति। यदा सूर्यचन्द्रमङ्गलशुक्रशनैश्चराणां युतिर्भवेत्तदा जातको द्युतप्रियो व्रतदूषको दुःखी निर्धनोऽपुत्रश्च भवति। यदा सूर्यचन्द्रगुरुशुक्राणां युतिर्भवेत्तदा जातको व्रणपीडिताङ्गः स्वबन्धुत्यक्तो देवब्राह्मणपीडकश्च भवति। यदा सूर्यचन्द्रबुधगुरुशनैश्चराणां युतिर्भवेत्तदा जातको दुष्टः सज्जनद्वेषी गुरुत्यक्तश्च भवति। यदा सूर्यचन्द्रबुधशुक्रशनैश्चराणां युतिर्भवेत्तदा जातको दयाहीनोऽनर्थकर्ता मद्यपी व्यर्थव्ययी च भवति। यदा सूर्यचन्द्रगुरुशुक्रशनैश्चराणां युतिर्भवेत्तदा जातकः शोकपीडितो निष्प्रभो मानहीनो निर्धनोऽपुत्रश्च भवति। यदा सूर्यमङ्गलबुधगुरुशनैश्चराणां युतिर्भवेत्तदा जातको दुष्टो मूढो रणभीरुः स्त्रीत्यक्तश्च भवति। यदा सूर्यमङ्गलबुधशुक्रशनैश्चराणां युतिर्भवेत्तदा जातको लज्जारहितः सज्जनद्वेषी कृतघ्नो मद्यपी निर्धनश्च भवति। यदा सूर्यमङ्गलगुरुशुक्रशनैश्चराणां युतिर्भवेत्तदा जातकः क्षतपीडिताङ्गो मस्तकरोगी सुखरहितो गौरवहीनश्च भवति। यदा सूर्यबुधगुरुशुक्रशनैश्चराणां युतिर्भवेत्तदा जातकोऽतिक्रोधी कुरूपो नेत्ररोगी कुवस्त्रधारकश्च भवति।

यदा चन्द्रमङ्गलबुधगुरुशुक्राणां युतिर्भवेत्तदा जातको निरुत्साहः सदाक्रूरोऽनर्थकारी कामी धनिकश्च भवति। यदा चन्द्रमङ्गलबुधगुरुशनैश्चराणां युतिर्भवेत्तदा जातकः शूरो मानी निर्व्यसनी च भवति। यदा चन्द्रमंगलबुधशुक्रशनैश्चराणां युतिर्भवेत्तदा जातकः क्षमावान् सुचरित्रवान् जितेन्द्रियो धनवान् पुत्रवान् प्रसिद्धश्च भवति। यदा चंद्रमङ्गलगुरुशुक्रशनैश्चराणां युतिर्भवेत्तदा जातको दुर्जनो मनस्वी अज्ञातशीलोऽतिधनिकःपुत्रप्रियश्च भवति। यदा चन्द्रबुधगुरुशुक्रशनैश्चराणां युतिर्भवेत्तदा जातको मनोहरोऽलङ्कारधारको न्रमवेशी कीर्तिमान् कुलबान्धवाग्रणी च भवति। यदा मङ्गलबुधगुरुशुक्रशनैश्चराणां युतिर्भवेत्तदा जातको विनयी नम्रस्वभावो दयावान् सत्यभाषी दानी च भवति।

## ०३/०६) सुतभावे ग्रहषट्कयुतिफलम्।

यदा सूर्यचन्द्रमङ्गलबुधगुरुशुक्राणां युतिर्भवेत्तदा जातकः कठोरवचनी मन्दगतिर्मलिनो दुःखी दरिद्रश्च भवति। यदा सूर्यचन्द्रमङ्गलबुधगुरुशनैश्चराणां युतिर्भवेत्तदा जातकस्तेजस्वी पौरुषयुक्तः पराक्रमी निरोगी उत्तमस्त्रीयुक्तः प्रधानश्च भवति। यदा सूर्यमङ्गलचन्द्रबुधशुक्रशनैश्चराणां युतिर्भवेत्तदा जातको मधुरभाषी चारुविशालनेत्रः सुस्वरो नीतिमानतिथिप्रियश्च भवति। यदा सूर्यचन्द्रमङ्गलगुरुशुक्रशनैश्चराणां युतिर्भवेत्तदा

**तृतीया दृष्टिः।**

जातकः पैतृकव्यवसायरतः कुटुम्बाग्रणी:परिश्रमपीडिताङ्गः:पुण्यवांश्चभवति। यदा सूर्यचन्द्रबुधगुरुशुक्रशनैश्चराणां युतिर्भवेत्तदा जातकः शठः क्रूरः दयाहीनो यशस्वी विदेशनिवासी परोपजीवी च भवति। यदा सूर्यमङ्गलबुधगुरुशुक्रशनैश्चराणां युतिर्भवेत्तदा जातकः प्रभावहीनो निर्धनः परस्त्रीलोलुपो रिपुनिन्दितश्च भवति। यदा चन्द्रमङ्गलबुधगुरुशुक्रशनैश्चराणां युतिर्भवेत्तदा जातक आत्मज्ञानी धनिको बन्धुप्रियो नेता च भवति।

## ०३/ ०७ सुतभावे ग्रहसप्तकयुतिफलम् ।

यदा सूर्यचन्द्रमङ्गलबुधगुरुशुक्रशनैश्चराणां युतिर्भवेत्तदा जातको विद्वान् समर्थो लोकस्वामी शिल्पकारश्च भवति।

## ०४/ ०१ कलत्रभावे युतिविचारः।

## ०४/ ०२ कलत्रभावे ग्रहद्वययुतिफलम्।

यदा सूर्यचन्द्रयोर्युतिर्भवेत्तदा जातको दाम्भिको गुणहीनो दुःखी विह्वलो धर्महीनश्च भवति। यदा सूर्यमङ्गलयोर्युतिर्भवेत्तदा जातकः क्षतपीडिताङ्गो गुरुविप्रसेवारतो वादरतो दानहीनश्च भवति। यदा सूर्यबुधयोर्युतिर्भवेत्तदा जातको नपुंसकोऽल्पवीर्योऽर्थहीनवक्ता बन्धुयुक्तः कुलटापतिश्च भवति। यदा सूर्यगुर्वोर्युतिर्भवेत्तदा जातको मायावी बहुदुःखी कटुभाषी परान्नभक्षी अल्पसुखभोक्ता कृतघ्नश्च भवति। यदा सूर्यशुक्रयोर्युतिर्भवेत्तदा जातकोऽशान्तो बहुपापरतः परान्नपुष्टो निर्धनः सेवकश्च भवति। यदा सूर्यशनैश्चरयोर्युतिर्भवेत्तदा जातको भयग्रस्तोऽशान्तमनो रुग्णः क्लीबः कुलटापतिर्बहुशत्रुग्रस्तश्च भवति। यदा चन्द्रमङ्गलयोर्युतिर्भवेत्तदा जातको विवेकहीनो धनहीनो मंदाग्निपीडितो खलसङ्गेन भययुक्तश्च भवति। यदा चन्द्रबुधयोर्युतिर्भवेत्तदा जातको दयावान् सत्यवादी सुकलत्रवान् सन्ततियुक्तो बान्धवप्रियः सुखी च भवति। यदा चन्द्रगुर्वोर्युतिर्भवेत्तदा जातकः शास्त्ररतो भाग्यवान् बहुधनिको नृपपूजितश्च भवति। यदा चन्द्रशुक्रयोर्युति जातको बुद्धिमान् सुखी सुकलत्रवांश्च भवति। यदा चन्द्रशनैश्चरयोर्युतिर्भवेत्तदा जातको निर्दयो भीरुः क्रूरः कामी रुग्णः परस्त्रीलोलुपः किङ्करयुक्तश्च भवति। यदा मङ्गलबुधयोर्युतिर्भवेत्तदा जातकः कुटिलो निस्तेजो वक्रभाषी विकलाङ्गः पुत्रपराजितश्च भवति। यदा मङ्गलगुर्वोर्युतिर्भवेत्तदा जातकोऽधमो व्यर्थश्रमी पापःकदर्थिताङ्गो राज्यसेवासम्भूतशत्रुग्रस्तश्च भवति। यदा मङ्गलशुक्रयोर्युतिर्भवेत्तदा जातकोऽधर्मिको नीतिहीनो क्षतदेहो निर्धनः शत्रुपराजितो लोकनिन्दितश्च

भवति। यदा मङ्गलशनैश्चरयोर्युतिभवेत्तदा जातकोऽभिमानी कुरूपो दुष्टकर्मरतः पिशुनो दुर्बलो बहुरोगपीडितश्च भवति। यदा बुधगुर्वोर्युतिर्भवेत्तदा जातको गर्विष्ठ उद्विग्नमनो बुद्धिमान् बलवान् कामपीडितोऽतिव्ययी च भवति। यदा बुधशुक्रयोर्युतिर्भवेत्तदा जातकः श्रद्धालुर्निर्लज्जो रूपवान् निरोगी धनधान्यसमृद्धश्च भवति। यदा बुधशनैश्चरयोर्युतिर्भवेत्तदा जातको गुणहीनो दुर्व्यसनी कामसन्तप्तः कुलटापतिः शत्रुपराजितश्च भवति। यदा गुरुशुक्रयोर्युतिर्भवेत्तदा जातकः सुतनुः सुस्वरयुक्तः बहुरोगी कीर्तिमान् प्रसिद्धो देवब्राह्मणपूजकश्च भवति। यदा गुरुशनैश्चरयोर्युतिर्भवेत्तदा जातकोऽसत्यवादी पापरतो नष्टबुद्धिः स्त्रीपराजितः स्त्रीधनभोक्ता च भवति। यदा शुक्रशनैश्चरयोर्युतिर्भवेत्तदा जातको निर्लज्जो व्यर्थश्रमी अभक्षभोजी असद्व्ययी परस्त्रीरतः परपोषको बहुशत्रुवांश्च भवति।

## ०४/०३ कलत्रभावे ग्रहत्रययुतिफलम् ।

यदा सूर्यचन्द्रमङ्गलग्रहाणां युतिर्भवेत्तदा जातको गुणहीनः कामुको विह्वलो रोगी स्त्रीजितश्च भवति। यदा सूर्यचन्द्रबुधानां युतिर्भवेत्तदा जातकः कठोरः क्षमावान् कुलटानुरतोऽपुत्रश्च भवति। यदा सूर्यचन्द्रगुरूणां युतिर्भवेत्तदा जातकः कामुकः कुकर्मी निर्दयो रुग्णः स्त्रीजितश्च भवति। यदा सूर्यचन्द्रशुक्राणां युर्तिर्भवेत्तदा जातको विनष्टदारो गुरुद्रोही जनद्वेषी विदेशनिवासी च भवति। यदा सूर्यचन्द्रशनैश्चराणां युतिर्भवेत्तदा जातको नयहीनो बुद्धिहीनो दुर्जनरतः सज्जनासहायश्च भवति। यदा सूर्यमङ्गलबुधानां युतिर्भवेत्तदा जातकः पापबुद्धिः परान्नरतः कान्तिहीनो दीनो दुष्कर्मरतः पराश्रयी च भवति। यदा सूर्यमङ्गलगुरूणां युतिर्भवेत्तदा जातकः कुसङ्गी दुष्कर्मरतः शत्रुजितः सज्जननिन्दितः सर्वजनसहायहीनश्च भवति।

यदा सूर्यमङ्गलशुक्राणां युतिर्भवेत्तदा जातको बुद्धिहीनः पापमतिर्निर्दयो विवेकहीनो रुग्णः सज्जनवियोगी च भवति। यदा सूर्यमङ्गलशनैश्चराणां युतिर्भवेत्तदा जातको दुर्बुद्धिर्निर्दयो भीरुः कृतघ्नः कामी कुरूपः कुलटापतिश्च भवति। यदा सूर्यबुधगुरूणां युतिर्भवेत्तदा जातकः कुबुद्धिर्भीरुर्निर्दयो मलिनो निर्धनः शिष्टजनहीनश्च भवति। यदा सूर्यबुधशुक्राणां युतिर्भवेत्तदा जातकः कुमतिः क्रूरः कुसङ्गी बुद्धिहीनः कुलटापतिस्तस्करश्च भवति। यदा सूर्यबुधशनैश्चराणां युतिर्भवेत्तदा जातकः कातरो दुष्टोऽत्यातुरो विरूपः कुलटापतिश्च भवति । यदा सूर्यगुरुशुक्राणां युतिर्भवेत्तदा जातको निर्दयो रुग्णः कुसङ्गी पत्नीत्यक्तः शास्त्रविमुखश्च भवति। यदा सूर्यगुरुशनैश्चराणां युतिर्भवेत्तदा जातको भीरुर्दीनः

सदाचारहीनो विरक्तदारः सन्मानहीनो जनसहायहीनश्च भवति। यदा सूर्यशुक्रशनैश्चराणां युतिर्भवेत्तदा जातकः कामी संभोगचतुरो जितेन्द्रियः सुखी दानी च भवति।

यदा चन्द्रमङ्गलबुधानां युतिर्भवेत्तदा जातको निर्दयो बुद्धिहीनः कुरूपः कुवेषी विधुरः सत्योपेतश्च भवति। यदा चन्द्रमङ्गलगुरूणां युतिर्भवेत्तदा जातकः प्राज्ञः कामातुरः सत्यव्रती धर्मपरायणो युद्धकुशलः स्त्रीपीडितश्च भवति। यदा चन्द्रमङ्गलशुक्राणां युतिर्भवेत्तदा जातकः क्रोधी निष्ठुरो मलिनः सज्जनविमुखः कार्यनिन्दितश्च भवति। यदा चन्द्रमङ्गलशनैश्चराणां युतिर्भवेत्तदा जातकः सरलोऽदाम्भिकः कष्टहीनः शास्त्ररतः सज्जनसङ्गी देवगुरुपूजकश्च भवति। यदा चन्द्रबुधगुरूणां युतिर्भवेत्तदा जातकः शास्त्रानुरागी वाग्मी युद्धकुशलोत्तमसुखभाक् पत्नीप्रियश्च भवति। यदा चन्द्रबुधशुक्राणां युतिर्भवेत्तदा जातको विनयी सुशीलो गौरवशाली पुण्यकर्मरतो देवपूजकश्च भवति। यदा चन्द्रबुधशनैश्चराणां युतिर्भवेत्तदा जातकः श्रद्धावान् यशस्वी धनिको धान्योपभोक्ता भूपतिः पुत्रेणप्रसिद्धश्च भवति। यदा चन्द्रगुरुशुक्राणां युतिर्भवेत्तदा जातको निर्भयो गुणवान् धर्मपरायणः स्त्रीप्रियः कीर्तिमांश्च भवति। यदा चन्द्रगुरुशनैश्चराणां युतिर्भवेत्तदा जातको मन्त्रज्ञो जितेन्द्रियोऽन्वेषको गजादिसुखभाक् तीर्थाटनशीलश्च भवति।

यदा चन्द्रशुक्रशनैश्चराणां युतिर्भवेत्तदा जातको बुद्धिमान् बहुशास्त्रविद् रतिप्रियो याज्ञिकश्च भवति। यदा मङ्गलबुधगुरूणां युतिर्भवेत्तदा जातकः क्षमावान् सद्वचनपालकः सुजनप्रियोऽपराजितः प्रभूतहर्म्यवांश्च भवति। यदा मङ्गलबुधशुक्राणां युतिर्भवेत्तदा जातकः पुण्यशाली प्रसन्नचित्तः सर्वकार्यकुशलः कृषिवलो धनिकश्च भवति। यदा मङ्गलबुधशनैश्चराणां युतिर्भवेत्तदा जातकः कठोरः कदर्यः क्रूरः कान्तिहीनो मांसाहारी कीर्तिहीनश्च भवति। यदा मङ्गलगुरुशुक्राणां युतिर्भवेत्तदा जातको लज्जालुर्विशालनेत्रो सुखी यशस्वी पत्नीप्रियो विद्वद्वन्द्यश्च भवति। यदा मङ्गलशुक्रशनैश्चराणां युतिर्भवेत्तदा जातकः क्रोधी कुसङ्गी रोगी विधिनियमहीनो बहुशस्त्रवांश्च भवति। यदा बुधगुरुशुक्राणां युतिर्भवेत्तदा जातको धनसङ्ग्रही सुखी उत्तमस्त्रीसुखभाक् लोकप्रियो राजसचिवश्च भवति। यदा बुधगुरुशनैश्चराणां युतिर्भवेत्तदा तदा जातको यशस्वी स्वनामधन्यः पुण्यशाली नैकशास्त्रविद् बहुप्रासादवान् जनोपकारी मन्त्री च भवति। यदा बुधशुक्रशनैश्चराणां युतिर्भवेत्तदा जातकः सद्धर्मप्रियः शत्रुजितो राज्यमान्यो नृपपूज्यो भूमिपतिर्विद्वद्प्रियश्च भवति। यदा गुरुशुक्रशनैश्चराणां युतिर्भवेत्तदा जातकः सुचरित्रवान् सुशीलः सदाचाररतः समृद्धिशाली पशुधनयुक्तश्च भवति।

## ०४/ ०४ कलत्रभावे ग्रहचतुष्टययुतिफलम् ।

यदा सूर्यचन्द्रमङ्गलबुधानां युतिर्भवेत्तदा जातको निर्दयः क्रोधी शोकातुरः पापकथानुरागी व्यर्थपरिश्रमी प्रतापहीनश्च भवति। यदा सूर्यचन्द्रमङ्गलगुरूणां युतिर्भवेत्तदा जातको दयालुर्बहुपुत्रवान् सुमित्रवान् सुजनप्रियः भूरिकलत्रसुखभाक् च भवति। यदा सूर्यचन्द्रमङ्गलशुक्राणां युतिर्भवेत्तदा जातको निष्ठुरो धर्मविमुखोऽल्पसुखी कलत्रहीनःपरनिन्दकश्च भवति। यदा सूर्यचन्द्रमङ्गलशनैश्चराणां युतिर्भवेत्तदा जातको दाम्भिकोऽधार्मिको निष्ठुरः सन्ततिरहितो निर्धनः कुलटापतिश्च भवति। यदा सूर्यचन्द्रबुधगुरूणां युतिर्भवेत्तदा जातको दाम्भिको निंद्योऽनेकस्त्रीभोगी च भवति। यदा सूर्यचन्द्रबुधशुक्राणां युतिर्भवेत्तदा जातकः कुष्ठरोगी त्वचारोगी कफरोगी कुलटाऽऽवृत्तश्च भवति। यदा सूर्यचन्द्रबुधशनैश्चराणां युतिर्भवेत्तदा जातकः कृतघ्नी पित्तरोगी स्मृतिभ्रष्टः पापः कुसङ्गी गणिकागामी च भवति। यदा सूर्यचन्द्रगुरुशुक्राणां युतिर्भवेत्तदा जातकः मलिनो द्वेषी बुद्धिहीनो धर्महीनश्च भवति। यदा सूर्यचन्द्रगुरुशुक्राणां युतिर्भवेत्तदा जातकः शास्त्रानुरागी अनृतभाषी कृशतनुः कलहप्रियः सन्ततिरहितश्च भवति। यदा सूर्यचन्द्रशुक्रशनैश्चराणां युतिर्भवेत्तदा जातकः कठोरो दुर्बुद्धिः शास्त्रज्ञानहीनो रात्र्यन्धकोऽतिव्ययी धननाशकश्च भवति। यदा सूर्यमङ्गलबुधगुरूणां युतिर्भवेत्तदा जातकः कामी निष्ठुरः देहपीडितो लाभहीनश्च भवति। यदा सूर्यमङ्गलबुधशुक्राणां युतिर्भवेत्तदा जातको दुष्टः श्रमिकः कृशकायः स्त्रीदोषपीडितश्च भवति। यदा सूर्यमङ्गलबुधशनैश्चराणां युतिर्भवेत्तदा जातकः स्वच्छन्दी बुद्धिहीनोऽतिक्रोधी कुकर्मी कुलटापतिश्च भवति। यदा सूर्यमङ्गलगुरुशुक्राणां युतिर्भवेत्तदा जातकः शठो निर्दयो मायावी कामुकः आभिचारिकश्च भवति। यदा सूर्यमङ्गलगुरुशनैश्चराणां युतिर्भवेत्तदा जातको द्वेषी बुद्धिहीनः पिशुनो बहुदोषभाक् जनविरोधीकार्यकर्ता च भवति। यदा सूर्यमङ्गलशुक्रशनैश्चराणां युतिर्भवेत्तदा जातको निर्लज्जः कठोरः पापप्रसिद्धो बन्धुहीनो निर्धनश्च भवति। यदा सूर्यबुधगुरुशुक्राणां युतिर्भवेत्तदा जातको मायावी असूयको मांसाहारी निस्तेजः शत्रुपराजितश्च भवति। यदा सूर्यबुधगुरुशनैश्चराणां युतिर्भवेत्तदा जातको बुद्धिहीनः कलहप्रियः शास्त्रपराङ्मुखी भाग्यहीनश्च भवति। यदा सूर्यगुरुशुक्रशनैश्चराणां युतिर्भवेत्तदा जातकः शठः कठोरोऽतिक्रोधी निष्प्रजो निर्धनश्च भवति। यदा चन्द्रमङ्गलबुधगुरूणांयुतिर्भवेत्तदा जातकः प्रसन्नचित्तो कल्याणकर्मनिरतो मनोहरः सौभाग्यशाली नेता च भवति। यदा चन्द्रमङ्गलबुधशुक्राणां युतिर्भवेत्तदा जातको नीतिमान् नयनाभिराम उत्तमकलत्रभाक् नैकसन्ततियुक्तश्च भवति। यदा चन्द्रमङ्गलबुधशनैश्चराणां युतिर्भवेत्तदा जातको धीर उदारः सुबुद्धिर्देवप्रियो मान्यश्च भवति। यदा चन्द्रमङ्गलगुरुशुक्राणां युतिर्भवेत्तदा जातकोऽनसूयो निर्लोभी धर्मपरायणो नियमरतो व्यवहारनिपुणो भाषाकुशलश्च भवति। यदा चन्द्रमङ्गलगुरुशनैश्चराणां युतिर्भवेत्तदा जातकः सुचरित्रः प्रियवक्ता चारुनेत्रः

स्त्रीवल्लभो नृपप्रियश्च भवति। यदा चन्द्रमङ्गलशुक्रशनैश्चराणां युतिर्भवेत्तदा जातक: सुशीलो निर्भयश्चतुरो नीतिज्ञो बान्धवस्नेही सुजनप्रियश्च भवति। यदा चन्द्रबुधगुरुशुक्राणां युतिर्भवेत्तदा जातक: सुशीलो धार्मिक: सत्यवादी गुरुभक्तोऽतिथिप्रियश्च भवति। यदा चन्द्रबुधगुरुशनैश्चराणां युतिर्भवेत्तदा जातको बुद्धिमान् प्रसन्नचित्त: सुकलत्रभाक् पुत्रवान् सुजनप्रियश्च भवति। यदा चन्द्रबुधशुक्रशनैश्चराणां युतिर्भवेत्तदा जातक: कार्यप्रसिद्ध: सुवेषधारी अजातशत्रुश्च भवति। यदा चन्द्रगुरुशुक्रशनैश्चराणां युतिर्भवेत्तदा जातको निष्पापो लज्जाशीलो जितेन्द्रिय: सुकलत्रभाक् च भवति।

यदा मङ्गलबुधगुरुशुक्राणां युतिर्भवेत्तदा जातक: सत्याचरणरतो मङ्गलकार्यरतो गौरवशाली भाग्यवान् नृपवत्सुखी च भवति। यदा मङ्गलबुधगुरुशनैश्चराणां युतिर्भवेत्तदा जातक: सत्यव्रती धर्मध्वज: सुखी उत्तमकलत्रसुखभाक् बहुपत्नीवान् स्वजनोपकारी शत्रुजिच्च भवति । यदा मङ्गलबुधशुक्रशनैश्चराणां युतिर्भवेत्तदा जातको विनीतो मनोहरो भाग्यवान् कुलशिरोमणिर्महाजनसङ्गी च भवति। यदा मंगलगुरुशुक्रशनैश्चराणां युतिर्भवेत्तदा जातको निष्पाप: पुण्यात्मा प्रबलप्राक्रमी प्रशंसनीय: प्रसिद्धश्च भवति।यदा बुधगुरुशुक्रशनैश्चराणां युतिर्भवेत्तदा जातक नीतिज्ञो विदग्धदारोऽजातशत्रुश्च भवति।

### ०४/ ०५ कलत्रभावे ग्रहपञ्चकयुतिफलम् ।

यदा सूर्यचन्द्रमङ्गलबुधगुरूणां युतिर्भवेत्तदा जातक: क्रूर: कठोर: कुरूपो दुष्टो नपुंसको निर्धनश्च भवति। यदा सूर्यचन्द्रमङ्गलबुधशुक्राणां युतिर्भवेत्तदा जातको बुद्धिहीनो मन्दस्वभावो विकृतमना: कफरोगी कुलटापतिश्च भवति। यदा सूर्यचन्द्रमङ्गलबुधशनैश्चराणां युतिर्भवेत्तदा जातकोऽधार्मिक: कृशतनुर्यवाकृति: कुपुत्रवान् कन्याजनकश्च भवति। यदा सूर्यचन्द्रमङ्गलगुरुशुक्राणां युतिर्भवेत्तदा जातक: कामुक: भीरुर्बहुदोषभाक् स्त्रीलोलुपश्च भवति। यदा सूर्यचन्द्रमङ्गलगुरुशनैश्चराणां युतिर्भवेत्तदा जातको द्वेषी निस्तेज: सर्वशत्रुवांश्च भवति। यदा सूर्यचन्द्रमङ्गलशुक्रशनैश्चराणां युतिर्भवेत्तदा जातक: कठोर इर्षालुर्बुद्धिहीन: कामी च भवति। यदा सूर्यचन्द्रबुधगुरुशुक्राणां युतिर्भवेत्तदा जातको निर्लज्जोऽधार्मिको बन्धुहीन: स्वजनपरित्यक्त: शत्रुपराजितश्च भवति। यदा सूर्यचन्द्रबुधगुरुशनैश्चराणां युतिर्भवेत्तदा जातक: शठो याचको यशोहीन: शत्रुग्रस्तश्च भवति। यदा सूर्यचन्द्रबुधशुक्रशनैश्चराणां युतिर्भवेत्तदा जातको दुष्टो गर्विष्ठो हृदयरोगी यानादिव्ययी च भवति। यदा सूर्यचन्द्रगुरुशुक्रशनैश्चराणां युतिर्भवेत्तदा जातको निर्दयोऽप्रसिद्ध: परान्नभक्षी कुलटापतिश्च भवति। यदा सूर्यमङ्गलबुधगुरुशुक्राणां युतिर्भवेत्तदा जातक:

कृतघ्नः कठोरोऽपुत्रोनिर्धनो निस्तेजश्च भवति। यदा सूर्यमङ्गलबुधगुरुशनैश्चराणां युतिर्भवेत्तदा जातको दुष्टो निर्लज्जः पापः कुकर्मी वेदाचारहीनश्च भवति। यदा सूर्यमङ्गलबुधशुक्रशनैश्चराणां युतिर्भवेत्तदा जातको दुष्टः कुकर्मरतः पापो मूर्खशिरोमणिः पत्नीसौहार्दहीनश्च भवति। यदा सूर्यमङ्गलगुरुशुक्र-शनैश्चराणां युतिर्भवेत्तदा जातकः कातरः व्यसनपीडितः पराक्रमहीनो निर्धनो बान्धवनिन्दितश्च भवति। यदा सूर्यबुधगुरुशुक्रशनैश्चराणां युतिर्भवेत्तदा जातको मतिहीनोऽविनयी क्षुधार्तः कुलटापतिश्च भवति।

यदा चन्द्रमङ्गलबुधगुरुशुक्राणां युतिर्भवेत्तदा जातको दयालुर्नीतिज्ञः सत्याचरणकर्ता सुकलत्रभाक् सुजनप्रियश्च भवति। यदाचन्द्रमङ्गलबुधगुरुशनैश्चराणां युतिर्भवेत्तदा जातको धार्मिक उत्तमवचनी प्रभावशाली प्रसिद्धः प्रमदानुरागी च भवति । यदा चन्द्रमङ्गलबुधशुक्रशनैश्चराणां युतिर्भवेत्तदा सुचरित्रश्चतुरो बुद्धिमान् बान्धवप्रियश्च भवति। यदा चन्द्रमङ्गलगुरुशुक्रशनैश्चराणां युतिर्भवेत्तदा जातकः शास्त्रपरायणो निरोगी दीर्घायुः अप्रसिद्धस्तीर्थाटनप्रियश्च भवति। यदा चन्द्रबुधगुरुशुक्रशनैश्चराणां युतिर्भवेत्तदा जातकोऽप्रमादी दुष्टहन्ता उपायेनकार्यसाधकश्च भवति। यदा मङ्गलबुधगुरुशुक्रशनैश्चराणां युतिर्भवेत्तदा जातकोऽद्वेष्टा धार्मिकः प्रशंसनीयश्च भवति।

### ०४/०६ कलत्रभावे ग्रहषट्कयुतिफलम् ।

यदा सूर्यचन्द्रमङ्गलबुधगुरुशुक्राणां युतिर्भवेत्तदा जातकोऽसत्यवादी रोगग्रस्तो निर्धनो नृपपीडितश्च भवति। यदा सूर्यचन्द्रमङ्गलबुधगुरुशनैश्चराणां युतिर्भवेत्तदा जातकः शठः रोगपीडितो मलिनः सेवकः शत्रुपराजितश्च भवति। यदा सूर्यचन्द्रमङ्गलबुधशुक्रशनैश्चराणां युतिर्भवेत्तदा जातकः कुलटापतिरकालवृद्धो रोगपीडितश्च भवति। यदा सूर्यचन्द्रमङ्गलगुरुशुक्रशनैश्चराणां युतिर्भवेत्तदा जातको विनयी भीरुः क्षुधार्तो नैकक्लेशभाक् च भवति। यदा सूर्यचन्द्रबुधगुरुशुक्रशनैश्चराणां युतिर्भवेत्तदा जातकः कृपणः स्नेहशून्यो रौद्रकर्मरतो निर्धनो दुःखी च भवति। यदा सूर्यमङ्गलबुधगुरुशुक्रशनैश्चराणां युतिर्भवेत्तदा जातको बुद्धिहीनः परस्त्रीरतः शत्रुपराजितश्च भवति। यदा चन्द्रमङ्गलबुधगुरुशुक्रशनैश्चराणां युतिर्भवेत्तदा जातकः प्रसन्नचित्तो मनोहरो धनसङ्ग्रही नृपश्च भवति।

## ०४/ ०७ कलत्रभावे ग्रहसप्तकयुतिफलम्।

यदा सूर्यचन्द्रमङ्गलबुधगुरुशुक्रशनैश्चराणां युतिर्भवेत्तदा जातकः शूरः सद्धर्मपरायणो दृढवचनी यशस्वी नृपश्च भवति।

**उपसंहारः** अस्यां दृष्ट्यां युतिविचारस्य सामान्यफलं तदनु च कुटुम्बभावे सुतभावे कलत्रभावे च ग्रहद्वययुतिरारभ्य सप्तग्रहयुतिपर्यन्तं ग्रहाणां सामान्यविशेषफलवत्त्वं व्याख्यातं। अतएव साधूक्तं यद् द्विर्बद्धं सुबद्धं भवति किमुयत्र नवग्रहाः ? यद्यप्युभयो राहुकेतुनामकयोश्छयाग्रहयोर्विचारऽत्र न कृस्तयोस्तु अधिकविशेषफलवत्त्वात्।

-x-x-x-

# चतुर्थी दृष्टिः।

## जन्मकुण्डल्यां ग्रहाणां दृष्टिविचारः।
(१३७-१५९)

## जन्मकुण्डल्यां ग्रहाणां दृष्टिविचारः।

जन्मकुण्डल्यां सूर्यचन्द्रमङ्गलादिग्रहाणामन्यान्यक्षेत्रस्थानां दृष्टिरपि जातकस्य जीवने प्रभावं दर्शयति। तेषां ग्रहाणां मेषवृषभादिराशिपतीनां क्षेत्रेषु स्थित्वा प्रभावस्य यत्फलं भवति तस्य विचारः कर्तव्य इत्यत्र दृष्टिविचारः प्रस्तूयते। तद्यथा मेषवृश्चिकयोर्मङ्गलो वृषभतुलयोः शुक्रो मिथुनकन्ययोर्बुधः कर्कस्य चन्द्रः सिंहस्य सूर्यो धनुर्मीनयोर्गुरुः मकरकुम्भयोश्च शनिरिति राशिपतीनां क्षेत्रेषु स्थितानां सूर्यादिनामुपरिचन्द्रादिग्रहाणां दृष्टिपातेन जातकस्य फलप्राप्तिरेवं भविष्यति।

सर्वेग्रहाः[१] स्वस्थानात् सप्तमभावे पूर्णदृष्ट्या पश्यन्ति मङ्गलश्चतुर्थाष्टमभावयोः पूर्णदृष्ट्या पश्यति। गुरुः पञ्चमनवमभावयोः पूर्णदृष्ट्या पश्यति। मङ्गलं विहाय सर्वेग्रहाः स्वस्थानात् चतुर्थाष्टमभावयोः त्रिपाद्दृष्ट्या पश्यन्ति। गुरुं विहाय सर्वेग्रहाः स्वस्थानात् पञ्चमनवमभावयोरर्धदृष्ट्या पश्यन्ति। शनैश्चरं विहाय सर्वेग्रहाः स्वस्थानात् तृतीयदशमभावयोरेकपाददृष्ट्या पश्यन्ति।

## <u>जन्मकुण्डल्यां सामान्यदृष्टिविचारः</u>।

### ०१) मङ्गलक्षेत्रीयस्य सूर्यस्योपरि चन्द्रादिग्रहाणां दृष्टिफलम्।

यदा मङ्गलक्षेत्रीयस्य[२] सूर्यस्योपरिचन्द्रस्य दृष्टिर्भवेत्तदा जातको दानी कोमलाङ्गः कलाज्ञो बहुभृत्यवान् स्त्रीप्रियश्च भवति।यदा मङ्गलस्य दृष्टिर्भवेत्तदा जातको बलवान् शूरः क्रूरो रक्तनेत्रपाद-हस्तयुक्तश्च भवति। यदा बुधस्य दृष्टिर्भवेत्तदा जातकः सुखहीनो निर्धनः पराक्रमहीनः प्रेष्यो नित्यप्रवासी मलिनः पराश्रयी च भवति। यदा गुरोर्दृष्टिर्भवेत्तदा जातको नृपमन्त्री दानी दयालुः कुलाग्रणी बहुधनसम्पन्नश्च भवति। यदा शुक्रस्य दृष्टिर्भवेत्तदा जातकश्चर्मरोगी दीनो दुष्टमित्रयुक्तः कुस्त्रीसङ्गी च

---

१ त्रिदशत्रिकोणचतुरस्रसप्तमान्यवलोकयन्ति चरणाभिवृद्धितः।
रविजामरेज्यरुधिराःपरे च ये क्रमशो भवन्ति किल वीक्षणेऽधिकाः।। बृ.जा. २/१३ ।।

२ यदा सूर्यो मेषराश्यां वृश्चिकराश्यां वा भवेत्तदा स मङ्गलक्षेत्रीयः कथ्यते।

भवति। यदा शनैश्चरस्य दृष्टिर्भवेत्तदा जातक उत्साहहीनो मलिनो बुद्धिहीनो दीनो मूढस्त्रीभर्ता अकुशलश्च भवति।

## ०२) शुक्रक्षेत्रीयस्य सूर्यस्योपरि चन्द्रादिग्रहाणां दृष्टिफलम्।

यदा शुक्रक्षेत्रीयस्य[३] सूर्यस्योपरि चन्द्रस्य दृष्टिर्भवेत्तदा जातको मृदुवचनी वेश्यागामी बहुस्त्रीसङ्गी भवति। एवं जलव्यवसायेनधनोपार्जनं करोति। यदा मङ्गलस्य दृष्टिर्भवेत्तदा जातकस्तेजस्वी शूरः संग्रामप्रियः स्वबलेन धनसम्पन्नः प्रसिद्धश्च भवति। यदा बुधस्य दृष्टिर्भवेत्तदा जातको लेखको लिपिज्ञः काव्यपुस्तकगानविद्यासु निपुणो मनोहरः प्रसन्नचित्तश्च भवति। यदा गुरोर्दृष्टिर्भवेत्तदा जातको भीरुः स्त्रीधनसुखभाक् नृपो नृपमन्त्री बुद्धिमांश्च भवति। यदा शुक्रस्य दृष्टिर्भवेत्तदा जातको मनोहरनेत्रवान् सुन्दरदेहः प्रधानसचिवो मन्त्री चिन्तायुक्तश्च भवति। यदा शनैश्चरस्यदृष्टिर्भवेत्तदा जातको नीचकर्मकर्ता प्रमादी दरिद्रो विषमस्वभावो रोगपीडितो वृद्धस्त्रीसङ्गी च भवति।

## ०३) बुधक्षेत्रीयस्य सूर्यस्योपरि चन्द्रादिग्रहाणां दृष्टिफलम्।

यदा बुधक्षेत्रीयस्य[४] सूर्यस्योपरि चन्द्रस्य दृष्टिर्भवेत्तदा जातको बन्धनशत्रुपीडित उदासीन परदेशयात्राकारणेन कष्टभाक् धनहीनश्च भवति। यदा मङ्गलस्य दृष्टिर्भवेत्तदा जातकः प्रमादी लज्जालुः क्लेशभाक् दीनः सङ्ग्रामपराजितः शत्रुभयपीडितश्च भवति।

यदा गुरोर्द्रष्टिर्भवेत्तदा जातको बहुशास्त्रवेत्ता, स्वतन्त्रस्वभावो विदेशयात्रारतः स्त्रीपुत्रादिकारणात् गर्विष्ठश्च भवति। यदा शुक्रस्य दृष्टिर्भवेत्तदा जातकश्चञ्चलो विलासी निरोगी सुखी स्त्रीपुत्रादियुक्तो विदेशवासी विषाग्निशस्त्रघातेनक्वचिद् हतशरीरो भवति।

यदा शनैश्चरस्यदृष्टिर्भवेत्तदा जातको धूर्तो बुद्धिहीन उद्विग्गमना बहुभृत्यभाक् बहुबन्धुपोषकश्चभवति।

## ०४) चन्द्रक्षेत्रीयस्य सूर्यस्योपरि चन्द्रादिग्रहाणां दृष्टिफलम् ।

यदा चन्द्रक्षेत्रीयस्य[५] सूर्यस्योपरि चन्द्रस्य दृष्टिर्भवेत्तदा जातको निर्दयो नृपो वा नृपसदृशो जलव्यवसायेन धनिकश्च भवति। यदा मङ्गलस्य दृष्टिर्भवेत्तदा जातकः पिशुनः शोकपीडितो भगन्दरादिरोगैः पीडितो विरक्तबन्धुश्च भवति। यदा बुधस्य दृष्टिर्भवेत्तदा जातको विद्यावान् संमानितो

---

३ यदा सूर्यो वृषभराश्यां तुलाराश्यां वा भवेत्तदा स शुक्रक्षेत्रीयः कथ्यते।

४ यदा सूर्यो मिथुनराश्यां कन्याराश्यां वा भवेत्तदा स बुधक्षेत्रीयः कथ्यते।

५ यदा सूर्यः कर्कराश्यां भवेत्तदा स चन्द्रक्षेत्रीयः कथ्यते।

यशस्वी प्रसिद्धो नृपप्रियः कार्यनिपुणः शत्रुहीनश्च भवति। यदा गुरोर्दृष्टिर्भवेत्तदा जातकः कुलशिरोमणि–निर्मलयशस्वी नृपमन्त्री सेनापतिः कालज्ञश्च भवति। यदा शुक्रस्य दृष्टिर्भवेत्तदा जातकः प्रियवाक् सेवाकार्यनिपुणो युद्धकुशलः स्त्रीसेवी स्त्रीसम्पर्कात् धनसम्पन्नश्च भवति। यदा शनैश्चरस्यदृष्टिर्भवेत्तदा जातकः कुमतिः कुकर्मरतः पिशुनः कफरोगी वायुरोगी परजनधनहर्ता च भवति।

## ०५) निजक्षेत्रीयस्य सूर्यस्योपरि चन्द्रादिग्रहाणां दृष्टिफलम्।

यदा निजक्षेत्रीयस्य[६] सूर्यस्योपरि चन्द्रस्यदृष्टिर्भवेत्तदा जातको बुद्धिमान् कफरोगी सुकलत्रवान् नृपप्रियश्च भवति। यदा मङ्गलस्य दृष्टिर्भवेत्तदा जातको धूर्तः कफरोगपीडितः क्रूरः शूरः परस्त्रीरतश्च भवति। यदा बुधस्य दृष्टिर्भवेत्तदा जातको धूर्तो नृपाज्ञापालको बलवान् पण्डितजनवत्सलो लेखकश्च भवति। यदा गुरोर्दृष्टिर्भवेत्तदा जातकः स्वजनानुरागी देवमन्दिरवाटीकातडाग वापीनिर्माणकर्ता महाबुद्धिमानेकान्तवासी च भवति।

यदा शुक्रस्य दृष्टिर्भवेत्तदा जातको दयाहीनः क्रोधी अपयशभोक्ता कुष्टत्वचारोगी लज्जाहीनः स्वजनपरित्यक्तश्च भवति। यदा शनैश्चरस्य दृष्टिर्भवेत्तदा जातकः शठः कार्येषुविघ्नकर्ता नपुंसकः परपीडकः स्वजनक्लेशदायी च भवति।

## ०६) गुरुक्षेत्रीयस्य सूर्यस्योपरि चन्द्रादिग्रहाणां दृष्टिफलम्।

यदा गुरुक्षेत्रीयस्य[७] सूर्यस्योपरि चन्द्रस्य दृष्टिर्भवेत्तदा जातको वाग्मी बुद्धिमान् मनोहरदेहो शोकरहितः पुत्रवान् कुटुम्बवांश्च भवति। यदा मङ्गलस्य दृष्टिर्भवेत्तदा जातकः स्पष्टवक्ता धनवान् प्रचण्डदेहः स्वजनसङ्गविहीन सङ्ग्रामे वा विवादे यशस्वी स्थिराजीविकायुक्तश्च भवति। यदा बुधस्य दृष्टिर्भवेत्तदा जातको धातुक्रियानिपुणः काव्यकलाकुशलो भगवत्कथाकारो मधुरभाषी लोकमान्यः सत्पुरुषपूजितश्च भवति। यदा गुरोर्दृष्टिर्भवेत्तदा जातकोऽतिविद्वान् नृपमन्त्री कुलाग्रणीर्गजश्वादिधनयुक्तश्च भवति। यदा शुक्रस्य दृष्टिर्भवेत्तदा जातकः शान्तस्वभावः परिमलद्रव्यभोगी शृङ्गाराभूषणयुक्तः श्रेष्ठवस्त्रधारी सुकलत्रवांश्च भवति।

यदा शनैश्चरस्य दृष्टिर्भवेत्तदा जातको नीचजनाश्रयी पशुप्रेमी मलिनोऽपवित्रो परान्नभक्षी च भवति।

---

[६] यदा सूर्यः सिंहराश्यां भवेत्तदा स निजक्षेत्रीयः कथ्यते।

[७] यदा सूर्यो धनुराश्यां मीनराश्यां वा भवेत्तदा स गुरुक्षेत्रीयः कथ्यते।

## ०७) शनैश्चरक्षेत्रीयस्य सूर्यस्योपरि चन्द्रादिग्रहाणांदृष्टिफलम्।

यदा शनैश्चरक्षेत्रीयस्य[८] सूर्यस्योपरि चन्द्रस्य दृष्टिर्भवेत्तदा जातको मायावी चञ्चलः स्त्रीसङ्गेनधन–सुखनाशकरश्च भवति। यदा मङ्गलस्य दृष्टिर्भवेत्तदा जातको रोगग्रस्तो विकलाङ्गो युद्धे वादविवादे पराजितः शत्रुकृतव्रणपीडिताङ्गश्च भवति। यदा बुधस्य दृष्टिर्भवेत्तदा जातको नपुंसकः परधनहर्ता[९] शूरश्च भवति। यदा गुरोर्दृष्टिर्भवेत्तदा जातको बुद्धिमान् सत्कर्मकर्ता बहुजनपालको यशोवान् मनस्वी प्रसिद्धश्च भवति। यदा शुक्रस्य दृष्टिर्भवेत्तदा जातको रत्नादिक्रयविक्रयेण धनसम्पन्नः स्त्रीसाहाय्येन च धनिको भवति। यदा शनैश्चरस्यदृष्टिर्भवेत्तदा जातकः शत्रुनाशको नृपसंमानभाक् प्रसन्नचित्तश्च भवति।

## ०८) मेषराशिगतचन्द्रस्योपरि[१०]सूर्यादिग्रहाणां दृष्टिफलम्।

यदा मेषराशिगतचन्द्रस्योपरि सूर्यस्य दृष्टिर्भवेत्तदा जातको धैर्यवानुग्रस्वभाव नम्रजनैः सह नम्रः सङ्ग्रामभीरुर्नृपसंमानभाक् च भवति। यदा मङ्गलस्यदृष्टिर्भवेत्तदा जातको दन्तरोगी नेत्ररोगी विषाग्निवायुभयपीडितो भूतादिदुर्बाधापीडितश्च भवति। यदा बुधस्यदृष्टिर्भवेत्तदा जातको बहुविद्याविशारदो मधुरवाक् लोकप्रियः सुकीर्तिमान् सद्गुणसम्पन्नो धनिकश्च भवति। यदा गुरोर्दृष्टिर्भवेत्तदा जातको बहुधनवान् नृपसचिवो राज्याधिकारी सेनाध्यक्षो बहुभृत्यवान् च भवति। यदा शुक्रस्यदृष्टिर्भवेत्तदा जातकः शान्तस्वभावो मनोहरो धनवान् सुकलत्रवान् सुपुत्रवान् श्रेष्ठवक्ताऽल्पाशी च भवति।

यदा शनैश्चरस्य दृष्टिर्भवेत्तदा जातको रोगग्रस्त उद्विगमना निर्धनोऽनृतभाषी दुष्टकर्मरतः कुपुत्रसन्तप्तश्च भवति।

## ०९) वृषभराशिगतचन्द्रस्योपरि सूर्यादिग्रहाणां दृष्टिफलम्।

यदा वृषभराशिगतचन्द्रस्योपरि सूर्यस्य दृष्टिर्भवेत्तदा जातको भूमिपरीक्षणेन धनोपार्जनकर्ता कृषिकर्मनिपुणोऽन्वेषणकर्मणा प्रसिद्धो धनसम्पन्नो मन्त्री वाहनस्वामी च भवति। यदा मङ्गलस्य दृष्टिर्भवेत्तदा जातकः कामी परस्त्रीमनोहारी परस्त्रीसङ्गेन स्वपत्नीपुत्रत्यागी मातृपीडिकश्च भवति। यदा बुधस्यदृष्टिर्भवेत्तदा जातको विद्वान् चतुरवाक् भाषाविद् सर्वजनप्रियः सद्गुणसम्पन्नः कृपालुश्च भवति।

---

[८] यदा सूर्यो मकरराश्यां कुम्भराश्यां वा भवेत्तदा स शनैश्चरक्षेत्रीयः कथ्यते।

[९] जातकाभरणग्रन्थानुसारेण परवित्तहरणनिपुणो भवति प्रकाशितं वर्तते किन्तु संपादकेन वित्तशब्दस्यस्थाने चित्तशब्दः पठितः ।

[१०] चन्द्रं विहायाऽन्येषां ग्रहाणां क्षेत्रीयत्वं स्वामित्वानुसारेण गृहीत्वा तेषां क्षेत्रीयत्चमित्युक्तम् । चन्द्रस्य तु राशिगतत्वमेवफलं सर्वदा विचार्यते ।

यदा गुरोर्दृष्टिर्भवेत्तदा जातको धर्मनिष्ठः प्रख्यातो मातृपितृभक्त उत्तमपुत्रसुखभाक् सत्कुटुम्बवान् सुकलत्रयुक्तश्च भवति। यदा शुक्रस्यदृष्टिर्भवेत्तदा जातक उत्तमयानस्वामी उत्तमगृहसौख्ययुक्तो-त्तमोत्तमवस्त्रधारी सद्गृहस्थश्च भवति। यदा शनैश्चरस्य दृष्टिर्भवेत्तदा जातको निर्धनो मातृ[११]स्वस्त्रीद्वेषी पुत्रवान् मित्रवान् च भवति।

## १०)मिथुनराशिगतचन्द्रस्योपरि सूर्यादिग्रहाणां दृष्टिफलम्।

यदा मिथुनराशिगतचन्द्रस्योपरि सूर्यस्य दृष्टिर्भवेत्तदा जातकश्चतुरः सुशीलो धार्मिकोऽतिदुःखी नातिधनिकश्च भवति। यदा मङ्गलस्य दृष्टिर्भवेत्तदा जातकोऽतुलितबलवान् प्रकाण्डपण्डितः सुखी उत्तमवाहनस्वामी वैभवसम्पन्नो रूपवांश्च भवति। यदा बुधस्य दृष्टिर्भवेत्तदा जातकोऽतिकुशलोऽपराजितो धैर्यवान् नृपो दृढाज्ञाधारी च भवति। यदा गुरोर्दृष्टिर्भवेत्तदा जातको बहुशास्त्रविद् प्रसिद्धः सत्यपरायणो विवेकान्वितो धनिकश्च भवति।

यदा शुक्रस्य दृष्टिर्भवेत्तदा जातक उत्तमोत्तमवस्त्रगृहाभूषणस्त्रीपुत्रादि सुखभाक् च भवति। यदा शनैश्चरस्य दृष्टिर्भवेत्तदा जातको द्वेषी बन्धुहीनः स्त्रीरहितो निर्धनो वाहनपुत्रादिसुखहीनश्च भवति।

## ११) कर्कराशिगतचन्द्रस्योपरि सूर्यादिग्रहाणां दृष्टिफलम्।

यदा कर्कराशिगतचन्द्रस्योपरि सूर्यस्य दृष्टिर्भवेत्तदा जातको नृपप्रियः पत्रवाहको वा सन्देशवाहको वा दुर्गनिरीक्षको निष्प्रयोजनक्लेशकारी च भवति। यदा मङ्गलस्य दृष्टिर्भवेत्तदा जातकश्चतुरः शूरो दुर्बलदेहो मातृद्वेषी च भवति। यदा बुधस्य दृष्टिर्भवेत्तदा जातको नीतिशास्त्रविद् मनोहरो धनिकः स्त्रीपुत्रसुखभाक् च भवति। यदा गुरोर्दृष्टिर्भवेत्तदा जातको रजोगुणसम्पन्नो नीतिविशारदो विनीतः पराक्रमी चक्रवर्तीनृपश्च भवति। यदा शुक्रस्य दृष्टिर्भवेत्तदा जातकः सुवर्णादिसुखभाक् स्त्रीसुखयुक्तो गणिकागामी च भवति। यदा शनैश्चरस्य दृष्टिर्भवेत्तदा जातको व्यर्थभ्रमणशीलोऽनृतभाषी दरिद्रः पापरतो नीचकर्मरतो मातृकष्टदायी च भवति।

---

[११] केषाचित्मते यदा वृषभराश्यां पूर्वार्धेस्थित चन्द्रस्योपरि शनैश्चरस्य दृष्टिर्भवेत्तदा स मातृघाती वृषभराश्यां उत्तरार्धेस्थितचन्द्रस्योपरि शनैश्चरस्य दृष्टिर्भवेत्तदा स पितृघाती भवति।

## १२) सिंहराशिगतचन्द्रस्योपरि सूर्यादिग्रहाणां दृष्टिफलम्।

यदा सिंहराशिगतचन्द्रस्योपरि सूर्यस्यदृष्टिर्भवेत्तदा जातको नृपसदृशसद्गुणसम्पन्नः शूरो मद्यपानरसिकः विलम्बेनप्राप्तसंततिः प्रसिद्धो महारवश्च भवति। यदा मङ्गलस्य दृष्टिर्भवेत्तदा जातक उग्रस्वभाव उत्तमपुरुषोत्तमोत्तमवाहनस्त्रीपुत्रादिसुखभाक् च भवति। यदा बुधस्य दृष्टिर्भवेत्तदा जातको धनस्त्रीपुत्रयानादिसुखभाक् कातरः स्त्रीवशश्च भवति। यदा गुरोर्दृष्टिर्भवेत्तदा जातको सद्गुणसंपन्न उत्तमकुलोत्पन्नः कुलाग्रणी बहुश्रुतो नृपमन्त्री च भवति। यदा शुक्रस्य दृष्टिर्भवेत्तदा जातकश्चतुरो रुग्णः स्त्रीसङ्गी कार्यनिपुणो विद्वांश्च भवति। यदा शनैश्चरस्य दृष्टिर्भवेत्तदा जातकः कृषिकर्मरतो धनहीनोऽसत्यवादी दुर्गपालकः स्त्रीसुखरहितश्च भवति।

## १३) कन्याराशिगतचन्द्रस्योपरि सूर्यादिग्रहाणां दृष्टिफलम्।

यदा कन्याराशिगतचन्द्रस्योपरि सूर्यस्य दृष्टिर्भवेत्तदा जातकः कोषाध्यक्षः प्रसिद्धो विशिष्टकर्मकर्ता स्त्रीहीनो गुरुचरणानुरागी च भवति। यदा मङ्गलस्य दृष्टिर्भवेत्तदा जातको धैर्यवान् शिल्पशास्त्रज्ञः[१२] शिक्षितः प्रसिद्धो धनिको मातृकष्टदायी हिंसकः शूरः संग्रामविजयी च भवति। यदा बुधस्य दृष्टिर्भवेत्तदा जातकः काव्यकर्ता ज्योतिर्विद् कलहे वादे वा विजयी प्राज्ञश्च भवति। यदा गुरोर्दृष्टिर्भवेत्तदा जातको बन्धुसाहाय्येनसुखी राज्यकर्मज्ञाता यशोवान् कठिनकार्यस्य त्वरितार्थबोधकश्च भवति।

यदा शुक्रस्य दृष्टिर्भवेत्तदा जातकोऽनेकस्त्रीसङ्गी बहुविधालङ्कारभोक्ता धनिकः पराक्रमी च भवति। यदा शनैश्चरस्य दृष्टिर्भवेत्तदा जातको विस्मृतमतिर्दरिद्रः सुखहीनो मातृसुखवञ्चितः स्त्रीवशो निरर्थकधन–व्ययी च भवति।

## १४) तुलाराशिगतचन्द्रस्योपरि सूर्यादिग्रहाणां दृष्टिफलम्।

यदा तुलाराशिगतचन्द्रस्योपरि सूर्यस्य दृष्टिर्भवेत्तदा जातको रुग्णोऽस्थिरक्रियो निर्धनो भ्रमणशीलः पराजितः सुखहीनः पुत्रहीनश्च भवति । यदा मङ्गलस्य दृष्टिर्भवेत्तदा जातक उग्रस्वभावः रूद्रस्वभावः परस्त्रीलोलुपो बुद्धिमान् नेत्ररोगी च भवति। यदा बुधस्य दृष्टिर्भवेत्तदा जातकः कलाकुशलः शुभवाक् विद्वान् प्रख्यातश्च भवति। यदा गुरोर्दृष्टिर्भवेत्तदा जातको वस्त्राभूषणक्रयविक्रयकर्मकुशलः सर्वत्रप्रशस्तश्च भवति। यदा शुक्रस्य दृष्टिर्भवेत्तदा जातकश्चतुरः प्रसन्नचित्तः पुष्टदेहो धनसम्पन्नो विद्वांश्च भवति। यदा

[१२] प्राचीनग्रन्थेषु शिल्पशास्त्रविषयेषु मूर्तिकलाभवननिर्माणादि स्थापत्यकला च समावेशमर्हते स्म। आधुनिककाले वास्तुविषयकाणि समाविष्टानि बोध्यानि ।

शनैश्चरस्य दृष्टिर्भवेत्तदा जातकः प्रियभाषी बहुवाहनस्वामी विषयासक्तः[१३] स्वल्पसुखी मातृहितकारी च भवति।

### १५) वृश्चिकराशिगतचन्द्रस्योपरि सूर्यादिग्रहाणां दृष्टिफलम्।

यदा वृश्चिकराशिगतचन्द्रस्योपरि सूर्यस्य दृष्टिर्भवेत्तदा जातको विद्वान् भ्रमणशीलः सुखहीनो धनवान् सेवारतः श्रेष्ठवृत्तिहीनश्च भवति। यदा मङ्गलस्य दृष्टिर्भवेत्तदा जातको युद्धादिकार्येषु यशस्वी राज्यकार्यनिपुणो शूरो बह्वन्नाशी च भवति।

यदा बुधस्य दृष्टिर्भवेत्तदा जातकोऽकुशलस्तर्कविद्याविशारदो गीतसङ्गीतनिपुणश्च भवति। यदा गुरोर्दृष्टिर्भवेत्तदा जातको रूपवान् श्रेष्ठकर्मकर्ता धनाभूषणयुक्तश्च भवति।

यदा शुक्रस्य दृष्टिर्भवेत्तदा जातकोऽनैकविद्यापारङ्गतो बहुसुखभाक् धनवाहनसुखभाक् स्त्रीसङ्गेननष्टधनश्च भवति। यदा शनैश्चरस्य दृष्टिर्भवेत्तदा जातकः कृपणोऽसत्यवादी निर्धनः कुसंततियुक्तश्च भवति।

### १६) धनुराशिगतचन्द्रस्योपरि सूर्यादिग्रहाणां दृष्टिफलम्।

यदा धनुराशिगतचन्द्रस्योपरि सूर्यस्य दृष्टिर्भवेत्तदा जातकः प्रतापी उत्तमयशभाक् सुखभाक् उत्तमवाहनस्वामी सङ्ग्रामेविजयी राज्यसंमानभाक् च भवति।

यदा मङ्गलस्य दृष्टिर्भवेत्तदा जातको बहुप्रतापवान् सेनाध्यक्षो लक्ष्मीवानलङ्कारयुक्तश्च भवति। यदा बुधस्य दृष्टिर्भवेत्तदा जातकः श्रेष्ठवक्ता बहुभृत्यवान् गूढविद्याविद् शिल्पविद्यावांश्च भवति। यद गुरोर्दृष्टिर्भवेत्तदा जातको महापदस्थः श्रेष्ठवृत्तिः सुन्दरदेहश्च भवति। यदा शुक्रस्य दृष्टिर्भवेत्तदा जातको धर्मनिष्ठः संततिवान् धनिकः सुखसम्पत्तिवांश्च भवति। यदा शनैश्चरस्य दृष्टिर्भवेत्तदा जातको नित्यशास्त्ररतः श्रेष्ठवक्ता प्रचण्डप्रतापी च भवति।

### १७) मकरराशिगतचन्द्रस्योपरि सूर्यादिग्रहाणां दृष्टिफलम्।

यदा मकरराशिगतचन्द्रस्योपरि सूर्यस्य दृष्टिर्भवेत्तदा जातको भ्रमणशीलो मलिनो बुद्धिहीनो निर्धनश्च भवति। यदा मङ्गलस्य दृष्टिर्भवेत्तदा जातकः प्रचण्डश्चतुर उत्तमवाहनस्वामी स्त्रीपुत्रसुखभाक् च भवति। यदा बुधस्य दृष्टिर्भवेत्तदा जातको जडो निर्धनो गृहत्यागी स्त्रीपुत्रत्यक्तश्च भवति। यदा गुरोर्दृष्टिर्भवेत्तदा जातको राजपुत्रो राजसदृशस्तेजस्वी सत्यरतो गुणवान् स्त्रीपुत्रयुक्तश्च भवति। यदा शुक्रस्य दृष्टिर्भवेत्तदा

---

[१३] जातकाभरणग्रन्थानुसारेण तु जातको विषयभोगहीनो भवति।

जातको मनोहरनेत्रवान् धनवान् वाहनस्वामी पुत्रादिसुखभाक् च भवति। यदा शनैश्चरस्य दृष्टिर्भवेत्तदा जातकः प्रमादी सत्यहीनो मलिनो व्यसनयुक्तो निर्धनश्च भवति।

### १८) कुम्भराशिगतचन्द्रस्योपरि सूर्यादिग्रहाणां दृष्टिफलम्।

यदा कुम्भराशिगतचन्द्रस्योपरि सूर्यस्य दृष्टिर्भवेत्तदा जातकः कृषिकर्मरतो द्युतरतो नृपाश्रितो धर्मरतश्च भवति। यदा मङ्गलस्य दृष्टिर्भवेत्तदा जातको जल्पको मलिनचित्तोऽतिधूर्तो गृहधनमातृपितृवियुक्तश्च भवति। यदा बुधस्य दृष्टिर्भवेत्तदा जातकोऽतिपवित्रः प्रियवक्ता स्त्रीदाक्षिण्यवान् स्त्रीगानपटुश्च भवति। यदा गुरोर्दृष्टिर्भवेत्तदा जातक उत्तमनगरवासी क्षेत्रस्याधिपतिः सत्पुरुषाणां चरणानुरागी सुकलत्रवांश्च भवति। यदा शुक्रस्य दृष्टिर्भवेत्तदा शुक्रस्य दृष्टिर्भवेत्तदा जातको दीनो भीरुः पापो कुकर्मरतो पुत्रस्त्रीमित्रहीनश्च भवति। यदा शनैश्चरस्य दृष्टिर्भवेत्तदा शनैश्चरस्यदृष्टिर्भवेत्तदा जातको बृहत्नखी कुस्त्रीरतोऽधार्मिकोऽधिकरोमयुक्तः शठश्च भवति।

### १९) मीनराशिगतचन्द्रस्योपरि सूर्यादिग्रहाणां दृष्टिफलम्।

यदा मीनराशिगतचन्द्रस्योपरि सूर्यस्य दृष्टिर्भवेत्तदा जातको सुखी धनसम्पन्नः प्रसन्नभार्यः सेनाध्यक्षश्च भवति। यदा मङ्गलस्य दृष्टिर्भवेत्तदा जातकोऽतिपापः शत्रुपराजितः कुलटासङ्गी शूरो दुःखी च भवति। यदा बुधस्य दृष्टिर्भवेत्तदा जातको धनवान् नृपः सुखी प्रमदासक्तो वशीकरणकुशलश्च भवति। यदा गुरोर्दृष्टिर्भवेत्तदा जातक उदारचित्तः सुकुमारदेहः स्त्रीपुत्रवान् धनिकश्च भवति। यदा शुक्रस्यर्दृष्टिर्भवेत्तदा जातकः सुशीलो रतिप्रियो नृत्यगीतादिनिपुणो विद्वांश्च भवति। यदा शनैश्चरस्य दृष्टिर्भवेत्तदा जातकः कामुकः कुदारः स्त्रीपुत्ररहितो वा नीचस्त्रीसङ्गीश्च भवति।

### २०) निजक्षेत्रीयस्यमङ्गलस्योपरि चन्द्रादिग्रहाणां दृष्टिफलम्।

यदा निजक्षेत्रीयस्य[१४] मङ्गलस्योपरि सूर्यस्यदृष्टिर्भवेत्तदा जातकश्चतुरः श्रेष्ठवक्ता पितृभक्तो धनिकानामग्रणी पुत्रवान् स्त्रीयुक्तः प्रसिद्धो दण्डाधिकारी राज्यसचिवश्च भवति। यदा चन्द्रस्य दृष्टिर्भवेत्तदा जातक ईर्ष्यालुर्हतशरीरो मातृसुखहीनो द्वेषी मित्ररहितोऽधिककन्याजनकः परस्त्रीरतः सेनापतिश्च भवति। यदा बुधस्य दृष्टिर्भवेत्तदा जातकश्चतुरः परधनहर्ता कामादिरिपुभिः पीडितः कुलटासङ्गी च भवति। यदा गुरोर्दृष्टिर्भवेत्तदा जातको विद्वान् मधुरभाषी भाग्यवान् समर्थो मातृपितृवत्सलश्च भवति। यदा शुक्रस्य दृष्टिर्भवेत्तदा जातकः स्त्रीसङ्गेन नष्टधनो बन्धनपीडितो वा

---

[१४] यदा मङ्गलो मेषराश्यां वृश्चिकराश्यां वा भवेत्तदा स निजक्षेत्रीयः कथ्यते।

भवति। यदा शनैश्चरस्य दृष्टिर्भवेत्तदा जातको दुर्बलेर्ष्यालुर्मातृहीनः कुटुम्बद्वेषी परस्त्रीरतश्चौरान्वेषी च भवति।

## २१) शुक्रक्षेत्रीयस्यमङ्गलस्योपरि सूर्यादिग्रहाणां दृष्टिफलम्।

यदा शुक्रक्षेत्रीयस्य[१५]मङ्गलस्योपरि सूर्यस्य दृष्टिर्भवेत्तदा जातकः स्त्रीद्वेषी धैर्यवान् क्रोधी शत्रुयुक्तः पर्वतवनचारी च भवति। यदा चन्द्रस्य दृष्टिर्भवेत्तदा जातको विषमस्वभावः स्त्रीप्रियोऽनेकस्त्रीसङ्गी मातृपीडको युद्धभीरुश्च भवति। यदा बुधस्य दृष्टिर्भवेत्तदा जातकः कोमलाङ्गो जल्पकोऽल्पधनपुत्रयुक्तः शास्त्रवेत्ता च भवति। यदा गुरोर्दृष्टिर्भवेत्तदा जातको विशालहृदयो भाग्यवान् सङ्गीतनिपुणो बन्धुप्रियश्च भवति।

यदा शुक्रस्य दृष्टि भवेत्तदा जातको राज्यमन्त्री सेनाध्यक्षः प्रसिद्धः सुखी च भवति।

यदा शनैश्चरस्य दृष्टिर्भवेत्तदा जातको नम्रस्वभावो विद्वान् ग्रामनगरसमाजाग्रणीर्धनवान् स्वजन-युक्तश्च भवति।

## २२) बुधक्षेत्रीयस्य मङ्गलस्योपरि सूर्यादिग्रहाणां दृष्टिफलम्।

यदा बुधक्षेत्रीयस्य[१६] मङ्गलस्योपरि सूर्यस्यदृष्टिर्भवेत्तदा जातकः शूरो धैर्यवान् रक्ताङ्गो विद्वान् धनिकः पर्वतवनचारी च भवति। यदा चन्द्रस्य दृष्टिर्भवेत्तदा जातको बलवान् संतोषी स्त्रीलोलुपो राज्यरक्षाधिकारी च भवति। यदा बुधस्य दृष्टिर्भवेत्तदा जातको गणितज्ञः काव्यकुशलो लिपिवेत्ता जल्पको मधुरोऽप्यनृतभाषी दूतकार्यनिपुणश्च भवति। यदा गुरोर्दृष्टिर्भवेत्तदा जातकः कार्यकुशलो राजपुरुषः प्रसिद्धो नेता दूतकार्यार्थं विदेशप्रवासी च भवति। यदा शुक्रस्य दृष्टिर्भवेत्तदा जातको वस्त्रान्नपानादिसम्पन्नः स्त्रीसम्बध्धकार्यरतो व्यवसायी वा समृद्ध्या सर्वप्रियश्च भवति। यदा शनैश्चरस्य दृष्टिर्भवेत्तदा जातकः प्रतापी मलिनो वैभवहीनः प्रमादी दुर्गकोषस्थकार्यरतः पर्वतभ्रमणशीलश्च भवति।

## २३) चन्द्रक्षेत्रीयस्य मङ्गलस्योपरि सूर्यादिग्रहाणां दृष्टिफलम्।

यदा चन्द्रक्षेत्रीयस्य[१७] मङ्गलस्योपरि सूर्यस्य दृष्टिर्भवेत्तदा जातकः पित्तव्याधीग्रस्तस्तेजस्वी दण्डाधिकारी वा रक्षाधिकारी धैर्यवान् महाबलवांश्च भवति।

---

[१५] यदा मङ्गलो वृषभराश्यां वा भवेत्तदा स शुक्रक्षेत्रीयः भवति।

[१६] यदा मङ्गलो मिथुनराश्यां कन्याराश्यां वा भवेत्तदा स बुधक्षेत्रीयः कथ्यते।

[१७] यदा मङ्गलः कर्कराश्यां भवेत्तदा स कर्कक्षेत्रीयः कथ्यते।

यदा चन्द्रस्य दृष्टिर्भवेत्तदा जातको कुकर्मरतो दुर्मुखः शोकयुक्तो बहुरोगपीडिताङ्गश्च भवति। यदा बुधस्य दृष्टिर्भवेत्तदा जातको मलिनवृत्तिः पापः स्वजनपरित्यक्तो नीचकुलोत्पन्नश्च भवति। यदा गुरोर्दृष्टिर्भवेत्तदा जातको विख्यातो नृपमन्त्री विद्वान् त्यागी सुखी च भवति। यदा शुक्रस्य दृष्टिर्भवेत्तदा जातको निर्धनः स्त्रीसङ्गेनोद्विग्नमनाः पराजितश्च भवति। यदा शनैश्चरस्य दृष्टिर्भवेत्तदा जातकः सुन्दरदेहो ललितचेष्टो जलोत्पन्नपदार्थ– क्रयविक्रयधनिको जलप्रवासेन लाभवान् नृपसदृशसुखी नृपसम्बधेन वा धनिकश्च भवति।

## २४) सूर्यक्षेत्रीयस्य मङ्गलस्योपरि सूर्यादिग्रहाणां दृष्टिफलम्।

यदा सूर्यक्षेत्रीयस्य[१८] मङ्गलस्योपरि सूर्यस्य दृष्टिर्भवेत्तदा जातक उग्रस्वभावः शरणागतप्रशंसकानाञ्च हितकारी मित्रसज्जनस्वजनयुक्तो वनपर्वतविहारी च भवति। यदा चन्द्रस्य दृष्टिर्भवेत्तदा जातकः कठोरदेहो बुद्धिमान् मातृकष्टदायी बहुयशकीर्तियुक्तः स्त्रीसङ्गेन च धनिको भवति। यदा बुधस्य दृष्टिर्भवेत्तदा जातको लुब्धको बहुचतुरः काव्यकलारसिकः शिल्पशास्त्रविद् चञ्चलश्च भवति। यदा गुरोर्दृष्टिर्भवेत्तदा जातकः शुद्धमति बहुशास्त्रविद् राज्याधिकारी राजकीयलाभवांश्च भवति। यदा शुक्रस्य दृष्टिर्भवेत्तदा जातकः प्रसन्नचित्तस्तरुणोत्साही बहुस्त्रीसङ्गी स्त्रीप्रशंसालब्धश्च भवति। यदा शनैश्चरस्य दृष्टिर्भवेत्तदा जातको अकालवृद्धभासी दीनो भिक्षुकश्च भवति।

## २५) गुरुक्षेत्रीयस्य मङ्गलस्योपरि सूर्यादिग्रहाणां दृष्टिफलम्।

यदा गुरुक्षेत्रीयस्य[१९] मङ्गलस्योपरि सूर्यस्य दृष्टिर्भवेत्तदा जातकः क्रूरः संमानयोग्यो वनपर्वतविहारी च भवति। यदा चन्द्रस्य दृष्टिर्भवेत्तदा जातको विद्वान् विकलः कलहप्रियो नृपविरोधी च भवति। यदा बुधस्य दृष्टिर्भवेत्तदा जातको मेधावी शिल्पशास्त्रनिपुणो विद्वांश्च भवति। यदा गुरोर्दृष्टिर्भवेत्तदा जातकः सुखहीनः स्त्रीहीनः स्त्रीचिन्तायुक्तो वा धनिकः परिश्रमी चञ्चलश्च भवति। यदा शुक्रस्य दृष्टिर्भवेत्तदा जातको विषयासक्तो मनोहरो युवतिप्रियो महार्घवस्त्राभूषणधारी च भवति। यदा शनैश्चरस्य दृष्टिर्भवेत्तदा जातक उदारबुद्धिर्मलिनो भ्रमणशीलः सुखहीनः परधर्मावलम्बी परकार्यरतश्च भवति।

---

[१८] यदा मङ्गलः सिंहराश्यां भवेत्तदा स सूर्यक्षेत्रीयः कथ्यते।

[१९] यदा मङ्गलो धनुराश्यां मीनराश्यां वा भवेत्तदा स गुरुक्षेत्रीयः कथ्यते।

## २६) शनैश्चरक्षेत्रीयस्य मङ्गलस्योपरि सूर्यादिग्रहाणां दृष्टिफलम्।

यदा शनैश्चरक्षेत्रीयस्य[२०] मङ्गलस्योपरि सूर्यस्य दृष्टिर्भवेत्तदा जातकः प्रतापवान् श्यामवर्ण स्त्रीपुत्रधनसम्पन्नश्च भवति। यदा चन्द्रस्य दृष्टिर्भवेत्तदा जातकोत्तमाभूषणयुक्तश्चञ्चलो धनिक उच्चपदस्थ उदारविचारयुक्तश्च भवति। यदा बुधस्य दृष्टिर्भवेत्तदा जातकोऽसन्तुष्टोऽधार्मिकोऽसत्यः कपटी निर्धनो मधुरवाक्निर्भयश्च भवति। यदा गुरोर्दृष्टिर्भवेत्तदा जातको रूपवान् नृपसदृशगुणयुक्तो दृढनिश्चयी दीर्घायुर्भ्रातृप्रेमी नृपसंमानभाक् च भवति। यदा शुक्रस्य दृष्टिर्भवेत्तदा जातकः कलहप्रियो विविधभोगभोगी परिवारवत्सलश्च भवति। यदा शनैश्चरस्य दृष्टिर्भवेत्तदा जातको विद्वान् धनिकोऽनेकसन्ततियुक्त स्त्रीद्वेषी नृपश्च भवति।

## २७) मङ्गलक्षेत्रीयस्य बुधस्योपरि सूर्यादिग्रहाणां दृष्टिफलम्।

यदा मङ्गलक्षेत्रीयस्य[२१] बुधस्योपरि सूर्यस्य दृष्टिर्भवेत्तदा जातकः सत्यप्रियः सुखी वन्धुषुमुख्यो नृपसंमानभाक् च भवति। यदा चन्द्रस्य दृष्टिर्भवेत्तदा जातकः सेवककार्यनिपुणो मलिनश्चरित्रहीनः स्त्रीलोलुपो वाहनभृत्यस्वामी गीतनृत्यादिप्रियश्च भवति। यदा मङ्गलस्य दृष्टिर्भवेत्तदा जातकः शूरः पण्डितो धनसम्पन्नो प्रियवाक् कलहप्रियो राज्यप्रियश्च भवति। यदा गुरोर्दष्टिर्भवेत्तदा जातकः स्निग्धदेहो रोमयुक्तो धनवान् पापमतिः स्त्रीपुत्रवान् श्रेष्ठवाक् च भवति। यदा शुक्रस्य दृष्टिर्भवेत्तदा जातको गुणवान् गौरवयुक्तः सुबुद्धिमान् नम्रस्वभावो मित्रप्रियो नगराध्यक्षश्चतुरवाक् विश्वसनीयः स्त्रीयुक्तश्च भवति। यदा शनैश्चरस्य दृष्टिर्भवेत्तदा जातक उग्रस्वभावः हिंसकः कुलरहितो जनविरोधी दुःखी च भवति।

## २८) शुक्रक्षेत्रीयस्य बुधस्योपरि सूर्यादिग्रहाणां दृष्टिफलम्।

यदा शुक्रक्षेत्रीयस्य[२२] बुधस्योपरि सूर्यस्य दृष्टिर्भवेत्तदा जातको रुग्णो दरिद्रो दुःखी लोकतिरस्कृतः परोपकारी च भवति। यदा चन्द्रस्य दृष्टिर्भवेत्तदा जातकः प्रपञ्चप्रियो दृढप्रतिज्ञो राज्यमन्त्री प्रख्यातो नीरोगी विशालकुटुम्बवांश्च भवति। यदा मङ्गलस्य दृष्टिर्भवेत्तदा जातको रुग्णः शत्रुपीडितः क्लेशभाक् नृपपीडितः सर्वजनबहिष्कृतश्च भवति। यदा गुरोर्दृष्टिर्भवेत्तदा जातको विद्वानाज्ञापालको देशपुरनगरग्रामाधिपतिः प्रख्यातश्च भवति। यदा शुक्रस्य दृष्टिर्भवेत्तदा जातको भाग्यवान् सुखी प्रमदाप्रियो

---

[२०] यदा मङ्गलो मकरराश्यां कुम्भराश्यां वा भवेत्तदा स शनैश्चरक्षेत्रीयः कथ्यते।

[२१] यदा बुधो मेषराश्यां वृश्चिकराश्यां भवेत्तदा स मङ्गलक्षेत्रीयः कथ्यते।

[२२] यदा बुधो वृषभराश्यां तुलाराश्यां वा भवेत्तदा स शुक्रक्षेत्रीयः कथ्यते।

विविधवस्त्रालङ्कारसुखभाक् च भवति। यदा शनैश्चरस्य दृष्टिर्भवेत्तदा जातको मलिनः सुखरहितो बन्धुशोकभाक् रोगग्रस्तोऽनर्थभाक् स्त्रीपुत्रवाहनदुःखेन च सन्तप्तमना भवति।

## २९) निजक्षेत्रीयस्य बुधस्योपरि सूर्यादिग्रहाणां दृष्टिफलम्।

यदा निजक्षेत्रीयस्य[२३] बुधस्योपरि सूर्यस्यदृष्टिर्भवेत्तदा जातकः सत्यप्रियः समर्थो ललितचेष्टो लोकप्रियाऽऽकर्षकदेहो नृपप्रियश्च भवति। यदा चन्द्रस्य दृष्टिर्भवेत्तदा जातको मधुरवाक् जल्पाकः कलहप्रियः शास्त्रवत्सलः सुदृढदेहश्च भवति। यदा मङ्गलस्य दृष्टिर्भवेत्तदा जातको मलिनः पिशुनः कलाज्ञः हतशरीरः प्रतिभासम्पन्नो राज्यसेवकः सर्वजनप्रियश्च भवति। यदा गुरोर्दृष्टिर्भवेत्तदा जातकः शूर उदारचित्तः सुभगोऽग्रगण्यो नृपो नृपमन्त्री वा धनिको बहुश्रुतश्च भवति। यदा शुक्रस्य दृष्टिर्भवेत्तदा जातको विद्वान् राज्यसेवकः दूतकर्मकरो नीचस्त्रीसङ्गी च भवति। यदा शनैश्चरस्य[२४] दृष्टिर्भवेत्तदा जातको दाम्भिकः पापरतो गुणहीनो द्वेषी च भवति।

## ३०) चन्द्रक्षेत्रीयस्य बुधस्योपरि सूर्यादिग्रहाणां दृष्टिफलम्।

यदा चन्द्रक्षेत्रीयस्य[२५] बुधस्योपरि सूर्यस्य दृष्टिभवेत्तदा जातको दुर्बलो वस्त्रमालादिकर्मकरः गृहवास्तुशास्त्रज्ञो मणिरत्नादिकर्मकरो धनव्ययकर्तोत्पातैश्च पीडिताङ्गो भवति। यदा चन्द्रस्य दृष्टिर्भवेत्तदा जातकः सुखहीनः स्त्रीसङ्गेन नष्टधनः स्त्रीसङ्गेन च कष्टदेहो भवति। यदा मङ्गलस्य दृष्टिर्भवेत्तदा जातकः प्रियवक्ता जल्पाकोऽसत्याचरणस्तस्करोऽल्पशास्त्रवेत्ता च भवति। यदा गुरोर्दृष्टिर्भवेत्तदा जातकश्चतुरः श्रेष्ठवक्ता सुभगो विधिवेत्ता च भवति। यदा शुक्रस्य दृष्टिर्भवेत्तदा जातकः सुतनुःप्रियवाक् गीतसङ्गीतज्ञो ललितचेष्टश्च भवति। यदा शनैश्चरस्य दृष्टिर्भवेत्तदा जातको दाम्भिकः पापो बन्धनभाक् गुणहीनो द्वेषी च भवति।

## ३१) सूर्यक्षेत्रीयस्य बुधस्योपरि सूर्यादिग्रहाणां दृष्टिफलम्।

---

[२३] यदा बुधो मिथुनराश्यां कन्याराश्यां वा भवेत्तदा स निजक्षेत्रीयः कथ्यते।

[२४] जातकाभरण ग्रन्थानुसारेण जातकः सिद्धकार्योनम्रस्वभाव उत्तमवस्त्राभूषणादिसमृद्धिमान् च भवति ।
प्रारम्भिकसिद्धिं विनयं विशेषात्मद्वस्त्रभूषणादिसमृद्धिमुच्चैः
कुर्यान्नराणाममृतांशुजन्मा स्वमन्दिरस्थे रविसूनुदृष्टः ।।१८।। जा. भ. पृ. १५३ ।।

[२५] यदा बुधः कर्कराश्यां भवेत्तदा स चन्द्रक्षेत्रीयः कथ्यते।

**चतुर्थी दृष्टिः।**

यदा सूर्यक्षेत्रीयस्य[२६] बुधस्योपरि सूर्यस्य दृष्टिभवेत्तदा जातकः क्षुद्रस्वभावो हिंसकेर्ष्यालुश्चञ्चलो लज्जाहीनश्च भवति। यदा चन्द्रस्य दृष्टिर्भवेत्तदा जातको रूपवान् चतुरः काव्यकलातत्परो नृत्यप्रियो धनिकः सुवेषधारी च भवति। यदा मङ्गलस्य दृष्टिर्भवेत्तदा जातको नीचकर्मरतो दुःखी हतदेहो नपुंसकश्चारित्र्यहीनश्च भवति। यदा गुरोर्दृष्टिर्भवेत्तदा जातकः सुकुमारोऽतिप्राज्ञो वाक्कुशलः प्रख्यातो वाहनभृत्यादिस्वामी च भवति। यदा शुक्रस्य दृष्टिर्भवेत्तदा जातको मनोहरो मधुरवाक् विलासी नृपाश्रयी धनिको वाहनस्वामी च भवति। यदा शनैश्चरस्य दृष्टिर्भवेत्तदा जातकः कुरूप उग्रस्वभावः सुखहीनः स्वेदगन्धी च भवति।

## ३२) गुरुक्षेत्रीयस्य बुधस्योपरि सूर्यादिग्रहाणां दृष्टिफलम्।

यदा गुरुक्षेत्रीयस्य[२७] बुधस्योपरि सूर्यस्य दृष्टिर्भवेत्तदा जातकः शूरः प्रमेहपीडितोऽश्मरीरोगी च भवति। यदा चन्द्रस्य दृष्टिर्भवेत्तदा जातकस्तरुणावस्थः सुखी लेखनकार्यरतो धनिको मित्रसङ्गी सज्जनसङ्गी सङ्गीतप्रियश्च भवति। यदा मङ्गलस्य दृष्टिर्भवेत्तदा जातकस्तस्कराध्यक्षो वनेचरपतिर्लिपिकारोऽधिकारी लोकप्रतिनिधिश्च भवति। यदा गुरोर्दृष्टिर्भवेत्तदा जातकः कुलशिरोमणिर्ज्ञानी उत्तमस्मरणशक्तिर्राज्यकोषाध्यक्षो राज्यकर्मचारी च भवति। यदा शुक्रस्य दृष्टिर्भवेत्तदा जातकस्तरुणावस्थो लेखको धनिकश्च भवति। यदा शनैश्चरस्य दृष्टिर्भवेत्तदा जातको मलिनो दुष्टस्वभावो वनपर्वतनिवासी बह्वन्नभक्षी च भवति।

## ३३) शनैश्चरक्षेत्रीयस्य बुधस्योपरि सूर्यादिग्रहाणां दृष्टिफलम्।

यदा शनैश्चरक्षेत्रीयस्य[२८] बुधस्योपरि सूर्यस्य दृष्टिर्भवेत्तदा जातको निष्ठुरो मधुरभाषी बलवान् बह्वाशी प्रख्यातश्च भवति। यदा चन्द्रस्य दृष्टिर्भवेत्तदा जातकः स्थिरमतिर्भीरुर्जलोत्पन्नपदार्थक्रयविक्रय-वृत्तिःपुष्पफलकन्दमूलमद्यादिपदार्थक्रयविक्रयवृत्तिश्च भवति। यदा मङ्गलस्य दृष्टिर्भवेत्तदा जातकः प्रमादी लज्जालुः कठोरस्वभावश्चपलः सौम्यमूर्तिर्धनिकः सुखी च भवति। यदा गुरोर्दृष्टिर्भवेत्तदा जातकः प्राज्ञो ग्रामनगरराज्यस्वामी सुखी अन्नवाहनादिसुखभाक् च भवति। यदा शुक्रस्य दृष्टिर्भवेत्तदा जातकः कुरूपश्चतुरो नीचजनाश्रयी अतिकामी बहुसंततियुक्तश्च भवति।

यदा शनैश्चरस्य दृष्टिर्भवेत्तदा जातको दीनो निर्धनो नीचजनसङ्गी पापरतश्च भवति।

---

[२६] यदा बुधः सिंहराश्यां भवेत्तदा स सूर्यक्षेत्रीयः कथ्यते।

[२७] यदा बुधो धनुराश्यां मीनराश्यां वा भवेत्तदा स गुरुक्षेत्रीयः कथ्यते।

[२८] यदा बुधो मकरराश्यां कुम्भराश्यां वा भवेत्तदा स शनैश्चरक्षेत्रीयः कथ्यते।

## ३४) मङ्गलक्षेत्रीयस्य गुरोरुपरि सूर्यादिग्रहाणां दृष्टिफलम्।

यदा मङ्गलक्षेत्रीयस्य[२९] गुरोरुपरि सूर्यस्य दृष्टिर्भवेत्तदा जातको धार्मिकोऽसत्यभीरुर्विख्यातो भाग्यवान् नम्रस्वभावः प्रख्यातः पुत्रवांश्च भवति। यदा चन्द्रस्य दृष्टिर्भवेत्तदा जातकः शान्तो विनीतो वनिताप्रियः प्रख्यातो धार्मिकश्च भवति।

यदा मङ्गलस्य दृष्टिर्भवेत्तदा जातकः क्रूरस्वभावो धूर्तः परगर्वनाशको राज्यकर्मचारी जीवननिर्वाहकर्ता बहुजनस्वामी नीतिज्ञो विनयसम्पन्नश्च भवति। यदा बुधस्य दृष्टिर्भवेत्तदा जातकः सदाचारसम्पन्नः सत्यवाक् परछिद्रान्वेषी नम्रजनसङ्गी गुणसम्पन्नो मनोहरश्च भवति। यदा शुक्रस्य दृष्टिर्भवेत्तदा जातकः सुगन्धमालाशय्याभोजनवस्त्राभूषणादिसम्पन्नो भवति। यदा शनैश्चरस्य दृष्टिर्भवेत्तदा जातकः क्रूरस्वभावो विद्वान् धनवान् ग्रामनगरस्याधिपतिः संततिहीनो मलिनः कुदारश्च भवति।

## ३५) शुक्रक्षेत्रीयस्य गुरोरुपरि सूर्यादिग्रहाणां दृष्टिफलम्।

यदा शुक्रक्षेत्रीयस्य[३०] गुरोरुपरि सूर्यस्य दृष्टिर्भवेत्तदा जातको विद्यापारङ्गतो राज्यसचिवो विशालदेहोऽतिभ्रमणशीलो भृत्यपशुस्वामी वाहनस्वामी क्षतदेहश्च भवति।
यदा चन्द्रस्य दृष्टिर्भवेत्तदा जातकः सत्यपालको नम्रस्वभावो भाग्यवान् वनिताप्रियः कृतज्ञः शुद्धचित्तश्च भवति।यदा मङ्गलस्य दृष्टिर्भवेत्तदा दृष्टिर्भवेत्तदा जातको विद्याव्यासङ्गी प्रतापी धनसम्पन्नः सुखी राजपुरुषश्च भवति। यदा बुधस्य दृष्टिर्भवेत्तदा जातकश्चतुरो विद्यारतो गुणसम्पन्नः शुद्धशीलो मनोहरश्च भवति। यदा शुक्रस्य दृष्टिर्भवेत्तदा जातकः कलाज्ञः कलारसिको दयालुरैश्वर्यवांश्च भवति। यदा शनैश्चरस्य दृष्टिर्भवेत्तदा जातकश्चतुरः सुखी विद्वान् ग्रामनगराधिपतिः कुदारः[३१] पुत्रवांश्च भवति।

## ३६) बुधक्षेत्रीयस्य गुरोरुपरि सूर्यादिग्रहाणां दृष्टिफलम्।

यदा बुधक्षेत्रीयस्य[३२] गुरोरुपरि सूर्यस्य दृष्टिर्भवेत्तदा जातकः कुटुम्बवान् स्त्रीपुत्रधनसम्पन्नो ग्रामे श्रेष्ठपुरुषो मित्रवान् यशस्वी च भवति। यदा चन्द्रस्य दृष्टिर्भवेत्तदा जातकः सद्गुणसम्पन्नो ग्रामपरोपकारी सुतनुर्यशस्वी मातृप्रियः पुत्रवांश्च भवति। यदा मङ्गलस्य दृष्टिर्भवेत्तदा जातकः सर्वत्रविजयी क्षतदेहो धनिकः पराक्रमी च भवति। यदा बुधस्य दृष्टिर्भवेत्तदा जातकश्चतुरश्चारुवाक् ज्योतिषादिगूढविद्यासम्पन्नः प्रख्यातोऽन्वेषकः शिल्पशास्त्रवेत्ता स्त्रीपुत्रसुखयुक्तश्च भवति। यदा शुक्रस्य

---

[२९] यदा गुरुर्मेषराश्यां वृश्चिकराश्यां वा भवेत्तदा स मङ्गलक्षेत्रीयः कथ्यते।

[३०] यदा गुरुर्वृषभराश्यां तुलाराश्यां वा भवेत्तदा स शुक्रक्षेत्रीयः कथ्यते।

[३१] जातकभरणग्रन्थमते जातकः श्रेष्ठपत्नीयुक्तो भवति।

[३२] यदा गुरुर्मिथुनराश्यां कन्याराश्यां वा भवेत्तदा स बुधक्षेत्रीयः कथ्यते।

दृष्टिर्भवेत्तदा जातकः प्रसन्नमनाः कृषिकर्मरतो गणिकागामी गृहवापीसुखभाक् स्त्रीपुत्रधनयुक्तश्च भवति। यदा शनैश्चरस्य दृष्टिर्भवेत्तदा जातकः मनोहराकृतिः श्रेष्ठमतिर्ग्रामनगराधिपतिश्च भवति।

### ३७) चन्द्रक्षेत्रीयस्य गुरोरुपरि सूर्यादिग्रहाणां दृष्टिफलम्।

यदा चन्द्रक्षेत्रीय[३३] गुरोरुपरि सूर्यस्यदृष्टिर्भवेत्तदा जातकः प्रख्यातोऽग्रगण्यः सुखहीनो निर्धनो वृद्धावस्थायां धनिकः स्त्रीपुत्ररहितश्च भवति। यदा चन्द्रस्य दृष्टिर्भवेत्तदा जातको मनोहरो बहुवाहनस्वामी बहुकोशयुक्त उत्तमस्त्रीपुत्रवांश्च भवति।

यदा मङ्गलस्य दृष्टिर्भवेत्तदा जातकः शूरः क्षतदेहः सुवर्णधारी प्रमदापतिर्धनिकश्च भवति। यदा बुधस्य दृष्टिर्भवेत्तदा जातकः कलहपीडितो निष्पापो नृपभक्तो धनिको बन्धुबांधवयुक्तश्च भवति। यदा शुक्रस्य दृष्टिर्भवेत्तदा जातको भाग्यवान् बहुविभवोऽनेकालङ्कारभोक्ता सुखी बहुपत्नीवांश्च भवति । यदा शनैश्चरस्य दृष्टिर्भवेत्तदा जातको जल्पाको बहुबिभवो वृद्धावस्थायां सुखी ग्रामनगरसेनाध्यक्षश्च भवति।

### ३८) सूर्यक्षेत्रीयस्य गुरोरुपरि सूर्यादिग्रहाणां दृष्टिफलम्।

यदा सूर्यक्षेत्रीयस्य[३४] गुरोरुपरि सूर्यस्यदृष्टिर्भवेत्तदा जातकः प्रख्यातो नृपसदृशधनाढ्यः सुशीलश्च भवति। यदा चन्द्रस्य दृष्टिर्भवेत्तदा जातको मलिनचित्तः स्त्रीसङ्गेनधनिको जितेन्द्रियोऽतिसुभगमतिश्च भवति। यदा मङ्गलस्य दृष्टिर्भवेत्तदा जातको निपुणः शुद्धमतिः पवित्रः शूरः क्रूरो गुरुभक्तश्च भवति। यदा बुधस्य दृष्टिर्भवेत्तदा जातकः प्राज्ञः प्रियवचनी अग्रणीः प्रख्यातो गृहवास्तुज्ञाता च भवति। यदा शुक्रस्य दृष्टिर्भवेत्तदा जातको भाग्यवान् नृपसंमानभाक् दृढमनाः स्त्रिप्रियश्च भवति। यदा शनैश्चरस्य दृष्टिर्भवेत्तदा जातको जल्पाको मधुरवाक् उग्रः सुखहीनो विचित्रभाग्ययुक्तश्च भवति।

### ३९) निजक्षेत्रीयस्य गुरोरुपरि सूर्यादिग्रहाणां दृष्टिफलम्।

यदा निजक्षेत्रीयस्य[३५] गुरोरुपरि सूर्यस्य दृष्टिर्भवेत्तदा जातको बहुशत्रुग्रस्तो नृपविरोधी मित्रद्वेषी च भवति। यदा चन्द्रस्य दृष्टिर्भवेत्तदा जातको भाग्यवान् प्रमदाप्रियः संमानभाक् धनैश्वर्येण च गर्विष्ठो भवति। यदा मङ्गलस्य दृष्टिर्भवेत्तदा जातको हिंसकः क्रूरकर्मा परजनपीडको नष्टकुटुम्बश्च भवति। यदा बुधस्य दृष्टिर्भवेत्तदा जातको नृपो नृपसचिवः पुत्रधनस्त्रीसुखभाक् च भवति। यदा शुक्रस्य

---

[३३] यदा गुरुः कर्कराश्यां भवेत्तदा स चन्द्रक्षेत्रीयः कथ्यते।

[३४] यदा गुरुःसिहराश्यां भवेत्तदा स सूर्यक्षेत्रीयः कथ्यते।

[३५] यदा गुरुर्धनुराश्यां मीनराश्यां वा भवेत्तदा स निजक्षेत्रीयः कथ्यते।

दृष्टिर्भवेत्तदा जातको विद्वान् सुभगो दोषहीनो विशिष्टधनवान् दीर्घायुश्च भवति। यदा शनैश्चरस्य दृष्टिर्भवेत्तदा जातको मलिनो धर्महीनो भयग्रस्तो ग्रामेसमाजे च तिरस्कृतो निन्दनीयश्च भवति।

**४०) शनैश्चरक्षेत्रीयस्य गुरोरुपरि सूर्यादिग्रहाणां दृष्टिफलम्।**

यदा शनैश्चरक्षेत्रीयस्य[३६] गुरोरुपरि सूर्यस्य दृष्टिर्भवेत्तदा जातकः प्राज्ञो भूमिपतिरुदारचित्तः शूरो बहुसुखभाक् च भवति। यदा चन्द्रस्य दृष्टिर्भवेत्तदा जातकोऽतिधर्मनिष्ठः प्राज्ञः सद्कुलोत्पन्नो मातृपितृभक्तः सुशीलश्च भवति। यदा मङ्गलस्य दृष्टिर्भवेत्तदा जातकोऽतिबलवान् श्रेष्ठयोद्धा तेजस्वी सुवेषधारी प्रख्यातः सुजनपूज्यश्च भवति। यदा बुधस्य दृष्टिर्भवेत्तदा जातको बहुजनसमर्थलब्धो गणमान्यः प्रख्यातो बहुमित्रवान् शान्तः स्त्रीलोलुपो रतिनिपुणश्च भवति। यदा शुक्रस्य दृष्टिर्भवेत्तदा जातको विवेकविद्याधनगुणान्वितो नृपाभिलाषी च भवति। यदा शनैश्चरस्य दृष्टिर्भवेत्तदा जातकः सद्गुणसम्पन्नो धनधान्यपूर्णो नम्रस्वभावो गृहस्वामी विद्वान् चारित्र्यवान् देशाधिपतिश्च भवति।

**४१) मङ्गलक्षेत्रीयस्य शुक्रस्योपरि सूर्यादिग्रहाणां दृष्टिफलम्।**

यदा मङ्गलक्षेत्रीयस्य[३७] शुक्रस्योपरि सूर्यस्यदृष्टिर्भवेत्तदा जातको बुद्धिमान् नृपो नृपसंमानभाक् वा स्त्रीदुःखी स्त्रीसङ्गेननष्टधनश्च भवति। यदा चन्द्रस्य दृष्टिर्भवेत्तदा जातकः प्रख्यातश्चञ्चलमनाः कामातुरः कुलटापतिरात्मघाती च भवति। यदा मङ्गलस्य दृष्टिर्भवेत्तदा जातको मलिनः परसेवारतो दीनो धनमानसुखादिरहितश्च भवति। यदा बुधस्य दृष्टिर्भवेत्तदा जातको परधनहर्ता मूढोऽसमर्थः क्रूरोऽसत्यवादी निर्धनः स्वजनत्यक्तश्च भवति। यदा गुरोर्दृष्टिर्भवेत्तदा जातकः शोभनदेहो नम्रस्वभाव उदारचित्तः स्त्रीपुत्रादिसुखभाक् च भवति। यदा शनैश्चरस्य दृष्टिर्भवेत्तदा जातको[३८]ऽतिमलिनः प्रमादी भ्रमणशीलस्तस्करवृत्तिश्च भवति।

**४२) निजक्षेत्रीयस्य शुक्रस्योपरि सूर्यादिग्रहाणां दृष्टिफलम्।** यदा निजक्षेत्रीयस्य[३९] शुक्रस्योपरि सूर्यस्य दृष्टिर्भवेत्तदा जातक उत्तमपुरुषो धनिकः स्त्रीसुखसम्पन्नश्च भवति। यदा चन्द्रस्य दृष्टिर्भवेत्तदा जातकः संमानभाक्

---

[३६] यदा गुरुर्मकरराश्यां कुम्भराश्यां वा भवेत्तदा स शनैश्चरक्षेत्रीयः कथ्यते।

[३७] यदा शुक्रो मेषराश्यां वृश्चिकराश्यां वा भवेत्तदा स मङ्गलक्षेत्रीयः कथ्यते।

[३८] जातकाभरणग्रन्थानुसारेण जातकः शान्तोमान्यो दानी स्वजनसहाययुक्तश्च भवति (जा. भ. पृ.१६८/६)।

[३९] यदा शुक्रो वृषभराश्यां तुलाराश्यां भवेत्तदा स निजक्षेत्रीयः कथ्यते।

उत्तममतिर्धनिकः परमकुलीनः पुत्रवान् उत्तमवाक् च भवति। यदा मङ्गलस्य दृष्टिर्भवेत्तदा जातकः कुलटापतिः कामी स्त्रीसङ्गेननष्टधनो युद्धे च पराजितो भवति।

यदा बुधस्य दृष्टिर्भवेत्तदा जातकः सुतनुर्मधुरभाषी धैर्यवान् बुद्धिमान् विपुलसत्वः (आत्मबली) सर्वगुणसम्पन्नः प्रख्यातश्च भवति। यदा गुरोर्दृष्टिर्भवेत्तदा जातकः सद्‌गुणसम्पन्नः सुकलत्रवान् सुपुत्रवानधिकभगिनीयुक्तश्च भवति। यदा शनैश्चरस्य दृष्टिर्भवेत्तदा जातकोऽल्पधनो दुःशील उदारो रोगी च भवति।

## ४३) बुधक्षेत्रीयस्य शुक्रस्योपरि सूर्यादिग्रहाणां दृष्टिफलम्।

यदा बुधक्षेत्रीयस्य[४०] शुक्रस्योपरि सूर्यस्य दृष्टिर्भवेत्तदा जातको विद्यापारङ्गतो राजपुरुषाणां कर्मकर्ता धनसम्पन्नः सुखी च भवति। यदा चन्द्रस्य दृष्टिर्भवेत्तदा जातकः सुकुमारः सुकर्मरतो कमलनेत्रः सुकेश उत्तमवाहनस्वामी च भवति। यदा मङ्गलस्य दृष्टिर्भवेत्तदा जातकः कामी सुन्दरमुखाकृतिः प्रमदासङ्गेन च नष्टधनो भवति। यदा बुधस्य दृष्टिर्भवेत्तदा जातकः प्राज्ञः कुटुम्बसुखभाक् व्यवहारदक्षो धनिक उत्तमवाहनस्वामी जनाध्यक्षः सामर्थ्यवांश्च भवति। यदा गुरोर्दृष्टि भवेत्तदा जातकोऽतिसुखी दर्पयुक्तो बहुरूपी विद्वांश्च भवति। यदा शनैश्चरस्य दृष्टिर्भवेत्तदा जातकश्चञ्चलो द्वेषी मूर्खः पराजितो दुःखी च भवति।

## ४४) चन्द्रक्षेत्रीयस्य शुक्रस्योपरि सूर्यादिग्रहाणां दृष्टिफलम्।

यदा चन्द्रक्षेत्रीयस्य[४१] शुक्रस्योपरि सूर्यस्य दृष्टिर्भवेत्तदा जातकस्य भार्या क्रोधसम्पन्ना मनोहराङ्गना राजपुत्री धनिकाऽतिकार्यरता च भवति। यदा चन्द्रस्य दृष्टिर्भवेत्तदा जातको भाग्यवान् ललितचेष्टः सुखी प्रथमकन्यानन्तरंबहुपुत्रवान् मातृवत्सलो द्वितीयभार्यासुखदाता च भवति। यदा मङ्गलस्य दृष्टिर्भवेत्तदा जातको बहुसौख्यभाक् कलादक्षः शत्रुहन्ता स्त्रीचिन्तितश्च भवति। यदा बुधस्य दृष्टिर्भवेत्तदा जातकः सद्गुणसम्पन्नो विद्यापारङ्गतः स्त्रीपुत्रादिदुःखसन्तप्तो[४२] लोकस्तिरस्कृतश्च भवति। यदा गुरोर्दृष्टिर्भवेत्तदा जातको व्यवहारकुशलो धनपुत्रभृत्ययानादिसुखभाक् मित्रबन्धुयुक्तश्च भवति। यदा शनैश्चरस्य दृष्टिर्भवेत्तदा जातको दरिद्रो विरूपः पतितश्चपलस्वभावो दुःखी च भवति।

---

४० यदा शुक्रो मिथुनराश्यां कन्याराश्यां वा भवेत्तदा स बुधक्षेत्रीयः कथ्यते।

४१ यदा शुक्रः कर्कराश्यां भवेत्तदा स चन्द्रक्षेत्रीयः कथ्यते।

४२ सारावलीग्रन्थकर्तुःकल्याणवर्मणो मते जातकस्यपत्नी बुद्धिमती भवति।

## ४५) सूर्यक्षेत्रीयस्य शुक्रस्योपरि सूर्यादिग्रहाणां दृष्टिफलम्।

यदा सूर्यक्षेत्रीयस्य[४३] शुक्रस्योपरि सूर्यस्य दृष्टिर्भवेत्तदा जातक ईर्ष्यालुः कामसंतप्त गजादिपशुपालकः पत्नीप्रियः प्रमदासङ्गेन च धनिको भवति। यदा चन्द्रस्य दृष्टिर्भवेत्तदा जातकः सापत्नमातृको वा द्वैमातुरः स्त्रीसङ्गेन च दुःखी वैभवयुक्तो अतिविचारवांश्च भवति। यदा मङ्गलस्य दृष्टिर्भवेत्तदा जातकः प्रख्यातः प्रमदाप्रियो धनसम्पन्नो भाग्यवान् परस्त्रीसक्तश्च भवति।

यदा बुधस्य दृष्टिर्भवेत्तदा जातको लुब्धकः शठः शूरः स्त्रीविषयकचञ्चलमनाः परस्त्रीगामी अनृतभाषी धनवांश्च भवति। यदा गुरोर्दृष्टिर्भवेत्तदा जातको धनवाहनभृत्यादिस्वामी बहुस्त्रीभोगी नृपमन्त्री च भवति। यदा शनैश्चरस्य दृष्टिर्भवेत्तदा जातको रूपवान् नृपसदृशप्रख्यातो धनिको वाहनस्वामी कुलटापतिश्चारित्र्यहीनस्त्रीसङ्गी वा भवति।

## ४६) गुरुक्षेत्रीयस्य शुक्रस्योपरि सूर्यादिग्रहाणां दृष्टिफलम्।

यदा गुरुक्षेत्रीयस्य[४४] शुक्रस्योपरि सूर्यस्य दृष्टिर्भवेत्तदा जातको विद्वान् धनवान् लोकप्रिय उग्रः शूरो विदेशनिवासी च भवति। यदा चन्द्रस्य दृष्टिर्भवेत्तदा जातको विख्यातो राजपुरुषो नम्रस्वभावो बलवान् सौख्यवांश्च भवति। यदा मङ्गलस्य दृष्टिर्भवेत्तदा जातकोऽतिसुखीअतिदुःखी वा धनिको पशुधनयक्तो-ऽग्रगण्यः पुण्यकर्मकर्ता उत्तमवाहनस्वामी स्त्रीसक्तः स्त्रीणामल्पप्रियश्च भवति। यदा बुधस्य दृष्टिर्भवेत्तदा जातको वस्त्राभूषणवाहनादिसौख्यभाक् भवति। यदा गुरोर्दृष्टिर्भवेत्तदा जातक उत्तमगजैश्वर्यवान् बहुपत्नीभोक्ता पुत्रवांश्च भवति। यदा शनैश्चरस्य दृष्टिर्भवेत्तदा जातको धनकुबेरो भवति।

## ४७) शनैश्चरक्षेत्रीयस्य शुक्रस्योपरि सूर्यादिग्रहाणां दृष्टिफलम्।

यदा शनैश्चरक्षेत्रीयस्य[४५] शुक्रस्योपरि सूर्यस्य दृष्टिर्भवेत्तदा जातकः शूरः सत्यवादी महाधनः सुखी अतिकामी च भवति। यदा चन्द्रस्य दृष्टिर्भवेत्तदा जातकस्तेजस्वी शूरः सुतनुर्धनसम्पन्नश्च भवति। यदा मङ्गलस्य दृष्टिर्भवेत्तदा जातको जल्पाको निर्धनो रुग्णः परिश्रमेणश्रान्तो नष्टदारोऽनैकसङ्कटग्रस्तो वृद्धावस्थायां च सुखी भवति। यदा बुधस्य दृष्टिर्भवेत्तदा जातको बुद्धिमान् सङ्ग्रहशीलोऽनुशासनप्रियो विद्वान् सत्याचरणरः सुखसम्पन्नश्च भवति। यदा गुरोर्दृष्टिर्भवेत्तदा जातकः सुकुमारो गीतसङ्गीतज्ञ

---

[४३] यदा शुक्रः सिंहराश्यां भवेत्तदा स सूर्यक्षेत्रीयः कथ्यते।

[४४] यदा शुक्रो धनुराश्यां मीनराश्यां वा भवेत्तदा स गुरुक्षेत्रीयः कथ्यते।

[४५] यदा शुक्रो मकरराश्यां कुम्भराश्यां वा भवेत्तदा स शनैश्चरक्षेत्रीयः कथ्यते।

उत्तवस्त्रादिसकलसौख्यवान् सुकलत्रवांश्च भवति। यदा शनैश्चरस्य दृष्टिर्भवेत्तदा जातक उत्तमवाहनसुखभाक् सुन्दरगात्रः स्थूलदेहः श्यामवर्णो बहुसौख्यवांश्च भवति।

## ४८) मङ्गलक्षेत्रीयस्य शनैश्चरस्योपरि सूर्यादिग्रहाणां दृष्टिफलम्।

यदा मङ्गलक्षेत्रीयस्य[४६] शनैश्चरस्योपरि सूर्यस्य दृष्टिर्भवेत्तदा जातकः कृषिकर्मरतः कार्यशीलो धनधान्ययुक्तो गोमहिषादिपशुपालकश्च भवति। यदा चन्द्रस्य दृष्टिर्भवेत्तदा जातकश्चञ्चलो नीचकर्मरतो नीचकुरूपस्त्रीसङ्गी सुखहीनो निर्धनश्च भवति।

यदा मङ्गलस्य दृष्टिर्भवेत्तदा जातको मांसमदिरादिकुत्सितपदार्थभक्षकरस्तस्कराध्यक्षो नीचस्वभावो नीचस्त्रीसङ्गी च भवति। यदा बुधस्य दृष्टिर्भवेत्तदा जातकोऽधार्मिकोऽनृतवादी बहुभक्षी तस्करः सुखी च भवति। यदा गुरोर्दृष्टिर्भवेत्तदा जातकः सुखयुक्तो धनसम्पन्नोऽग्रगण्यो मुख्यसचिवो नृपमन्त्री भाग्यशाली च भवति।

यदा शुक्रस्य दृष्टिर्भवेत्तदा जातकोऽतिचञ्चलो विरूपो नीचस्त्रीसङ्गी भोगहीनश्च भवति।

## ४९) शुक्रक्षेत्रीयस्य शनैश्चरस्योपरि सूर्यादिग्रहाणां दृष्टिफलम्।

यदा शुक्रक्षेत्रीयस्य[४७] शनैश्चरस्योपरि सूर्यस्य दृष्टिर्भवेत्तदा जातकः स्पष्टवक्ता निर्धनो मृदुचेतो विद्वान् परगृहनिवासी च भवति। यदा चन्द्रस्य दृष्टिर्भवेत्तदा जातको राज्यसचिवो राज्यसचिवसंमानभाक् वा कुटुम्बवान् युवतीप्रियः प्रमदासङ्गेन च भाग्यवान् भवति।

यदा मङ्गलस्य दृष्टिर्भवेत्तदा जातको युद्धविद्याविशारदः संग्रामभीरुर्जल्पाको धनिकश्च भवति। यदा बुधस्य दृष्टिर्भवेत्तदा जातको विलासी चतुरो नृत्यकुशलः शिल्पकारः युद्धविद्याविशारदो गीतज्ञश्च भवति। यदा गुरोर्दृष्टिर्भवेत्तदा जातकःसद् गुणसम्पन्नो नृपभक्तः सज्जनप्रियश्च भवति। यदा शनैश्चरस्य दृष्टिर्भवेत्तदा जातकः स्त्रीसङ्गचतुरो योगनिष्ठः स्त्रीप्रियश्च भवति।

---

[४६] यदा शनैश्चरो मेषराश्यां वृश्चिकराश्यां वा भवेत्तदा स मङ्गलक्षेत्रीयः कथ्यते।
[४७] यदा शुक्रो वृषभराश्यां तुलाराशयां वा भवेत्तदा स शुक्रक्षेत्रीयः कथ्यते।

## ५०) बुधक्षेत्रीयस्य शनैश्चरस्योपरि सूर्यादिग्रहाणां दृष्टिफलम्।

यदा बुधक्षेत्रीयस्य[४८] शनैश्चरस्योपरि सूर्यस्य दृष्टिर्भवेत्तदा जातको धार्मिको धैर्यवान् जितक्रोधो निर्धनः क्लेशसहिष्णुश्च भवति। यदा चन्द्रस्य दृष्टिर्भवेत्तदा जातको नृपसदृशस्तेजस्वी स्त्रीप्रियः स्त्रीसम्बद्धपदार्थव्यवसायी च भवति। यदा मङ्गलस्य दृष्टिर्भवेत्तदा जातको रोगी भारवाहकोऽतिपरिश्रमी विख्यातो मल्लविद्यासक्तो धार्मिकविधिनिपुणश्च भवति। यदा बुधस्य दृष्टिर्भवेत्तदा जातको बहुचतुरः शिल्पकारो गीतनृत्यविशारदो युद्धविद्यानिपुणश्च भवति। यदा गुरोर्दृष्टिर्भवेत्तदा जातको राज्याश्रयी राज्यकार्यकुशलः सद्गुणसंपन्नः सज्जनप्रियश्च भवति। यदा शुक्रस्य दृष्टिर्भवेत्तदा जातको धर्मतत्परो योगविद्याविशारदः स्त्रीप्रियः स्त्रीसम्बद्धाभूषणनिर्माता च भवति।

## ५१) चन्द्रक्षेत्रीयस्य शनैश्चरस्योपरि सूर्यादिग्रहाणां दृष्टिफलम्।

यदा चन्द्रक्षेत्रीयस्य[४९] शनैश्चरस्योपरि सूर्यस्य दृष्टिर्भवेत्तदा जातको मातृकष्टदायी पितृसुखहीनो-ऽन्नधनपुत्रस्त्रीचिन्तायुक्तश्च भवति। यदा चन्द्रस्य दृष्टिर्भवेत्तदा जातको धनिको बन्धुपीडितो मातृकष्टदायी च भवति। यदा मङ्गलस्य दृष्टिर्भवेत्तदा जातको विकलाङ्गः कुटुम्बक्लेशभाक् कुलटापतिर्नृपार्जितधनवांश्च च भवति। यदा बुधस्य दृष्टिर्भवेत्तदा जातको भ्रमणशीलो दाम्भिको निष्ठुरः कठोरवाक् उत्तमक्रियाकुशलश्च भवति। यदा गुरोर्दृष्टिर्भवेत्तदा जातको गृहभूमिरत्नवाहनस्त्रीधनाभूषणयुक्तो भवति।

यदा शुक्रस्य दृष्टिर्भवेत्तदा जातक उदारचित्तः श्रेष्ठकुलोत्पन्नो मध्यमरूपो धनिकश्च भवति।

## ५२) सूर्यक्षेत्रीयस्य शनैश्चरस्योपरि सूर्यादिग्रहाणां दृष्टिफलम्।

यदा सूर्यक्षेत्रीयस्य[५०] शनैश्चरस्योपरि सूर्यस्य दृष्टिर्भवेत्तदा जातकोऽनृतभाषी निर्धनो दुर्बलो मद्यपी सेवको दु:खी एकाकी च भवति। यदा चन्द्रस्य दृष्टिर्भवेत्तदा जातकोऽनेकरत्नादिसुखभाक् बहुयुवतीरतो बहुकीर्तियुक्तो नृपप्रियश्च भवति। यदा मङ्गलस्य दृष्टिर्भवेत्तदा जातको नित्यप्रवासी तस्करः पर्वतवासी दुर्गवासी वा क्षुद्रस्वभावः स्त्रीपुत्ररहितश्च भवति। यदा बुधस्य दृष्टिर्भवेत्तदा जातक:प्रमादी निर्धनो मलिनो दीनः स्त्रीकर्मकृतश्च भवति। यदा गुरोर्दृष्टिर्भवेत्तदा जातकः सुशीलो विश्वसनीयो धनिकः पुत्रवान् ग्रामणीश्च भवति। यदा शुक्रस्य दृष्टिर्भवेत्तदा जातको मनोहरो धनवान् विलम्बितसुखभाक् युवतीषु अल्पप्रियश्च भवति।

---

[४८] यदा शनैश्चरः कन्याराश्यां मिथुनराश्यां वा भवेत्तदा स बुधक्षेत्रीयः कथ्यते।

[४९] यदा शनैश्चरः कर्कराश्यां भवेत्तदा स चन्द्रक्षेत्रीयः कथ्यते।

[५०] यदा शनैश्चरः सिंहराश्यां भवेत्तदा स सूर्यक्षेत्रीयः कथ्यते।

## ५३) गुरुक्षेत्रीयस्य शनैश्चरस्योपरि सूर्यादिग्रहाणां दृष्टिफलम्।

यदा गुरुक्षेत्रीयस्य[५१] शनैश्चरस्योपरि सूर्यस्य दृष्टिर्भवेत्तदा जातकःपालकपिता तेन च धनसमृद्धो भवति। यदा चन्द्रस्य दृष्टिर्भवेत्तदा जातकः सुशीलः स्त्रीपुत्रधनसम्पन्नो मातृविहीनश्च भवति। यदा मङ्गलस्य दृष्टिर्भवेत्तदा जातको चारित्र्यहीनः पापरतो लोकद्वेषी वायुरोगी क्षुद्रवृतिश्च भवति। यदा बुधस्य दृष्टिर्भवेत्तदा जातकः सौम्यस्वभावो भाग्यवान् नृपसदृशधनिकः सुखी मान्योः लोकप्रियःपण्डितश्च भवति। यदा गुरोर्दृष्टिर्भवेत्तदा जातको नृपो वा नृपमन्त्री वा नेता सेनाध्यक्ष उच्चाधिकारी सर्वापद्-विमुक्तश्च भवति। यदा शुक्रस्य दृष्टिर्भवेत्तदा जातकः प्रवृतिशीलो द्वैमातुरो वनपर्वतनिवासी च भवति।

## ५४) निजक्षेत्रीयस्य शनैश्चरस्योपरि सूर्यादिग्रहाणां दृष्टिफलम् ।

यदा निजक्षेत्रीयस्य[५२] शनैश्चरस्योपरि सूर्यस्य दृष्टिर्भवेत्तदा जातको रोगी विरूपदारः परान्नभोजी कष्टभाक् भ्रमणशीलो भारवाहकश्च भवति। यदा चन्द्रस्य दृष्टिर्भवेत्तदा जातकश्चञ्चलोऽनृतवादी पापरतो भ्रमणशीलो यात्राकष्टभाक् मातृपीडकश्च भवति। यदा मङ्गलस्य दृष्टिर्भवेत्तदा जातकोऽतिप्रतापी प्रख्यातो महाजनानाग्रणीरुग्रस्वभावोऽतिसाहसिकश्च भवति। यदा बुधस्य दृष्टिर्भवेत्तदा जातकःसत्वगुणी सुदेहो यात्रा विशेषज्ञोऽल्पधनधान्ययुक्तश्च भवति। यदा गुरोर्दृष्टिर्भवेत्तदा जातक उत्तमसद्गुणसम्पन्नो नृपो वा नृपसर्जको वा चिरायुर्नीरोगी च भवति। यदा शुक्रस्य दृष्टिर्भवेत्तदा जातको धनिको भाग्यवान् सकलैश्वर्यवान् परस्त्रीरतश्च भवति।

**उपसंहारः** अत्रदृष्टयां जातकस्य जन्मकुण्डलीगतानां सूर्योदिग्रहाणां दृष्टिविशेषेण यद् यद् सामान्यफलं सारावली जातकाभरणादिग्रन्थेषु लिखितं वर्तते तस्य तस्य चर्चा विशेषरूपेण प्रस्थापिता। मेषादिराशिषु स्थितानां ग्रहाणां तेषां च ग्रहाणां राशिगतत्वं क्षेत्रीयत्वमपि स्पष्टतया प्रस्थापितम्। तादृशानां राशिगतग्रहाणां क्षेत्रीयग्रहाणां चाध्ययनमत्र विवेचितं वर्तते। एतदर्थं तेषां ग्रहाणां कैर्ग्रहैःसह मित्रता शत्रुता वा तद्बलाबलानुसारेणैव फलं प्रदर्शितम्। तत्र च ग्रहाणामन्यग्रहैः सह शत्रुता वा मित्रतावा[५३]परिशिष्टे प्रदर्शिताऽस्ति। अस्यां चर्चायां पाश्चात्य मतमपि निर्दिष्टव्यं यतो भारतीयज्योतिःशास्त्रे केषां ग्रहाणां कैः ग्रहैः सह मित्रता वा शत्रुता वाऽस्ति। तत् प्राचीनकालादेव निर्धारितं वर्तते। तद्यथा सूर्यस्य चन्द्र-

---

[५१] यदा शनैश्चरो धनुराश्यां मीनराश्यां वा भवेत्तदा स गुरुक्षेत्रीयः कथ्यते।

[५२] यदा शनैश्चरो मकरराश्यां कुम्भराश्यां वा भवेत्तदा स निजक्षेत्रीयः कथ्यते।

[५३] विशेषार्थं परिशिष्टम्-०३ द्रष्टव्यम्।

मङ्गल–गुरुभिः सह मित्रता। चन्द्रस्य सूर्यबुधाभ्यां सह मित्रेत्यादि एवं च सूर्यस्य शुक्रशनैश्चरराहुभिः सह शत्रुता शनैश्चरस्य च सूर्यचन्द्रमङ्गलैः सह शत्रुतेत्यादि। किन्तु पाश्चात्यज्योतिःशास्त्रविदां मते मित्रतायाः शत्रुताया वा सिद्धान्तो किञ्चित् भिन्नः तत्रस्थाः यस्यकस्यापि ग्रहस्य येन केनापिग्रहेण सह युतिर्भवेत्तयोरुभयोः शत्रुता। द्वयोवा त्रयाणां वा युतौ शत्रुतेत्यादि। एवं यस्य कस्यापि ग्रहस्य येनकेनापि ग्रहेण १२० अंशे स्थितिर्यदा भवेत्तदा तयोरुभयोः मित्रेत्यादि अलं विस्तरेण। यद्यप्युभयो राहुकेतुनामकयोश्छयाग्रहयोर्विचारऽत्र न कृस्तयोस्तु अधिकविशेषफलवत्त्वात्।

-x-x-x-

# पञ्चमी दृष्टिः ।

## जन्मकुण्डल्यां कुटुम्बभावस्य विचारः ।

(१६०-२०३)

## जन्मकुण्डल्यां कुटुम्बभावस्य विचारः।

वित्तं नेत्रं मुखं विद्यावाक् कुटुम्बाशनानि च।
द्वितीयं स्थान जन्मानि क्रमाज्ज्योतिर्विदो विदुः[1]।।

दैवज्ञे वैद्यनाथेन जातकपारिजाते यत् कथितम् तदनुश्रुत्याऽस्यां दृष्ट्यां चर्चाविचार: प्रस्तूयते ।

जन्मकुण्डल्यां द्वितीयभावस्य 'कुटुम्बभाव' इति नामकरणम् । ज्यौतिषशास्त्रे जातकस्य केवलं कुटुम्बस्य विचारो न क्रियते किन्तु तत् सम्बन्धिनौ क्रयविक्रयौ (व्यापार इति यावत्) सुखं भोगोऽशनपानादि भोगसाधनानि च समान्यतया विचार्यन्ते। बहुशो वित्तस्य विचारोऽप्यन्तर्न्यस्यते यत् साहाय्येन मणिमाणिक्यादिधनमपि विचार्यते। कुटुम्ब सम्बन्धिविद्याया अपि वाण्या: सत्यवाचोपि चिन्तनं क्रियते।

**१ कुटुम्बम् ।**
**२ वाक्। सत्यम् । बहुभाषणं च ।**
**३ वित्तं क्रयविक्रयौ मणिमाणिक्यकोश संग्रहश्च ।**
**४ विद्या ।**
**५ भोजनपात्रम्। अशनानि (भोजनम्)।**
**६ मुखम् (आस्यम्।)।**
**७ नेत्रम् ।**

प्रथमं तावत् द्वितीयभावस्य (कुटुम्भभावस्य) राश्यादिफलविचार: प्रारभ्यते। अन्तरं च कुटुम्बादिविशेष फलविचार: करिष्यते ।

### ०१/०१ द्वितीयभावे मेषादि राशिफलविचारः।

यदा द्वितीयभावे मेषराशिर्भवेत्तदा जातक: पण्डितो विद्वान् बहुसन्ततिमान् भाग्यवान् भूरिकुटुम्बी श्रेष्ठपशुधनयुक्तश्च भवति। यदा द्वितीयभावे वृषभराशिर्भवेत्तदा जातक: कृषिकर्मणा धनिको हिरण्यादि

[1] जा.पा. ११/४९।

धनसंपन्न श्रेष्ठपशुधनयुक्तश्च भवति। यदा द्वितीयभावे मिथुनराशिर्भवेत्तदा जातको दयालुः प्रीतिमान् सुवर्णरजतादि धनसम्मपन्नः कन्यासन्तिमांश्च भवति। यदा द्वितीयभावे कर्कराशिर्भवेत्तदा जातको वृक्षोत्पन्नपदार्थानां क्रयविक्रयेण धनिको नीतिप्रियो जायानिमित्तसुखभाक् पुत्रवत्सलश्च भवति। यदा द्वितीयभावे सिंहराशिर्भवेत्तदा जातको पराक्रमेण श्रेष्ठजनसङ्गकरणेन च धनिकः परोपकारी च भवति। यदा द्वितीयभावे कन्याराशिर्भवेत्तदा जातको नृपसम्मानभाक् हिरण्यरजतमौक्तिकमाणिक्याश्वगजादिधन-युक्तश्च भवति। यदा द्वितीयभावे तुलाराशिर्भवेत्तदा जातकः पाषाणमृत्तिकाभूमिजन्यकर्मणा धनिकः सत्कर्मणायशस्वी च भवति। यदा द्वितीयभावे वृश्चिकराशिर्भवेत्तदा जातको धर्मिष्ठः स्त्रीलोलुपो विचित्र-वचनी देवद्विजभक्तश्च भवति। यदा द्वितीयभावे धनूराशिर्भवेत्तदा जातको धनुर्विद्यया शस्त्रविद्यया शस्त्रनिमार्णविद्यया च धनिको भवति। यदा द्वितीयभावे मकरराशिर्भवेत्तदा जातकः कृषिकर्मणाधनिको विदेशनिवासेन धनसम्पन्नो वशीकृतनृपश्च भवति। यदा द्वितीयभावे कुम्भराशिर्भवेत्तदा जातकः परोपकारी सज्जनसेवारतो फलपुष्पवृक्षोत्पन्नपदार्थानां क्रयविक्रयेण धनिकश्च भवति। यदा द्वितीयभावे मीनराशिर्भवेत्तदा जातको व्रतदेवताराधनादि सत्कर्मक्रियाभिर्धनिको पितृसंगृहीतद्रव्यभोक्ता च भवति ।

**०२/ ०१ द्वितीयभावे सूर्यादिग्रहाणां फलविचारः।**

**०३/ ०१ द्वितीयभावे सूर्यस्य राशिगतफलविचारः।**

यदा द्वितीयभावे मेषराश्यां सूर्यो भवेत्तदा जातक उग्रस्वभावो नृपसंमानभाक् लोभी विद्वान् मृदुभाषी धनिकश्च भवति। यदा वृषभराश्यां सूर्यो भवेत्तदा जातकः पिशुन उन्मादी बुद्धिहीनो निर्धनः कुत्सितान्नभक्षी असद्व्ययी च भवति। यदा मिथुनराश्यां सूर्यो भवेत्तदा जातकः परजनहितकारी पशुस्नेही अनाथपालको रतिक्रियानिपुणः स्वकुटुम्बपालकश्च भवति। यदा कर्कराश्यां सूर्यो भवेत्तदा जातकश्चतुरो वाक्पटुर्मृदुभाषी शूरो धैर्यवांश्च भवति। यदा सिंहराश्यां सूर्यो भवेत्तदा जातको धैर्यवान् कविः परस्त्रीरतः कुकर्मणा धनिकश्च भवति (परि.०१,क्र.३५)। यदा कन्याराश्यां सूर्यो भवेत्तदा जातकोऽभिमानी कटुवचनी अनेककन्याजनकः सुखहीनश्च भवति। यदा तुलाराश्यां सूर्यो भवेत्तदा जातक एकशास्त्रनिपुणो धनधान्यधर्महीनः परस्त्रीलोलुपश्च भवति (परि.०१,क्र.५५)। यदा वृश्चिकराश्यां सूर्यो भवेत्तदा जातकस्तेजस्वी शान्तो धैर्यवान् कुटुम्बाग्रणीः पुत्रवान् धनवांश्च भवति। यदा धनूराश्यां सूर्यो भवेत्तदा जातकः सत्कर्मरतो धनवान् पुत्रवान् सुभृत्यवान् च भवति। यदा मकरराश्यां सूर्यो भवेत्तदा जातकः कृतघ्न उग्रमित्रयुक्तो धनधर्मपुत्रहीनश्च भवति। यदा कुम्भराश्यां सूर्यो भवेत्तदा जातको विद्यावान् धर्महीनो निर्धनो युद्धकुशलो दुष्टशत्रुयुक्तः पराश्रयी च भवति। यदा मीन राश्यां सूर्यो भवेत्तदा जातको बुद्धिमान् स्वरुपवान् हर्षयुक्तो धनवांश्च भवति।

**०३/०२ द्वितीयभावे चन्द्रस्य राशिगतफलविचारः।**

यदा द्वितीयभावे मेषराश्यां चन्द्रो भवेत्तदा जातकः शीघ्रकर्मकुशलो धनिको बलवान् पुत्रवांश्च भवति। यदा वृषभराश्यां चन्द्रो भवेत्तदा जातको गुप्तकर्मकुशलो गजाश्वयानादिसुखभोक्ता बहुधनयुक्तश्च भवति। यदा मिथुनराश्यां चन्द्रो भवेत्तदा जातको बुद्धिमान् धनधान्यादिसुखभाक् शत्रुजिच्च भवति। यदा कर्कराश्यां चन्द्रो भवेत्तदा जातको विनयी विद्वान् वाहनादिसुखयुक्तो बहुधनयुक्तो न्यायाधीशो महाधिकारी च भवति। यदा सिंहराश्यां चन्द्रो भवेत्तदा जातको विनयी विद्याप्रियो धनिक उत्तमवाहनयुक्तश्च भवति (परि.०१,क्र.३६)। यदा कन्याराश्यां चन्द्रोभवेत्तदा जातकः सुशीलो विनयी विद्याकुशलो धनवान् धान्येन च परिपूर्णो भवति। यदा तुलाराश्यां चन्द्रोभवेत्तदा जातको जल्पाको मुखरोगी गृहसुखयुक्तश्च भवति। यदा वृश्चिकराश्यां चन्द्रो भवेत्तदा जातको नीचकर्मरतो धर्महीनो धनहीनो पितृधननाशकरश्च भवति। यदा धनूराश्यां चन्द्रो भवेत्तदा जातकः शूरः धनवान् नृपसचिवोऽधिकारी वा भवति। यदा मकरराश्यां चन्द्रो भवेत्तदा जातकः कृपणो नीचजनसेवको मलिनचित्तश्च भवति। यदा कुम्भराश्यां चन्द्रोभवेत्तदा जातकोऽल्पबुद्धिर्धनधान्यसुखभाक् राज्याधिकारी च भवति। यदा मीनराश्यां चन्द्रो भवेत्तदा जातको सुदृढदेहः सुखी उत्तमवाहनसुखभाक् च भवति।

**०३/०३ द्वितीयभावे मङ्गलस्य राशिगतफलविचारः।**

यदा द्वितीयभावे मेषराश्यां मङ्गलो भवेत्तदा जातकश्चतुरः जारजः संसाररतो यौवनावस्थायां धनिको वृद्धावस्थायां च संमानभाक् च भवति। यदा वृषभराश्यां मङ्गलो भवेत्तदा जातको वाहनसुखभाक् धनवान् वृद्धावस्थायां च बहुशत्रुयुवतो भवति। यदा मिथुनराश्यां मङ्गलो भवेत्तदा जातकः पापरतो विषयासक्तोऽशक्तो निर्धनश्च भवति। यदा कर्कराश्यां मङ्गलो भवेत्तदा जातकोऽधार्मिकोऽपवित्रो निर्धनः कुपुत्रपीडितः शत्रुपीडितश्च भवति (परि.०१,क्र.५६)। यदा सिंहराश्यां मङ्गलो भवेत्तदा जातकः सत्यवादी अधिकारी प्राज्ञो धनकुबेरः सुखी च भवति। यदा कन्याराश्यां मङ्गलो भवेत्तदा जातको लोभी दुष्टस्तस्करश्च भवति। यदा तुलाराश्यां मङ्गलो भवेत्तदा जातकोऽपवित्रः स्वधर्महीनो धनवाहनचिन्ताग्रस्तो भवति। यदा वृश्चिकराश्यां मङ्गलो भवेत्तदा जातको धनवान् अश्वादिवाहनयुक्तः सुखी च भवति(परि.०१,क्र.३१) (परि.०१,क्र.३२)। यदा धनूराश्यां मङ्गलो भवेत्तदा जातकस्तेजस्वी भाग्यवान् सुखी प्राज्ञो वाहनचिन्तायुक्तश्च भवति। यदा मकरराश्यां मङ्गलो भवेत्तदा जातकः शान्तो वाहनाभूषणयुक्तो धनिको नृपमान्योऽधिकारी न्यायाधीशश्च भवति (परि.०१,क्र.२८)। यदा कुम्भराश्यां

मङ्गलो भवेत्तदा जातकः पिशुनो दुष्टो निर्धनः शत्रुभययुक्तश्च भवति। यदा मीनराश्यां मङ्गलो भवेत्तदा जातको व्रती तपस्वी मधुरभाषी दानी धनिको शत्रुजितच्च भवति (परि.०१,क्र.२९)।

### ०३/४ द्वितीयभावे बुधस्य राशिगतफलविचारः।

यदा द्वितीयभावे मेषराश्यां बुधो भवेत्तदा जातको विद्वान् मित्रवत्सलो धनिकश्च भवति। यदा वृषभराश्यां बुधो भवेत्तदा जातकः निष्कपटो धनिको मानी अश्वादिसुखभोक्ता च भवति। यदा मिथुनराश्यां बुधो भवेत्तदा जातकः शास्त्रज्ञस्तत्वज्ञः स्वधर्मरतः कार्यकुशलो नृपसेवको धनसंपन्नश्च भवति। यदा कर्कराश्यां बुधो भवेत्तदा जातकः सुचारित्र्यवान् सुस्वरः सुदृढदेहः सिद्धकार्यश्च भवति। यदा सिंहराश्यां बुधो भवेत्तदा जातको शुद्धचित्तो धनवाहनसुखभाक् च भवति। यदा कन्याराश्यां बुधो भवेत्तदा जातको गुप्तकार्यकुशलो धनधान्यसुखयुक्तः शत्रुजितच्च भवति। यदा तुलाराश्यां बुधो भवेत्तदा जातकः कालज्ञश्चतुरो धनवान् नृपसेवकश्च भवति। यदा वृश्चिकराश्यां बुधो भवेत्तदा जातकः कठोरः कर्मकुशलो धनधान्यादिसुखभाक् च भवति। यदा धनूराश्यां बुधो भवेत्तदा जातको विनयी सुजनवत्सलः सुमित्रयुक्तो बहुवाहनयुक्तो धनवान् सुभृत्यवान् सुखी शत्रुजिच्च भवति। यदा मकरराश्यां बुधो भवेत्तदा जातको मधुरभाषी धनवान् वृद्धावस्थायां च रोगी भवति। यदा कुम्भराश्यां बुधो भवेत्तदा जातको शरणागतरक्षकः सुस्थानकर्मरतो युद्धपराजितश्च भवति। यदा मीनराश्यां बुधो भवेत्तदा जातको नीचजनसङ्गी मदयुक्तो निर्धनो बन्धुत्यक्तश्च भवति।

### ०३/०५ द्वितीयभावे गुरो राशिगतफलविचारः।

यदा द्वितीयभावे मेषराश्यां गुरुर्भवेत्तदा जातकः कविर्धनवान् वाहनयुक्तश्च भवति। यदा वृषभराश्यां गुरुर्भवेत्तदा जातकः पिशुनो दुष्टो नीचजनसङ्गी कठोरो निष्ठुरो गोधनयुक्तः स्त्रीपराजितश्च भवति। यदा मिथुनराश्यां गुरुर्भवेत्तदा जातकः स्वधर्मरक्षको धनिको बहुवाहनयुक्तश्च भवति। यदा कर्कराश्यां गुरुर्भवेत्तदा जातकः प्रख्यातः सज्जनसङ्गी च भवति(परि.०१,क्र.३३)। यदा सिंहराश्यां गुरुर्भवेत्तदा जातको जनद्वेषी श्रद्धावान् धनयुक्तश्च भवति। यदा कन्याराश्यां गुरुर्भवेत्तदा जातकः पिशुनः कन्याजनकः सुखी परस्त्रीरतश्च भवति। यदा तुलाराश्यां गुरुर्भवेत्तदा जातकः प्रिययुद्धो धनिकः परस्त्रीरतश्च भवति। यदा वृश्चिकराश्यां गुरुर्भवेत्तदा जातकः शठः प्रमादी कुलटापतिश्च भवति। यदा धनूराश्यां गुरुर्भवेत्तदा जातको धनवान् वाहनयुक्त सुमित्रयुक्तः कुटुम्बपालकश्च भवति (परि.०१,क्र.३४)। यदा मकरराश्यां गुरुर्भवेत्तदा जातको मलिनो धर्महीनोऽशुचि वृद्धस्त्रीरतश्च भवति। यदा कुम्भराश्यां गुरुर्भवेत्तदा

जातकश्चतुरः सुखी सज्जनसङ्गी अश्वादिवाहनसुखभाक् च भवति (परि.०१,क्र.३७) (परि.०१, क्र.३७)। यदा मीनराश्यां गुरुर्भवेत्तदा जातकः सत्यभाषी दानी धनिकः पूर्णसुखी च भवति।

**०३/०६ द्वितीयभावे शुक्रस्य राशिगतफलविचारः।**

यदा द्वितीयभावे मेषराश्यां शुक्रो भवेत्तदा जातकः स्वधर्मरतो नीचकर्मरतः कर्महीनो धनवान् कुसन्ततिमांश्च भवति। यदा वृषभराश्यां शुक्रो भवेत्तदा जातको विनयी विद्वान् बहुधनिको वाहनसुखभाक् च भवति। यदा मिथुनराश्यां शुक्रो भवेत्तदा जातकश्चतुरः अक्रोधो ब्राह्मणभक्तो धनवान् भाग्यवान् पुत्रवान् बहुमित्रश्च भवति। यदा कर्कराश्यां शुक्रो भवेत्तदा जातको धनाभिमानी कुकर्मरतः कफरोगी धनसमृद्धो वाहनस्वामी च भवति। यदा सिंहराश्यां शुक्रो भवेत्तदा जातकः क्रोधी पिशुनः शठमित्रोऽल्पबुद्धिश्च भवति। यदा कन्याराश्यां शुक्रो भवेत्तदा जातकः पिशुनः कुस्त्रीसङ्गी बन्धुत्यक्तो निर्धनः पुत्रहीनश्च भवति(परि.०१,क्र.३९)। यदा तुल्याराश्यां शुक्रो भवेत्तदा जातको बुद्धिमान् धनसमृद्धो वाहनस्वामी च भवति। यदा वृश्चिकराश्यां शुक्रो भवेत्तदा जातको धर्मकल्याणकर्मरतो नृपसेवाकुशलो धनसङ्ग्रही च भवति। यदा धनूराश्यां शुक्रो भवेत्तदा जातको वायुरोगी पितृव्याधिग्रस्तो धनिकश्च भवति। यदा मकरराश्यां शुक्रो भवेत्तदा जातकः प्रपञ्ची शठो धनवान् दाम्भिको निर्धनः शत्रुभयदाता भवति। यदा कुम्भराश्यां शुक्रो भवेत्तदा जातको विनयी चतुरो नृपमान्यः परकार्यरतश्च भवति। यदा मीनराश्यां शुक्रो भवेत्तदा जातकः सत्यपरायणो बहुधनवान् सुखी सन्ततियुक्तश्च भवति।

**०३/०७ द्वितीयभावे शनैश्चरस्य राशिगतफलविचारः।**

यदा द्वितीयभावे मेषराश्यां शनैश्चरो भवेत्तदा जातकः शठो दुष्टो नेत्ररोगी कामादिविषयासक्तः शत्रुपराजितश्च भवति। यदा वृषभराश्यां शनैश्चरो भवेत्तदा जातको धनवान् सुवर्णाभूषणयुक्त सुवस्त्रधारी च भवति। यदा मिथुनराश्यां शनैश्चरो भवेत्तदा जातको युवास्थायां धनिक उत्तरावस्थायां कुस्त्रीसङ्गी च भवति। यदा कर्कराश्यां शनैश्चरो भवेत्तदा जातकः पिशुनः शठः क्रूरोऽविनयी मूर्खभृत्यस्वामी तस्करो द्विभार्यश्च भवति। यदा सिंहराश्यां शनैश्चरोभवेत्तदा जातकः कामादिविषयासक्तो मदयुक्तो गोरक्षकः स्वधर्मरक्षको धनिको च भवति। यदा कन्याराश्यां शनैश्चरोभवेत्तदा जातकोऽसत्यवादी मदोन्मत्तः परमनोज्ञाता धनरहितश्च भवति। यदा तुलाराश्यां शनैश्चरोभवेत्तदा जातकः शूरश्चतुरः शास्त्रज्ञो विद्यावान् न्यायाधीशो धनयुक्तश्च भवति। यदा वृश्चिकराश्यां शनैश्चरो भवेत्तदा जातको नीचजनसङ्गी कुमित्रः कुस्त्रीसङ्गी निर्धनश्च भवति। यदा धनूराश्यां शनैश्चरो भवेत्तदा जातको धनवान् पूर्णसुखी नृपवद्भाग्यवांश्च भवति। यदा मकरराश्यां शनैश्चरो भवेत्तदा जातको मकरस्वभावः समुद्रगमनागमन–

कार्येण धनिकः कुस्त्रीयुक्तो नृपसेवाकुशलश्च भवति (परि.०१,क्र.३०)। यदा कुम्भराश्यां शनैश्चरो भवेत्तदा जातको धनिको दृढदेहो नृपमान्यो धनवान् सुभृत्यवांश्च भवति। यदा मीनराश्यां शनैश्चरो भवेत्तदा जातको बुद्धिमान् कलाभिज्ञः सुखी धनिकः शत्रुजिच्च भवति।

### ०४/०१ जन्मकुण्डल्यां द्वितीयभावेऽन्यभावाधिपतीनां फलविचारः।

यदा द्वितीयभावे लग्नेशो भवेत्तदा जातको धनिको दीर्घायुः स्थूलदेहो बलवान् पृथ्वीपतिर्भूमिलाभेन सुखी सत्कर्मप्रवृतश्च भवति। यदा द्वितीयभावे लग्नेशो नीचसंज्ञको भवेत्तदा जातको निर्धनो दुःखी भवति। यदा द्वितीयभावे तृतीयेशः शुभो भवेत्तदा जातको धनवान् भवति। यदा द्वितीयभावे तृतीयेशः पापग्रहो भवेत्तदा जातको भिक्षुको दीनोऽल्पायुर्बन्धुद्वेषी च भवति। यदा द्वितीयभावे चतुर्थेशः शुभो भवेत्तदा जातकः पितृपालकः स्वधनेन च पितृसुखदाता भवति। यदा द्वितीयभावे चर्तुथेशः पापग्रहो भवेत्तदा जातको पितृद्वेषी भवति। यदा द्वितीयभावे पञ्चमेशः शुभग्रहो भवेत्तदा जातको पुत्रवान् पुत्रेणधनिकश्च भवति। यदा द्वितीयभावे पञ्चमेशः पापग्रहो भवेत्तदा जातको दरिद्रो गानविद्याविशारदो कष्टेनभोजनभाक् भवति। यदा द्वितीयभावे षष्ठेशो भवेत्तदा जातको दुष्टश्चतुरो धनसंग्रही शुभस्थाननिवासी प्रख्यातो रुग्णो मित्रसङ्गेन च धननाशकश्च भवति। यदा द्वितीयभावे सप्तमेशः शुभग्रहो भवेत्तदा जातकः स्वस्त्रीसाहाय्येन धनवान् भवति। यदा द्वितीयभावे सप्तमेशः पापग्रहो भवेत्तदा जातकः स्त्रीनिमित्तधनवान् अल्परतिसुखयुक्तः पुत्रवाञ्छाग्रयुक्तः कुभार्यः भवति। यदा द्वितीयभावेऽष्टमेशः शुभग्रहो भवेत्तदा जातकः सुखी किन्तु नृपदण्डने मृत्युं प्रप्नोति। यदा द्वितीयभावेऽष्टमेशः पापग्रहो भवेत्तदा जातकोऽल्पायुस्तस्करस्तत्सङ्गी च भवति। यदा द्वितीयभावे नवमेशः शुभग्रहो भवेत्तदा जातको वृषभपालकः क्रयविक्रयादि वाणिज्येन विख्यातः सुस्वभावो प्रीतिकरो धर्मात्मा न्यूनावयवयुक्तः पशुभयेन च पीडितो भवति। यदा द्वितीयभावे नवमेशः पापग्रहो भवेत्तदा जातकः, सद्धनव्ययी कुटुम्बक्लेशी कटुवचनी अल्पधनिको भवति। यदा द्वितीयभावे दशमेशो भवेत्तदा जातको लोभी मातरि दुष्टोऽल्पभोजी धर्मश्रवणतत्परश्च भवति। यदा द्वितीयभाव एकादशेशः शुभग्रहो भवेत्तदा जातको बहुधनिको भवति। यदा द्वितीयभाव एकादशेशः पापग्रहो भवेत्तदा जातक उत्तमसुखभाक् अल्पभोजनप्रियोऽल्पायू रुग्णश्च भवति यदा द्वितीयभावे द्वादशेशः शुभग्रहो भवेत्तदा जातकः नृपचौराग्निभयदुःखपीडिो भवति मृत्युं वा प्राप्नोति। यदा द्वितीयभावे पापग्रहो भवेत्तदा जातकः कृपणः कुवचनः पदार्थनाशेन दुःखी च भवति। यदा द्वितीयभावे शुभग्रहो भूत्वा द्वादशेशो भवेत्तदा जातको नृपचौराग्निभयदुःखी भवति मृत्युं वा प्राप्नोति।

## पञ्चमी दृष्टिः।

### ०५/०१ द्वितीयभावस्यस्वामिनो द्वादशभावेषु फलविचारः।

यदा द्वितीयेशः प्रथमभावे स्थितो भवेत्तदा जातकः कृपणः सत्कर्मरतः सुखी स्वतन्त्रव्यवसायी धनवान् नृपमान्यश्च भवति (परि.०१,क्र.४१)। यदा द्वितीयेशो द्वितीयभावे भवेत्तदा जातको बहुधनवान् दुष्ट उद्विग्नमनाः कुटुम्बपालक उत्तमसुखभोक्ता लोभी प्रख्यातो लोकविरुद्धाचारश्च भवति। यदा द्वितीयेशः शुभग्रहस्तृतीयभावे भवेत्तदा जातको नृपद्वेषी भवति। यदा द्वितीयेशः पापग्रहस्तृतीयभावे भवेत्तदा जातको बन्धूनामद्वेष्टाभवति। यदा द्वितीयेशो मङ्गलस्तृतीयभावे भवेत्तदा जातकस्तस्करो भवति। यदा द्वितीयेशःशनैश्चरस्तृतीयभावे भवेत्तदा जातको बन्धुहीनो भवति।यदा द्वितीयेशःसूर्यस्तृतीयेशो भवेत्तदा जातको बन्धुद्वेषी भवति। यदा द्वितीयेशःशुभग्रहो चतुर्थभावे भवेत्तदा जातको दयावान् सत्यवादी दीर्घायुः पितृधनलाभी च भवति। यदा द्वितीयेशो मङ्गलश्चतुर्थभावे भवेत्तदा जातकः मृत्युं वा मृत्युतुल्यपीडां प्राप्नोति। यदा द्वितीयेशश्चतुर्थभावे क्रूरग्रहणे सह युतो वा दृष्टो भवेत्तदा जातको रोगी दरिद्रश्च मातृकष्टदायी भवति। यदा द्वितीयेशः शुभग्रहः पञ्चमभावे भवेत्तदा जातको भाग्यवान् पुत्रजनकः दुष्करकर्मणा भूमिलाभेन सुखी प्रख्यातश्च भवति। यदा द्वितीयेशः पापग्रहेण युतो दृष्टो वा भवेत्तदा जातकः कृपणो दुःखी दुष्टो दुःखितसन्ततिमांश्च भवति। यदा द्वितीयेशः पापग्रहो पञ्चमभावे भवेत्तदा जातकः खलो निर्धनः शत्रुयुक्तश्च भवति। यदा द्वितीयेशः षष्ठेभावे भवेत्तदा जातकः धनसङ्ग्रही शत्रुनाशकश्च भवति। यदा द्वितीयेशः शुभग्रहः सप्तमभावे भवेत्तदा जातको गुणसंपन्नः स्त्रीसुखवांश्च भवति। यदा द्वितीयेशः पापग्रहः सप्तमेभावे भवेत्तदा जातकोऽपुत्रो जातकस्य पत्नी वन्ध्या वा भवति। यदा द्वितीयेशोऽष्टमभावे भवेत्तदा जातक आत्मघाती सुखभोक्ता भाग्यवादी रुण्डमाली भिक्षुकः परधनहर्ता च भवति। यदा द्वितीयेशो नवमभावे भवेत्तदा जातको दानी व्रती भाग्यवान् पुण्यरतो दानप्रसिद्धः प्रखरवक्ता च भवति (परि.०१,क्र.४२) (परि.०१,क्र.४३)। यदा द्वितीयेशः पापग्रहो नवमभावे भवेत्तदा जातकः कृपणो दरिद्रो भिक्षुकः परपीडकश्च भवति । यदा द्वितीयेशो दशमभावेस्थितो भवेत्तदा जातको मनोहरो यशस्वी मातृपितृभक्तो नृपमान्यो नृपसंमानभाक् च भवति (परि.०१,क्र.२८)। यदा द्वितीयेशो दशमभावे पापग्रहेण युतो दृष्टो वा भवेत्तदा जातको मातृपितृद्वेषी भवति। यदा द्वितीयेश एकादशभावे भवेत्तदा जातको धनवान् जनपालको यशस्वी नृपमन्त्री व्यवहारकुशलो ज्यौतिषविद्ययापक्षिज्ञानेन च धनवान् भवति (परि.०१,क्र.३७) (परि.०१,क्र.३८) (परि.०१, क्र.४०)। यदा द्वितीयेशो द्वादशभावेभवेत्तदा जातकः स्वतन्त्रव्यवसायेन प्रख्यातो भवति। यदा द्वितीयेशः पापग्रहो द्वादशभावेभवेत्तदा जातकः कृपणो म्लेच्छजनसङ्गी पापरतः क्रूरस्तस्करः कापालिको निर्धनश्च भवति।

## पञ्चमी दृष्टिः।

### ०६/ ०१ द्वितीयभावस्योपरि सूर्यादिग्रहाणां पूर्णदृष्टिफलविचारः।

यदा द्वितीयभावस्योपरि सूर्यस्य [२] दृष्टिर्भवेत्तदा जातकः पितृधनयुक्तः पितृनाशकरः स्वपराक्रमेण धनसम्मपन्नः पशुधनभाक् शरीरे च गुह्यभागपीडितो भवति । यदा द्वितीयभावस्योपरि चन्द्रस्य दृष्टिर्भवेत्तदा जातको विशालकुटुम्बसुखभाक् स्ववंशवृद्धिकरः पीडिताङ्गो जन्मानन्तरं चाष्टमेवर्षे लोहभयं जलभयं वा भवति ।यदा द्वितीयभावस्योपरि मङ्गलस्य दृष्टिर्भवेत्तदा जातको कुटुम्बसुखहीन उत्तरोतरन्यूनधनभाक् उदरव्याधियुक्तच भवति । यदा द्वितीयभावस्योपरि बुधस्य दृष्टिर्भवेत्तदा जातको बहुधनयुक्तो भाग्यवान् दीर्घायुर्नानाविधभोगभोक्ता च भवति । यदा द्वितीयभावस्योपरि गुरोर्दृष्टिर्भवेत्तदा जातको धनकुबेरः भाग्यवान् बुद्धिमान् स्वजनसुखदाता च भवति (परि.०१,क्र.२८) (परि.०१, क्र.२९)। यदा द्वितीयभावस्योपरि शुक्रस्य दृष्टिर्भवेत्तदा जातक उत्तरोत्तरधनवृद्धिकरः श्रेष्ठकुटुम्बपालकः स्वजनानां सुखदाता शत्रुनाशकः श्रमिकश्च भवति। यदा द्वितीयभावस्योपरि शनैश्चरस्य दृष्टिर्भवेत्तदा जातको धननाशकः कुटुम्बक्लेशभाक् जन्मान्तरे त्रयोदशवर्षे जलभयेन वायुभयेन वा पीडिताङ्गश्च भवति। यदा द्वितीयभावस्योपरि राहुग्रहस्य दृष्टिर्भवेत्तदा जातकः कुटुम्बसुखहीनो जन्मवर्षात् चतुर्दशवर्षे जलभयेन अष्टमेवर्षे च मृत्युतुल्यपीडा मनुभवति।

### ०७/ ०१ द्वितीयभावे स्थितग्रहस्योपर्यन्यग्रहाणां दृष्टिफलविचारः।

### ०७/ ०२ कुटुम्बम्।

यदा द्वितीयभावे सिंहराश्यां चन्द्रस्योपरि दशमभावे स्थितस्य गुरोर्दृष्टिर्भवेत्तदा जातकः कुलशिरोमणिर्भवति। यदा द्वितीयभावे कर्कराश्यां सिंहराश्यां वा सूर्यस्योपरि दशमभावे स्थितस्य गुरोर्दृष्टिर्भवेदत्तदा जातकः कुलशिरोमणिः कुटुम्बपालकश्च भवति। यदा द्वितीयभावे शुभग्रहस्योपरि द्वितीयेशस्य दृष्टिर्भवेत्तदा जातकः कुटुम्बवान् भवति।

यदा द्वितीयभावे सिंहराश्यां सूर्यस्योपरि पञ्चमभावे अष्टमभावे वा स्थितस्य शनैश्चरस्य दृष्टिर्भवेत्तदा जातकः कुटुम्बक्लेशकरो भवति। यदा द्वितीयभावे कर्कराश्यां चन्द्रस्योपर्यष्टमभावे स्थितस्य सूर्यस्य दृष्टिर्भवेत्तदा जातकः कुटुम्बक्लेशकरो भवति। यदा द्वितीयभावे मेषराश्यां मङ्गलस्योपरि पञ्चमभावे द्वादशभावे वा स्थितस्य शनैश्चरस्य दृष्टिर्भवेत्तदा जातकः कुटुम्बक्लेशकरो भवति। यदा द्वितीयभावे मेषराश्यां बुधस्योपरि पञ्चमभावे स्थितस्य शनैश्चरस्य दृष्टिर्भवेत्तदा जातकः कुटुम्बहीनो भवति।

---

[२] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम्।

## पञ्चमी दृष्टि:।

### ०७/०३ वाक्। सत्यं । बहुभाषणं च ।

यदा द्वितीयभावे मीनराश्यां सूर्यस्योपरि दशमभावे स्थितस्य मङ्गलस्य दृष्टिर्भवेत्तदा जातक: स्पष्टवक्ता भवति। यदा द्वितीयभावे मेषराश्यां चन्द्रस्योपर्यष्टमभावे स्थितस्य बुधस्य दृष्टिर्भवेत्तदा जातको मधुरवचनो भवति। यदा द्वितीयभावे मेषराश्यां चन्द्रस्योपर्यष्टमभावे स्थितस्य शुक्रस्य दृष्टिर्भवेत्तदा जातक: सद्वचनीभवति। यदा द्वितीयभावे वृषभराश्यां चन्द्रस्योपर्यष्टमभावे स्थितस्य बुधस्य दृष्टिर्भवेत्तदा जातको मृदुवचनो भवति। यदा द्वितीयभावे मेषराश्यां मङ्गलस्योपरि दशमभावे स्थितस्य गुरोर्दृष्टिर्भवेत्तदा जातको मधुरवाग् भवति। यदा द्वितीयभावे वृश्चिकराश्यां मङ्गलस्योपरि दशमभावे स्थितस्य गुरोर्दृष्टिर्भवेत्तदा जातको मधुरवचनो भवति। यदा द्वितीयभावे सिंहराश्यां बुधस्योपरि दशमभावे स्थितस्य गुरोर्दृष्टिर्भवेत्तदा जातको वाक्पटुर्भवति। यदा द्वितीयभावे कर्कराश्यां बुधस्योपरि दशमभावे स्थितस्य गुरोर्दृष्टिर्भवेत्तदा जातक: सद्वचनो भवति। यदा द्वितीयभावे कर्कराश्यां बुधस्योपरि दशमभावे स्थितस्य शुक्रस्य दृष्टिर्भवेत्तदा जातक: प्रियवक्ता भवति। यदा द्वितीयभावे वृश्चिकराश्यां गुरोरुपर्येकादशभावे स्थितस्य मङ्गलस्य दृष्टिर्भवेत्तदा जातक: सत्यवक्ता भवति। यदा द्वितीयभावे कन्याराश्यां गुरोरुपर्येकदशभावे स्थितस्य बुधस्य दृष्टिर्भवेत्तदा जातकश्चारुवाक् भवति। यदा द्वितीयभावे तुलाराश्यां शुक्रस्योपर्येकादशभावे स्थितस्य चन्द्रस्य दृष्टिर्भवेत्तदा जातक: सद्वचनो भवति।

यदा द्वितीयभावे वृषभराश्यां तुलाराश्यां वा शुक्रस्योपर्यष्टमभावे स्थितस्य मङ्गलस्य दृष्टिर्भवेत्तदा जातको जल्पाको भवति। यदा द्वितीयभावे कर्कराश्यां शनैश्चरस्योपर्यष्टमभावे स्थितस्य बुधस्य दृष्टिर्भवेत्तदा जातक: कठोरवचनो भवति। यदा द्वितीयभावे मेषराश्यां चन्द्रस्योपरि पञ्चमभावे द्वादशभावे वा स्थितस्य शनैश्चरस्य दृष्टिर्भवेत्तदा जातकोऽनृतभाषी भवति।

### ०७/०४ वित्तं क्रयविक्रयौ मणिमाणिक्यकोश संग्रहश्च ।

यदा द्वितीयभावे शनैश्चरस्योपरि बुधस्य दृष्टिर्भवेत्तदा जातको धनिको भवति । यदा द्वितीयभावे सूर्यस्योपरि शनैश्चरस्य दृष्टिर्भवेत्तदा जातको नि:संशयं धनिको भवति। यदा द्वितीयभावे शुभग्रहस्योपरि शनैश्चरस्य दृष्टिर्भवेत्तदा जातको निसंशयं धनसम्मपन्नो भवति ।यदा द्वितीयभावे गुरोरुपरि सौम्यग्रहस्य[३] दृष्टिर्भवेत्तदा जातको बहुधनी भवति । यदा द्वितीयभावे शुक्रस्योपरि गुरोर्दृष्टिर्भवेत्तदा जातको धनकुबेरो भवति। यदा द्वितीयभावे शुक्रस्योपरि बुधस्य दृष्टिर्भवेत्तदा जातकोऽल्पपरिश्रमेणाऽधिकं धनं प्राप्नोति।

[३] सौम्याग्रहाश्च चन्द्रोबुध:शुक्राश्च सन्ति।

## पञ्चमी दृष्टिः।

यदा द्वितीयभावे शुक्रेणसह शुभग्रहस्य युतिर्दृष्टिर्वा भवेत्तदा जातकोऽति धनिको भवति।यदा द्वितीयभावस्योपरि शुभग्रहाणां दृष्टिरधिका भवति तदा जातकोऽल्प श्रमेणाऽपि बहुधनयुक्तो भवति । यदा द्वितीयभावे मेषराश्यां सूर्यस्योपरि दशमभावे स्थितस्य गुरोर्दृष्टिर्भवेत्तदा जातको धनकुबेरो भवति। यदा द्वितीयभावे वृश्चिकराश्यां सूर्यस्योपरि दशमभावे दशमभावे स्थितस्य गुरोर्दृष्टिर्भवेत्तदा जातको धनिको भवति। यदा द्वितीयभावे धनूराश्यां मीनराश्यां वा सूर्यस्योपरि दशमभावे स्थितस्य गुरोर्दृष्टिर्भवेत्तदा जातक: कुलाग्रणीर्गजाश्वधनादिमांश्च भवति। यदा द्वितीयभावे मीनराश्यां सूर्यस्योपरि दशमभावे स्थितस्य मङ्गलस्य त्रिपाद्दृष्टिर्भवेत्तदा जातको धनवान् भवति।यदा द्वितीयभावे मेषराश्यां चन्द्रस्योपरि दशमभावे स्थितस्य बुधस्य दृष्टिर्भवेत्तदा जातको धनवान् भवति ।यदा द्वितीयभावे मेषराश्यां चन्द्रस्योपरि दशमभावे स्थितस्य गुरोर्दृष्टिर्भवेत्तदा जातको ध़नवान् भवति ।यदा द्वितीयभावे कर्कराश्यां चन्द्रस्योपरि दशमभावे स्थितस्य बुधस्य दृष्टिर्भवेत्तदा जातको धनिको भवति। यदा द्वितीयभावे कर्कराश्यां चन्द्रस्योपरि दशमभावे स्थितस्य गुरो: शुक्रस्य वा दृष्टिर्भवेत्तदा जातको धनकुबेरो भवति। यदा द्वितीयभावे कन्याराश्यां चन्द्रस्योपर्येकादशभावे स्थितस्य मङ्गलस्य दृष्टिर्भवेत्तदा जातको धनसम्पन्नो भवति। यदा द्वितीयभावे कन्याराश्यां चन्द्रस्योपर्यष्टमभावे स्थितस्य शुक्रस्य दृष्टिर्भवेत्तदा जातको बहुधनवान् प्रख्यातश्च भवति। यदा द्वितीयभावे वृश्चिकराश्यां चन्द्रस्योपरि दशमभावे स्थितस्य गुरोर्दृष्टिर्भवेत्तदा जातको बहुधनिको भवति। यदा द्वितीयभावे धनूराश्यां चन्द्रस्योपर्येकादशभावे स्थितस्य मङ्गलस्य दृष्टिर्भवेत्तदा जातको बहुधनयुक्तो भवति। यदा द्वितीयभावे तुलाराश्यां चन्द्रस्योपरि दशमभावे वा सप्तमभावे स्थितस्य गुर्रोर्दृष्टिर्भवेत्तदा जातक आधुनिकाकर्षकवस्त्रभूषणादिक्रयविक्रये कुशलो भवति। यदा द्वितीयभावे मीनराश्यां चन्द्रस्योपरि दशमभावे स्थितस्य गुरोर्दृष्टिर्भवेत्तदा जातको धनसम्पन्नो भवति।यदा द्वितीयभावे तुलाराश्यां मङ्गलस्योपरि पञ्चमभावे स्थितस्य शनैश्चरस्य दृष्टिर्भवेत्तदा जातको धनिको भवति। यदा द्वितीयभावे कन्याराश्यां मङ्गलस्योपर्यष्टमभावे स्थितस्य शुक्रस्य दृष्टिर्भवेत्तदा जातक: स्त्रीसम्बन्धितपदार्थाणां विक्रयेण धनसम्पन्नोऽथवा व्यवसाये बहुस्त्रीसाहाय्येन धनमप्नोति।

यदा द्वितीयभावे कुम्भराश्यां मङ्गलस्योपरि पञ्चमभावे स्थितस्य शनैश्चरस्य दृष्टिर्भवेत्तदा जातको धनवान् भवति। यदा द्वितीयभावे मेषराश्यां बुधस्योपर्येकादशभावे स्थितस्य मङ्गलस्य दृष्टिर्भवेत्तदा जातको धनसम्पन्नो भवति। यदा द्वितीयभावे मेषराश्यां बुधस्योपरि दशमभावे स्थितस्य गुरोर्दष्टिर्भवेत्तदा जातको धनधान्यसमृद्धो भवति। यदा द्वितीयभावे वृश्चिकराश्यां बुधस्योपरि दशमभावे स्थितस्य गुरोर्दृष्टिर्भवेत्तदा जातको धनिको भवति। यदा द्वितीयभावे मकरराश्यां मङ्गलस्योपर्यष्टमभावे स्थितस्य चन्द्रस्य दृष्टिर्भवेत्तदा जातको धनिको भवति। यदा द्वितीयभावे कुम्भराश्यां मङ्गलस्योपरि पञ्चमभावे

स्थितस्य शनैश्चरस्य दृष्टिर्भवेत्तदा जातको धनिको भवति। यदा द्वितीयभावे मिथुनराश्यां बुधस्योपर्यष्टमभावे स्थितस्य गुरोर्दृष्टिर्भवेदथवा दशमभावे स्थितस्य गुरोर्दृष्टिर्भवेत्तदा जातको धनिको भवति। यदा द्वितीयभावे कन्याराश्यां बुधस्योपर्यष्टमभावे स्थितस्य गुरोर्दृष्टिर्भवेत्तदा जातको धनिको भवति। यदा द्वितीयभावे कन्याराश्यां गुरोरुपर्येकादशभावे स्थितस्य मङ्गलस्य दृष्टिर्भवेत्तदा जातको धनसम्पन्नो भवति। यदा द्वितीयभावे मीनराश्यां गुरोरुपर्येकादशभावे स्थितस्य मङ्गलस्य दृष्टिर्भवेत्तदा जातकः सम्पत्तिमान् भवति। यदा द्वितीयभावे कर्कराश्यां गुरोरुपरि दशमभावे स्थितस्य चन्द्रस्य दृष्टिर्भवेत्तदा जातको धनसमृद्धो भवति। यदा द्वितीयभावे कर्कराश्यां गुरोरुपरि दशमभावे स्थितस्य शुक्रस्य दृष्टिर्भवेत्तदा जातको बहुविभवधनधान्यादिसुखभाग् भवति। यदा द्वितीयभावे कर्कराश्यां गुरोरुपरि पञ्चमभावे स्थितस्य शनैश्चरस्य दृष्टिर्भवेत्तदा जातको धनसमृद्धो भवति। यदा द्वितीयभावे सिंहराश्यां गुरोरुपरि दशमभावे स्थितस्य सूर्यस्य दृष्टिर्भवेत्तदा जातको धनिको भवति। यदा द्वितीयभावे तुलाराश्यां शुक्रस्योपर्येकादशभावे स्थितस्य चन्द्रस्य दृष्टिर्भवेत्तदा जातको धनिको भवति। यदा द्वितीयभावे कर्कराश्यां शुक्रस्योपरि दशमभावः स्थितस्य गुरोर्दृष्टिर्भवेत्तदा जातको धनसम्पन्नो भवति। यदा द्वितीयभावे मीनराश्यां शुक्रस्योपरि दशमभावे स्थितस्य गुरोर्दृष्टिर्भवेत्तदा जातको गजैश्वर्ययुक्तो भवति। यदा द्वितीयभावे धनूराश्यां शुक्रस्योपरि दशमभावे स्थितस्य गुरोर्दृष्टिर्भवेत्तदा जातको धनकुबेरो भवति। यदा द्वितीयभावे धनूराश्यां शुक्रस्योपरि पञ्चमभावे स्थितस्य शनैश्चरस्य दृष्टिर्भवेत्तदा जातको धनकुबेरो भवति। यदा द्वितीयभावे मीनराश्यां शुक्रस्योपरि पञ्चमभावे स्थितस्य शनैश्चरस्य दृष्टिर्भवेत्तदा जातको धनिको भवति। यदा द्वितीयभावे मकरराश्यां शुक्रस्योपर्यष्टमभावे स्थितस्य चन्द्रस्य दृष्टिर्भवेत्तदा जातको धनसम्पन्नो भवति। यदा द्वितीयभावे कुम्भराश्यां शुक्रस्योपर्येकादशभावे स्थितस्य मङ्गलस्य दृष्टिर्भवेत्तदा जातको वृद्धावस्थायां धनसम्पन्नो भवति। यदा द्वितीयभावे मकरराश्यां शुक्रस्योपर्येकादशभावे स्थितस्य मङ्गलस्य दृष्टिर्भवेत्तदा जातको वृद्धावस्थायां धनं प्राप्नोति। यदा द्वितीयभावे कुम्भराश्यां शुक्रस्योपरि पञ्चमभावे स्थितस्य शनैश्चरस्य दृष्टिर्भवेत्तदा जातकः सम्पत्तिमान् भवति। यदा द्वितीयभावे वृश्चिकराश्यां शनैश्चरस्योपरि दशमभावे स्थितस्य गुरोर्दृष्टिर्भवेत्तदा जातको धनकुबेरो भवति। यदा द्वितीयभावे कन्याराश्यां शनैश्चरस्योपरि दशमभावे स्थितस्य चन्द्रस्य दृष्टिर्भवेत्तदा जातकः स्त्रीसाहाय्येनऽथवा स्त्रीसम्बधितव्यवसायेन धनं प्राप्नोति। यदा द्वितीयभावे मिथुनराश्यां शनैश्चरस्योपरि दशमभावे स्थितस्य चन्द्रस्य दृष्टिर्भवेत्तदा जातकः स्त्रीसहाय्येन धनं प्राप्नोति। यदा द्वितीयभावे कन्याराश्यां शनैश्चरस्योपर्यष्टमभावे स्थितस्य शुक्रस्य दृष्टिर्भवेत्तदा जातकः स्त्रीसम्बधिताभूषणनिर्माणकर्ता भवति। यदा द्वितीयभावे कर्कराश्यां शनैश्चरस्योपर्यष्टमभावे स्थितस्य गुरोर्दृष्टिर्भवेत्तदा जातको रत्नादिधनसम्पतिमान् भवति। यदा द्वितीयभावे कर्कराश्यां शनैश्चरस्योपरि

## पञ्चमी दृष्टिः।

दशमभावे स्थितस्य शुक्रस्य दृष्टिर्भवेत्तदा जातको धनसम्पन्नो भवति। यदा द्वितीयभावे मेषराश्यां चन्द्रस्योपरि दशमभावे स्थितस्य गुरोर्दृष्टिर्भवेत्तदा जातको धनवान् भवति। यदा द्वितीयभावे शुभग्रहस्योपरि द्वितीयेशस्य दृष्टिर्भवेत्तदा जातको धनिको भवति। यदा द्वितीयभावस्याधिपतिः केन्द्रे शुभग्रहेण (गुरुणा शुक्रेण बुधेन पूर्णचन्द्रेण वा) दृष्टो भवेत्तदा जातको धनिको भवति। यदा द्वितीयभावे शुक्रस्योपरि बुधस्य दृष्टिर्भवेत्तदा जातको धनिको भवति तथा द्वितीयभावे शुक्रेण सह शुभग्रहस्योपरि बुधस्य[४] दृष्टिर्भवेत्तदा जातकोऽतिधनिको भवति। यदा द्वितीयेभावे शनैश्चरस्योपरि बुधस्य दृष्टिर्भवेत्तदा जातको धनवान् भवति। द्वितीयेशः शुभग्रहेण सह द्वितीयभावे दृष्टिं करोति तदा जातको धनवान् भवति। यदा द्वितीयभावे शुभग्रहस्योपरि द्वितीयेशस्य दृष्टिर्भवेत्तदा जातको धनिको भवति। यदा द्वितीयभावे शुभाशुभग्रहौ , द्वादशभावे पापग्रहः प्रथमभावे च शुभग्रहो भवेत्तदा जातकोऽस्थिरधनयुक्तो भवति। यदा द्वितीयभावे क्षीणचन्द्रस्योपरि बुधस्य दृष्टिर्भवेत्तदा जातकः सञ्चितधननाशको नूतनधनोपार्जनहीनश्च भवति। यदा द्वितीयभावस्योपर्यशुभग्रहाणां दृष्टिरधिका भवति तदा जातको बहुश्रमेणाऽपि अल्पधनो निर्धनो वा भवति। यदा द्वितीयभावे सिंहराश्यां शनैश्चरस्योपरि दशमभावे स्थितस्य गुरोर्दृष्टिर्भवेत्तदा जातकः कष्टेन धनमाप्नोति। यदा द्वितीयभावे मेषराश्यां सूर्यस्योपरि द्वादशभावे स्थितस्य शनैश्चरस्य दृष्टिर्भवेत्तदा जातको निर्धनोऽल्पधनो वा भवति। यदा द्वितीयभावे मिथुनराश्यां कन्याराश्यां वा सूर्यस्योपर्यष्टमभावे स्थितस्य चन्द्रस्य दृष्टिर्भवेत्तदा जातकोऽल्पधनो भवति। यदा द्वितीयभावे मेषराश्यां शुक्रस्योपर्यष्टमभावे स्थितस्य मङ्गलस्य दृष्टिर्भवेत्तदा जातकोऽल्पधनो भवति। यदा द्वितीयभावे तुलाराश्यां शुक्रस्योपर्यष्टमभावे द्वादशभावे वा स्थितस्य शनैश्चरस्य दृष्टिर्भवेत्तदा जातकोऽल्पधनो भवति। यदा द्वितीयभावे वृषभराश्यां शुक्रस्योपर्यष्टमभावे द्वादशभावे वा स्थितस्य शनैश्चरस्य दृष्टिर्भवेत्तदा जातकोऽल्पधनो भवति।

यदा द्वितीयभावस्योपरि सूर्यमङ्गलशनैश्चराणां दृष्टिर्भवेत्तदा जातको धनहीनो भवति। यदा द्वितीयभावस्योपरि सूर्यचन्द्रमङ्गलशनैश्चराणां दृष्टिर्भवेत्तदा जातको निःसंशयं दरिद्रो भवति। यदा द्वितीयभावे क्षीणचन्द्रस्योपरि[५] सूर्यमङ्गलशनैश्चराणां दृष्टिर्भवेत्तदा जातको दीनो धनहीनश्च भवति यदा द्वितीयभावस्योपरि सूर्यमङ्गलशनैश्चराणां दृष्टिर्भवेत्तदा जातको धनहीनो भवति। यदा द्वितीयभावस्योपरि सूर्यचन्द्रमङ्गलशनैश्चराणां दृष्टिर्भवेत्तदा जातको निःसंशयं दरिद्रो भवति। यदा द्वितीयभावे

[४] अत्र द्वादशभावे स्थितस्य बुधस्य दृष्टिरकपादेति कथ्यते।

[५] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम्।

## पञ्चमी दृष्टिः।

क्षीणचन्द्रस्योपरि[६] सूर्यमङ्गलशनैश्चराणां दृष्टिर्भवेत्तदा जातको दीनो धनहीनश्च भवति यदा द्वितीयभावे मेषराश्यां चन्द्रस्योपरि द्वादशभावे पञ्चमभावे वा स्थितस्य  शनैश्चरस्य दृष्टिर्भवेत्तदा जातको निर्धनो भवति। यदा द्वितीयभावे तुलाराश्यां चन्द्रस्योपर्यष्टमभावे स्थितस्य सूर्यस्य दृष्टिर्भवेत्तदा जातको निर्धनो भवति।यदा द्वितीयभावे मकरराश्यां सूर्यस्योपर्यष्टमभावे स्थितस्य चन्द्रस्य दृष्टिर्भवेत्तदा जातकः स्त्रीसङ्गेन धननाशको  भवति। यदा द्वितीयभावे मिथुनराश्यां चन्द्रस्योपरि द्वादशभावे स्थितस्य शनैश्चरस्य दृष्टिर्भवेत्तदा जातको धनहीनो भवति। यदा द्वितीयभावे सिंहराश्यां चन्द्रस्योपर्यष्टमभावे स्थितस्य शनैश्चरस्य दृष्टिर्भवेत्तदा जातको निर्धनो भवति। यदा द्वितीयभावे कर्कराश्यां मङ्गलस्योपर्यष्टमभावे स्थितस्य शुक्रस्य दृष्टिर्भवेत्तदा जातको निर्धनो भवति। यदा द्वितीयभावे कर्कराश्यां शनैश्चरस्योपर्यष्टमभावे स्थितस्य सूर्यस्य दृष्टिर्भवेत्तदा जातको धनचिन्तामग्नो भवति। यदा द्वितीयभावे मकरराश्यां चन्द्रस्योपर्यष्टमभावे द्वादशभावे वा स्थितस्य शनैश्चरस्य दृष्टिर्भवेत्तदा जातको निर्धनो भवति। यदा द्वितीयभावे मकरराश्यां बुधस्योपर्यष्टमभावे स्थितस्य शनैश्चरस्य दृष्टिर्भवेत्तदा जातको निर्धनो भवति। यदा द्वितीयभावे कर्कराश्यां शुक्रस्योपर्यष्टमभावे स्थितस्य शनैश्चरस्य दृष्टिर्भवेत्तदा जातको निर्धनो भवति। यदा द्वितीयभावे वृश्चिकराश्यां शुक्रस्योपर्यष्टमभावे स्थितस्य मङ्गलस्य दृष्टिर्भवेत्तदा जातको निर्धनो भवति। यदा द्वितीयभावे मकरराश्यां शुक्रस्योपर्यष्टमभावे  स्थितस्य मङ्गलस्य दृष्टिर्भवेत्तदा जातको निर्धनो भवति।यदा द्वितीयभावे सिंहराश्यां शनैश्चरस्योपर्यष्टमभावे स्थितस्य सूर्यस्य दृष्टिर्भवेत्तदा जातको निर्धनो भवति। यदा द्वितीयभावे सिंहराश्यां शनैश्चरस्योपर्यष्टमभावे स्थितस्य बुधस्य दृष्टिर्भवेत्तदा जातको दीनो निर्धनश्च भवति। यदा द्वितीयभावे वृश्चिकराश्यां चन्द्रस्योपर्यष्टमभावे स्थितस्य बुधस्य दृष्टिर्भवेत्तदा जातको धनहीनो भवति। यदा द्वितीयभावे मीनराश्यां बुधस्यस्योपर्य ष्टमभावे स्थितस्य चन्द्रस्य दृष्टिर्भवेत्तदा जातको धनहीनो नष्टधनो वा भवति। यदा द्वितीयभावे शत्रुराश्यामस्तङ्गतावस्थायां नीचराश्यां वा  स्थितस्य ग्रहस्योपरि पापग्रहस्य दृष्टिर्भवेत्तदा जातको निर्धनो भवति। यदा द्वितीयेशः षष्ठभावे द्वादशभावे वा तथा द्वादशेशो द्वितीयभावेभवेत्तदा जातको निर्धनो भवति। यदा द्वितीयेशो निर्बलःसन्  द्वादशभावे गुरुस्तथा लग्नस्योपरि शुभग्रहस्य दृष्टिर्न भवेत्तदा जातको धनहीनो भवति। यदा द्वितीयभावे सूर्यमङ्गलशनैश्चराणां युतिर्भवेत्तदा जातको दरिद्रो भवति अथवा धननाशः करोति। यदा द्वितीयभावे सूर्यमङ्गलशनैश्चरैः सह क्षीणचन्द्रः शुभग्रहयुतिहीनः शुभग्रहदृष्टिहीनो वा भवेत्तदा जातको निर्धनो भवति। यदा द्वितीयभावे चन्द्रमङ्गलयोरुपरि शनैश्चरस्य दृष्टिर्भवेत्तदा जातको धननाशं करोति। यदा द्वितीयभावे क्षीणचन्द्रस्योपरि बुधस्य दृष्टिर्भवेत्तदा जातकः पैतृकधननाशको

---

[६] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम्।

भवति। यदा द्वितीयभावे युग्मराश्यां[७] शनैश्चरेण सह राहुर्भवेत्तदा जातको नाटकादिकार्येषु धननाशको भवति। यदा द्वितीयभावे शनैश्चरेणसह राहुर्भवेत्तदा जातको नाटकगीतगणिकादिकार्येषु धननाशको भवति।

**०७/ ०५ अशनानि (भोजनम्)।**

यदा द्वितीयेशोपरि लग्नेशस्य दृष्टिर्भवेत्तदा जातको नियमितभोजनो भवति ।यदा द्वितीयेशः शुभषष्ट्यंशे[८] भवेत्तदा जातकोऽल्पमपि स्वाद्वन्नंभुक्ते । यदा द्वितीयभावे मेषराश्यां चन्द्रस्योपर्यष्टमभावे स्थितस्य शुक्रस्य दृष्टिर्भवेत्तदा जातकोऽल्पाशी भवति।

यदा द्वितीयभावे मेषराश्यां वृश्चिकराश्यां वा शनैश्चरस्योपर्यष्टमभावे स्थितस्य बुधस्य दृष्टिर्भवेत्तदा जातको बहुभोजको भवति । यदा द्वितीयभावे वृश्चिकराश्यां चन्द्रस्योपर्यष्टमभावैकादशभावे वा स्थितस्य मङ्गलस्य दृष्टिर्भवेत्तदा जातको बहुभक्षको भवति । यदा द्वितीयभावे मीनराश्यां बुधस्योपर्यष्टमभावे स्थितस्य शनैश्चरस्य दृष्टिर्भवेत्तदा जातको बहुभक्षको भवति।

यदा द्वितीयभावे मङ्गलः पापग्रहेण दृष्टो भवेत्तदा जातकोऽभोज्यान्नभक्षी भवति । यदा द्वितीयभावे नीचराश्यां ग्रहस्योपर्यन्यनीचग्रहस्य दृष्टिर्भवेत्तदा जातकः परान्नभक्षी भवति। यदा द्वितीयेशो नीचराश्यां शत्रुराश्यां वा नीचग्रहेण दृष्टो भवेत्तदा जातकः परान्नभक्षी भवति । यदा द्वितीयेशःशत्रुग्रहेण नीचग्रहेण वा युतो दृष्टो वा भवेत्तदा जातकः परान्नभक्षी भवति । यदा द्वितीयभावे राहुग्रहस्योपरि पापग्रहस्य दृष्टिर्भवेत्तदा जातकः कदन्नभक्षी भवति ।

०७/०६ नेत्रम्।

यदा द्वितीयभावे मेषराश्यां सूर्यस्योपर्यष्टमभावे स्थितस्य मङ्गलस्य दृष्टिर्भवेत्तदा जातकः प्रायोरक्तनेत्रवान् भवति। यदा द्वितीयभावे कन्याराश्यां मिथुनराश्यां वा सूर्यस्योपरि द्वादशभावे स्थितस्य बुधस्य दृष्टिर्भवेत्तदा जातको नेत्रपीडितो भवति। यदा द्वितीयभावे मेषराश्यां चन्द्रस्योपर्यष्टमभावै-कादशभावे वा स्थितस्य मङ्गलस्य दृष्टिर्भवेत्तदा जातको दन्तरोगी नेत्ररोगी पीडितश्च भवति। यदा द्वितीयभावे मेषराश्यां चन्द्रस्योपरि पञ्चमभावे द्वादशभावे वा स्थितस्य शनैश्चरस्य दृष्टिर्भवेत्तदा जातको

---

[७] युग्मराशिः स्त्रीराशिरिति कथ्यते यत्र वृषभ–कर्क–वृश्चिक–मकर– मीनादयो गृह्यन्ते।

[८] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम्।

नेत्ररोगपीडितो भवति। यदा द्वितीयभावे नीचराश्यां मङ्गलस्योपर्यष्टमभावे स्थितस्य शनैश्चरस्य दृष्टिर्भवेत्तदा जातको नेत्ररोगपीडितो भवति।

## ०८/०१ द्वितीयभावे सूर्यस्य विशिष्टफलविचारः।

यदा सूर्यः स्वोच्चराश्यां[९] भवेत्तदा जातको नृपसम्मानभाक् नृपाच्चधनिको भवति। यदा सूर्यः स्वोच्चनवांशे[१०] भवेत्तदा जातको राज्याधिकारी तथा राजकार्यकुशलश्च भवति। यदा सूर्यो होरादिषड्वर्गेषु शुभो[११]भवेत्तदा सज्जनेभ्योऽपि धनं प्राप्नोति। यदा सूर्यो मूलत्रिकोणराश्यां[१२] भवेत्तदा जातको भैक्षेण धनं लभते। यदा सूर्यो मित्रग्रहस्य राश्यां[१३] भवेत्तदा जातको धनधान्यसम्पन्नो भवति। यदा सूर्यो मित्रग्रहस्य नवांशे[१४] भवेत्तदा जातको धातुसम्बधित व्यवसायेन धनिको भवति। यदा सूर्यः शत्रुग्रहस्य राश्यां[१५] भवेत्तदा जातकः सञ्चितधननाशको भवति। यदा सूर्यः शत्रुग्रहस्य नवांशे[१६] भवेत्तदा जातको नीचजनेभ्यो धनं प्राप्नोति। यदा सूर्यः षड्वर्गेषु पापग्रहस्य राश्यां[१७] भवेत्तदा जातकश्चौर्येण धनं लभते। यदा सूर्यो नीचराश्यां[१८] भवेत्तदा जातकोऽन्यायोपजीवी धर्माचरणविरुद्धश्च भवति। यदा सूर्यो नीचनवांशे[१९] भवेत्तदा जातको भूमिव्यवसायेन धनिको भवति।

## ०८/०२ द्वितीयभावे चन्द्रस्य विशिष्टफलविचारः।

यदा चन्द्रः स्वोच्चराश्यां[२०] भवेत्तदा जातको मौक्तिकादिबहुधनयुक्तो भवति। यदा चन्द्रः स्वोच्चनवांशे[२१] स्थितो भवेत्तदा जातकः सुवर्णादिधनसम्पन्नो भवति। यदा चन्द्रो होरादिषड्वर्गेषु

---

[९] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम्।

[१०] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम्।

[११] यदा होरादिषड्वर्गेषु सूर्य उच्चराश्यां स्वराश्यां मूलत्रिकोणराश्यामधिमित्रराश्यां मित्रराश्यां वा भवेत्तदा स शुभो मन्यते।

[१२] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम्।

[१३] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम्।

[१४] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम्।

[१५] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम्।

[१६] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम्।

[१७] यदा षड्वर्गेषु सूर्यःशनैश्चरक्षेत्रीयो भवेत्तदा स पापसंज्ञकः कथ्यते ।

[१८] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम्।

[१९] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम्।

[२०] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम्।

[२१] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम्।

**पञ्चमी दृष्टि:।**

शुभो[22]भवेत्तदा जातको नानाविधकार्यैर्धनिको भवति। यदा चन्दो मूलत्रिकोणराश्यां[23]भवेत्तदा जातक: स्त्रीधनेन सुखं प्राप्नोति।यदा चन्द्रो मित्रग्रहस्य राश्यां[24] भवेत्तदा जातक: पुत्रद्वारा धनिको भवति । यदा चन्द्रो मित्रग्रहस्य नवांशे [25] भवेत्तदा जातक: कृषिकर्मणा धनिको भवति। यदा चन्द्रो वर्गोत्तमावस्थायां[26] भवेत्तदा जातको मित्रसाहाय्येन धनिको भवति। यदा चन्द्र: शत्रुग्रहस्य राश्यां[27] भवेत्तदा जातकश्चौर्यकर्मणा धनिको भवति। यदा चन्द्र: शत्रुग्रहस्य नवांशे[28] भवेत्तदा जातक: निन्द्यकर्मणा धनिको भवति। यदा चन्द्रो होरादिषड्वर्गेषु पापग्रहस्य राश्यां[29] भवेत्तदा जातको धनचिन्तायुक्तो भवति। यदा चन्द्रो नीचराश्यां[30] भवेत्तदा जातकोऽसद्व्ययेन निर्धनो भवति। यदा चन्द्रो नीचनवांशे[31]भवेत्तदा जातक: सञ्चितधननाशको भवति।

### ०८/०३ द्वितीयभावे मङ्गलस्य विशिष्टफलविचार:।

यदा मङ्गल उच्चराश्यां[32] भवेत्तदा जातको युद्धादिकर्मणा धनिको भवति। यदा मङ्गल उच्चनवांशे[33] भवेत्तदा जातको बहुश्रपरिश्रमोपि स्वल्पधनो भवति। यदा मङ्गलो होरादिषड्वर्गेषु शुभो[34] भवेत्तदा जातक: स्वजनेभ्यो धनं लभते। यदा मङ्गलो मूलत्रिकोणराश्यां[35]भवेत्तदा जातको दस्युकर्मणा धनं प्राप्नोति। यदा मङ्गलो मित्रग्रहस्य राश्यां[36] मित्रग्रहस्य वा नवांशे[37]भवेत्तदा जातको मित्रसाहाय्येन

---

[22] यदा होरादिषड्वर्गेषु चन्द्र उच्चराश्यां स्वराश्यां मूलत्रिकोणराश्यामधिमित्रराश्यां मित्रराश्यां वा भवेत्तदा स शुभो मन्यते।

[23] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम्।

[24] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम्।

[25] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम्।

[26] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम्।

[27] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम्।

[28] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम्।

[29] यदा षड्वर्गेषु चन्द्रो मङ्गलशनैश्चरक्षत्रीयो भवेत्तदा स पापग्रह: कथ्यते ।

[30] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम्।

[31] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम्।

[32] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम्।

[33] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम्।

[34] यदा होरादिषड्वर्गेषु मङ्गलस्य उच्चराश्यां स्वराश्यां मूलत्रिकोणराश्यामधिमित्रराश्यां मित्रराश्यां वा भवेत्तदा स शुभो मन्यते।

[35] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम्।

[36] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम्।

[37] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम्।

धनिको भवति(परि.०१,क्र.२८) (परि.०१,क्र.२९)। यदा मङ्गलो वर्गोत्तमावस्थायां[३८] भवेत्तदा जातको देवगुरूप्रसादाद्धनिको भवति । यदा मङ्गलः शत्रुग्रहस्य राश्यां[३९] भवेत्तदा जातकोऽल्पधनो भवति। यदा मङ्गलः शत्रुग्रहस्य नवांशे[४०] भवेत्तदा जातको धर्माविरुद्धाचार ऋणकर्ता च भवति । यदा मङ्गलः षड्वर्गेषु पापग्रहराश्यां[४१] भवेत्तदा जातको व्रणीभवति। यदा मङ्गले नीचराश्यां[४२]भवेत्तदा जातको निर्धनो भवति। यदा मङ्गलो नीचनवांशे[४३] भवेत्तदा जातको ऋणकर्ता भवति।

## ०८/०४ द्वितीयभावे बुधस्य विशिष्टफलविचारः।

यदा बुध उच्चराश्यां[४४] भवेत्तदा जातकः सञ्चितधनेन धनिको भवति। यदा बुध उच्चनवांशे[४५]भवेत्तदा जातकः कृषिकर्मणा पशुपालनेन वा धनिको भवति। यदा बुधो होरादिषड्वर्गेषु शुभो[४६] भवेत्तदा जातको नानाविधकार्यैर्धनिको भवति । यदा बुधो मूलत्रिकोणराश्यां[४७] भवेत्तदा जातकः सज्जनद्वारा धनिको भवति । यदा बुधो मित्रग्रहस्य राश्यां[४८] भवेत्तदा जातको विविधव्यवसायैर्धनिको भवति । यदा बुधो मित्रग्रहस्य नवांशे[४९] स्थितोभवेत्तदा जातकोऽन्यजनद्वारा धनिको भवति। यदा बुधो वर्गोत्तमावस्थायां[५०] भवेत्तदा जातकः सत्कर्मभिर्धनिको भवति । यदा बुधः शत्रुग्रहस्य राश्यां[५१] भवेत्तदा जातकः शत्रुसाहाय्येन धनिको भवति। यदा बुधः शत्रुग्रहस्य नवांशे[५२] भवेत्तदा जातकोऽल्पधनो भवति। यदा बुधो होरादिषड्वर्गेषु पापग्रहस्य राश्यां[५३] भवेत्तदा जातको वञ्चनादिकर्मणा धनिको भवति। यदा

---

[३८] विशेषार्थ परिशिष्टम् –०३ द्रष्टव्यम्।
[३९] विशेषार्थ परिशिष्टम् –०३ द्रष्टव्यम्।
[४०] विशेषार्थ परिशिष्टम् –०३ द्रष्टव्यम्।
[४१] यदा षड्वर्गेषु मङ्गलः शनैश्चरक्षेत्रीयो भवेत्तदा स पापसंज्ञकः कथ्यते ।
[४२] विशेषार्थ परिशिष्टम् –०३ द्रष्टव्यम्।
[४३] विशेषार्थ परिशिष्टम् –०३ द्रष्टव्यम्।
[४४] विशेषार्थ परिशिष्टम् –०३ द्रष्टव्यम्।
[४५] विशेषार्थ परिशिष्टम् –०३ द्रष्टव्यम्।
[४६] यदा होरादिषड्वर्गेषु बुध उच्चराश्यां स्वराश्यां मूलत्रिकोणराश्यामधिमित्रराश्यां मित्रराश्यां वा भवेत्तदा स शुभो मन्यते।
[४७] विशेषार्थ परिशिष्टम् –०३ द्रष्टव्यम्।
[४८] विशेषार्थ परिशिष्टम् –०३ द्रष्टव्यम्।
[४९] विशेषार्थ परिशिष्टम् –०३ द्रष्टव्यम्।
[५०] विशेषार्थ परिशिष्टम् –०३ द्रष्टव्यम्।
[५१] विशेषार्थ परिशिष्टम् –०३ द्रष्टव्यम्।
[५२] विशेषार्थ परिशिष्टम् –०३ द्रष्टव्यम्।
[५३] यदा षड्वर्गेषु बुधो मङ्गलशनैश्चरक्षत्रीयो भवेत्तदा स पापग्रहः कथ्यते ।

बुधो नीचराश्यां[५४] भवेत्तदा जातको निकृष्टकर्मणा धनिको भवति। यदा बुधो नीचनवांशे[५५] भवेत्तदा जातको शत्रुभिर्दीनहीनवृत्या च धनवान् भवति।

### ०८/०५ द्वितीयभावे गुरो विशिष्टफलविचारः।

यदा गुरुः स्वोच्चराश्यां[५६] भवेत्तदा जातको न्यायेन धनं प्राप्नोति। यदा गुरुः स्वोच्चनवांशे[५७] भवेत्तदा जातको वैदुष्येण सौजन्येन च मानं धनं च प्राप्नोति। यदा गुरुर्होरादिषड्वर्गेषु शुभो[५८] भवेत्तदा जातको नृपाद् द्रव्यं लभते। यदा गुरुर्मूलत्रिकोणराश्यां[५९] भवेत्तदा जातको गुप्तधनं पैतृकधनमधिगच्छति। यदा गुरुर्मित्रग्रहस्य राश्यां[६०] भवेत्तदा जातकोऽश्वगजवस्त्रादि व्यवसायेन धनिको भवति। यदा गुरुर्मित्रग्रहस्य नवांशे[६१] भवेत्तदा जातकः कृषिकर्मणा धनवान् भवति ।दा गुरुर्वर्गोत्तमावस्थायां[६२] भवेत्तदा जातकः सज्जनसहाय्येन वा सद्वृत्या च धनवान् भवति। यदा गुरुः शत्रुग्रहस्य राश्यां[६३] भवेत्तदा जातकः शत्रुसेवया धनिको भवति। यदा गुरुः शत्रुग्रहस्य नवांशे[६४] भवेत्तदा जातकः शत्रुधनेन जीवनं यापयति। यदा गुरुः षड्वर्गेषु पापग्रहग्रहस्य राश्यां[६५] भवेत्तदा जातको भूरिपरिश्रमेण धनं लभते। यदा गुरुर्नीच-राश्यां[६६] भवेत्तदा जातकः परस्त्रीधनं प्राप्नोति। यदा गुरुर्नीचनवांशे[६७] भवेत्तदा जातकः शूद्रादिभ्यो वित्तं लभते।

---

[५४] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम्।
[५५] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम्।
[५६] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम्।
[५७] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम्।
[५८] यदा होरादिषड्वर्गेषु गुरु उच्चराश्यां स्वराश्यां मूलत्रिकोणराश्यामधिमित्रराश्यां मित्रराश्यां वा भवेत्तदा स शुभो मन्यते।
[५९] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम्।
[६०] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम्।
[६१] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम्।
[६२] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम्।
[६३] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम्।
[६४] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम्।
[६५] यदा षड्वर्गेषु गुरुः शनैश्चरक्षेत्रीयो भवेत्तदा स पापग्रहः कथ्यते ।
[६६] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम्।
[६७] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम्।

## पञ्चमी दृष्टि:।

### ०८/ ०६ द्वितीयभावे शुक्रस्य विशिष्टफलविचार:।

यदा शुक्र: स्वोच्चराश्यां[६८] भवेत्तदा जातक: प्रभूतधनसञ्चयकर्ता भवति। यदा शुक्र: स्वोच्चनवांशे[६९] भवेत्तदा जातक: पैतृकधनेन धनिको भवति। यदा शुक्र: होरादिषड्वर्गेषु शुभो[७०] भवेत्तदा जातको धनकुबेरो भवति । यदा शुक्रो मूलत्रिकोणराश्यां[७१] भवेत्तदा जातक: पुत्रसाहाय्येन धनवान् भवति । यदा शुक्रो मित्रग्रहस्य राश्यां[७२] भवेत्तदा जातको नृपात् धनिको भवति। यदा शुक्रो मित्रग्रहस्य नवांशे[७३] भवेत्तदा जातको नृपपुत्रेण धनिको भवति। यदा शुक्रो वर्गोत्तमावस्थायां भवेत्तदा जातको धनकुबेरो भवति । यदा शुक्र: शत्रुग्रहस्य राश्यां[७४] भवेत्तदा जातक: श्रेष्ठकर्मणा धनं प्राप्नोति। यदा शुक्र: शत्रुग्रहस्य नवांशे[७५] भवेत्तदा जातको दैन्येन भैक्षेण च जीवननिर्वाहं करोति। यदा शुक्र: षड्वर्गेषु पापग्रहस्य राश्यां[७६] भवेत्तदा जातक: परदेशनिवासेन धनिको भवति। यदा शुक्रो नीचराश्यां[७७] भवेत्तदा जातक:सेवकवृत्त्या धनं प्राप्नोति। यदा शुक्रो नीचनवांशे[७८] भवेत्तदा जातको द्यूतेन धनं लभते।

### ०८/ ०७ द्वितीयभावे शनैश्चरस्य विशिष्टफल विचार:।

यदा शनैश्चर: स्वोच्चराश्यां[७९] भवेत्तदा जातक: कुकर्मणा धनवान् भवति। यदा शनैश्चर उच्चनवांशे[८०] भवेत्तदा जातको महाकष्टेन स्वल्पधनं प्राप्नोति। यदा शनैश्चरो होरादिषड्वर्गेषु शुभो[८१] भवेत्तदा जातको दुर्व्यसनद्यूतादिकर्मणा धनवान् भवति। यदा शनैश्चरो मूलत्रिकोणराश्यां[८२] भवेत्तदा

---

[६८] विशेषार्थ परिशिष्टम् –०३ द्रष्टव्यम्।

[६९] विशेषार्थ परिशिष्टम् –०३ द्रष्टव्यम्।

[७०] यदा होरादिषड्वर्गेषु शुक्र उच्चराश्यां स्वराश्यां मूलत्रिकोणराश्यामधिमित्रराश्यां मित्रराश्यां वा भवेत्तदा स शुभो मन्यते।

[७१] विशेषार्थ परिशिष्टम् –०३ द्रष्टव्यम्।

[७२] विशेषार्थ परिशिष्टम् –०३ द्रष्टव्यम्।

[७३] विशेषार्थ परिशिष्टम् –०३ द्रष्टव्यम्।

[७४] विशेषार्थ परिशिष्टम् –०३ द्रष्टव्यम्।

[७५] विशेषार्थ परिशिष्टम् –०३ द्रष्टव्यम्।

[७६] यदा षड्वर्गेषु शुक्र: मङ्गलक्षेत्रीयो भवेत्तदा स पापग्रह: कथ्यते ।

[७७] विशेषार्थ परिशिष्टम् –०३ द्रष्टव्यम्।

[७८] विशेषार्थ परिशिष्टम् –०३ द्रष्टव्यम्।

[७९] विशेषार्थ परिशिष्टम् –०३ द्रष्टव्यम्।

[८०] विशेषार्थ परिशिष्टम् –०३ द्रष्टव्यम्।

[८१] यदा होरादिषड्वर्गेषु शनैश्चर उच्चराश्यां स्वराश्यां मूलत्रिकोणराश्यामधिमित्रराश्यां मित्रराश्यां वा भवेत्तदा स शुभो मन्यते।

[८२] विशेषार्थ परिशिष्टम् –०३ द्रष्टव्यम्।

जातकः परसेवया धनिको भवति। यदा शनैश्चरो मित्रग्रहस्य राश्यां[८३] भवेत्तदा जातकः सत्कर्मणा धनवान् भवति। यदा शनैश्चरो मित्रग्रहस्य नवांशे [८४] भवेत्तदा जातको भूम्यादिनिहितगुप्तधनं प्राप्नोति। यदा शनैश्चरो वर्गोत्तमावस्थायां शुभो[८५] भवेत्तदा जलोत्पन्नपदार्थानां व्यवसायेन धनं लभते। यदा शनैश्चरः शत्रुग्रहस्य राश्यां[८६] भवेत्तदा जातको दासवृत्त्या धनं लभते। यदा शनैश्चरः शत्रुग्रहस्य नवांशे [८७]भवेत्तदा जातकः पापकर्मभिर्धनिको भवति। यदा शनैश्चरः षड्वर्गेषु पापग्रहस्य राश्यां [८८] भवेत्तदा जातकः पापकर्मणा धनवान् भवति । यदा शनैश्चरः स्वनीचराश्यां भवेत्तदा जातकःदीनो दरिद्रो बहुदुःखी भवति । यदा शनैश्चरः स्वनीचनवांशे भवेत्तदा जातकोऽन्त्यजसाहाय्ये धनवान् भवति।

## ०९/०१ द्वितीयभावस्य कुटुम्बादि विचारः।

## ०९/०२ कुटुम्बम्।

द्वितीयेशः शुभग्रहयुक्तः केन्द्रे त्रिकोणे मित्रग्रहक्षेत्रे वा शुभग्रहराश्यां स्वराश्यां वा भवेत्तदा जातकः कुटुम्बस्य सम्यक्पलको भवति (परि.०१,क्र.२८)। यदा होरादिदशवर्गाणां वर्गचतुष्के गोपुरांशाख्या-वस्थायां[८९] द्वितीयेशस्तस्य च नवमांशाधिपतिर्होरादिदशवर्गाणां पञ्चवर्गेषु सिंहासनाख्यावस्थायां[९०] भवेत्तदा जातकः पञ्चाशज्जनपालको भवति [९१] । यदा सिंहासनाख्यावस्थायां होरादिदशवर्गाणां षड्वर्गेषु पारावतांशाख्यावस्थायां वा द्वितीयेशो यदा गुरुणा दृष्टो युतो वा भवेत्तदा जातकः कुटुम्बस्य समाजस्य च पालको भवति। यदा द्वितीयेशो गोपुरांशाख्यावस्थायां शुक्रश्च पारावतांशाख्यावस्थायां भवेत्तदा जातको बहुजनपालकः समृद्धिकारकश्च भवति। यदा गुरुः सिंहासनांशाख्यावस्थायां शुक्रश्च गोपुरांशाख्यावस्थायां धनेशश्च होरादिदशवर्गाणां नववर्गेषु ऐरावतांशाख्यावस्थायां भवेत्तदा जातको बहुजनपालको भवति। यदा लग्नाद् द्वितीये चन्द्रो भवेत्तदा जातको विशालं कुटुम्बं विभर्ति । यदा सप्तमेभावे शुभराशिस्थः सूर्यो भवेत्तदा जातको विशालकुटुम्बवान् भवति । यदा द्वितीयभावे कोऽपि उच्चग्रहः शुभग्रहेण दृष्टो भवेत्तथा लग्नोशोऽप्युच्चराश्यां शुभग्रहेण दृष्टो भवेत्तदा जातको बहुजनपालको भवति।

---

[८३] विशेषार्थ परिशिष्टम् -०३ द्रष्टव्यम्।
[८४] विशेषार्थ परिशिष्टम् -०३ द्रष्टव्यम्।
[८५] विशेषार्थ परिशिष्टम् -०३ द्रष्टव्यम्।
[८६] विशेषार्थ परिशिष्टम् -०३ द्रष्टव्यम्।
[८७] विशेषार्थ परिशिष्टम् -०३ द्रष्टव्यम्।
[८८] यदा षड्वर्गेषु शनैश्चरः सूर्यमङ्गलक्षेत्रीयो भवेत्तदा स पापग्रहः कथ्यते ।
[८९] विशेषार्थ परिशिष्टम् -०३ द्रष्टव्यम्।
[९०] विशेषार्थ परिशिष्टम् -०३ द्रष्टव्यम्।
[९१] धनेशे गोपुरांशे धनेशांशपे शुभे सिंहासनांशे पञ्चाशज्जन पालकः।। जा.तत्व.२/१२९।।

## पञ्चमी दृष्टिः।

यदा धनेशो लग्नभावे भवेत्तदा जातको निष्ठुरोऽलसः कामी कुटुम्ब- कंटकोऽन्यजनकर्मचारी च भवति। यदा जन्मकुंडल्यां द्वितीयभावे पापराशौ राहु र्भवेत्तदा जातकः कुटुम्बाद् विरोधी धनक्षयी भवति। यदा जन्मकुण्डल्यां सप्तमभावे पापग्रेहण सह मङ्गलो युक्तो दृष्टो वा भवेत्तदा जातकः कुलनाशको भवति। यदा जन्मकुण्डल्यां लग्नभावे सप्तमभावे व्ययभावे च सर्वेग्रहाः स्थिता भवेयुस्तदा जातकः कुटुम्बविनाशी परिवारनाशको वा भवति[९२]।

### ०९/०३ वाक्। सत्यम् । बहुभाषणं च ।

यदा द्वितीयभावे गुरुर्भवेत्तदा जातकः सुवचनः सत्यवक्ता मधुरभाषी च भवति। यदा द्वितीयेशः शुभग्रहेण सह केन्द्रे[९३] अथवा स्वोच्चस्वगृहादिराश्यामथवा शुभग्रहस्य राश्यां भवेत्तदा जातक उत्तमवाक् मधुरभाषी च भवति। यदा द्वितीयभावे स्थितः शुभग्रहो मित्रग्रहस्य राश्यां स्वोच्चराश्यां स्वराश्यां वा भवेत्तदा जातको मधुरभाषी मृदुभाषी सत्यवक्ता च भवति। यदा द्वितीय भावे मित्रराश्यां स्वराश्यामुच्चराश्यां वा स्थितशुभग्रहो होरादिषड्वर्गेषु शुभोभवेत्तदा[९४] जातको वाक्सिद्धिर्भवति । यदा द्वितीयेशः शुभग्रहः शुभग्रहेण सह त्रिकोणस्थाने[९५] भवेत्तदा जातको वक्ता भवति। यदा द्वितीयेशस्य नवमांशस्वामी शुभग्रह उच्चराश्यां भवेत्तदा जातक उत्तमवक्ता भवति। यदा पारावतांशावस्थायां[९६] द्वितीयेशो गुरुणा सह भवेत्तदा जातक उत्तमवक्ता भवति।

यदा द्वितीयभावे चन्द्रशनैश्चरौ मङ्गलेन दृष्टो भवेतां तदा जातकः परुषवाक् अर्थात् कटुवचनो भवति। यदा द्वितीयशो गुरुणा सहाष्टमभावे भवेत्तदा जातको मूको भवति किन्तु यदा द्वितीयेशो गुरुर्वा उच्चराश्यां स्वराश्यां वा भवेत्तदा न दोषो भवति। यदा द्वितीयेशो निर्बलोभूत्वा[९७] पापग्रहस्य नवांशे भवेत्तदा जातकः कटुवचनो भवति । यदा द्वितीयभावे पापग्रहोऽथवा द्वितीयभावं पापग्रहनवांशयुक्तं पापग्रहेण दृष्टं भवेत्तदा जातकः पापस्वभाववाणीयुक्तो भवति। यदा द्वितीयभावे शनैश्चरक्षेत्रे (मकरराश्यां

---

[९२] लग्नान्त्यास्ते सर्वे परिवार क्षयः।। जा.तत्व.द्वि.वि./१३५।।

[९३] विशेषार्थं परिशिष्टम् -०४ द्रष्टव्यम्।

[९४] यदा होरादिवर्गेषु ग्रह उच्चराश्यां स्वराश्यां मित्रग्रहस्य राश्यां वर्गोत्तमावस्थायां मूलत्रिकोणराश्यां वा भवेत्तदा शुभसंज्ञको भवति।

[९५] विशेषार्थं परिशिष्टम् -०४ द्रष्टव्यम्।

[९६] विशेषार्थं परिशिष्टम् -०३ द्रष्टव्यम्।

[९७] यदा द्वितीयेशो नीचराश्यां शत्रुराश्यां पापराश्यां अस्तङ्गतावस्थायां पापग्रहेणसह पापग्रहेणदृष्टो वा भवेत्तदा द्वितीयेशो निर्बलो भवति । अथवा ग्रहाणां बलाबलनिणयार्थं परिशिष्टम् -०३ द्रष्टव्यम्।

कुम्भराश्यां वा) बुधः शनैश्चरेण दृष्टो भवेत्तदा जातको वाणीदोषयुक्तो भवति। यदा द्वितीयेशो गुरुणा सह षष्ठभावे अष्टमभावे द्वादशभावे वा भवेत्तदा जातको वाणीहीनो भवति(परि.०१,क्र.०१)[९८] । यदा द्वितीयेशो नीचराश्यां पापग्रहेण दृष्टो युतो वा भवेत्तदा जातको मूको भवति (परि.०१,क्र.०२) (परि.०१, क्र.०५) (परि.०१,क्र.१०)। यदा द्वितीयेशः पापग्रहेण सह षष्ठभावेऽष्टमभावे द्वादशभावे वा भवेत्तदा जातको मूको भवति (परि.०१,क्र.०३) (परि.०१,क्र.०७)। यदा वाणीकारको बुधः स्वराशिं विहाय षष्ठभावेऽष्टमभावेद्वादशभावे वा पापग्रहेण युतो दृष्टो वा भवेत्तदा जातको वाणीहीनो भवति (परि.०१, क्र.०४)। यदा वाणीकारको बुधो नीचराश्यां पापग्रहेण युतो दृष्टो वा भवेत्तदा जातको मूको भवति (परि.०१, क्र.०६) ।यदा वाणीकारको बुधोऽस्तङ्गतावस्थायां षष्ठभावेऽष्टमभावे द्वादशभावे वा भवेत्तदा जातको मूको भवति (परि.०१, क्र.०७)। यदा वाणीकारको बुधोऽस्तङ्गतावस्थायां पापग्रहेण सह युतो दृष्टो वा भवेत्तदा जातको मूको भवति (परि.०१,क्र.०८)। यदा द्वितीयभावे पापग्रहो बुधोऽस्तङ्गतावस्थायां भवेत्तदा जातको मूको भवति (परि.०१,क्र.०९)। यदा द्वितीयभावे पापग्रहो द्वितीयेशोऽपि पापग्रहेण युतो दृष्टो वा भवेत्तदा जातको मूको भवति (परि.०१,क्र.१२)। यदा द्वितीयशो बुधेना सह द्वादशभावे शत्रुराश्यां पापग्रहेण दृष्टो भवेत्तदा जातको मूको भवति (परि.०१,क्र.१३) । यदा द्वितीयभावकारको गुरुर्नीचग्रहेण युतः पापग्रहेण शत्रुग्रहेण दृष्टो भवेत्तदा जातको मूको भवति (परि.०१, क्र.१४)। यदा द्वितीयेशो द्वादशभावे पापग्रहेण युतो दृष्टो वा द्वादशेशोऽपि शत्रुराश्यां द्वितीयभावे भवेत्तदा जातको मूको भवति (परि.०१, क्र.११) ।

### ०९/०४ वित्तं क्रयविक्रयौ मणिमाणिक्यकोश संग्रहश्च ।

यदा धनेशलाभेशयोर्युतिरेकादशभावे भवेत्तदा जातको धनवान् भवति। धनेशलाभेशयोर्युतिर्मित्रराश्यां स्वोच्चराश्यां वा भवेत्तदा जातको धनवान् भवति। यदा द्वितीयेशलाभेशौ परस्परौ मित्रंभूत्वा लग्नभावे भवेतां तदा जातको धनवान् भवति। यदा द्वितीयेशलग्नेशैकादशभावानां युतिर्लग्नभावे भवेत्तदा जातको धनवान् भवति। यदा द्वितीयभावे धनकारको ग्रह उच्चराश्यां मित्रग्रहस्य राश्यां स्वगृहावस्थायां वा भवेत्तदा जातक आमरणान्तं धनिको भवति। यदा द्वितीयभावस्यस्वामी यस्मिन् भावे भवेत्तदनुसारेण धनाभिवृद्धिर्भवति। यदा द्वितीयभावस्याधिपतिस्तृतीयभावस्याधिपतिना सह लग्नभावे भवेत्तदा जातको भातृधनेन सुखी भवति अथवा भातृधनसाहाय्येन जीवननिर्वाहः करोति। अनेन प्रकारेण चतुर्थभावेशेन सह धनेशो लग्ने भवेत्तदा मातृसाहाय्येन धनं प्राप्नोति, दशमेशेन सह धनेशो लग्ने भवेत्तदा पितृधनेन पितृसाहाय्येन वा धनंप्राप्नोति सप्तमेशेन सह द्वितीयेशो भवेत्तदा पत्नीसाहाय्येन पत्नीधनेन वा धनं

---

[९८] अस्तमात् स्थानादर्धचन्द्रद्वयगते ( )इति चिह्ने दर्शितं परि.इति परिशिष्टं क्र. इति च कुण्डली क्रमाङ्कं दर्शयतः।

प्राप्नोति(परि.०१,क्र.४०)। षष्ठेशेन सह द्वितीयेशो लग्नेभवेत्तदा युद्धं जीत्वा शत्रुधनेन धनं प्राप्नोति। पञ्चमेशेन सह द्वितीयेशो लग्नभावे भवेत्तदा पुत्रसाहाय्येन पुत्रधनेन जातको धनिको भवति। यदा द्वितीयेशलाभशयोर्युति केन्द्रे भवेत्तदा जातको धनवान् भवति। यदा द्वितीयभावस्य स्वामी वक्रयुक्तो भवेत्तदा द्वितीयभावस्य स्वामी बलवान् भवति। अस्मिन्योगे द्वितीयेशो राश्यनुसारेण शुभाशुभफलं ददाति।

यदा द्वितीयेशो षड्वर्गेषु शुभो भवेत्तदा जातकः कोट्याधिपतिर्भवति। यदा द्वितीयेशः स्वोच्चराश्यां मूलत्रिकोणराश्यां स्वगृहावस्थायां मित्रग्रहस्य राश्यां शुभग्रहस्य राश्यां वा नवमेकादशभावे केन्द्रे वा भवेत्तदा जातको धनवान् भवति। यदा कस्मिंश्चितापिभावे चन्द्रमङ्गलयोर्युतिः शुभग्रहेण दृष्टो भवेत्तदा जातको सद्यो धनिको भवति। होरादिषड्वर्गाणां पञ्चवर्गेषु सिंहासनाख्यावस्थायां यदि कस्यचित् अपि द्वितीयेशस्य स्वगृहत्वमुच्चराशित्वमधिमित्रादि च संभवेयुर्यदितदापि सद्यो धनिकयोगः संभवति। प्रथमचतुर्थसप्तमदशमभावेषु केन्द्रस्थानेषु पञ्चमनवमभावयोः कोणाख्ययो यदि द्वितीयेशदशमेशयो युतिर्भवेत्तदा जातकः सद्यो धनिको जायते[९९]। धनभावेस्थितग्रहस्य धनभावस्योपरि दृष्टिकर्ताग्रहस्य धनेशस्य वा दशायां अन्तदर्शायां धनकारकग्रहानुसारेण धनप्राप्तिः जातकस्य जीवने भवति।

यदा दशमाधिपतिर्नवमांशराश्यधिपतिना सह द्वितीयेशस्य युतिर्जायते एकादशेशेन च यदि इयं युतिर्दृष्टा भवेत् होरादि दशवर्गेषु वैशेषिकांशाख्यावस्थायां दशमेशस्य नवमांशधिपतिः स्थितो भवेत् तदापि धनिकत्वयोगः संभवति। यदि लग्नाधिपतिर्द्वितीयभावे बलवान् भवेत्तदा जातको धनवान् भवति । यदि लग्नद्वितीयैकादशभावानामधिपतयः स्वस्थानेषु भवेयुस्तदा जातको वित्तवान् भवति। यदि धनेशलाभेशौ मित्रराशिगतौ उच्चराशिगतौ एकादशभावेस्थितौ स्यातां तौ वा परस्परं मित्रत्वमापन्नौ लग्नभावे गतौ भवेतां, लग्नेशद्वितीयेशैकादशेशत्वा लग्नभावे स्थितं भवेयुस्तदा जातको द्रव्यातिशयो भवति। यदि द्वितीयैकादशयोः परस्परं परिवर्तन योगो भवेत्तावुभौ वा लग्नचतुर्थसप्तमदशैकादशभावेषु भवेतां तदा जातको धनवान् भवति। यदा द्वितीयभावे सूर्यबुधयोर्युतिर्भवेत्तदा जातको धनिकः सेवकश्च भवति।

**(अ) धनकुबेरयोगः**

यदि द्वितीयभावे बुधः शुभग्रहैः दृष्टो भवेत्तदा जातको धनकुबेरो भवति।

---

[९९] खार्थपौ युतौ केन्द्रकोणगौ सद्योधनी ।। जा.तत्व. द्वि.वि./३।। धनस्थे यदि लग्नेशे निधमान् बलसंयुते।।जा.पा.११/५२।।

## पञ्चमी दृष्टिः।

द्वितीयेशलाभेशयोः परिवर्तनयोगे शुभग्रहयुक्ते च जातको धनकुबेरो भवति। यदि गुरोः शनिराहुमङ्गलैः सह जाता युतिः शुक्रबुधाभ्यां दृष्टा भवेत्तदा जातको धनकुबेरो भवति।

यदि द्वितीयस्थाने गुरुशुक्रयोर्युतिभवेत तदा जातको नृपसदृशः प्रभूतधनवान् भवति राजसुखानि च प्राप्नोति। यदि बुधः सूर्येण सह मिथुनराशौ वा कन्याराशौ अस्तङ्गतोऽपि जातकं लक्ष्मीवन्तं करोति। यदा द्वितीयभावे कर्कराश्यां चन्द्रगुवोर्युति र्भवेत्तदा जातर्वो राजसदृशो धनिको भवति। यदा द्वितीयभावे चन्द्रगुरुशुक्राणां युतिर्भवेत्तदा जातको बहुधनवान् भवति। यदा द्वितीयभावे कन्याराशौ चन्द्रबुधयोर्युतिर्भवेत्तदा जातको नृपतुल्यो धनवान् भवति। यदा द्वितीयभावे गुरुर्गोपुरादि[१००] – विशिष्टावस्थायां पञ्चमेशेन दृष्टो भवेत्तदा नृपतुल्यधनिको भवति। यदा द्वितीयेश उच्चराश्यां केन्द्रे[१०१] भवेत्तदा जातको धनिक उच्चाधिकारी च भवति।

### (आ) आकस्मिक धनप्राप्तियोगः।

द्वितीयशलग्नेशयोः परिवर्तने जाते तौ च यस्मिन् कस्मिन्श्चित् भावस्थितौ तद्भाव सम्बधित जनेन जातक आकस्मिकं धनं प्राप्नोति। यस्य कस्य भावेशः द्वितीयेशेन सह लग्नेभावे स्थितस्तद्भाव सम्बधित जनेन जातक आकस्मिकं धनं प्राप्नोति ।

### (इ) उदारगुणः।

यदि द्वितीयेभावे चन्द्रःशुक्रेण दृष्टो भवेत्तदा जातको दानशीलउदारश्च भवति[१०२]। यदि द्वितीयेभावे बुधो गुरुणा शुक्रेण वा दृष्टो भवेत्तदाऽपि जातको दानशीलउदारश्च भवति । अस्मिन्योगे चन्द्रो वा बुधो मित्रग्रहस्य राश्यां मूलत्रकोणराश्यामुच्चराश्यां वा भवेत्तदा जातको विशेषधनवान् भवति ।

### (ई) ख्यातिःकीर्त र्वा ।

यदि द्वितीयैकाशयोः परस्परं परिवर्तनयोगो भवेत् ता वुभौ वा लग्नचतुर्थसप्तम दशमैकादशभावेषु भवेतां तदा जातको ख्यातिमान् भवति[१०३]।

---

[१००] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम्।

[१०१] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम्।

[१०२] चन्द्रः कुटुम्बभवने शुक्रेण निरीक्षितः प्रदाता च।
सौम्ये शुभसंदृष्टे स एव धनवान् सदा ज्ञेयः ।। जा.पा.११/५७।।

**पञ्चमी दृष्टिः।**

यदा द्वितीयभावे स्थित उच्चग्रहः शुभग्रहेण दृष्टो भवेत्तथा लग्नेशोऽप्युच्चराश्यां शुभग्रहेण दृष्टो भवेत्तदा जातको महाधनिको बहुनामाश्रयदाताऽन्नदाता च भवति।

यदि केन्द्रभावे[१०४] मूलत्रिकोणराश्यां[१०५] मङ्गलः स्वराश्यां[१०६] वा स्वोच्चोच्चराश्यां[१०७] वा भवेत्तदा जातको रुचकयोगयुक्तो [१०८] भवति। यदि तत्रैव तत्र स्थितो बुधो भवेत्तदा जातको भद्रयोगयुक्तो[१०९] भवति। यदि च तत्रैव स्थितः शुक्रो भवेत्तदा जातको मालव्ययोग युक्तो[११०] भवति।

**(उ)धनप्राप्तिकालः।**

यदा धनभावस्थो ग्रहः द्वितीयभावस्य द्रष्टा ग्रहो धनभावाधिपतिश्च स्वस्वान्तर्दशामहादशासु येषां येषां भावानां स्थिरकारकाणि[१११] स्युस्तेषां कारकाणां माध्यमेन धनप्राप्तियोग्यसमयो ज्ञायते।

**(ऊ) धनप्राप्तेर्दशाज्ञानं ।**

द्वितीयेशः स्वकीयदशायामन्तरदशायाञ्च यस्मिन् कस्मिन् भावे स्थित स्तस्यभावस्य दिशानुसारेण[११२] यदि वा द्वितीयेशो वक्रीभूते सर्वतो धनलाभो भवति।

---

[१०३] धनेशे लग्नसंयुक्ते लाभेशे धनलाभगे।
तावुभौ केन्द्रगौ वाऽपि धनवान् ख्यातिवान् भवेत्। ।। जा.पा.११/५९।।
[१०४] विशेषार्थं परिशिष्टम् –०४ द्रष्टव्यम्।
[१०५] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम्।
[१०६] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम्।
[१०७] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम्।
[१०८] विशेषार्थं परिशिष्टम् –०६ द्रष्टव्यम्।
[१०९] विशेषार्थं परिशिष्टम् –०६ द्रष्टव्यम्।
[११०] विशेषार्थं परिशिष्टम् –०६ द्रष्टव्यम्।
[१११] कारकाणिद्विविधानि चराणिस्थिराणि सन्ति तदर्थः परिशिष्टं ०३ द्रष्टव्यः ।
[११२] प्रथमत्रयाणां लग्न( धन–पराक्रम भावानां पूर्वदिशा निश्चिता।
द्वितीयत्रयाणां मातृ–सुतरिपुभावान्तं उत्तरदिशा प्रोक्ता।
तृतीयत्रयाणां कलत्रायुष्य भाग्यभावानां पश्चिमदिशा निर्धारिता।
चतुर्थत्रयाणां कर्मलाभव्ययभावानां दक्षिण दिशा कथितम्।

## पञ्चमी दृष्टि:।

द्वितीयभावस्य धनसम्बधि लिखितमस्ति[११३] यद् द्वितीयभावगते लग्नेशे दशमभावे चायेशे द्वितीयेशे च कस्यचिदपि शुभग्रहस्य नवांशे स्थितिर्जायेत यदि तदा जातको नि:स्वोऽपि जगति नामतो धनिको ज्ञायते। लग्नाधिपतिर्द्वितीयभावे निर्बलत्वं[११४] पापग्रहयुतिञ्च प्राप्यस्थितो भवेत्तदा जातको वञ्चक: [११५] खलश्च भवति । यदा द्वादशभावे गुरुर्भवेद् वित्तेशो बलवर्जितो[११६] लग्नभावे च शुभग्रहस्य दृष्टिहीनो भवेत्तदा जातको निर्धनो भवति । यदा मेषराशिस्थित: सूर्यस्तुलानवमांशे पापग्रहेण दृष्टो भवेत्तथा च कन्याराशिस्थित: शुक्रो नवमांशस्याऽन्तिमभागे भवेत्तदा जातको निर्धनो भवति। यदा चन्द्रो मेषकर्कतुलामकरराशीणामेकस्याऽन्तभागे, वृषभसिंहवृश्चिककुम्भानामेकस्याऽऽदिभागे, मिथुनकन्याधन–मीनानां वैकस्य मध्यभागे बलहीनो[११७] भवेत्तथा च लग्नभावं ग्रहरहितं भवेत्तदा जातकस्य राजभङ्गयोगो वा दारिद्र्ययोगो जायते। यदा सप्तमभावे चन्द्रो गुरुर्दृष्टिहीनो भवेत्तदा जातको धनहीनो भवति। यदा चन्द्रश्चरराश्यां वा चरस्य नवमांशे वा पापग्रहेण दृष्टो गुरुणा च दृष्टो न भवेत्तदाऽपि जातकोऽतिदरिद्रो भवति। यदा नीचराश्यां [११८] शत्रुग्रहस्यराश्यां [११९] शुक्रशनैश्चरौ षड्वर्गेपापग्रहस्यराश्यां [१२०] परस्परं दृष्टिगतौ[१२१] एकस्मिन् राशिगतौ स्यातां तदा जातकोऽति दरिद्रो भवति। यदा द्वितीयेशोऽस्तङ्गतावस्थायां पापग्रहेण सह द्वितीयभावेऽष्टमभावे वा भवेत्तदा जातको ऋणग्रस्तो भवति। यदा द्वितीयेशेकादशौ नीचराशिस्थितौ क्रूरषष्ट्यंशस्थौ भवेतां तदा जातको ऋणग्रस्तो भवति। यदा यत्रकुत्रभावे द्वितीयेश: स्वोच्चराश्यां पापग्रहेण युक्तो दृष्टो वा भवेत्तथा लग्नेश: पापयुक्तो भवेत्तदा जातकोऽति परिश्रमेणाऽल्पधनं प्राप्नोति।

---

[११३] धनेङ्गेशे खे लाभपे धनेशांशेशे शुभे नामतो धनी ।।जा.तत्व. द्वि.वि./१ ।।

[११४] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम्।

[११५] धनस्थे यदि लग्नेशे निधिमान् बलसंयुते।
निर्बले पापसंयुक्ते वञ्चनादिके वदेत।। जा.पा.३/५२।।

[११६] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम्।

[११७] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम्।

[११८] विशेषार्थ: परिशिष्टं ०३ दृष्टव्यम्।

[११९] जातकपारिजातकानुसारेण शुक्रशत्रुभूतौ सूर्यश्च चंद्रश्च शनैश्चरशत्रुभुतास्तु सूर्यश्च चंद्रश्च भौमश्च।।
जापा.२/४२त:४४।।

[१२०] होरादिषड्वर्गेषु पापग्रहाणां सूर्यमङ्गलशनैश्चराणामाधेयानां वर्गेषु यदा शुक्रशनैश्चरौ भवेत्तां तदा पापग्रहवर्गौ भवति।

[१२१] विशेषार्थ: परिशिष्टं ०३ दृष्टव्यम्।

## पञ्चमी दृष्टिः।

**०९/०५ विद्या ।**

**(अ) वैयाकरणः-** यदा द्वितीयेशो बलवान्[१२२] गुरुः सूर्यशुक्राभ्यां दृष्टो भवेत्तदा जातको वैयाकरणो जायते।

**(आ)तार्किकः-** यदा द्वितीयभावस्थौ गुरुशुक्रौ सूर्यमङ्गलाभ्यां दृष्टौ भवेतां तदा जातकः परमतार्किको न्यायवेत्ता च भवति। यदा सूर्यो मङ्गलो वा द्वितीयेशो भूत्वा गुरुशुक्राभ्यां दृष्टो भवेदथवा द्वितीयेशः सूर्यो मङ्गलो वा पारावतांशावस्थायां[१२३] भवेत्तदा जातकस्तार्किको[१२४] भवति ।

**(इ)गणितज्ञः।-** यदा द्वितीयभावस्थमङ्गलः शुभग्रहेण दृष्टो भवेत्तदा जातको गणितशास्त्री भवति (परि.०१,क्र.२८) (परि.०१,क्र.२९)। द्वितीयभावस्थौ चन्द्रमङ्गलौ यदि शुभग्रहेण बुधेन वा दृष्टौ भवेतां तदाऽपि जातको गणितशास्त्री जायते। यदा द्वितीयभावे सूर्यबुधगुरुणां युतिर्भवेत्तदा जातको गणितशास्त्री भवति । यदा द्वितीयभावे सूर्यबुधयोर्युत्योपरि गुरोर्दृष्टिर्भवेत्तदा जातको गणितशास्त्री भवति।

**(ई)वेदान्ती -** यदा द्वितीयभावे उच्चराश्यां बुधो भवेदथवा गुरुः केन्द्रे त्रिकोणे वा भवेदथवा शनैश्चरो होरादि दशवर्गाणां वर्गचतुष्के गोपुरांशाख्यावस्थायां भवेदथा गुरुर्दशवर्गाणां वर्गपञ्चके सिंहासनांशावस्थायां भवेत्तदा जातको वेदान्ती (वेदान्तशास्त्री) भवति। यदा द्वितीयेशबुध उच्चराश्यां शनैश्चरो गोपुरांशावस्थायां[१२५] गुरुर्सिंहासनांशावस्थायां[१२६] भवेयुस्तदा जातको वेदान्ती भवति।

यदा शनैश्चरः पारावतांशावस्थायां[१२७] गुरुबुधाभ्यां दृष्टो भवेत्तदा जातको वेदान्ती भवति । यदा द्वितीयभावकारको गुरुःकेन्द्रे (सप्तमे) त्रिकोणे (पञ्चमे-नवमे वा) भवेत्तदा जातको वेदान्ती भवति । यदा द्वितीयेशः पारावतांशावस्थायामुच्चस्थबुधो लग्नभावे भवेत्तदा जातको वेदान्ती भवति । यदा

---

[१२२] विशेषार्थः परिशिष्टं ०३ दृष्टव्यम्।

[१२३] विशेषार्थं परिशिष्टम् -०३ द्रष्टव्यम्।

[१२४] श्री महादेवपाठक विरचित जातकत्वग्रन्थे यदा गुरुःशुक्रो वा द्वितीयेशो भूत्वा सूर्यभौमाभ्यां दृष्टो भवेत्तदा जातकस्तार्किको न्यायविदो वा भवति। जीवाच्छौ धनेशौ रव्यारदृष्टौ तार्किकः।। जा.तत्व.प्र.वि./४१ ।।
वाग्भावपे रवौ भौमे गुरुशुक्रनिरीक्षते पारावतांशके वापि तर्कयुक्ति परायणः।। जा.पा.११/८३।।

[१२५] विशेषार्थं परिशिष्टम् -०३ द्रष्टव्यम्।

[१२६] विशेषार्थं परिशिष्टम् -०३ द्रष्टव्यम्।

[१२७] विशेषार्थं परिशिष्टम् -०३ द्रष्टव्यम्।

द्वितीयभावकारको गुरुः केन्द्रे त्रिकोणे वा बुधशुक्राभ्यां दृष्टो भवेत्तथा शनैश्चरः पारावतांशावस्थायां भवेत्तदा जातको वेदान्ती भवति।

**(उ)ज्योतिर्विद्योगः।**- यदा द्वितीयभावे तृतीयभावे वा बुधशुक्रयोः[१२८] युतिरथवा तृतीयभावे गुरुस्तथा द्वितीयभावे शुक्रो भवेत्तदैतत्त्रितये एत्तत्रीतये जातको ज्योतिर्विदामग्रणीर्भवति। यदा द्वितीयेशे च बलवति केन्द्रभावे[१२९] त्रिकोणभावे[१३०] एकादशे वा भावे बुधो भवेत्तदाऽपि जातको ज्योतिर्विद् भवति। यस्मिन्कस्मिन्भावे गुरुः स्वगृही वा स्वोच्चराश्यां वा भवेत्तदाऽपि जातको ज्योतिर्विदामग्रणीर्भवति। यदा द्वितीयभावे बुधशुक्रयोर्युतिर्भवेत्तदा जातको ज्योतिर्विद् भवति।

**(ऊ)सकलविद्यानिपुणयोगः** - यदि नवमांशगतस्य सूर्यस्य राशिपतिर्होरादिदशवर्गाणां सकलेषु वर्गेषु वैशेशिकांशाख्यावस्थायां[१३१] भवेद् द्वितीयभावे च बलवति सति जातकोऽनेकशास्त्रवेत्ता भवति। यदा द्वितीयभावस्थो गुरुर्बलवान्भूत्वा द्वितीयेशस्य नवमांशगतो जन्मकुंडल्यां केन्द्रे शुभग्रहेण दृष्टो भवेत्तदा जातकोऽनेकशास्त्राचार्यो भवति । यदा गुरुशनैश्चरयोर्युतिर्राहुणा वा केतुना वा यस्मिन् कस्मिन् भावे युक्तो भवेत् शुक्रेण च दृष्टो भवेत्तदा जातकः षड्शास्त्रवेत्ता भवति। यदि गुरोः शनिराहुमङ्गलैः सह जातायुतिः शुक्रबुधाभ्यां दृष्टो भवेत्तदा जातकः सकलविद्यानिष्णातो भवति।

यदा द्वितीयेशबुधगुरवः पापकर्तरीयोगे[१३२] भवेत्तदा जातको निश्चयेन विद्याहीनो भवति। यदा द्वितीयभावं पापकर्तरीयोगे भवेत्तदा जातकोऽल्पविद्यायुक्तो भवति। यदा द्वितीयेशबुधगुरवो लग्नातष्टमभावे भवेयुस्तदा जातको विद्यारहितो भवति। यदा द्वितीयेशबुधगुरवो लग्नाद्द्वादशभावे पापग्रहेण सह भवेयुस्तदा जातको विद्यारहितोऽल्पविद्यायुक्तो भवति। यदा द्वितीयेशः पापग्रहेण सह

---

[१२८] जातकतत्वे पंचमविवेके ज्ञाच्छौसोत्थार्थगा वित्यत्र्य (४८) हिन्दी व्याख्याकारेण ज्ञाच्छावितस्य (पृ. २५) ज्ञ इत्यस्य बृहस्पति इत्यर्थो गृहीतो यद्यपि स इति बुधः।

[१२९] विशेषार्थं परिशिष्टम् -०४ द्रष्टव्यम्।

[१३०] विशेषार्थं परिशिष्टम् -०४ द्रष्टव्यम्।

[१३१] विशेषार्थं परिशिष्टम् -०३ द्रष्टव्यम्।

[१३२] विशेषार्थं परिशिष्टम् -०६ द्रष्टव्यम्।

लग्नात् षष्ठभावे पापग्रहस्य दृष्टियुक्तो भवेत्तदा जातकोऽल्पविद्यायुक्तो विद्याहीनो वा भवति। यदा द्वितीयेशः पापकर्तरीयोगे[१३३] भवेत्तदा जातको विद्याहीनो भवति।

## ०९/०६ अशन (भोजनम्)।

यदा द्वितीयेशगुरुचन्द्राः केन्द्रे[१३४] भवेयुस्तदा जातको रजतपात्रे भोजनं करोति।

यदा द्वितीयेशगुरुचन्द्रशुक्राः केन्द्रे भवेयुस्तदा जातको सुवर्णपात्रे भोजनं करोति। यदा द्वितीयेश–लग्नेशशनैश्चराः केन्द्रे भवेयुस्तदा जातको लोहपात्रे भोजनं करोति।

यदा द्वितीयभावातष्टमभावे चन्द्रमङ्गलशुक्राणां युतिर्भवेत्तदा जातकः श्रेष्ठभोजनभाक् भवति। यदा बलवान् द्वितीयेशो लग्नेशेन दृष्टो भूत्वा पापग्रहस्य दृष्टिरहितो भवेत्तदा जातको नियमितभोजनभाक् भवति। होरादिदशवर्गेषु वैशेषिकांशाख्यावस्थायां द्वितीयेशो यदा बलवान् गुरुणा दृष्टो वा भवेत्तदा जातकः सुखभोजी भवति । यदा द्वितीयभावातष्टमभावे चन्द्रमङ्गलयोर्युतिर्भवेत्तदा जातको मिष्टान्नप्रियो मद्यपानादिरसिकश्च भवति। यदा द्वितीयेशः स्वयं शुभः स्वोच्चराश्यां वा शुभग्रहेण दृष्टो वा तदा जातकोल्पभोजी भवति।

यदा च द्वितीयेशः पापग्रहयुक्तो भवेद् धनभावो वा क्रूरेषु षष्टयंशेषु भवेत्तदा जातको बहुभोजी भवति। यदा द्वितीयेशो नीचराश्यां पापग्रहेण दृष्टो भवेत्तदा जातको बहुभोजी भवति। यदा च धनेशो बलवान् शुभग्रहयुक्तश्च भवेदथवा चरराशौ वा द्वितीयस्थानं शुभराश्यां शुभग्रहं दृष्टं च भवेत्तदा जातकः शीघ्रभोजी जायते ।

यदा द्वितीयभावात् सप्तमभावे सूर्यचन्द्रबुधगुरुणां युतिर्भवेत्तदा जातको भोजनोत्सुकः क्षुधार्तो भवति। यदा द्वितीयेशः पापग्रहैर्दृष्टो भवेत्तदा जातकोऽन्यैः प्रदत्त विषभोजी भवति। यदा द्वितीयभावे राहुग्रहः पापग्रहेण[१३५] दृष्टो भवेत्तदा जातकः कुत्सितभोजनभक्षी भवति। यदा द्वितीयभावे मङ्गलः पापग्रहेण दृष्टो भवेत्तदा जातकः कुत्सितान्नं भक्षयति। यदा द्वितीयेशो नीचग्रहेण दृष्टो भवेत्तदा जातकः कुत्सितभोजनकर्ता भवति। यदा द्वितीयेशो नीचराश्यां पापग्रहेण दृष्टो भवेत्तदा जातको बहुभोजी भवति। यदा द्वितीयेशः शत्रुग्रहेण युतो भवेत्तदा जातकः परान्नभक्षी भवति।

---

[१३३] द्वितीयेशात् द्वितीयभावे वक्रिपापग्रहो द्वादशभावे च र्मागिणः पापग्रहोभवेत्तदा द्वितीयेशस्य पापकर्तरी योगो भवति।

[१३४] विशेषार्थं परिशिष्टम् –०४ द्रष्टव्यम्।

[१३५] सूर्यमङ्गलशनैश्चरपापग्रहेणसहबुधानाञ्च पापसंज्ञाः सन्ति।

## ०९/०७ मुखम् (आस्यम्)।

यदा द्वितीयभावे शुभग्रह उच्चराश्यां स्वगृहावस्थायां मित्रराश्यां वा भवेत्तदा जातको मनोहर-मुखाकृतिर्भवति। यदा द्वितीयेशः केन्द्रे स्वोच्चराश्यां स्वराश्यां मित्रराश्यां मूलत्रिकोणराश्यां वा भवेत्तदा जातको मनोहरमुखाकृतिर्भवति। यदा द्वितीयेशः शुभग्रहेण[१३६] सह केन्द्रे भवेत्तदा जातकः सुन्दरमुखाकृतिर्युक्तो भवति। यदा द्वितीयभावकारकगुरुः केन्द्रे स्वोच्चराश्यां स्वराश्यां मित्रराश्यां मूलत्रिकोणराश्यां वा भवेत्तदा जातको मनोहरमुखाकृतिर्भवति। यदा द्वितीयभावकारकः गुरुः शुभग्रहेण[१३७] सह केन्द्रे भवेत्तदा जातकः सुन्दरमुखाकृतिर्युक्तो भवति। यदा द्वितीयभावे स्थितशुभग्रहस्योपर्यन्यशुभग्रहस्य दृष्टिर्भवेत्तदा जातकः सुन्दरमुखाकृतियुक्तो भवति।

यदा द्वितीयभावे सूर्यो वा शनैश्चरो वा द्वितीयेशो यदि षष्ठभावेशेन पापग्रहेण वा युतो भवत्तदा जातको वक्त्ररोगी[१३८] (मुखरोगी) भवति । यदा द्वितीयभावे पापराश्यां राहुःस्थितो भवेत्तदा जातको मुखरोगी[१३९] भवति। द्वितीयभावे पापग्रहः पापग्रहेण दृष्टो भवेत्तदा जातको विकृतमुखाकृतिर्भवति। यदा द्वितीयेशो राहुणा सह षष्ठभावेऽमभावे द्वादशभावे वा भवेत्तदा जातको दन्तरोगी भवति। यदा द्वितीयभावे पापग्रहो, द्वितीयेशो नीचराश्यां शत्रुराश्यां वा पापग्रहेण सह भवेत्तदा जातकः कुरूपो भवति (दुर्मुखो भवति)। यदा द्वितीयभावे पापग्रहो भवेत्तदा जातको दीर्घमुखो भवति। यदा द्वितीयभावकारको गुरुः त्रिकभावे[१४०] पापग्रहेण सह भवेत्तदा जातको दन्तरोगी भवति।

## ०९/०८ नेत्रम्।

द्वितीयेशे (द्वादशेशेच) शुभग्रहयुक्तः द्वितीयो वा (द्वादशो वा) भावः शुभग्रहयुक्तो भवेद् लग्नेशेन च युतो भवेत्तदा जातकः शोभननेत्रो भवति। यदा उच्चराश्यां स्वराश्यां वा द्वितीयेश उच्चादिराश्यां स्थितश्चंद्रेण शुक्रेण वा सह लग्नभावे भवेत्तदा जातकः सुनेत्रवान् भवति। यदा द्वितीयभावस्य कारकग्रहो गुरुः शुभग्रहेण युक्तो दृष्टो वा भवेत्तथा लग्नेशोऽपि शुभग्रहेण युक्तो दृष्टो वा भवेत्तदा जातको

---

[१३६] पूर्णचन्द्रो (शुक्लअष्टमतिथि आरभ्य कृष्णपञ्चमीपर्यंतम्) गुरुः शुक्रः शुभग्रहयुक्तबुधस्य च शुभसंज्ञा भवति।

[१३७] पूर्णचन्द्रो (शुक्लअष्टमतिथि आरभ्य कृष्णपञ्चमीपर्यंतम्) गुरुः शुक्रः शुभग्रहयुक्तबुधस्य च शुभसंज्ञा भवति।

[१३८] धनरीशौ युतौ सपापौ दन्तरोगी।।जा.तत्व.प्र.वि./३२४।।

[१३९] धने चेच्छिरवी धान्यनाशो धनं च कुटुम्बाद्विरोधो नृपाद्द्रव्यचिन्ता।
मुखे रोगतासततं स्यात्तथा च यदा स्वे गृहे सौम्यगेहेऽतिसौख्यम्।। जा.भ.पृ.११४/२।।

[१४०] विशेषार्थं परिशिष्टम् -०४ द्रष्टव्यम्।

मनोहरविशालनयनो भवति। यदा गुरुद्वितीयेशौ सुस्थानयुक्तौ भवेतां तदा जातकस्य दृष्टिराकर्षका शुभा निर्मला च भवति।

**(अ) साधारणनेत्रपीडायोगः।-** यदा शुभग्रहेण सह द्वितीयेशः षष्ठभावेऽष्टमभावे द्वादशेभावे वा भवेत्तदा जातकः साधारणनेत्रपीडामनुभवति। यदा शुभग्रहेण सह द्वितीयेशस्तृतीयभावे भवेत्तदा जातकः भ्रातृकारणात् षष्ठेभावेभवेत्तदा शत्रुकारणात् पञ्चमभावेभवेत्तदा पुत्रकारणात् साधारण नेत्रपीडां प्राप्नोति।

**(आ) रक्तनेत्रयोगः।-** यदा द्वितीयेशः सूर्यमङ्गलाभ्यां युक्तो वा दृष्टो वा भवेत्तदा जातको रक्तनेत्रो भवति। यदा द्वितीयेशः (लग्नेशः) (च) षष्ठभावेऽष्टमभावे द्वादशभावे (षष्ठभावेऽष्टमभावे द्वादशभावे वा) वा भवेत्तदा जातकस्य चक्षुर्नाशः सम्पद्यते यद्यपि शुभग्रहदृष्टो वा तद्युतौ वा तदाशुभप्रभावो ह्रासं गच्छति। यदा द्वादशभावे पापग्रहेण मङ्गलो भवेत्तदा जातकस्य वामनेत्रक्षयो भवति (परि.०१,क्र.०१६) (परि.०१,क्र.०५२)। यदा द्वितीयभावकारको गुरुः पापग्रहेण युतो दृष्टो वा षष्ठभावेऽष्टमभावे द्वादशभावे वा भवेत्तदा जातकोऽन्धो भवति (परि.०१,क्र.१६)। यदा द्वितीयभावे शनैश्चरो भवेत्तदा जातकस्य दक्षिणनेत्रक्षयो जायते (परि.०१,क्र.१७)। यदा यदा द्वितीयेशो मङ्गलेन सह द्वादशभावे भवेत्तदा जातको वामनेत्ररोगी तथा द्वितीयेशः शनैश्चरेण सह द्वादशभावे भवेत्तदा जातको दक्षिणनेत्रपीडितो भवति। यदा चन्द्रयुतौ शुक्रः द्वादशभावे वा सप्तमभावे वा भवेत्तदा जातको वामनेत्रेण काणो भवति। यदा शुक्रेण पापग्रहेण युक्तश्चन्द्रो द्वितीयभावे भवेत तदा जातकोऽन्धः काणो[१४१] भवति (परि.०१,क्र.१५)। यदा सूर्यचन्द्रौ द्वादशभावे शुभग्रहरहितौ भवेतां तदा जातकोन्धो भवति। यदा द्वितीयेशेन वा द्वादशेन सह शुक्रचन्द्रौ लग्नभावे स्वराशिं स्वोच्चराशिं विहाय शुभग्रहदृष्टिरहितौ च भवेताम् तदा जातकोरात्र्यन्धो जायते। द्वितीयेशेन सह चन्द्रशुक्रौ[१४२] यस्मिन् कस्मिन्भावे भवेतां तदा जातको रात्र्यन्धो जायते। यदा लग्नेभावे द्वितीयेशचन्द्रशुक्राणां युतिः शुभग्रहस्य दृष्टिरहिता भवेत्तदा जातको रात्र्यन्धो भवति। यदा द्वितीयेशः शुक्रेण वा चन्द्रेण सह लग्नभावे भवेत्तदा जातको रात्र्यन्धको भवति। यदा द्वितीयेशो लग्नभावे नीचग्रहेण युतो भवेत्तदा जातको रात्र्यन्धको भवति (परि.०१, क्र.१९)।

---

[१४१] धने वा व्यये शुक्रे पापयुते काणो वा मन्दलोचनः।।जा.तत्व.प्र.वि./२२५।।

[१४२] विशेषार्थं परिशिष्टम् -०३ द्रष्टव्यम्। ( शुक्रो नेत्रकारको भवति । )

## पञ्चमी दृष्टिः।

यदि सूर्यशुक्रौ द्वितीयशद्वादशेशाभ्यां सह षष्ठाष्टमद्वादशभावेष्विति त्रिकभावे[१४३] भवेतां तदा जातको जन्मान्धो जायते । यदा द्वितीयेशो लग्नेशसूर्यशुक्रैः सह षष्टाष्टमद्वादशभावे वा भवेत्तदा जातको जनुषान्धको भवति। यदा चन्द्रमङ्गलौ[१४४]यद्येकस्मिन्राशौ सूर्यो वा पंचमभावे (द्वादशे नवमे च भावे) पापग्रहयुतो भवेत् , शुक्रशनैश्चरो वा युतिगतो भवेत्तदा जातको नेत्रपीडया दुःखी भवति । यदा द्वितीयभावे कुम्भराश्यां राहुमङ्गलशुक्रगुरुणां युतिर्लग्नभावे सूर्यचन्द्रर्यो र्युति भवेत्तदा जातको नेत्ररोगी भवति (परि.०१,क्र.१०७)।

यदा द्वितीयेशो लग्नभावे द्वितीयषष्ठदशमभावेशाः शुक्रेण सह युतस्तदा राजदण्डेन नेत्रोत्पाटनम् संभवति। अथाऽपि द्वितीयेशो द्वादशशो वा नीचराशेर्नवमांशे पापग्रहेण दृष्टो वा तद्युतो वा भवेत्तदाऽपि राजदण्डेन नेत्रोत्पाटनं सम्भवति। यदा सप्तमभावे  सूर्यः शनैश्चरक्षेत्रियो भवेत्तदा जातको नेत्र रोगेण पीड्यते। यदा  द्वितीयद्वादशभावयोर्यदि पापग्रहः शनैश्चरो दृष्टो भवेत्तदाऽपि जातको नेत्ररोगेण पीड्यते। यदा यस्मिन् कस्मिन्भावे द्वितीयेशेन सह शुक्रो भवेत्तदा जातको नेत्ररोगेण पीदड्यते। यदा शुक्रात् तृतीयषष्ठद्वादशभावेषु यदि द्वितीयेशो भवेत्तदा जातको नेत्ररोगेण पीड्यते। यदा लग्नभावे सप्तमभावे वा सूर्यशनैश्चरयोर्युतिर्भवेत्तदा जातको दक्षिणनेत्रेणाऽन्धो भवति। यदा द्वितीयेशलग्नेशयोर्युतिः षष्ठभावेऽष्टमभावे द्वादशभावे वा भवेत्तदा जातकोऽन्धो भवति च। यदा शनैश्चरमङ्गलौ गुलिकेन[१४५]युतौ द्वितीयेशेन द्वितीयभावे स्थितौ भवेतामथवा तत्र पापग्रहैः शनैश्चरो दृष्टो भवेत्तदा जातको नेत्ररोगी भवति। यदा द्वितीयभावे पापग्रहो भवेत्तदा जातको लघुनेत्रो भवति। यदा द्वितीयभावे पापग्रहो द्वितीयेशः शुभग्रहेण दृष्टो भवेत्तदाऽपि जातको लघुनेत्रो नेत्ररोगी वा भवति। यदा द्वितीयेशो मङ्गलशनैश्चराभ्यां युक्तोभवेदथवा द्वितीयेशो गुलिकेन[१४६] सह भवेदथवा द्वितीय स्थाने पापग्रहः शनैश्चरेण भवेत्तदा जातको नेत्ररोगी भवति। यदा द्वितीयेशो लग्नेशेन सह षष्ठमभावेऽष्टमभावे द्वादशभावे वा भवेत्तदा जातको नेत्रपीडितो भवति।

---

[१४३] विशेषार्थं परिशिष्टम् –०४ द्रष्टव्यम्।

[१४४] नेत्रपीडाश्रुपात्तदनु शशिकुजावेकभावे यदाऽक्षयो
श्चिन्हं किञ्चित्तदानीं ग्रहबल वशतो दृश्यमेवं सुधीभिः।
मार्तण्डे रिक्तयाते तदनुनवमगेपुत्रगे वा खलाढये
दृष्टो वा स्यान्मनस्वी सुविकलनयनः सूर्यजे व्याधियुक्तः।।

[१४५] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम्।

[१४६] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम्।

**पञ्चमी दृष्टिः।**

यदा द्वितीयेशस्य नवांशस्वामी पापग्रहराश्यां अथवा पापग्रहेण सह भवेदथवा सूर्यमङ्गलस्य वा क्षेत्रयुक्तद्वितीयभावे गुलिक[१४७] सूर्याभ्यां दृष्टो भवेत्ताम् तदा जातको नेत्रपीडातयुक्तो भवति। यदा द्वितीयभावाद् द्वादशभावे राहुसूर्यौ तथाष्टमभावे पापग्रहो भवेत्तदा जातको नेत्ररोगी भवति। यदा द्वितीयभावाच्चतुर्थभावे वाऽष्टमभावे स्थितसूर्यस्योपरि पापग्रहस्य दृष्टिर्भवेत्तदा जातकोऽल्पदृष्टियुक्तो भवति। द्वितीयभावे पापग्रहाणामुपरि शनैश्चरस्य दृष्टिर्भवेत्तदा जातको नेत्ररोगी भवति। यदा द्वितीयेशो नीचराश्यां शत्रुराश्यामस्तङ्गतावस्थायां भावस्य सन्धौ षष्ठभावेऽष्टमभावे द्वादशभावे वा पापग्रहेण दृष्टो युतो वा भवेत्तदा जातको नेत्ररोगी भवति। यदा सूर्यः द्वितीयभावात्सप्तमभावे द्वादशभावे वा शनैश्चरेण युतो वा दृष्टो भवेत्तदा जातको दक्षिणनेत्रेणान्धोभवति। यदा सूर्यः द्वितीयभावात्सप्तमभावे द्वादशभावे वा राहुभौमाभ्यां युतो भवेत्तदा जातको वामनेत्रेणान्धो भवति । यदा द्वितीयभावे कोऽपि ग्रहो नीचराश्यां द्वितीयभावकारकगुरुणा सह भवेत्तदा जातकोऽन्धो भवति (परि.०१,क्र.१७)। यदा द्वितीयभावे कोऽपि ग्रहो नीचराश्यां नेत्रकारकशुक्रेण सह दक्षिणनेत्रकारकसूर्येन सह वामनेत्रकारकचन्द्रेण वा सह भवेत्तदा जातकोऽन्धो भवति (परि.०१,क्र.१८)। यदा द्वितीयभावे पापग्रहेण सह मङ्गलो भवेत्तदा जातको नेत्ररोगी भवति (परि.०१,क्र.०२७) (परि.०१,क्र.०२६)। यदा पञ्चमभावः पापकर्तरीयोगे पापग्रहेण दृष्टो भवेत्तदा जातको नेत्ररोगी भवति (परि.०१,क्र.०२५)।

### १०/०१ द्वितीयभावस्य शुभाशुभत्वनियमाः।

यस्य भावस्य विचारः करणीयो भवति स भावो लग्नम्[१४८] इति गणनीयम्। अतः द्वितीयभावात् प्रथम–द्वितीय–चर्तुथ–पञ्चम–सप्तम–नवम–दशमभावानां स्वामिनां विचारः करणीयो यथा स स्वामी शुभोग्रहोऽस्ति न वा? यदा स स्वामी शुभो भवेत्तदा स शुभफलदायको भवति । यदा च तस्मिन्नेव भावे पापग्रहो भवेदथवा तस्मिन् भावस्योपरि पापग्रहस्य दृष्टिर्भवेत्तदा तस्याऽशुभफलं मन्तव्यम्। यदा च शुभाशुभग्रहाणां प्रभावो भवेत्तदा मिश्रफलं बोद्धव्यम् ।

यदा द्वितीयभावस्याधिपतिः पापग्रहस्तस्माद्भावादथवा लग्नभावादष्टमभावे भवेदथवा सूर्येणा–ऽस्तङ्गतो भवेदथवा नीचराश्यां भवेदथवा शत्रुराश्यां शुभग्रहेण दृष्टो युतो वा न भवेत्तदा तस्यभावस्य फलं प्रणश्यति।

---

[१४७] विशेषार्थः परिशिष्टं ०३ दृष्टव्यम्।।

[१४८] भावस्य यस्यैव फलं विचिन्त्यं भावं च तं लग्नमिति प्रकल्प्य।
तस्माद्वदेद्द्वादशबावजानि फलानि तद्रूपदनादिकानि।। फ.दी.१५/२०।।

## पञ्चमी दृष्टिः।

यदा द्वितीयभावस्याधिपतिःक्रूरग्रहःसूर्येणाऽस्तङ्गतो भवेदथवा नीचराश्यां भवेदथवा शत्रुराश्यां शुभग्रहेण दृष्टो युतो वा न भवेत्तदा स यस्मिन् भावे भवेत्तस्य भावस्य फलं प्रणश्यति।

यदा द्वितीयेशः शुभग्रहो नीचराश्यां शत्रुराश्यामस्तङ्गतावस्थायां वा भवेत्तदा द्वितीयभावस्यफलहानिं करोति किन्तु शुभग्रहेण युतो दृष्टो वा भवेत्तदा तस्य फलविषये ऽशुभत्वं न्यूनं भवति।

यदा द्वितीयभावात् षष्ठभावेऽष्टमभावे द्वादशभावे वा पापग्रहो स्वराशिं विहाया न्यराश्यां भवेत्तदा द्वितीयभावस्याशुभफलं भवति।

यदा द्वितीयभावस्याधिपतिः षष्ठभावस्याऽष्टमभावस्य द्वादशभावस्य वा स्वामीभवेत्तदा तस्य भावस्याशुभ फलं ददाति। किन्तु त्रिकस्थानस्याधिपतिः सन्नपि यदा स लग्नेशो भवति तदा तस्य फलमशुभं न भवति।

यदा द्वितीयभावस्योपरि शुभग्रहस्य दृष्टिर्भवेत्तदा तस्य शुभफलं भवति।

यदा द्वितीयभावो द्वितीयेशो द्वितीयभावकारकग्रहश्च(कारकाः) निर्बला भवेयु रथवा पापकर्तरीयोगे[१४९] भवेयुरथवा शत्रुग्रहयुक्ता भवेयुरथवा तैर्दृष्टाभवेयुस्तथा शुभग्रहेण युक्ता दृष्टा न भवेयुस्तदा शुभफलं न लभ्यतेऽथवा तद्भावस्य दुःखं लभ्यते।

द्वितीयभावे यद् द्रेष्काणो भवेत्तस्माद् द्वाविंशतिद्रेष्काणस्य स्वामी द्वितीयभावस्याशुभफलं वितरति। अतो द्वितीयभावात् २२ द्रेष्काणस्वामिनोथवा षष्ठाष्टमद्वदशभावानां स्वामिनां दशाश्चान्तर्दशा द्वितीयभावस्याशुभफलं वितरन्ति।

यदा द्वितीयभावात् तृतीयषष्ठेकादशभावेषु स्थितेषु पापग्रहाणां दशाऽन्तर्दशाफलं तद्भावस्य शुभफलं ददाति।

यदा द्वितीयभावात् प्रथम-चतुर्थ-पञ्चम-सप्तम-दशमभावेषु शुभग्रहाः सन्ति तदा तद्भावस्य शुभफलस्याभिवृद्धिर्भवति ।

द्वितीयेशस्य मित्रग्रहदशायां तद्भावस्य शुभफलं प्राप्यते। अत्र ग्रहाणां नैसर्गिकमैत्री-पञ्चधामैत्र्याधारेणमित्राऽमित्रनिर्णयो भवति ।

यदा द्वितीयेशो यस्य कस्य भावस्य मध्यबिन्दो राश्यादिमाने भवेत्तदा स यस्मिन् भावे स्थितो भवेत्तस्य भावस्य पूर्णफलं ददाति। यदा द्वितीयेशो द्वयोः भावयोः सन्धौ (संधिराश्यादिमाने) भवेत्तदा स निष्फलो भवति । मध्येऽनुपातेन फलं गणनीयम्।

यदा द्वितीयेशः स्वोच्चराश्यां स्वराश्यां मूलत्रिकोणराश्यां मित्रराश्यां होरादिषड्वर्गेषु बलवान् वा भवेत् किन्तु स ग्रहो भावसन्धौ भवेत्तदा स निष्फलो भवति।

---

[१४९] विशेषार्थं परिशिष्टम् – ०६ द्रष्टव्यम् ।

**१०/०२ द्वितीयभावं लग्नंमत्वा द्वितीयाद् द्वितीयभावे धनविचारः।**

यदा द्वितीयाद् द्वितीयभावे (लग्नात्तृतीयभावे इति यावत्) चन्द्रयोर्युति भवेत्तदाजातको धनिकश्चन्द्रशनैश्चरयोर्युतिर्भवेत्तदा धनकुबेरो गुरुशनैश्चरयोर्युतिर्भवेत्तदा धनवान् शुक्रशनैश्चरयोर्युतिर्भवेत्तदा धनसम्पन्नः सूर्यचन्द्रमङ्गलानां युतिर्भवेत्तदा सञ्चितधनेन धनिकः सूर्यमङ्गलबुधानां युतिर्भवेत्तदा धनवान् चन्द्रमङ्गलशनैश्चराणां युतिर्भवेत्तदा धनसमृद्धः सूर्यबुधगरूणां युतिर्भवेत्तदा धनिको मङ्गलबुधशुक्रणां युतिर्भवेत्तदा धनकुबेरो मङ्गलगुरुशनैश्चराणां युतिर्भवेत्तदा  कृषिकार्येण धनिको मङ्गलबुधशनैश्चराणां युतिर्भवेत्तदा धनवान् सूर्यचन्द्रबुधानां युतिर्भवेत्तदा ऐश्वर्यवान् सूर्यचन्द्रबुधशुक्राणां युतिर्भवेत्तदा ऐश्वर्यवान् पशुधनयुक्तो सूर्यमङ्गलबुधशुक्राणां युतिर्भवेत्तदा धनसम्पन्न सूर्यमङ्गलगुरुशणेश्चराणां युतिर्भवेत्तदा ऐश्वर्यवान् चन्द्रमङ्गलगुरुशनैश्चराणां युतिर्भवेत्तदा धनसमृद्धो मङ्गलगुरुशुक्रशनैश्चराणां युतिर्भवेत्तदा धनवान्  सूर्यचन्द्रबुधशुक्रशनैश्चराणां युतिर्भवेत्तदा धनार्जनकार्ये निपुणश्चन्द्रमङ्गलबुधगुरुशनैश्चराणां युतिर्भवेत्तदा धनसङ्ग्रही सुर्यमङ्गलबुधगुरुशुक्रशनैश्चराणां युतिर्भवेत्तदा ऐश्वर्यवान् सुर्यचन्द्रबुधगुरुशुक्र-शनैश्चराणां युतिर्भवेत्तदा धनसम्पन्नश्चन्द्रबुधगुरुशुक्राणां युतिर्भवेत्तदा धननाशको भवति।

**१०/०३ द्वितीयभावं लग्नंमत्वा द्वितीयात्पञ्चमभावे धनविचारः।**

यदा द्वितीयात्पञ्चमभावे (लग्नात्षष्ठभावे इति यावत्) सूर्यबुधयोर्युतिर्भवेत्तदा जातको धनवान् सूर्यशनैश्चरयोर्युतिभवेत्तदा धनवान् मङ्गलबुधशुक्राणां युतिर्भवेत्तदा धनिकः सूर्यबुधशुक्रशनैश्चराणां युतिर्भवेत्तदा धनकुबेरोयदा च मङ्गलगुरुशुक्राणां युतिर्भवेत्तदा जातको धनिको भवति ।

यदा सूर्यशुक्रयोर्युतिर्भवेत्तदा जातको निर्धनश्चन्द्रबुधयोर्युतिर्भवेत्तदा निर्धनः सूर्यचन्द्रबुधानां युतिर्भवेत्तदा धनधान्यहीनश्चन्द्रमङ्गलगुरूणां युतिर्भवेत्तदा निर्धनश्चन्द्रबुधशनैश्चराणां युतिर्भवेत्तदा निर्धनश्चन्द्रगुरुशुक्राणां युतिर्भवेत्तदा निःस्वो बुधगुरुशनैश्चराणां युतिर्भवेत्तदा निर्धनो गुरुशुक्रशनैश्चराणां युतिर्भवेत्तदा निर्धनः सूर्यचन्द्रबुधगुरुशुक्राणां युतिर्भवेत्तदा निर्धनो यदा च सूर्यचन्द्रगुरुशुक्रशनैश्चराणां युतिर्भवेत्तदा जातको निर्धनो भवति।

**१०/०४ द्वितीयात् तृतीयेभावे धनविचारः।**

यदा द्वितीयात्तृतीये (लग्नाच्चतुर्थभावे इति यावत्) चन्द्रमङ्गलबुधानां युतिर्भवेत्तदा जातको धनवान् चन्द्रबुधगुरूणां युतिर्भवेत्तदा धनकुबेरश्चन्द्रगुरुशनैश्चराणां युतिर्भवेत्तदा स्थिरलक्ष्मीवान् मङ्गलबुधगुरूणां युतिर्भवेत्तदा भूमिसम्बन्धितपदार्थैः पशुधनेन च धनिको मङ्गलगुरुशनैश्चराणां युतिर्भवेत्तदा राज्यसेवाया-

## पञ्चमी दृष्टिः।

मल्पधनश्चन्द्रमङ्गलबुधशनैश्चराणां युतिर्भवेत्तदा धनिकश्चन्द्रगुरुशुक्रशनैश्चराणां युतिर्भवेत्तदा धनकुबेरो मङ्गलबुधगुरुशनैश्चराणां युतिर्भवेत्तदा धनवान् मङ्गलबुधशुक्रशनैश्चराणां युतिर्भवेत्तदा धनिकः सूर्यचन्द्रबुधगुरुशुक्राणां युतिर्भवेत्तदा पैतृकधनेनचन्द्रमङ्गलबुधगुरुशुक्राणां युतिर्भवेत्तदा धनकुबेरश्चन्द्र–मङ्गलगुरुशुक्रशनैश्चराणां युतिर्भवेत्तदा स्वर्णादिधनसम्पन्नो यदा च चन्द्रबुधगुरुशुक्रशनैष्चराणां युतिर्भवेत्तदा जातको धनकुबेरो भवति।

यदा गुरुसूर्ययोर्युतिर्भवेत्तदा जातको निर्धनो गुरुशुक्रयोर्युतिर्भवेत्तदा परिश्रमेण धनिकःसूर्यचन्द्रगुरूणां युतिर्भवेत्तदा निर्धनः सूर्यमङ्गलबुधानां युतिर्भवेत्तदा परवित्तलोलुपः सूर्यगुरुशनैश्चराणां युतिर्भवेत्तदा निर्धनः सूर्यचन्द्रमङ्गलशुक्राणां युतिर्भवेत्तदा निर्धनः सूर्यचन्द्रशुक्रशनैश्चराणां युतिर्भवेत्तदा धनहीनः सूर्यचन्द्रमङ्गलबुध शनैश्चराणां युतिर्भवेत्तदा निर्धनः सूर्यचन्द्रबुधशुक्रशनैश्चराणां युतिर्भवेत्तदा धननाशको यदा च सूर्यचन्द्रमङ्गलगुरुशुक्रशनैश्चराणां युतिर्भवेत्तदा जातको निर्धनो भवति।

### १०/०५ द्वितीयात्पञ्चमभावे बुद्धिविचारः।

यदा द्वितीयात्पञ्चमभावे (लग्नात् षष्ठभावे इति यावत्) सूर्यमङ्गलोर्युतिर्भवेत्तदा जातको–ऽतिबुद्धिमान्, सूर्यशनैश्चरयोर्युतिर्भवेत्तदा महाप्राज्ञः सूर्यशुक्रशनैश्चराणां युतिर्भवेत्तदा बहुविद्यावान् सूर्यबुधगुरूशुक्राणां युतिर्भवेत्तदा बुद्धिमान्, सूर्यबुधगुरूशनैश्चराणां युतिर्भवेत्तदा विद्यावान् चन्द्रमङ्गलबुधगुरूणां युतिर्भवेत्तदाऽतिबुद्धिमान् यदा च चन्द्रमङ्गलबुधशुक्राणां युतिर्भवेत्तदा जातको बुद्धिमान् भवति।

यदा द्वितीयात्पञ्चमभावे गुरुचन्द्रयोर्युतिर्भवेत्तदा जातको बुद्धिहीन श्चन्द्रशनैश्चरयोर्युतिर्भवेत्तदा विस्मृतिगुणयुक्तः सूर्यबुधशुक्राणां युतिर्भवेत्तदा बुद्धिहीनः सूर्यगुरूशुक्राणां युतिर्भवेत्तदा जडश्चन्द्रगुरु–शनैश्चराणां युतिर्भवेत्तदा बुद्धिहीन श्चन्द्रशुक्रशनैश्चराणां युतिर्भवेत्तदा विद्यारहितः सूर्यचन्द्रबुधगुरूणां युतिर्भवेत्तदा बुद्धिहीनो यदा च सूर्यचन्द्रबुधशनैश्चराणां युतिर्भवेत्तदा जातको बुद्धिहीनो भवति।

### १०/०६ द्वितीयात्सप्तमेभावे धनविचारः

यदा द्वितीयात्सप्तमेभावे (लग्नादष्टमभावे इति यावत्) सूर्यचन्द्रशनैश्चराणां युतिर्भवेत्तदा निर्धनः सूर्यमङ्गलबुधानां युतिर्भवेत्तदा धनहीनः सूर्यचन्द्रबुधशुक्राणां युतिर्भवेत्तदा निर्धनः सूर्यचन्द्रगुरुशनैश्चराणां युतिर्भवेत्तदा धनहीनः यदा च सूर्यमङ्गलबुधशनैश्चराणां युतिर्भवेत्तदा जातको निर्धनो भवति ।

**१०/०७ द्वितीयादष्टमभावे (लग्नात् नवमभावे) धनविचारः।**

यदा द्वितीयादष्टमभावे (लग्नान्नवमभावे इति यावत्) बुधशनैश्चरयो र्युतिर्भवेत्तदा जातको धनकुबेरो गुरुशुक्रयोर्युतिर्भवेत्तदा धनकुबेर श्चन्द्रबुधगुरूणां युतिर्भवेत्तदा धनिको मङ्गलबुधगुरूणां युतिर्भवेत्तदा धनोपार्जनोत्सुको मङ्गलगुरूशनैश्चराणां युतिर्भवेत्तदा धनवान् मङ्गलशुक्रशनैश्चराणां युतिर्भवेत्तदा धनकुबेरः सूर्यचन्द्रमङ्गलगुरूणां युतिर्भवेत्तदा धनवान् सूर्यचन्द्रबुधगुरूणां युतिर्भवेत्तदा जातको धनकुबेरः सूर्यचन्द्रबुधशुक्राणां युतिर्भवेत्तदा धनवान् सूर्यमङ्गलबुधशनैश्चराणां युतिर्भवेत्तदा धनवान् सूर्यमङ्गलशुक्रशनैश्चराणां युतिर्भवेत्तदा धनवान् चन्द्रबुधगुरूशुक्राणां युतिर्भवेत्तदा निधिपतिर्मङ्गलबुधगुरुशनैश्चराणां युतिर्भवेत्तदा धनवान्, सूर्यचन्द्रमङ्गलबुधशुक्राणां युतिर्भवेत्तदा धनवान् सूर्यचन्द्रमङ्गलगुरूशुक्राणां युतिर्भवेत्तदा धनवान् सूर्यचन्द्रबुधगुरूशनैश्चराणां युतिर्भवेत्तदा धनकुबेरः सूर्यचन्द्रगुरूशुक्रशनैश्चराणां युतिर्भवेत्तदा धनकुबेरः सूर्यमङ्गलबुधगुरूशुक्राणां युतिर्भवेत्तदैश्वर्यवैंश्चन्द्रमङ्गलबुधगुरूशुक्रशनैश्चराणां युतिर्भवेत्तदा नृपवत्समृदधिमान् यदा च सप्तग्रहाणां युतिर्भवेत्तदा जातकः पूर्णसुखी भवति।

यदा बुधगुरुशनैश्चराणां युतिर्भवेत्तदा जातकोऽसद्व्ययी भवति ।

**११/०१ मेषलग्नेशुभशुभयोगाः।**

यदा द्वितीयेशो द्वादशभावे भवेत्तदा जातकोऽल्पधनिको निर्धनो वा भवति। किन्तु यदि द्वादशभावे द्वितीयेश उच्चराश्यां भवेत्तदा जातको धनिको भवति यथा मेषलग्ने द्वादशभावे उच्चराश्यां शुक्रो भवेत्तदा जातको धनिको भवति।

मेषे जातस्य धनपोव्यवस्थोपि कविः शुभः।<br>
इतरक्षैतु जातस्य व्ययस्थः धनपोऽशुभः।।१।।

भावार्थरत्नाकरः (रामानुचार्यः)

यदा मेषलग्ने मङ्गलशुक्रयोर्युतिः द्वितीयभावे भवेत्तदा जातकः धनिको भवति। यदा मेषलग्ने मङ्गलगुरुशुक्राणां युतिर्द्वितीयभावे भवेत्तदा जातकः सम्पतिवान् धनिकश्च भवति। यदा मेषलग्ने लग्नेशः पञ्चमभावे भवेत्तदा जातको धनवान् भवति। यदा मेषलग्ने लग्नेशसप्तमेशयोः (मङ्गलशुक्रयोः) युतिः सप्तमभावे भवेत्तदा जातकः स्वप्रयत्नेन श्रमापेक्षयाऽल्पधनं प्राप्नोति । यदा मेषलग्नेऽष्टमभावे लग्नेशेन सह द्वितीयेशो भवेत्तदा जातको नेत्रारोगी भवति । यदा मेषलग्ने मङ्गलसूर्यगुरूणां युतिः प्रथमभावे पञ्चमभावे नवमभावे एकादशभावे वा भवेत्तदा जातको धनवान् पुत्रवाश्च भवति। यदा मेषलग्ने

**पञ्चमी दृष्टिः।**

द्वितीयेशपञ्चमेशयोः युतिर्गुरुदृष्टिरहितां भवेत्तदा जातको धनिको पुत्रवांश्च भवति। भावार्थरत्नाकरमते शुक्रस्योपरि नैसर्गिक शत्रुग्रहस्य दृष्टिः शुभः। पराशरमतेनवमेशगुरुर्दृष्टिशुभं मन्यते । यदा मेषलग्ने पञ्चमेशोपरिगुरोर्दृष्टिर्भवेत्तदा जातको धनिको पुत्रवांश्च भवति।

## ११/०२ वृषभलग्ने शुभाशुभयोगाः।

यदा वृषभलग्ने द्वितीयेशपञ्चमेशनवमेशानां दशमेशानां वा युतिर्द्वितीयभावे पञ्चमभावे नवभावे दशमभावे वा भवेत्तदा जातको धनिको भवति। यदा वृषभलग्ने द्वितीयेशनवमेशयोर्युतिर्द्वितीयभावे नवमेभावे दशमेभावे पञ्चमभावे वा भवेत्तदा जातको धनिको भवति। यदा वृषभलग्ने पञ्चमेशदशमेशयोर्युतिर्द्वितीयभावे पञ्चमभावे नवमभावे दशमभावे वा भवेत्तदा जातको धनिको भवति। यदा वृषभलग्ने द्वितीयेशपञ्चमेशयोर्युतिर्द्वितीयभावे पञ्चमभावे नवमभावे दशमभावे वा भवेत्तदा जातकः पुत्रवान् धनवांश्च भवति। यदा वृषभलग्ने द्वितीयेशबुधस्योपरि गुरुग्रहस्य दृष्टिर्भवेत्तदा जातको धनवान् भवति। अत्र गुरुरष्टमेशो भूत्वा अशुभोऽपि लाभभावाधिपतिर्भुत्वा शुभत्वं प्राप्नोति अतः द्वितीयैकादशयोः युतिर्दृष्टिः सम्बन्धात् जातको धनवान् भवति। यदा वृषभलग्ने पञ्चमभावे बुधस्योपर्येकादशभावे स्थितस्य गुरोः पूर्णदृष्टिर्भवेत्तदा जातको धनवान् भवति। यदा वृषभलग्ने पञ्चमभावे बुधस्योपरि प्रथमभावे स्थितस्य गुरोर्दृष्टिर्भवेत्तदाऽपि जातको धनवान् भवति । यदा वृषभलग्ने द्वितीयेशैकादशयोर्युतिः प्रथमभावे  द्वितीयभावे चतुर्थभावे पञ्चमभावे दशमभावे एकादशेभावे वा भवेत्तदा जातको धनवान् भवति। यदा वृषभलग्ने चतुर्थभावे द्वितीयैकादशयोर्युतेरुपरि उच्चस्थमङ्गलस्य दृष्टिर्भवेत्तदा जातको धनिको भवति। यदा वृषभलग्ने गुरुबुधयोर्युतिर्दृष्टिसम्बन्धे मङ्गलस्य दृष्टि वा युतिर्भवेत्तदा जातकोऽल्प धनयुक्तो भवति। अर्थात् मङ्गलस्य युतिर्दृष्टि वा बुधेन गुरुणा सह भवति तदा जातकोऽल्पधनिको भवति।

## ११/०३ मिथुनलग्नेशुभाशुभयोगाः।

यदा मिथुनलग्ने द्वितीयभावे चन्द्रमङ्गलशुक्राणां युतिर्भवेत्तदा जातको धनवान् भवति। विशेषस्तु शुक्रस्य महादशायां (विशोत्तरीमते) जातकोऽधिको धनं लभते। मिथुनलग्ने द्वितीयभावे शनैश्चरमङ्गलस्योर्युतिरष्टमभावे चन्द्रो भवेत्तदा शनैश्चरमङ्गलयोः दशायां धननाशो भवति। मिथुनलग्ने मङ्गलचन्द्रयोर्युतिरेकादशभावे भवेत्तदा जातकः सविशेषां धनिको भवति।

**११/ ०४ कर्कलग्नेशुभाशुभयोगाः।**

यदा कर्कलग्ने पञ्चमेश: पञ्चमभावे भवेत्तदा जातक: पुत्रवान् धनवांश्च भवति।

यदा कर्कलग्ने शुक्रो द्वितीयभावे सिंहराश्यां भवेत्तदा जातको धनिको भवति। यदा कर्कलग्ने द्वितीयभावे चन्द्रमङ्गलगुरूणांयुतिर्भवेत्तथा सूर्यशुक्रयोर्युतिः पञ्चमभावे भवेत्तदा जातको धनिको भवति । यदा कर्कलग्ने द्वितीयेश उच्चराश्यां लग्नेशैकादशयोर्युति एकदशभावे नवमेशो लग्नभावे भवेत्तदा जातको धनिको भवति। कर्कलग्ने गुरुसूर्योर्युतिर्द्वितीयभावे पञ्चमभावे  नवमेभावे वा भवेत्तदा जातको धनवान् भवति । यदा कर्कलग्ने सूर्यमङ्गलयोर्युतिर्दशमभावे भवेत्तदा जातकोऽति धनिको भवति। यदा कर्कलग्ने गुरुचन्द्रयोर्युतिर्भवेत्तदा जातको विद्यावान् धनवांश्च भवति।

**११/ ०५ सिंहलग्ने शुभाशुभयोगः।**

यदा सिंहलग्ने बुधसूर्यमङ्गलानां युतिर्द्वितीयभावे चतुर्थभावे पञ्चमभावे नवमभावे दशमभावे एकादशभावे वा भवेत्तदा जातकोऽति धनिको भवति। यदा सिंहलग्ने बुधमङ्गलयोर्युतिः द्वितीयभावे चतुर्थभावे नवमभावे एकादशभावे वा भवेत्तदा जातक: स्वल्पप्रयासेन धनिको भवति। यदा सिंहलग्ने बुधसूर्ययोर्युतिर्लग्ने द्वितीयभावे चतुर्थभावे पञ्चमभावे दशमभावे एकादशभावे वा भवेत्तदा जातको धनिको भवति। यदा सिंहलग्ने सूर्यबुधयोर्युतेरुपरिगुरोर्दृष्टिर्भवेत्तदा जातको विद्यानिपुणो धनवांश्च भवति। सिंहलग्ने सूर्यमङ्गलबुधानां युतिर्भवेत्तदा बुधस्यदशायां (विशोत्तरीदशानुसारेण)जातको धनिको भवति।

**११/ ०६ कन्यालग्ने शुभाशुभयोगाः।**

यदा कन्यालग्ने शुक्रचन्द्रयोर्युतिर्द्वितीयभावे नवमभावे एकादशभावे वा भवेत्तदा जातको धनिको भवति । यदा कन्यालग्ने सूर्यशुक्रयोर्युतिर्द्वादशभावे भवेत्तथा शुक्रोऽस्तङ्गतावस्थायां भवेत्तदा जातको धनहीनो भवति। यदा कन्यालग्ने चतुर्थभावे गुरुशुक्रयोर्युतिर्भवेत्तदा गुरुशुक्रयोर्दशायां (विंशेत्तरीदशायां) जातको धनिको भवति। यदा कन्यालग्ने पञ्चमेशो लाभभावे भवेत्तदा जातको धनिको भवति। शनैश्चरस्य दशायां जातक उत्तमसुखं प्राप्नोति।

**११/ ०७ तुलालग्नेशुभाशुभयोगाः।**

यदा तुलालग्ने सूर्यशनैश्चरबुधानांयुतिर्वा दृष्टिर्भवेत्तदा जातको विद्यावान् धनवांश्च भवति। यदा तुलालग्ने मङ्गलबुधयोर्युति एकादशभावे पञ्चमेशशनैश्चरौ नवमेभावे तथा गुरुर्रष्टमभावे भवेत्तदा जातको

धनवान् भवति। यदा तुलालग्ने द्वितीयभावे सूर्यबुधमङ्गलानां युतिः पञ्चमभावे शनैश्चरो भवेत्तदा जातको यन्त्रविज्ञानेन धनवान् रसायण शास्त्रस्यज्ञाता धातुविज्ञानेन धनवान् भवति। यदा तुलालग्ने पञ्चमेशो लग्नभावे कर्मेशश्चन्द्रदशमभावे भवेत्तदा जातको विद्यानिपुणो यशस्वी विद्यया धनिकश्च भवति । विशेषस्तु शनैश्चरस्य चन्द्रस्य च दशायां महाधनिको भवति। तुलालग्ने गुरुरष्टमभावे द्वादशभावे वा भवेत्तदा लग्नभावे चतुर्थभावे पञ्चमभावे वा स्थितस्य पञ्चमेशस्य दशायां जातको धनवान् यशस्वी विद्याप्रख्यातश्च भवति। यदा तुलालग्ने पञ्चमेशो नवमभावे नवमेशः पञ्चमभावे भवेदथवा पञ्चमेशनवमेशयोः युतिर्नवमेभावे तृतीयभावे भवेत्तदा जातको विद्यानिपुणो भवति। अस्मिन् योगे जातको विशेषरूपेण लोहसम्बन्धित यन्त्रसम्बन्धित यानसम्बन्धित सन्देश सम्बन्धित ज्ञानेन धनवान् भवति।

## ११/०८ वृश्चिकलग्नेशुभाशुभयोगः।

यदा वृश्चिकलग्ने द्वितीयेशलग्नेशयार्युतिर्भवेत्तदा जातको धनसम्पन्नो भवति। यदा वृश्चिकलग्ने द्वितीयेशलाभेशयोर्युतिर्द्वितीयभावे एकादशभावे पञ्चमभावे नवमभावे दशमभावे वा भवेत्तदा जातको धनवान् भवति। यदा वृश्चिकलग्ने धनेशलग्नेश लाभेशानां युतिर्लाभभावे भवेत्तदा जातको धनवान् भवति। यदा वृश्चिकलग्ने लग्नेशधनेशलाभेशपञ्चमेशभाग्येशानां युतिर्भवेत्तदा जातको धनवान् विद्वांश्च भवति। यदा वृश्चिकलग्ने मीनराशिगतगुरुणा सह बुधो भवेत्तथा एकादशभावे चन्द्रो भवेत्तदा जातको धनिको भवति। यदा वृश्चिकलग्ने द्वितीयेशभाग्येशयोर्युतिः प्रथमभावे द्वितीयभावे पञ्चमभावे नवमभावे एकादशभावे वा भवेत्तदा जातको धनिको भवति। यदा पञ्चमभावे पञ्चमेशनवमेशयोयुतेरुपरि बुधस्य दृष्टिर्भवेत्तदा जातको धनसम्पन्नो विद्यानिपुणो भवति। यदा वृश्चिकलग्ने द्वितीयभावे पञ्चमभावे दशमभावे एकादशभावे वा लग्नेशपञ्चमेशयोर्युति भवेत्तदा जातको रोगविद्यानिपुणो धनवांश्च भवति।

## ११/०९ धनुलग्नेशुभाशुभयोगः।

यदा धनुर्लग्ने द्वितीयेशशनैश्चरौ लाभभावे भवेत्तदा जातको धनवान् भवति।

यदा धनुर्लग्ने द्वितीयेशशुक्रयोर्युतिर्द्वितीयभावे एकादशभावे वा भवेत्तदा जातको मनोरञ्जनक्रियाभि-र्धनवान् भवति।

## ११/१० मकरलग्नेशुभाशुभयोगः।

यदा मकरलग्ने उच्चराश्यां चन्द्रस्योपरि गुरोर्दृष्टिस्त्रिकोणशयोर्युतिर्लग्नेभावे भवेत्तदा जातको विद्यानिपुणो धनिकश्च भवति। यदा मकरलग्ने पञ्चमेशशुक्रस्य युतिः शनैश्चरेण सह द्वितीयभावे लग्नभावे वा भवेत्तदा जातकः स्वकीयसम्पादितविद्यया धनिको भवति।

## ११/११ कुम्भलग्ने शुभाशुभयोगः।

यदा कुम्भलग्ने द्वितीयेशो लग्नभावे लग्नेशो द्वितीयभावे भवेत्तदा गुरोर्दशायां शुभाशुभफलं शनैश्चरस्य दशायां जातको धनवान् यशस्वी भवति। यदा कुम्भलग्ने गुरुशुक्रशनैश्चराणां युतिरेकादशभावे भवेत्तदा जातकोऽधिकप्रयासेन धनं प्राप्नोति। कुम्भलग्ने यदा द्वितीयेशपञ्चमेशसूर्याणांयुतिस्तृतीयभावे भवेत्तदा जातकः सूर्यस्य महादशायां धनं प्राप्नोति।

## ११/१२ मीनलग्ने शुभाशुभयोगः।

मीनलग्ने द्वितीयभावे चन्द्रः पञ्चमभावे च मङ्गलो भवेत्तदा जातकश्चन्द्रदशायां धनं लभते। यदा मीनलग्ने द्वितीयेशपञ्चमेशचतुर्थेशानां युतिरेकादश भावे भवेत्तदा जातको धनवान् वाहनयुक्तो विद्यानिपुणो भवति। यदा मीनलग्ने लग्नेशद्वितीयेशचतुर्थेशपञ्चमेशानां युतिश्चतुर्थभावे भवेत्तदा जातको मङ्गलबुधगुरूग्रहाणां दशासु धनवान् विद्यानिपुणो यशस्वी नृपसदृशसुखी च भवति। किन्तु अस्मिन् योगे शुक्रस्य युतिर्भवेत्तदा योगफलं नश्यति।

## १२/०१ दशाफलविचारः।

यदा षड्बलसम्पन्नोऽष्टकवर्गे शुभबिन्दुयुक्तो द्वितीयेशः स्वोच्चराश्यां स्वमित्रराश्यां मूलत्रिकोणराश्यां शुभग्रहस्यराश्यां वा अस्तङ्गतावस्थाहीनो भवेत्तदा द्वितीयेशस्य दशाऽन्तर्दशायां जातको धनपुत्रविद्यादिसुखयुक्तो भवति। यदा द्वितीयेशो वर्गोत्तमास्थायां शुभो भवेत्तदा जातको धनवान् पुत्रवान् विद्यावांश्च भवति। ग्रहाणां षड्बलानुसारेण[१५०] द्वितीयेशस्य इष्टबलमधिकं भवेत्तदा द्वितीयेशस्य दशान्तर्दशायां जातको धनवान् सुखी च भवति। यदा द्वितीयेशेन सह योगकारकग्रहो भवेत्तदा योगकारकग्रहस्य दशाऽन्तर्दशायां जातको धनपुत्रविद्यादि सुखयुक्तो भवति। यदा द्वितीयेशोऽल्पबलयुक्तः स्वोच्चराश्यां मूलत्रिकोणराश्यां वा भवेत्तदा द्वितीयेशस्य दशाऽन्तर्दशायां जातको धनवान् भवति।

[१५०] विशेषार्थं परिशिष्टम् – ०३ द्रष्टव्यम् ।

## पञ्चमी दृष्टिः।

यदाऽऽरोहिणिसंज्ञायुक्तो[१५१] द्वितीयेशो भवेत्तदा जातको द्वितीयेशस्य दशाऽन्तर्दशायां धनवान् यशस्वी पुत्रवान् विद्यावांश्च भवति। यदाऽऽरोहिणीसंज्ञायुक्तो द्वितीयेशो नवमांशे नीचराश्यां शत्रुराश्यां वा भवेत्तदा जातको द्वितीयेशस्य दशाऽन्तर्दशायामल्पशुभफलं प्राप्नोति।

यदा द्वितीयेशो निर्बलो भूत्वा नीचराश्यां शत्रुराश्यां वा भवेत्तदा जातको द्वितीयेशस्य  दशाऽन्तर्दशायां निर्धनो भवति। यदा द्वितीयेशो निर्बलो भूत्वा परमनीचांशे भवेत्तदा जातको द्वितीयेशस्य  दशाऽन्तर्दशायां निर्धनो रोगी भवति । कदाचिन्मृत्युं मृत्युतुल्यपीडां वा प्राप्नोति । यदा द्वितीयभावे कोऽपि ग्रहो नीचराश्यां शत्रुराश्यामस्तङ्गतावस्थायां  नीचनवांशे वा भवेत्तदा जातको द्वितीयेशस्य दशाऽन्तर्दशायां रोगी निर्धनो मन:सन्तापयुकतश्च भवति। यदा स्वोच्चराश्यां स्वराश्यां स्वमित्रराश्यां मूलत्रिकोणराश्यां वा द्वितीयेशो नवमांशे शत्रुराश्यां  नीचराश्यां वा भवेत्तदा द्वितीयेशस्य दशाऽन्तरर्दशायां पूर्वार्द्धे शुभफलमुत्तरार्द्धे अशुभफलं भवति। यदा द्वितीयभावे कोऽपि पापग्रह: स्वराशिं स्वमित्रराशिं वा  स्वोच्चराशिं विहाय भवेत्तदा द्वितीयेशस्य ग्रहस्य दशाऽन्तर्दशायामशुभफलं प्राप्नोति। यदा बलवत:शुभग्रहस्य पूर्णदृष्टि: [१५२] द्वितीयभावस्योपरि भवेत्तदा तस्य शुभग्रहस्य दशाऽन्तर्दशायां द्वितीयभावजन्यशुभफलस्याभिवृद्धिर्भवति।

यदा द्वितीयेशोऽवरोहिणीसंज्ञायुक्तो[१५३]भवेत्तदा द्वितीयेशस्य दशान्तर्दशायां जातको धनचिन्तायुक्तो देहपीडितश्च भवति । किन्तु यदाऽवरोहिणीसंज्ञायुक्तो द्वितीयेशो मित्रराश्यां स्वोच्चराश्यां नवांशे स्वराश्यां वा भवेत्तदा जातको द्वितीयेशस्य दशान्तर्दशायां मिश्रफलं प्राप्नोति।यदा द्वितीयेशो वक्री भूत्वा त्रिकभावे[१५४] भवेत्तदा द्वितीयेशस्य दशान्तर्दशायां जातको दु:खी अपमानसहो निर्धनश्च भवति। ग्रहाणां षड्बलानुसारेण द्वितीयेशस्य कष्टबलमधिकं भवेत्तदा द्वितीयेशस्य दशान्तर्धशायां जातको निर्धनो दु:खी च भवति। यदा द्वितीयेशो राहुणा केतुना वा सह त्रिकभावे भवेत्तदा द्वितीयेशस्य दशाऽन्तर्दशायां  जातक: कष्टं दु:खं च प्राप्नोति। यदा द्वितीयेशो पापग्रहेण सह त्रिकभावे[१५५] भवेत्तदा द्वितीयेशस्य पापग्रहस्य वा

---

[१५१] यदा  कोऽपिग्रहो द्वितीयेशो भूत्वा स्वनीचराशिं त्यक्त्वा स्वोच्चराशिं प्रतिगच्छेत्तदा तस्य आरोहिणी संज्ञा भवति।

[१५२] विशेषार्थं परिशिष्टम् – ०३ द्रष्टव्यम् ।

[१५३] यदा  कोऽपिग्रहो द्वितीयेशो भूत्वा स्वोच्चराशिं त्यक्त्वा नीचराशिं प्रतिगच्छेत्तदा तस्य अवरोहिणी संज्ञा भवति।

[१५४] विशेषार्थं परिशिष्टम् – ०४ द्रष्टव्यम् ।

[१५५] विशेषार्थं परिशिष्टम् – ०४ द्रष्टव्यम् ।

**पञ्चमी दृष्टिः।**

दशाऽन्तर्दशायां जातको निर्धनो रोगपीडितश्च भवति। यदा द्वितीयभावे त्रिकभावाधिपतिः पापग्रहो भवेत्तदा जातको द्वितीयेशस्य दशाऽन्तर्दशायां निर्धनो धनचिन्तायुक्तो नेत्ररोगी मुखरोगी वा भवति।

यदा द्वादशेशो द्वितीयभावे उच्चराश्यां भवेत्तदा जातको आकस्मिक धनं प्राप्नोति। यथा द्वितीयभावे मकरराश्यां मङ्गलः ।

**उपसंहारः-** जन्मकुण्डल्यां कुटुम्बभावस्य फलविचारस्य चर्चायां प्रत्येकभावस्य तत्तत् स्थितराश्यास्तत्तद्राशिपतेश्च परस्परं भावपरिवर्तने जातकस्य यत्फलं भवेत्तदर्शितानाम्। तेषां ग्रहाणां परस्परं स्थानगतानां शुभाशुभफलविचारस्तेषाञ्चनियमाऽपि संगृहीता । अनेन सर्वतोग्राही प्रयोजनं सिद्धं भवति यत् अत्र दृष्ट्यां वर्णितानां  चर्चिताञ्च विषयविशेषाणां सम्यक् परिगणनेन फलं शतप्रतिशतं सम्भवति।

-x-x-x-

# षष्ठी दृष्टिः।

## जन्मकुण्डल्यां सुतभावस्य विचारः।

(२०४-२५०)

## षष्ठी दृष्टिः।

### जन्मकुण्डल्यां सुतभावस्य विचारः।

यन्त्रमन्त्रौ तथा विद्याबुद्धेश्चैव प्रबन्धकम्।
पुत्रराज्यापभ्रंशादि पश्येत् पुत्रालयाद् बुधः[1]।।

पराशरमुनि विरचिते बृहत्पराशरहोराशास्त्रे सुतभावानुसारेण

**१ यन्त्रमन्त्रो।**

**२ विद्याबुधिःप्रबन्धश्च।**

**३ पुत्रादि राज्यभ्रंशश्चेति विचार्यन्ते।**

आधुनिककालेफलज्योतिषानुसारेणाऽत्र दृष्ट्यां क्रम एव गृहीतः।

**१ बुद्धिर्विद्याविनयःप्रबन्धश्च ।**

**२ गर्भस्थितिः।**

**३ आत्मजतत्सम्बधिनौ लाभालाभौ परस्परव्यवहाराश्च ।**

**४ मन्त्रोदेवभक्तिश्च ।**

**५ पितृसुखादि।**

**६ हृदयस्वास्थ्यम्।**

**७ उदरस्वास्थ्यम् । च।**

#### ०१ पञ्चमभावे मेषादि राशीनां फलविचारः।

यदा पञ्चमभावे मेषराशिर्भवेत्तदा जातकः प्रायो निर्धनपुत्रवान् देवकृपावान् कर्मरतः पापानुरक्तः कुलवित्तयुक्तश्च भवति। यदा पञ्चमभावे वृषभराशिर्भवेत्तदा जातको मनोहरापत्यबहुकान्तिनिजपतिधर्म-युक्तकन्या जातको भवति। यदा पञ्चमभावे मिथुनराशिर्भवेत्तदा जातको गुणवान् सुस्वामीयुक्तः प्रतापी

[1] बृ.पा.हो.शा.१२/५

बलवान् सद्दायकश्च भवति। यदा पञ्चमभावे कर्कराशिर्भवेत्तदा जातको यशस्वी शान्तो जलक्रीडारतः पुत्रवान् स्त्रीप्रियश्च भवति। यदा पञ्चमभावे सिंहराशिर्भवेत्तदा जातको मांसप्रियः क्षुधायुक्तस्तीव्रस्वभावो विदेशनिवासी स्त्रीजनको न्यायनीतिरहितः क्रूरपुत्रयुक्तश्च भवति। यदा पञ्चमभावे कन्याराशिर्भवेत्तदा जातको हीनकन्याजनकः सा कन्या पतिप्रिया पुण्यपरायणा प्रगल्भाप्रशान्तपापाभूषणप्रिया च भवति। यदा पञ्चमभावे तुलाराशिर्भवेत्तदा जातकस्य मनोहरसुशीलक्रियाकुशलाशुभदृष्टिगुणसंपन्नपुत्रा भवन्ति। यदा पञ्चमभावे वृश्चिकराशिर्भवेत्तदा जातको धार्मिकस्तस्यसुन्दरमनोहरदोषरहितप्रणययुक्तपुत्राः भवन्ति। यदा पञ्चमभावे धनुर्राशिर्भवेत्तदा जातकस्य पुत्राः पापमतिकुरूपगम्भीरचेष्टावन्तो भवन्ति। यदा पञ्चमभावे मकरराशिर्भवेत्तदा जातकस्य धर्नुधारी शत्रुनाशकसेवाप्रियराज्यमान्यहयादियानकुशलसंचालकलक्ष्य–साधकगुणयुक्ताः पुत्रा भवन्ति। यदा पञ्चमभावे कुम्भराशिर्भवेत्तदा जातकस्य धनिकप्रसन्नचित्तास्ते बहुगुणसम्पन्नाः किन्तु निःसन्तानपुत्रा भवन्ति। प्रायो दुष्टपुत्रैः जातकः कष्टं प्राप्नोति। यदा पञ्चमभावे मीनराशिर्भवेत्तदा जातकस्य निरोगीस्वरूपवन्तः यशस्वीनः सुकलत्रवन्तः पुत्रा भवन्ति।

**०२/०१ पञ्चमभावे सूर्यादिग्रहाणां राशिगतफलविचारः।**

**०३/०१ पञ्चमभावे सूर्यस्य राशिगतफलविचारः।**

यदा पञ्चमभावे मेषराश्यां सूर्यो भवेत्तदा जातक उत्तमगुणयुक्तः कुटुम्बपालको भृत्यपालकोऽश्वादि पशुसुखभाक् वैश्यगुणसम्पन्नोजनकस्यपुत्रो निर्दयाल्पसंततियुक्तश्च भवति। यदा वृषभराश्यां सूर्यो भवेत्तदा जातकः प्रायः शठः पिशुनो धर्मरहितो निर्धनोऽपुत्रो दुःखी परकार्यनाशकरश्च भवति। यदा मिथुनराश्यां सूर्यो भवेत्तदा जातकः प्रसन्नचित्तो देवभक्तः प्राज्ञः कफरोगी पुत्रवान् च भवति। यदा कर्कराश्यां सूर्यो भवेत्तदा जातको विनयी विद्यावान् धैर्यगुणसम्पन्नः शस्त्रसङ्ग्रही पुत्रवान् च भवति। यदा सिंहराश्यां सूर्यो भवेत्तदा जातकोऽत्यवादी ज्ञानी परमनपरीक्षको दीर्घायुः पुत्रवांश्च भवति । यदा कन्याराश्यां सूर्यो भवेत्तदा जातको धैर्यगुणसम्पन्नो भीरुः पुत्ररहितश्च भवति। यदा तुलाराश्यां सूर्यो भवेत्तदा जातकः क्रोधी शीघ्रकार्यकर्ता वित्तवान् साधारणधर्मपालकश्च भवति। यदा वृश्चिकराश्यां सूर्यो भवेत्तदा जातको मनोहरमुखाकृतिर्गानप्रियः समुद्रमार्गेणधनसम्पन्नश्च भवति। यदा धनूराश्यां सूर्यो भवेत्तदा जातको गुणवान् नृपाधिकारी परदेशेशस्त्रघातात्पीडितदेहः पुत्रवांश्च भवति। यदा मकरराश्यां सूर्यो भवेत्तदा जातकः शठो दुष्टो रोगी पिशुनोऽपुत्रश्च भवति। यदा कुम्भराश्यां सूर्यो भवेत्तदा जातको बाल्यावस्थायां वृद्धावस्थायां वा रोगी अपुत्रश्च भवति। यदा मीनराश्यां सूर्यो भवेत्तदा जातको विद्यावान् नृपसचिवः सुखी पुत्रसुखभाक् च भवति।

## ०३/०२ पञ्चमभावे चन्द्रस्य राशिगतफलविचारः।

यदा पञ्चमभावे मेषराश्यां चन्द्रो भवेत्तदा जातकः कन्याजनको धनवान् मित्रयुक्तश्च भवति। यदा वृषभराश्यां चन्द्रो भवेत्तदा जातकः कन्याजनको धनधान्यसुखभाक् च भवति। यदा मिथुनराश्यां चन्द्रो भवेत्तदा जातको बहुकन्याजनको भवति। यदा कर्कराश्यां चन्द्रो भवेत्तदा जातको भीरुर्दानी गोसेवकः कन्याजनकश्च भवति। यदा सिंहराश्यां चन्द्रो भवेत्तदा जातकः कीर्तिमान् सुखी पुत्रवान् प्रायोऽधिककन्याजनकश्च भवति। यदा कन्याराश्यां चन्द्रो भवेत्तदा जातकः कुकर्मरतः साहसी अल्पबुद्धिः कन्यापिता च भवति। यदा तुलाराश्यां चन्द्रो भवेत्तदा जातकः क्रोधी राज्याधिकारी वायुरोगी कन्याजनकश्च भवति। यदा वृश्चिकराश्यां चन्द्रो भवेत्तदा जातकः स्त्रीपराजितः कन्याजनको युवावस्थायां धनवान् पुत्रवांश्च भवति। यदा धनुराश्यां चन्द्रो भवेत्तदा जातकः सेनापतिर्नृपाधिकारी पुत्रवान् धनिकः सुखी च भवति। यदा मकरराश्यां चन्द्रो भवेत्तदा जातकः कुकर्मरतो युद्धप्रियो दुष्टमित्रवान् द्विभार्यः कन्यापिता च भवति। यदा कुम्भराश्यां चन्द्रो भवेत्तदा जातकः शीघ्रकार्यकर्ता युवावस्थायां रोगी कन्यापिता च भवति। यदा मीनराश्यां चन्द्रो भवेत्तदा जातको युवावस्थायां सुखी वृद्धावस्थायां वायुरोगी कन्याजनकश्च भवति।

## ०३/०३ पञ्चमभावे मङ्गलस्य राशिगतफलविचारः।

यदा पञ्चमभावे मेषराश्यां मङ्गलोभवेत्तदा जातकोऽपुत्र उग्रः स्त्रीपरजितः कुत्सितान्नभक्षी च भवति यदा वृषभराश्यां मङ्गलो भवेत्तदा जातक उग्रो दूषितान्नभक्षी स्त्रीपराजितः पुत्ररहितश्च भवति। यदा मिथुनराश्यां मङ्गलो भवेत्तदा जातकः क्रोधी दुःखी अपुत्रः सेवाकार्येण च धनिको भवति। यदा कर्कराश्यां मङ्गलो भवेत्तदा जातकः क्रोधी परस्त्रीरतः पुत्रहीनश्च भवति (परि.०१,क्र.७७) (परि.०१, क्र.९०)। यदा सिंहराश्यां मङ्गलो भवेत्तदा जातको युवावस्थायां सुखी पुत्ररहितो वा पुत्रकष्टभाक् च भवति। यदा कन्याराश्यां मङ्गलो भवेत्तदा जातकोऽभिमानी बुद्धिहीनः सन्ततिकष्टभाक् च भवति। यदा तुलाराश्यां मङ्गलो भवेत्तदा जातको मित्रहीनः सुकलत्रवान् राज्यकार्यकुशलश्च भवति। यदा वृश्चिकराश्यां मङ्गलो भवेत्तदा जातक; स्वधर्मपालकः श्रद्धावान् पुत्रवांश्च भवति(परि.०१,क्र.३६)। यदा धनुराश्यां मङ्गलो भवेत्तदा जातको मनस्वी नृपसम्मानभाक् सुखी च भवति। यदा मकरराश्यां मङ्गलो भवेत्तदा जातकस्तुष्टः कुलीनः सुखी शत्रुहन्ता च भवति। यदा कुम्भराश्यां मङ्गलो भवेत्तदा जातको

धान्यसङ्ग्रही अपुत्रो नृपसम्मानलब्धश्च भवति। यदा मीनराश्यां मङ्गलो भवेत्तदा जातको मनस्वी प्रसिद्धो नृपसंमानभाक् पुत्रवांश्च भवति।

### ०३/०४ पञ्चमभावे बुधस्य राशिगतफलविचारः।

यदा पञ्चमभावे मेषराश्यां बुधो भवेत्तदा जातकः शूरः स्वधर्मरक्षको धान्येनपूर्णः बह्वश्वादिसम्पन्नः पुत्रवांश्च भवति। यदा वृषभराश्यां बुधो भवेत्तदा जातको दानी सत्कुलोत्पन्नः स्वधर्मकुशलः कार्यदक्षो यशस्वी मित्रसाहाय्येनसुखी च भवति। यदा मिथुनराश्यां बुधो भवेत्तदा जातको गुणवान् उत्तमभोजन–प्रियः स्वदेशे प्रसिद्धो भाग्यवान् पुत्रवांश्च भवति। यदा कर्कराश्यां बुधो भवेत्तदा जातकः शुद्धान्तकरणः कृतज्ञश्च भवति। यदा सिंहराश्यां बुधो भवेत्तदा जातक एकशास्त्रनिपुणः स्त्रीपराजितः पुत्रसुखी च भवति। यदा कन्याराश्यां बुधो भवेत्तदा जातको दयालुः कार्यकुशलो रसज्ञः सुप्रजावांश्च भवति। यदा तुलाराश्यां बुधो भवेत्तदा जातकः शठः पुष्टदेहो धनिको पुत्रवांश्च भवति। यदा वृश्चिकराश्यां बुधो भवेत्तदा जातकः प्रबलजठराग्निर्वायुरोगी कफरोगी धनवान् सुपुत्रवान् शत्रुजिच्च भवति। यदा धनुराश्यां बुधो भवेत्तदा जातक उग्रस्वभावः कार्यदक्षः सुवर्णसङ्ग्रही धनसुखयुक्तश्च भवति। यदा मकरराश्यां बुधो भवेत्तदा जातको धर्मिष्ठः कार्यदक्षः सुखी राज्यमान्यश्च भवति। यदा कुम्भराश्यां बुधो भवेत्तदा जातकः क्रोधकर्ता पिशुनो गुरुब्राह्मणशरणागतः पुत्रवान् धनवांश्च भवति। यदा मीनराश्यां बुधो भवेत्तदा जातकः सुखी जीवनस्य मध्यावस्थायां धनवान् स्त्रीसुखभाक् जीवनस्योत्तरावस्थायां प्रख्यातो भवति।

### ०३/०५ पञ्चमभावे गुरो राशिगतफलविचारः।

यदा पञ्चमभावे मेषराश्यां गुरुर्भवेत्तदा जातको राज्याधिकारी मध्यमायुः सुपुत्रवांश्च भवति। यदा वृषभराश्यां गुरुर्भवेत्तदा जातकः पिशुनो नीचजनसङ्गी स्वजनत्यक्तो धनपुत्ररहितश्च भवति। यदा मिथुनराश्यां गुरुर्भवेत्तदा जातकः कार्यकुशलः धनिकः पुत्रवान् शत्रुजिच्च भवति। यदा कर्कराश्यां गुरुर्भवेत्तदा जातकः कलाज्ञो धनवान् पुत्रवान् सुकलत्रवान् मित्रवांश्च भवति। यदा सिंहराश्यां गुरुर्भवेत्तदा जातकः सदाचारी धर्मनिष्ठो बहुधनिकश्च भवति। यदा कन्याराश्यां गुरुर्भवेत्तदा जातकः श्रेष्ठकीर्तिमान् युद्धविशारदो धनवान् पुत्रेण यशस्वी सुखी च भवति । यदा तुलाराश्यां गुरुर्भवेत्तदा जातको दयालुः शान्तः शूरश्च भवति। यदा वृश्चिकराश्यां गुरुर्भवेत्तदा जातकः शान्तः सुप्रसिद्धः पूजनीयः सुखी बहुपुत्रवांश्च भवति। यदा धनुराश्यां गुरुर्भवेत्तदा जातको राज्याधिकारी बहुवाहनस्वामी धनकुबेरः पुत्रवांश्च भवति। यदा मकरराश्यां गुरुर्भवेत्तदा जातको भ्रमणशीलोऽस्वस्थो निर्धनोऽपुत्रः परस्त्रीरतश्च भवति।

यदा कुम्भराश्यां गुरुर्भवेत्तदा जातकश्चतुरः स्वधर्मपालको मनस्वी विदेशयात्रारतश्च भवति। यदा मीनराश्यां गुरुर्भवेत्तदा जातकः सर्वगुणसम्पन्नः पूर्णसुखी च भवति।

### ०३/०६ पञ्चमभावे शुक्रस्य राशिगतफलविचारः।

यदा पञ्चमभावे मेषराश्यां शुक्रो भवेत्तदा जातको विद्याकुशलो बहुमित्रवान् द्विभार्यः परकार्यकुशलश्च भवति। यदा वृषभराश्यां शुक्रो भवेत्तदा जातकः शीघ्रकार्यकर्ता सुखसम्पन्नः पुत्रवांश्च भवति(परि.०१,क्र.३७)। यदा मिथुनराश्यां शुक्रो भवेत्तदा जातकश्चतुरो युद्धकलाकुशलो वाहनसम्पन्नः पुत्रवांश्च भवति। यदा कर्कराश्यां शुक्रो भवेत्तदा जातको गुणवान् कलङ्कयुक्तोऽपुत्रः स्त्रीहीनः सर्वजनप्रियश्च भवति। यदा सिंहराश्यां शुक्रो भवेत्तदा जातकः शठः क्रोधात् व्याकुलः वृकोदरः पुत्रहीनश्च भवति। यदा कन्याराश्यां शुक्रो भवेत्तदा जातकः प्रायो मृत्युतुल्यपीडायुक्तो पुत्रमित्रहीनो रोगीकन्याजनकश्च भवति। यदा तुलाराश्यां शुक्रो भवेत्तदा जातको घातुको निष्ठुरः सेवकः पुत्रवान् धनवांश्च भवति। यदा वृश्चिकराश्यां शुक्रो भवेत्तदा जातको बाल्यावस्थायां रोगी वायुरोगी निर्धनो मित्रहीनो पितृसुखभाक् वन्ध्यास्त्रीपतिर्भवति। यदा धनुराश्यां शुक्रो भवेत्तदा जातकः कठोरो मानी वायुरोगी विदेशभ्रमणशीलः पुत्रवांश्च भवति। यदा मकरराश्यां शुक्रो भवेत्तदा जातको युद्धकुशलो बहुयात्राकर्ता च भवति। यदा कुम्भराश्यां शुक्रो भवेत्तदा जातकः शूरो बुद्धिमान् उग्रस्वभावो धनकुबेरो बहुपुत्रवांश्च भवति। यदा मीनराश्यां शुक्रो भवेत्तदा जातकः श्रेष्ठकर्मकर्ता बुद्धिमान् सुमित्रसाहाय्येन सुखी च भवति (परि.०१,क्र.२८) (परि.०१,क्र.४४)।

### ०३/०७ पञ्चमभावे शनैश्चरस्य राशिगतफलविचारः।

यदा पञ्चमभावे मेषराश्यां शनैश्चरो भवेत्तदा जातको मदोन्मत्तः कुकर्मरतः स्वधर्महीनोऽपुत्रश्च भवति। यदा पञ्चमभावे वृषभराश्यां शनैश्चरो भवेत्तदा जातको गोपालकरक्षको विप्रसेवको परदेशनिवासेन सुखी च भवति। यदा मिथुनराश्यां शनैश्चरो भवेत्तदा जातको मदोन्मत्तः शठो निर्धनोऽपुत्रश्च भवति। यदा कर्कराश्यां शनैश्चरो भवेत्तदा जातकोऽनेकशास्त्रनिपुणः कार्यकुशलो धनसम्पन्नः कुलटापतिः पुत्रहीनश्च भवति। यदा सिंहराश्यां शनैश्चरो भवेत्तदा जातकः शठोऽसत्यवादी निर्धनोऽपुत्रश्च भवति। यदा कन्याराश्यां शनैश्चरो भवेत्तदा जातक उग्रस्वभावी आप्तजनसेवको निर्धनोऽपुत्रश्च भवति। यदा तुलाराश्यां शनैश्चरो भवेत्तदा जातकः कुलश्रेष्ठो दीर्घायुर्धनवान् पुत्रवांश्च भवति। यदा वृश्चिकराश्यां शनैश्चरो भवेत्तदा जातको युवावस्थायामपुत्रो वृद्धावस्थायां च पुत्रवान् भवति। यदा धनूराश्यां शनैश्चरो

भवेत्तदा जातक: सुप्रसिद्धो बहुधनिक: सुपुत्रवांश्च भवति। यदा मकरराश्यां शनैश्चरो भवेत्तदा जातक: सुखपुत्रधनरहितो बहुशस्त्रसङ्ग्रही कुस्त्रीसङ्गी च भवति। यदा कुम्भराश्यां शनैश्चरो भवेत्तदा जातकोऽसत्यभाषी बुद्धिमान् धनसम्पन्न: पुत्रवांश्च भवति। यदा मीनराश्यां शनैश्चरो भवेत्तदा जातक: स्वधर्मरहितश्चतुरोऽभिमानी भोगी पुत्रहीनश्च भवति।

### ०४/ ०१ जन्मकुण्डल्यां पञ्चमभावेऽन्यभावधिपतीनां फलविचार: ।

यदा पञ्चमभावे लग्नेशो भवेत्तदा जातक: सुन्दरपुत्रवान् दानी प्रख्यातो दीर्घायुरुत्तमकर्मकर्ता लोककल्याणरतश्च भवति(परि.०१,क्र.४४) (परि.०१,क्र.४२)। यदा पञ्चमभावे द्वितीयेशो भवेत्तदा जातक:पुत्रेणप्रसन्नचित्त: कष्टतरकर्मणिप्रख्यात: कृपणो रुग्णश्च भवति। यदा पञ्चमभावे तृतीयेशो भवेत्तदा जातक: पुत्रेणसहोदरपुत्रेणसहोदरेणवाऽऽश्रितो दीर्घायु: परोपकारी च भवति। यदा पञ्चमभावे चतुर्थेशो भवेत्तदा जातक: पैतृकसम्पतिमान् दीर्घायु: स्वप्रयत्नेन पुरुषार्थेन प्रख्यात: पुत्रपालकश्च भवति। यदा पञ्चमभावे पञ्चमेशो भवेत्तदा जातक: पुत्रवान् प्रख्यातो विद्वान् सुखी च भवति। यदा पञ्चमभावे षष्ठेशो भवेत्तदा जातक: पुत्रेणदु:खी पुत्रेणमृत्युं प्राप्नोति। यदा षष्ठेश: शुभग्रहो भवेत्तदा जातको दरिद्रो दुष्ट: कपटी निकृष्टस्थानपतिश्च भवति। यदा पञ्चमभावे सप्तमेशो भवेत्तदा जातकस्य देवगुरुप्रसादात् विनयीपुत्रा भवन्ति तस्य भार्या सुशीला भवति। यदा पञ्चमभावेऽष्टमेश: शुभग्रहो भवेत्तदा जातक: पुत्रजन्मानन्तरं मृत्युं प्रप्नोति वा कपटि भवति। यदा पञ्चमभावेऽष्टमेश:पापग्रहो भवेत्तदा जातक:पुत्रहीनो भवति। यदा पञ्चमभावे नवमेशो भवेत्तदा जातक:सुकर्मरतो देवभक्तो गुरुपूजक: रूपवान् धर्मशील–प्रजावांश्च भवति। यदा पञ्चमभावे दशमेशो भवेत्तदा जातक: कलाज्ञो नृत्यगानसङ्गीतज्ञ: सत्कर्मरतो विडम्बनशीलो नृपेण धनिको मातृभक्तो रसायणशास्त्रज्ञश्च भवति(परि.०१, क्र.३६) (परि.०१, क्र.३७)। यदा पञ्चमभावैकादशो भवेत्तदा जातकोऽल्पायु: स्वकीयगुणसम्पन्नपुत्रस्यपिता च भवति। यदा पञ्चमभावे द्वादशेशो भवेत्तदा जातक: पुत्रहीनो भवति। यदा द्वादशेश: शुभग्रहो भवेत्तदा जातक: पुत्रवान् पितृधनसुखभाक् सामर्थ्यहीनश्च भवति

### ०५/ ०१ पञ्चमभावस्य स्वामिनो द्वादशभावेषु फलविचार:।

यदा पञ्चमेश: प्रथमभावे भवेत्तदा जातक: सत्कर्मरतो वेदज्ञ: शास्त्रज्ञ: प्रख्यातोऽल्पप्रजश्च भवति। यदा पञ्चमेश: शुभग्रहो द्वितीयभावे भवेत्तदा जातको धनवान् भवति। यदा पञ्चमेश: पापग्रहो द्वितीयभावे भवेत्तदा जातको दीन: कष्टप्राप्तभोजनो गीतसङ्गीतज्ञश्च भवति। यदा पञ्चमेशस्तृतीयभावे

भवेत्तदा जातको मधुरभाषी बन्धुपालकः पुत्रवान् बहुमान्यश्च भवति। यदा पञ्चमेशः शुभग्रहेण सह तृतीयभावे भवेत्तदा जातकः शान्तः सुखी नम्रकार्यसिद्धश्च भवति। यदा पञ्चमेशः पापग्रहस्तृतीयभावे भवेत्तदा जातकः पुत्रचिन्तायुक्तो भवति। यदा पञ्चमेशश्चतुर्थभावे भवेत्तदा जातकः पितृकर्मरतो मातृभक्तश्च भवति । यदा पञ्चमेशः पापग्रहश्चतुर्थभावे भवेत्तदा जातकः पितृद्वेषी भवति। यदा पञ्चमेशः पञ्चमभावे भवेत्तदा जातकः स्वमानी बुद्धिमान् प्रख्यातः पुत्रवान् लोकनेता च भवति। यदा पञ्चमेशः पापग्रहः षष्ठभावे भवेत्तदा जातको रोगी निर्धनोऽप्रतिष्ठितशत्रुयुक्तश्च भवति। यदा पञ्चमेशः पापग्रहेण सह षष्ठभावे भवेत्तदा जातको धनपुत्रहीनश्च भवति। यदा पञ्चमेशः सप्तमभावे भवेत्तदा जातको मधुरभाषी देवपुजको गुरुभक्तः पुत्रवान् सुकलत्रवांश्च भवति। यदा पञ्चमेशोऽष्टमभावे भवेत्तदा जातकः कटुवक्ता शठो हीनाङ्गः स्त्रीहीनो निर्धनो व्यङ्गवाग्भातृयुक्तश्च भवति। यदा पञ्चमेशो नवमभावे भवेत्तदा जातकः रूपवान् कविः विद्यावान् सङ्गीतनिपुणो नाट्यशास्त्रविशारदः पुत्रवान् नृपमान्यश्च भवति (परि.०१,क्र.४५)। यदा पञ्चमेशो नवमभावे नीचरश्या भवेत्तदा जातकः पुत्रचिन्तायुकतो भवति (परि.०१,क्र.७७)। यदा पञ्चमेशो दशमभावे भवेत्तदा जातकः सत्कर्मरतो मातृभक्तोऽमात्यप्रियो नृपकार्यरतश्च भवति। यदा पञ्चमेश एकादशभावे भवेत्तदा जातकः शूरःसङ्गीतकुशलो मित्रवत्सलःपुत्रवान् नृपसंमन्भाक् च भवति। यदा पञ्चमेशो द्वादशभावे भवेत्तदा जातकःपुत्रवान् विदेशगामी पुत्रक्लेशभाक् भवति। यदा पञ्चमेशः पापग्रहो द्वादशभावे भवेत्तदा जातकःपुत्रहीनो भवति।

## ०६/०१) पञ्चमभावस्योपरि सूर्यादिग्रहाणां पूर्णदृष्टिफलविचारः।

यदा पञ्चमभावस्योपरि सूर्यस्य दृष्टिर्भवेत्तदा[२] जातकोऽल्पस्त्रीसुखयुक्तो वातपीडितः प्रथमसन्तान–नाशेन चिन्तायुक्तश्च भवति। यदा पञ्चमभावस्योपरि चन्द्रस्य दृष्टिर्भवेत्तदा जातकःकुलशिरोमणिर्ग्रामणी–र्मित्रैःसुखी विदेशेक्रयविक्रयैर्धनिकश्च भवति। यदा पञ्चमभावस्योपरि मङ्गलस्य दृष्टिर्भवेत्तदा जातकःप्रथमसन्ताननाशेन दुःखी वृकोदरो भोजनार्थंभ्रमणशीलश्च भवति। यदा पञ्चमभावस्योपरि बुधस्यदृष्टिर्भवेत्तदा जातको यशस्वी ऐश्वर्यवान् कन्याचतुष्टयजन्मानन्तरंपुत्रवांश्च भवति। यदा पञ्चमभाव–स्योपरिगुरोर्दृष्टिर्भवेत्तदा जातकः शास्त्रज्ञो लक्ष्मीवान् दीर्घायुर्बहुपुत्रवांश्च भवति(परि.०१,क्र.५१)। यदा पञ्चमभावस्योपरि शुक्रस्य दृष्टिर्भवेत्तदा जातकः प्रथमपुत्रानन्तरं कन्यासन्ततिमान् विद्यावान् सुखी धनसंग्रही च भवति। यदा पञ्चमभावस्योपरि शनैश्चरस्य दृष्टिर्भवेत्तदा जातकोऽपुत्रः स्थिरमना यशस्वी

---

[२] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम्।

रोगी स्वकुलधर्मरतश्च भवति। यदा पञ्चमभावस्योपरि राहोर्दृष्टिर्भवेत्तदा जातकऽपुत्रो वृद्धावस्थायां भाग्यवान् राज्यसम्मान्भाक् श्रमादपिविफलोऽविघ्नश्च भवति ।

**०७/ ०१ पञ्चमभावेस्थितग्रहस्योपर्यन्यग्रहाणां दृष्टिविचारः।**

**०७/ ०२ बुद्धिर्विद्याविनयःप्रबन्धश्च ।**

यदा पञ्चमभावे मिथुनराश्यां सूर्यस्योपर्येकादशभावे स्थितस्य गुरोर्दृष्टिर्भवेत्तदा जातको विद्वान् बहुशास्त्रवेत्ता भवति। यदा पञ्चमभावे सिंहराश्यां सूर्यस्योपरि प्रथमभावे नवमभावे वा स्थितस्य गुरोर्दृष्टिर्भवेत्तदा जातको महाबुद्धिमान् भवति। यदा पञ्चमभावे धनुराश्यां सूर्यस्योपर्येकादशभावे स्थितस्य दृष्टिर्भवेत्तदा जातकः पुत्रवान् भवति। यदा पञ्चमभावे मीनराश्यां सूर्यस्योपर्येकादशभावे स्थितस्य चन्द्रस्य दृष्टिर्द्वितीयभावे स्थितस्य चन्द्रस्य त्रिपाददृष्टिर्भवेत्तदा जातकः पुत्रवान् भवति । यदा पञ्चमभावे मकरराश्यां कुम्भराश्यां वा सूर्यस्योपरि नवमभावे प्रथमभावैकादशभावे वा स्थितस्य गुरुदृष्टिर्भवेत्तदा जातको बुद्धिमान् भवति। यदा पञ्चमभावे मिथुनराश्यां चन्द्रस्योपर्येकादशभावे नवमभावे प्रथमभावे वा गुरोर्दृष्टिर्भवेत्तदा जातको बहुशास्त्रविद् भवति। यदा पञ्चमभावे कन्याराश्यां चन्द्रस्योपर्येकादशभावे स्थितस्य मङ्गलस्य दृष्टिर्भवेत्तदा जातकः शिल्पविद्यानिपुणो (भवननिर्माणकर्ता) भवति। यदा पञ्चमभावे कन्याराश्यां चन्द्रस्योपरि द्वितीयभावेस्थितस्य बुधस्य दृष्टिर्भवेत्तदा जातको ज्योतिर्विद् काव्यकर्ता प्राज्ञश्च भवति। यदा पञ्चमभावे कन्याराश्यां चन्द्रस्योपर्येकादशभावे स्थितस्य गुरोर्दृष्टिर्भवेत्तदा जातकः शीघ्रार्थबोधको भवति।

यदा पञ्चमभावे तुलाराश्यां चन्द्रस्योपर्येकादशभावे स्थितस्य बुधस्य दृष्टिर्भवेत्तदा जातकः कलाशिल्पशास्त्रविद् भवति। यदा पञ्चमभावे वृश्चिकराश्यां चन्द्रस्योपर्येकादशभावे नवमभावे प्रथमभावे वा स्थितस्य गुरोर्दृष्टिर्भवेत्तदा जातको विद्यावान् भवति। यदा पञ्चमभावे धनुराश्यां चन्द्रस्योपर्येकादश-भावे स्थितस्य बुधस्य दृष्टिर्भवेत्तदा जातको गूढविद्यानिपुणः शिल्पविद्यायुक्तश्च भवति। यदा पञ्चमभावे धनुराश्यां चन्द्रस्योपरि तृतीयभावे स्थितस्य शनैश्चरस्य दृष्टिर्भवेत्तदा जातको वशीकरणविद्यानिपुणो भवति। यदा पञ्चमभावे मेषराश्यां वृश्चिकराश्यां वा मङ्गलस्योपरि प्रथमभावे नवमभावैकादशभावे वा स्थितस्य गुरोर्दृष्टिर्भवेत्तदा जातको रसायणशास्त्रस्य शिल्पशास्त्रस्य विशिष्टविद्वान् भवति।

**षष्ठी दृष्टिः।**

यदा पञ्चमभावे तुलाराश्यां मङ्गलस्योपर्येकादशभावे स्थितस्य गुरोर्दृष्टिर्भवेत्तदा जातकः सङ्गीतविद्याकुशलो सङ्गणकयन्त्रविशारदश्च भवति। यदा पञ्चमभावे मिथुनराश्यां मङ्गलस्योपर्येकादशभावे स्थितस्य बुधस्य दृष्टिर्भवेत्तदा जातको गणितशास्त्रविद् भवति।

यदा पञ्चमभावे कर्कराश्यां मङ्गलस्योपरि प्रथमभावे नवमभावे वा स्थितस्य गुरोर्दृष्टिर्भवेत्तदा जातको विद्वान् भवति। यदा पञ्चमभावे सिंहराश्यां मङ्गलस्योपर्येकादशभावे स्थितस्य चन्द्रस्य दृष्टिर्भवेत्तदा जातको बुद्धिमान् भवति। यदा पञ्चमभावे सिंहराश्यां मङ्गलस्योपर्येकादशभावे स्थितस्य बुधस्य दृष्टिर्भवेत्तदा जातकः काव्यकलानिपुणो शिल्पशास्त्रनिपुणश्च भवति। यदा पञ्चमभावे सिंहराश्यां मङ्गलस्योपरि प्रथमभावे नवमभावैकादशभावे वा स्थितस्य गुरोर्दष्टिर्भवेत्तदा जातकोऽनेक शास्त्रविद् भवति।

यदा पञ्चमभावे धनुराश्यां मीनराश्यां वा मङ्गलस्योपर्येकादशभावे स्थितस्य चन्द्रस्य दृष्टिर्भवेत्तदा जातको विद्वान् भवति।यदा पञ्चमभावे मीनराश्यां मङ्गलस्योपर्येकादशभावे स्थितस्य बुधस्य दृष्टिर्भवेत्तदा जातको मेधावी विद्वान् शिल्पकलानिपुणश्च भवति। यदा पञ्चमभावे मेषराश्यां बुधस्योपर्येकादशभावे द्वितीयभावे स्थितस्य मङ्गलस्य दृष्टिर्भवेत्तदा जातको विशिष्टविद्यायुक्तो भवति। यदा पञ्चमभावे वृश्चिकराश्यां बुधस्योपरि दशमभावस्थितस्य मङ्गलस्य दृष्टिर्भवेत्तदा जातको विद्यानिपुणो भवति। यदा पञ्चमभावे सिंहराश्यां मङ्गलस्योपरि द्वितीयभावे स्थितस्य चन्द्रस्य दृष्टिर्भवेत्तदा जातको बुद्धिमान् भवति। यदा पञ्चमभावे सिंहराश्यां मङ्गलस्योपर्येकादशभावे स्थितस्य बुधस्य दृष्टिर्भवेत्तदा जातकोऽऽधुनीक-शिल्पविद्यानिपुणः काव्यकलारसिकश्च भवति। यदा पञ्चमभावे सिंहराश्यां बुधस्योपर्येकादशभावे स्थितस्य मङ्गलस्य दृष्टिर्भवेत्तदा जातको नपुंसको भवति। यदा पञ्चमभावे सिंहराश्यां बुधस्योपरि नवमभावे स्थितस्य गुरोर्दृष्टिर्भवेत्तदा जातकोऽतिप्राज्ञो बहुशास्त्रविद् भवति। यदा पञ्चमभावे धनुराश्यां बुधस्योपर्येकादशभावे स्थितस्य गुरोर्दष्टिर्भवेत्तदा जातक उत्तमस्मरणशक्तियुक्तो ज्ञानवांश्च भवति। यदा पञ्चमभावे धनुराश्यां बुधस्योपर्येकादशभावेस्थितस्य शुक्रस्य दृष्टिर्भवेत्तदा जातको लेखनकर्मरतो भवति। यदा पञ्चमभावे मकरराश्यां बुधस्योपर्येकादशबावे स्थितस्य गुरोर्दृष्टिर्भवेत्तदा जातको बहुशास्त्रवेत्ता भवति। यदा पञ्चमभावे तुलाराश्यां गुरोरुपर्येकादशभावे द्वितीयभावे वा स्थितस्य शुक्रस्य दृष्टिर्भवेदथवा वृषभराश्यां गुरोरुपर्येकादशभावे दशमभावे वा स्थितस्य शुक्रस्य दृष्टिर्भवेत्तदा जातकः कलाप्रियो

चित्रकारश्च भवति। यदा पञ्चमभावे मिथुनराश्यां गुरोरुपर्येकादशभावे स्थितस्य बुधस्य दृष्टिर्भवेत्तदा जातको ज्यौतिषादिगूढविद्यापारङ्गतः शिल्पविद्याविशारदश्च भवति।

**बुद्धिहीनयोगः**

यदा पञ्चमभावे कन्याराश्यां चन्द्रस्योपरि तृतीयभावे स्थितस्य शनैश्चरस्य दृष्टिर्भवेत्तदा जातको जडो विस्मृतमतिश्च भवति। यदा पञ्चमभावे मकरराश्यां चन्द्रस्योपरि द्वितीयभावे स्थितस्य सूर्यस्य त्रिपाददृष्टिर्भवेत्तदा जातको बुद्धिहीनो भवति।

**०७/ ०३ आत्मजतत्सम्बधिनौ लाभालाभौ परस्परव्यवहाराश्च ।**

यदा पञ्चमभावे मिथुनराश्यां कन्याराश्यां वा सूर्यस्योपर्येकादशभावे स्थितस्य गुरोर्दृष्टिर्भवेत्तदा जातकः पुत्रेणगर्विष्ठो भवति। यदा पञ्चमभावे मिथुनराश्यां कन्याराश्यां वा सूर्यस्योपर्येकादशभावे स्थितस्य शुक्रस्य दृष्टिर्भवेत्तदा जातको पुत्रसुखसम्पन्नो भवति।

यदा पञ्चमभावे मेषराश्यां चन्द्रस्योपर्येकादशभावे स्थितस्य शुक्रस्यदृष्टिर्भवेत्तदा जातकः सुपत्रवान् सुकन्यायुक्तश्च भवति। यदा पञ्चमभावे मिथुनराश्यां चन्द्रस्योपर्येकादशभावे स्थितस्य शुक्रस्य दृष्टिर्भवेत्तदा जातको सन्ततिमान् भवति। यदा मिथुनराश्यां चन्द्रस्योपर्येकादशभावे स्थितस्य शुक्रस्य दृष्टिर्भवेत्तदा जातक उत्तमपुत्रसुखभाक् भवति । यदा पञ्चमभावे सिंहराश्यां चन्द्रस्योपर्येकादशभावे स्थितस्य सूर्यस्य दृष्टिर्भवेत्तदा जातक उत्तम पुत्रसन्ततिवांश्च भवति। यदा पञ्चमभावे सिंहराश्यां चन्द्रस्योपरि दशमभावे स्थितस्य मङ्गलस्य दृष्टिर्भवेत्तदा जातक उत्तमपुत्रसंततिमान् भवति। यदा पञ्चमभावे धनुराश्यां चन्द्रस्योपरि दशमभावे एकादशभावे स्थितस्य शुक्रस्य दृष्टिर्भवेत्तदा जातकःसन्ततियुक्तो भवति। यदा पञ्चमभावे मकरराश्यां चन्द्रस्योपर्येकादशभावे स्थितस्य गुरोर्दृष्टिर्भवेत्तदा जातकः पुत्रवान् भवति। यदा पञ्चमभावे मकरराश्यां चन्द्रस्योपर्येकादशभावे स्थितस्य शुक्रस्य दृष्टिर्भवेत्तदा जातकः सन्ततियुक्तो भवति। यदा पञ्चमभावे मीनराश्यां चन्द्रस्योपरि नवमभावे प्रथमभावे वा स्थितस्य गुरोर्दृष्टिर्भवेत्तदा जातकः पुत्रवान् भवति। यदा पञ्चमभावे वृश्चिकराश्यां मङ्गलस्योपर्येकादशभावे स्थितस्य चन्द्रस्य दृष्टिर्भवेत्तदा जातकोऽधिकन्याययुक्तो भवति। यदा पञ्चमभावे वृषभराश्यां मङ्गलस्योपर्येकादशभावेभावे स्थितस्य बुधस्य दृष्टिर्भवेत्तदा जातकः पुत्रयुक्तो भवति। यदा पञ्चमभावे तुलाराश्यां मङ्गलस्योपर्येकदशभावे नवमभावे वा स्थितस्य बुधस्य दृष्टिर्भवेत्तदा जातकः सन्ततियुक्तो भवति। यदा पञ्चमभावे मिथुनराश्यां मङ्गलस्योपर्येकदशभावस्थितस्य गुरोर्दृष्टि–

र्भवेत्तदा जातकः पुत्रवान् भवति। यदा पञ्चमभावे कन्याराश्यां मङ्गलस्योपर्येकादशभावे स्थितस्य गुरोर्दृष्टिर्भवेत्तदा जातकः बहुपुत्रवान् भवति।

यदा पञ्चमभावे मेषराश्यां बुधस्योपरि प्रथमभावे स्थितस्य नवमभावैकादशभावे वा स्थितस्य गुरोर्दृष्टिर्भवेत्तदा जातकः पुत्रसुखयुक्तो भवति। यदा पञ्चमभावे वृश्चिकराश्यां बुधस्योपरि प्रथमभावै–कादशभावे वा स्थितस्य गुरोर्दृष्टिर्भवेत्तदा जातकः सुपुत्रवान् भवति। यदा पञ्चमभावे मिथुनराश्यां गुरोरुपर्येकादशभावे स्थितस्य सूर्यस्य दृष्टिर्भवेत्तदा जातकः पुत्रवान् भवति। यदा पञ्चमभावे मेषराश्यां गुरोरुपरि नवमभावे स्थितस्य सूर्यस्य दृष्टिर्भवेत्तदा जातको बहुपुत्रवान् भवति। यदा पञ्चमभावे वृश्चिक–राश्यां गुरोरुपर्येकादशभावे स्थितस्य सूर्यस्य दृष्टिर्भवेत्तदा जातकः पुत्रवान् भवति। यदा पञ्चमभावे वृषभराश्यां शुक्रस्योपरि दशमभावैकादशभावे वा स्थितस्य गुरोर्दृष्टिर्भवेत्तदा जातकः सुपुत्रवान् भवति। यदा पञ्चमभावे तुलाराश्यां शुक्रस्योपरि नवमभावैकादशभावेप्रथमभावे वा स्थितस्य गुरोर्दष्टिर्भवेत्तदा जातकः पुत्रवान् भवति। यदा पञ्चमभावे मीनराश्यां शुक्रस्योपरि नवमभावैकादशभावेप्रथमभावे वा स्थितस्य गुरोर्दृष्टिर्भवेत्तदा जातकोऽनेकपुत्रणां पिता भवति। यदा पञ्चमभावे मकरराश्यां शुक्रस्योपरि प्रथमभावेनवमभावैकादशभावे वा स्थितस्य गुरोर्दृष्टिर्भवेत्तदा जातको गीतसङ्गीतविशारदो भवति। यदा पञ्चमभावे कुम्भराश्यां शुक्रस्योपरि प्रथमभावेनवमभावैकादशभावे वा स्थितस्य गुरोर्दृष्टिर्भवेत्तदा जातको नृत्यगीतसङ्गीतविशारदो भवति। यदा पञ्चमभावे सिंहराश्यां शनैश्चरस्योपरि प्रथमभावे नवमभावे वा गुरोर्दृष्टिर्भवेत्तदा जातको मन्त्रादि उपायेन पुत्रवान् भवति। यदा पञ्चमभावे कन्याराश्यां गुरोरुपर्येकादशभावे स्थितस्य सूर्यस्य दृष्टिर्भवेत्तदा जातकः पुत्रसुखेन सुखी भवति। यदा पञ्चमभावे मिथुनराश्यां गुरोरुपर्येकादशभावे स्थितस्य चन्द्रस्य दृष्टिर्भवेत्तदा जातकः पुत्रवान् भवति। यदा पञ्चमभावे कन्याराश्यां गुरोरुपर्येकादशभावे प्रथमभावे वा स्थितस्य चन्द्रस्य दृष्टिर्भवेत्तदा जातकः पुत्रादिसुखयुक्तो भवति। यदा पञ्चमभावे कन्याराश्यां गुरोरुपर्येकादशभावे स्थितस्य शुक्रस्य दृष्टिर्भवेत्तदा जातकः सुपुत्रवान् भवति। यदा पञ्चमभावे मिथुनराश्यां गुरोरुपर्येकादशभावे स्थितस्य शुक्रस्य दृष्टिर्भवेत्तदा जातकः पुत्रवान् भवति। यदा पञ्चमभावे तुलाराश्यां शुक्रस्योपर्येकादशभावे स्थितस्य चन्द्रस्य दृष्टिर्भवेत्तदा जातकः कुलीनपुत्राणां पिता भवति।

यदा पञ्चमभावे सिंहराश्यां सूर्यस्योपर्यष्टमभावे तृतीयभावे वा स्थितस्य शनैश्चरस्य दृष्टिर्भवेत्तदा जातको नपुंसको भवति। यदा पञ्चमभावे सिंहराश्यां चन्द्रस्योपर्यष्टमभावे स्थितस्य शनैश्चरस्य

दृष्टिर्भवेत्तदा जातकोऽपुत्रो भवति । यदा पञ्चमभावे वृश्चिकराश्यां चन्द्रस्योपर्यष्टमभावे तृतीयभावे वा स्थितस्य शनैश्चरस्य दृष्टिर्भवेत्तदा जातको नीचसंततियुक्तश्च भवति। यदा पञ्चमभावे तुलाराश्यां बुधस्योपर्येकादशभावे स्थितस्य शनैश्चरस्य अथवा यदा पञ्चमभावे वृषभराश्यां बुधस्योपर्येकादशभावे अष्टमभावे वा स्थितस्य शनैश्चरस्य दृष्टिर्भवेत्तदा जातकः पुत्रदुःखेन दुःखी वा अपुत्रोभवति। यदा पञ्चमभावे मेषराश्यां गुरोरुपर्यष्टमभावे स्थितस्य शनैश्चरस्य दृष्टिर्भवेत्तदा जातकः सन्ततिप्राप्तिकार्येविघ्नमनुभवति। यदा पञ्चमभावे कर्कराश्यां गुरोरुपर्येकादशभावे स्थितस्य सूर्यस्य दृष्टिर्भवेत्तदा जातकः सन्ततिबाधायुक्तो भवति ।

यदा पञ्चमभावे कर्कराश्यां शनैश्चरस्योपर्येकादशभावे स्थितस्य सूर्यस्य दृष्टिर्भवेत्तदा जातकः पुत्रचिन्तायुक्तो भवति। यदा पञ्चमभावे सिंहराश्यां शनैश्चरस्योपर्येकादशभावे स्थितस्य मङ्गलस्य दृष्टिर्भवेत्तदा जातकः स

### ०८/०१ पञ्चमभावे सूर्यस्य विशिष्टफलविचारः।

यदा सूर्यः स्वोच्चराश्यां [३] भवेत्तदा जातको निर्दयोऽल्पसन्ततिमान् भवति। यदा सूर्यः स्वोच्चनवांशे[४] भवेत्तदा जातकः सुखी सकलसिद्धिमान् भवति। यदा सूर्यो होरादिषड्वर्गेषु शुभो[५] भवेत्तदा जातको मनोहरः सौभाग्यशाली च भवति। यदा सूर्यो मूलत्रिकोणराश्यां[६] भवेत्तदा जातको गुणहीनपुत्रवान् भवति। यदा सूर्यो मित्रग्रहस्य राश्यां [७] भवेत्तदा जातक उग्रस्तेजस्वी पुत्रवान् भवति । यदा सूर्यो मित्रग्रहस्य नवमांशे[८] भवेत्तदा जातकः सुशीलश्चरित्रवान् संततियुक्तो भवति। यदा सूर्यो वर्गोत्तमावस्थायां शुभो[९] भवेत्तदा जातकस्य पुत्राः कुसङ्गत्या सङ्कटेन च पीडिता भवन्ति। यदा सूर्यः शत्रुग्रहस्य राश्यां[१०]

---

[३] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम्।
[४] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम्।
[५] यदा होरादिषड्वर्गेषु सूर्य उच्चराश्यां स्वराश्यां मूलत्रिकोणराश्यामधिमित्रराश्यां मित्रराश्यां वा भवेत्तदा स शुभो मन्यते।
[६] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम्।
[७] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम्।
[८] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम्।
[९] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम्।
[१०] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम्।

भवेत्तदा जातको विदेशवासी पुत्रवाश्च भवति। यदा सूर्यः शत्रुग्रहस्य नवांशे[११] भवेत्तदा जातकस्य पत्नी परपुरुषेण पुत्रवती भवति। यदा सूर्यः होरादिषड्वर्गेषु पापग्रहस्य राश्यां[१२] भवेत्तदा जातको नष्टगर्भयुक्तो भवति। यदा सूर्यो नीचराश्यां[१३] भवेत्तदा जातकस्य पुत्रो जायते पश्चान्निधनं च भवति। यदा सूर्यो नीचनवांशे[१४] भवेत्तदा जातकस्य कुपुत्रा भवन्ति।

## ०८/०२ पञ्चमभावे चन्द्रस्य विशिष्टफलविचारः।

यदा चन्द्रःस्वोच्चराश्यां[१५] भवेत्तदा जातको विशालाक्ष्याः कन्यायाः पिता भवति। यदा चन्द्रः-स्वोच्चनवांशे[१६] भवेत्तदा जातको रूपसम्पन्नायाः कन्यायाः पिता भवति।यदा चन्द्रो होरादिषड्वर्गेषु शुभो[१७] भवेत्तदा जातकः सौभाग्यवत्या मनोहरायाश्च कन्यायाः पिता भवति। यदा चन्द्रो मूलत्रिकोण-राश्यां[१८] भवेत्तदा जातकः प्रगल्भपुत्रीपिता भवति। यदा चन्द्रो मित्रग्रहस्य राश्यां[१९] भवेत्तदा जातकः शुभशीलायाः कन्यायाः पिता भवति। यदा चन्द्रो मित्रग्रहस्य नवांशे[२०] भवेत्तदा जातकः पवित्रायाः कन्यायाः पिता भवति।यदा चन्द्रो वर्गोत्तमावस्थायां[२१] भवेत्तदा जातकः पतिव्रतायाः कन्यायाः पिता भवति। यदा चन्द्रः शत्रुग्रहस्य राश्यां[२२] भवेत्तदा जातकः कुस्वभावायाः कन्यायाः भवति। यदा चन्द्रः शत्रुग्रहस्य नवांशे[२३]भवेत्तदा जातकः कुरूपकन्यायाः पिता भवति। यदा चन्द्रो होरादिषड्वर्गेषु पापग्रहस्य राश्यां[२४] भवेत्तदा जातकःकुसन्तत्या पीडितो भवति तस्य कन्या परपुरुषगामिनी भवति । यदा चन्द्रो

---

[११] विशेषार्थं परिशिष्टम् -०३ द्रष्टव्यम्।
[१२] यदा षड्वर्गेषु सूर्यःशनैश्चरक्षेत्रीयो भवेत्तदा स पापसंज्ञकः कथ्यते ।
[१३] विशेषार्थं परिशिष्टम् -०३ द्रष्टव्यम्।
[१४] विशेषार्थं परिशिष्टम् -०३ द्रष्टव्यम्।
[१५] विशेषार्थं परिशिष्टम् -०३ द्रष्टव्यम्।
[१६] विशेषार्थं परिशिष्टम् -०३ द्रष्टव्यम्।
[१७] यदा होरादिषड्वर्गेषु चन्द्र उच्चराश्यां स्वराश्यां मूलत्रिकोणराश्यामधिमित्रराश्यां मित्रराश्यां वा भवेत्तदा स शुभो मन्यते।
[१८] विशेषार्थं परिशिष्टम् -०३ द्रष्टव्यम्।
[१९] विशेषार्थं परिशिष्टम् -०३ द्रष्टव्यम्।
[२०] विशेषार्थं परिशिष्टम् -०३ द्रष्टव्यम्।
[२१] विशेषार्थं परिशिष्टम् -०३ द्रष्टव्यम्।
[२२] विशेषार्थं परिशिष्टम् -०३ द्रष्टव्यम्।
[२३] विशेषार्थं परिशिष्टम् -०३ द्रष्टव्यम्।
[२४] यदा षड्वर्गेषु चन्द्रो मङ्गलशनैश्चरक्षत्रीयो भवेत्तदा स पापग्रहः कथ्यते ।

नीचराश्यां[२५] भवेत्तदा जातकः सुरूपकन्यायाः पिता भवति। यदा चन्द्रो नीचनवांशे[२६] भवेत्तदा जातकः दुष्टबुद्धेः कन्यायाः पिता भवति।

## ०८/ ३ पञ्चमभावे मङ्गलस्य विशिष्टफलविचारः।

यदा मङ्गलः स्वोच्चनवांशे[२७] भवेत्तदा जातको दीर्घायुरल्पसन्ततिमांश्च भवति। यदा मङ्गलः स्वोच्चनवांशे[२८] भिवेत्तदा जातको रुग्णपुत्रवान् भवति। यदा मङ्गलो होरादिषड्वर्गेषु शुभो[२९] भवेत्तदा जातको व्रणपीडितपुत्रवान् भवति। यदा मङ्गलो मूलत्रिकोणराश्यां[३०] भवेत्तदा जातकस्य पुत्रा याचका भवन्ति । यदा मङ्गलो मित्रग्रहस्य राश्यां[३१] भवेत्तदा जातकः कृपणपुत्रपिता भवति। यदा मङ्गलो मित्रग्रहस्य नवांशे[३२] भवेत्तदा जातकोऽन्यायरत पुत्रवान् भवति। यदा मङ्गलो वर्गोत्तमावस्थायां शुभो[३३] भवेत्तदा जातकः शत्रुविजयीपुत्रवान् भवति। यदा मङ्गलः शत्रुग्रहस्यराश्यां[३४] भवेत्तदा जातको व्रणपीडितपुत्रवान् भवति। यदा मङ्गलः शत्रुग्रहस्यनवांशे[३५] भवेत्तदा जातको मलिनपुत्रवान् भवति। यदा मङ्गलः षड्वर्गेषु पापग्रहस्य राश्यां[३६] भवेत्तदा जातकस्य पुत्राः पापरता भवन्ति। यदा मङ्गलो नीचराश्यां[३७] भवेत्तदा जातकः परस्त्रीलोलुपपुत्रपिता भवति। यदा मङ्गलो नीचनवांशे[३८] भवेत्तदा जातकोऽल्पायुपुत्रपिता भवति।

## ०८/ ०४ पञ्चमभावे बुधस्य विशिष्टफलविचारः।

---

[२५] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम्।
[२६] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम्।
[२७] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम्।
[२८] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम्।
[२९] यदा होरादिषड्वर्गेषु मङ्गल उच्चराश्यां स्वराश्यां मूलत्रिकोणराश्यामधिमित्रराश्यां मित्रराश्यां वा भवेत्तदा स शुभो मन्यते।
[३०] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम्।
[३१] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम्।
[३२] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम्।
[३३] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम्।
[३४] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम्।
[३५] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम्।
[३६] यदा षड्वर्गेषु मङ्गलः शनैश्चरक्षेत्रीयो भवेत्तदा स पापसंज्ञकः कथ्यते ।
[३७] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम्।
[३८] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम्।

**षष्ठी दृष्टि:।**

यदा बुध: स्वोच्चराश्यां[३९] भवेत्तदा जातक: सुभग–सुन्दर–मनोज्ञ–पुत्रवान् भवति।

यदा बुध: स्वोच्चनवांशे[४०] भवेत्तदा जातको विनीतपुत्रवान् भवति । यदा बुधो होरादिषड्वर्गेषु शुभो[४१] भवेत्तदा विनयहीनपुत्रस्यपिता भवति। यदा बुधो मूलत्रिकोणराश्यां[४२] भवेत्तदा जातक: सुपुत्रवान् भवति यदा बुधो मित्रग्रहस्य राश्यां[४३] भवेत्तदा जातको नीरोगीसत्पुत्राणां जातको भवति। यदा बुधो मित्रग्रहस्य नवांशे[४४] भवेत्तदा जातक: शास्त्रदक्षपुत्रस्य पिता भवति। यदा बुधो वर्गोत्तमावस्थायां शुभो[४५] भवेत्तदा जातको नीतिकुशल–कार्यदक्ष–लोकप्रसिद्धपुत्रस्य पिता भवति। यदा बुध: शत्रुग्रहस्य राश्यां[४६] भवेत्तदा जातक: पिशुनस्वभावयुक्तपुत्रस्यपिता भवति। यदा बुधो षड्वर्गेषु पापग्रहस्य राश्यां[४७] भवेत्तदा जातक: पुत्रचिन्तायुक्तो भवति। यदा बुधो नीचराश्यां[४८] भवेत्तदा जातको दु:खीपुत्रस्य पिता भवति। यदा बुधो नीचनवांशे[४९] भवेत्तदा जातक: कन्यासंततियुक्तो भवति। यदि पुत्रो भवेत्तदा दोषयुक्तो निर्दयो वा भवति।

## ०८/०५ पञ्चमभावे गुरो विशिष्टफलविचार:।

यदा गुरु: स्वोच्चराश्यां[५०] स्थितोभवेत्तदा जातको दीर्घायुर्भवति। यदा गुरु: स्वोच्च–नवमांशे[५१] भवेत्तदा जातक: सुन्दरपुत्रवान् भवति। यदा गुरुर्होरादिषड्वर्गेषु शुभो[५२] भवेत्तदा जातकस्य

---

[३९] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम्।
[४०] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम्।
[४१] यदा होरादिषड्वर्गेषु बुध उच्चराश्यां स्वराश्यां मूलत्रिकोणराश्यामधिमित्रराश्यां मित्रराश्यां वा भवेत्तदा स शुभो मन्यते।
[४२] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम्।
[४३] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम्।
[४४] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम्।
[४५] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम्।
[४६] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम्।
[४७] यदा षड्वर्गेषु बुधो मङ्गलशनैश्चरक्षत्रीयो भवेत्तदा स पापग्रह: कथ्यते ।
[४८] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम्।
[४९] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम्।
[५०] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम्।
[५१] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम्।
[५२] यदा होरादिषड्वर्गेषु गुरु उच्चराश्यां स्वराश्यां मूलत्रिकोणराश्यामधिमित्रराश्यां मित्रराश्यां वा भवेत्तदा स शुभो मन्यते।

पुत्रः प्रसिद्धो भवति। यदा गुरुर्मूलत्रिकोणराश्यां[५३] भवेत्तदा जातकस्य पुत्रः पराक्रमी भवति। यदा गुरुर्मित्रग्रहस्य राश्यां[५४] भवेत्तदा नीचस्वभावयुक्तक्रोधीपुत्रस्यपिता भवति। यदा गुरुर्मित्रग्रहस्य नवांशे[५५] भवेत्तदा तस्करपुत्रस्य पिता भवति। यदा गुरुः शत्रुग्रहस्य राश्यां[५६] भवेत्तदा जातको विलम्बेन पुत्रसुख प्राप्नोति। यदा गुरुः शत्रुग्रहस्य नवांशे[५७] भवेत्तदा जातकस्य पुत्रः शत्रुतुल्य भवति। यदा गुरुर्होरादिषड्वर्गेषु पापग्रहस्यराश्यां[५८] भवेत्तदा जातकस्य पुत्रो मित्रहीनो भवति। यदा गुरुर्नीचराश्यां[५९] भवेत्तदा जातकस्य पुत्रः सदैव दुःखी भवति।यदा गुरुर्नीचनवमांशे[६०] भवेत्तदा जातकस्य पुत्रः पापरतो भवति।

## ०८/०६ पञ्चमभावे शुक्रस्य विशिष्टफलविचारः।

यदा शुक्रः स्वोच्चराश्यां[६१] भवेत्तदा जातकः सुभगकन्यापिता भवति। यदा शुक्रःस्वोच्च-नवांशे[६२] भवेत्तदा जातको दौहीत्रसम्पन्नो भवति। यदा शुक्रो होरादिषड्वर्गेषु शुभो[६३] भवेत्तदा जातकस्य रूपवत्यः कन्या भवन्ति। यदा शुक्रो मूलत्रिकोणराश्यां[६४] भवेत्तदा शत्रुविजयिसंतानपिता भवति। यदा शुक्रो मित्रग्रहस्य राश्यां[६५] भवेत्तदा पतिपरायणकन्यापिता भवति। यदा शुक्रो मित्रग्रहस्य नवांशे[६६] भवेत्तदा जातकस्य कन्याः सत्यादिगुणैर्भूषिता धर्मनिष्ठाश्च भवन्ति। यदा शुक्रो वर्गोत्तमनवांशे शुभो[६७] भवेत्तदा

---

[५३] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम्।
[५४] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम्।
[५५] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम्।
[५६] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम्।
[५७] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम्।
[५८] यदा षड्वर्गेषु गुरुः शनैश्चरक्षेत्रीयो भवेत्तदा स पापग्रहः कथ्यते ।
[५९] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम्।
[६०] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम्।
[६१] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम्।
[६२] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम्।
[६३] यदा होरादिषड्वर्गेषु शुक्र उच्चराश्यां स्वराश्यां मूलत्रिकोणराश्यामधिमित्रराश्यां मित्रराश्यां वा भवेत्तदा स शुभो मन्यते।
[६४] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम्।
[६५] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम्।
[६६] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम्।
[६७] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम्।

जातकस्य कन्यास्तेजस्विन्यो भवन्ति।यदा शुक्रः शत्रुग्रहस्य राश्यां[६८] भवेत्तदा जातकस्य कन्याः पापरता भवन्ति। यदा शुक्रः शत्रुग्रहस्य नवांशे[६९] भवेत्तदा जातकस्य कन्याः सुखहीनाः कृतघ्नाश्च भवन्ति। यदा शुक्रः होरादिषड्वर्गेषु पापग्रहस्य राश्यां[७०] भवेत्तदा कृपणकन्यापिता भवति। यदा शुक्रः नीचराश्यां[७१] भवेत्तदा जातकस्य कन्याः सुरूपाः विविधस्वभावयुक्तश्च भवन्ति। यदा शुक्रो नीचनवांशे[७२] भवेत्तदा जातकस्य कन्याः परपुरुषरताः भवन्ति।

## ०८/०७ पञ्चमभावे शनैचरस्य विशिष्टफलविचारः।

यदा शनैश्चरः स्वोच्चराश्यां[७३] भवेत्तदा जातकस्य शत्रुयुक्तपुत्राणां पिता भवति। यदा शनैश्चरः स्वोच्चनवांशे[७४] भवेत्तदा जातकस्य पुत्रानैकरोगयुक्ताः भवन्ति। यदा शनैश्चरः होरादिषड्वर्गेषु शुभो[७५] भवेत्तदा जातकः कृतघ्नपुत्रवान् भवति। यदा शनैश्चरो मूलत्रिकोणराश्यां[७६] भवेत्तदा जातकस्यपुत्रो मद्यसेवी भवति। यदा शनैश्चरो मित्रग्रहस्य राश्यां[७७] भवेत्तदा कृषीवलपुत्रस्य पिता भवति। यदा शनैश्चरो मित्रग्रहस्य नवांशे[७८] भवेत्तदा जातकस्य पुत्रः पशुपालको भवति। यदा शनैश्चरो वर्गोत्तमावस्थायां शुभो[७९] भवेत्तदा जातकस्य पुत्रो नेता भवति । यदा शनैश्चरः शत्रुग्रहस्य राश्यां[८०] भवेत्तदा जातकस्य पुत्रो भीरु भवति। यदा शनैश्चरःशत्रुग्रहस्य नवांशे[८१] भवेत्तदा जातकस्य पुत्रो भीरुः प्रेतादिग्रस्तो भवति । यदा शनैश्चरः होरादिषड्वर्गेषु पापग्रहस्य राश्यां[८२] भवेत्तदा जातकस्य पुत्रो रुग्णो भवति। यदा शनैश्चरो

---

[६८] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम्।
[६९] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम्।
[७०] यदा षड्वर्गेषु शुक्रः मङ्गलक्षेत्रीयो भवेत्तदा स पापग्रहः कथ्यते ।
[७१] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम्।
[७२] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम्।
[७३] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम्।
[७४] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम्।
[७५] यदा होरादिषड्वर्गेषु शनैश्चर उच्चराश्यां स्वराश्यां मूलत्रिकोणराश्यामधिमित्रराश्यां मित्रराश्यां वा भवेत्तदा स शुभो मन्यते।
[७६] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम्।
[७७] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम्।
[७८] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम्।
[७९] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम्।
[८०] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम्।
[८१] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम्।
[८२] यदा षड्वर्गेषु शनैश्चरः सूर्यमङ्गलक्षेत्रीयो भवेत्तदा स पापग्रहः कथ्यते ।

नीचराश्यां[८३] भवेत्तदा जातकस्य पुत्रो आत्मघातं करोति। यदा शनैश्चरो नीचनवांशे[८४] भवेत्तदा जातकस्य पुत्रोऽकालग्रस्तो भवति।

## ०९/०१ बुद्धिर्विद्याविनयःप्रबन्धश्च।

यदा लग्नेशः पञ्चमभावे पञ्चमेशो लग्नभावे भवेत्तदा जातको विद्वान् सद्गुणसम्पन्नो ज्ञानी च भवति। यदा पञ्चमेशः पापग्रहेण सह पञ्चमभावे लग्नभावे चन्द्रो भवेत्तदा जातकोऽरबीभाषाविद् पारसीभाषाविद् वा भवति। यदा पञ्चमभावकारकगुरुः पञ्चमेशो वा गोपुरादिविशिष्टावस्थायां[८५] भवेत्तदा जातको मेधावी भवति। यदा पञ्चमभावे शुभराश्यां शुभग्रहः शुभग्रहदृष्टियुक्तो भवेत्तदा जातको मेधावी भवति। यदा पञ्चमभावकारको गुरुः शुभषष्ट्यंशे शुभग्रहेण दृष्टोभवेत्तदा जातको मेघावी भवति। यदा चन्द्रमङ्गलबुधानामुपरि बलवान् गुरोः शुक्रस्य वा दृष्टिर्भवेत्तदा जातकः प्रत्युत्पन्नमतिर्भवति। यदा पञ्चमेशः शुभग्रहेण सह केन्द्रभावे[८६] भवेत्तदा जातकः कुशाग्रमतिर्भवति। यदा पञ्चमभावे गुरुः पञ्चमेशः शुभराश्यां भवेत्तदा जातको बुद्धिमान् भवति। यदा पञ्चमभावे बुधो भवेत्तदा जातको बुद्धिमान् भवति। यदा पञ्चमेशः स्वोच्चराश्यां शुभकर्तरीयोगे[८७] भवेत्तदा जातको विशिष्टबुद्धिमान् भवति। यदा पञ्चमभावकारकगुरुः पञ्चमभावे नवमभावे वा भवेत्तदा जातको मेधावी भवति (परि.०१,क्र.४५)। यदा गुरुः स्वनवांशे शुभषष्ट्यंशे[८८] गोपुरादिविशिष्टावस्थायां[८९] शुभग्रहस्यनवांशे वा शुभग्रहेण दृष्टोभवेत्तदा जातको त्रिकालज्ञानी भवति। यदा बलवन्तां पञ्चमेशगुरुबुधानां युतिः केन्द्रभावे[९०] त्रिकोणभावे[९१] वा भवेत्तदा जातक इङ्गितज्ञो भवति। यदा पञ्चमभावे सूर्येण सह बुधो मिथुनराश्यां कन्याराश्यां वा भवेत्तदा जातको विद्यालक्ष्मीयुक्तश्च भवति। यदा मङ्गलबुधयोर्युतिः शुभराश्यां भवेत्तदा जातको विद्वन्मनोरञ्जको भवति। यदा मङ्गलबुधयोर्युतिः शनैश्चरक्षेत्रे पञ्चमभावे द्वितीयभावे वा सूर्येण पाददृष्टियोगेन युक्ता

---

[८३] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम्।
[८४] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम्।
[८५] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम्।
[८६] विशेषार्थं परिशिष्टम् –०४ द्रष्टव्यम्।
[८७] यदा पञ्चमेशात् द्वितीयभावे द्वादशभावे च शुभग्रहो (मार्गी) भवेत्तदा शुभकर्तरीयोगो भवति।
[८८] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम्।
[८९] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम्।
[९०] विशेषार्थं परिशिष्टम् –०४ द्रष्टव्यम्।
[९१] विशेषार्थं परिशिष्टम् –०४ द्रष्टव्यम्।

भवेत्तदा जातको विद्वन्मनोरञ्जको भवति। यदा बलवान् पञ्चमेशः केन्द्रभावे[९२] त्रिकोणभावे[९३] वा भवेत्तदा जातको विद्वान् भवति(परि.०१,क्र.४६) (परि.०१,क्र.४५) (परि.०१,क्र.४७) (परि.०१,क्र.१०८)। यदा पञ्चमेशो दशमभावे एकादशभावे वा भवेत्तदा जातको विद्वान् भवति। यदा पञ्चमेशो गुरुर्वा स्वोच्चराश्यां स्वराश्यां मित्रग्रहराश्यां मूलत्रिकोणराश्यां वा केन्द्रभावे त्रिकोणभावे वा शुभग्रहेणयुतो दृष्टो वा भवेत्तदा जातको विद्यानिपुणो भवति(परि.०१,क्र.४६)। यदा पञ्चमभावे शुकः स्वाच्चरश्यां उच्चराश्यां वा मङ्गलेन सह भवेत्तदा जातकः कलानिपुणो भवति (परि.०१,क्र.४४) (परि.०१, क्र.४९)। यदा पञ्चमभावकारको गुरुः स्वोच्चराश्यां मृदुषष्ट्यंशे गोपुरादिविशिष्टावस्थायां शुभग्रहेण दृष्टो युतो वा भवेत्तदा जातको भविष्यवेत्ता भवति। यदा पञ्चमेशनवमेशयोः परस्परनवपञ्चमदृष्टिर्भवेत्तदा जातको विद्वान् भवति (परि.०१,क्र.५०)। यदा पञ्चमभावकरकगुरुःपञ्चमात् पञ्चमभावे शुभग्रहेण युतो दृष्टो वा भवेत्तथा पापग्रहस्य[९४] दृष्टिर्हीनो भवेत्तदा जातको विद्यावान् भवति (परि.०१,क्र.७८)। यदा पञ्चमेशनवमेशयोर्युतिस्त्रिकोणभावे केन्द्रभावे वा भवेत्तदा जातको विद्वान् भवति (परि.०१,क्र.१०८)।

यदा पञ्चमेशः स्वराशिं विहाय षष्ठभावेऽष्टमभावे द्वादशभावे वा पापग्रहेण युतो दृष्टो वा भवेत्तदा जातको मन्दबुद्धिर्भवति। यदा पञ्चमेशो गुरुर्वा पापकर्तरीयोगे[९५] भवेत्तदा जातको मन्दबुद्धिर्भवति। यदा पञ्चमेशोऽदृश्यगोलार्द्धे (सप्तमभावारभ्य द्वादशभावपर्यन्तम्) भवेत्तदा जातकोऽल्पबुद्धियुक्तो भवति। यदा पञ्चमभावे सूर्यचन्द्रयोयुर्तिभवेत्तदा जातकश्चञ्चलघीर्भवति। यदा पञ्चमभावकारको गुरुर्नीचराश्यां केन्द्रभावे भवेत्तदा जातकश्चञ्चलाघीर्भवति। यदा पञ्चमेशोऽस्तङ्गतावस्थायां पापग्रहेणयुतो दृष्टो वा भवेत्तदा जातको विद्याहीनो भवति। यदा सर्वेग्रहाः स्वनीचराशीषु शत्रुनवांशे दशमस्थानादन्येषुस्थानेषु स्थिता भवेयुस्तदा जातको विद्याहीनो भवति। यदा पञ्चमेशबुधगुरूणां युतिः त्रिकभावे[९६] भवेत्तदा जातको विद्याहीनो भवति। यदा पञ्चमेशः क्रूरषष्ट्यंशे भवेत्तदा जातको विद्याहीनो भवति। यदा पञ्चमभावे कारको गुरुः क्रूरषष्ट्यंशे भवेत्तदा जातको विद्याहीनो भवति। यदा पञ्चमभावे गुलिक[९७] शनैश्चरौ शुभदृष्टिहीनोयुतिहीनौ च भवेतां तदा जातको बुद्धिहीनो भवति। यदा पञ्चमभावे नीचराश्यां गुरुर्भवेत्तदा

[९२] विशेषार्थं परिशिष्टम् –०४ द्रष्टव्यम्।
[९३] विशेषार्थं परिशिष्टम् –०४ द्रष्टव्यम्।
[९४] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम्।
[९५] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम्।
[९६] विशेषार्थं परिशिष्टम् –०४ द्रष्टव्यम्।
[९७] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम्।

जातको विद्याबुद्धिहीनो भवति।यदा पञ्चमभावे चन्द्रस्योपरि सूर्यमङ्गलशनैश्चराणां दृष्टिर्भवेत्तदा जातको बुद्धिहीनो भवति। यदा पञ्चमभावे कोऽपि ग्रहो नीचराश्यां गुरुश्च षष्ठभावेऽष्टमभावे द्वादशभावे वा पापग्रहेण युतो दृष्टो वा भवेत्तदा जातको विद्याहीनो भवति (परि.०१,क्र.४८) ।

**०९/०२ गर्भस्थितिः।**

**गर्भपातयोगः।**

यदा कस्याश्चित् स्त्रियः पञ्चमभावे पापग्रहः पापग्रहेण दृष्टो युतो वा भवेत्तदा सा गर्भपातेन पीडिता भवति।यदा कस्याश्चित् स्त्रियः पञ्चमेशो गुरुर्वापापग्रहेण युतो दृष्टो वा भवेत्तदा सा गर्भधारणाऽसमर्था भवति। यदा कस्याश्चित् स्त्रियः पञ्चमेशो गुरुः पञ्चमभावो वा पापकर्तरीयोगे[९८] भवेत्तदा सा गर्भपतनेन दुःखिता भवति। यदा कस्याश्चित् स्त्रियः पञ्चमेशः पापग्रहेण सह त्रिकभावे[९९] भवेत्तदा सा गर्भधारणाऽसमर्था भवति। यदा कस्याश्चित् स्त्रियः पञ्चमभावे पापग्रहेण सह त्रिकभावाधिपतिर्भवेत्तदा सा गर्भपातेन पीडिता भवति। यदा कस्याश्चित् स्त्रियः पञ्चमभावस्य नवांशराशिः शुभग्रहेणदृष्टा भवेत्तथा पापग्रहाणां यादृशी दृष्टिर्भवेत्तदा तादृशसंख्यया गर्भपातो भवति। यदा कस्याश्चित् स्त्रियः षड्वर्गेषु पञ्चमेशगुरू निर्बलौ भवेतां तदा सा गर्भधारणाऽसमर्था भवति।

यदा पञ्चमभावे सूर्येण सह राहोःकेतोःशनैश्चरस्य प्रजापतेःयमस्य वरुणस्य वा युतिर्भवेत्तदा तस्या गर्भस्थित बालको नश्यति । यदा पञ्चमभावे नीचराश्यां चन्द्रस्योपर्येकाशभावे स्थितस्य मङ्गलस्य तृतीयभावे स्थितस्य शनैश्चरस्य दृष्टिर्भवेत्तदा सा गर्भपातेन पीडिता भवति। यदा पञ्चमभावे नीचराश्यां सूर्यस्योपर्येकाशभावे स्थितस्य शनैश्चरस्य दृष्टिर्भवेत्तदा सा गर्भपातेन पीडिता भवति।

**०९/०३ आत्मजतत्सम्बधिनौ लाभालाभौ परस्परव्यवहाराश्च ।**

गुरुग्रहात् लग्नात् वा पञ्चमभावे पुत्रसुखविचारः कर्तव्यः। गुरुर्लग्नाद्वा यो बली तस्मात् नवमभावे पुत्रसुखविचारः कर्तव्यः। तस्यां नवमेशस्यदशायां पुत्रसुखमिच्छेत्।

**(अ)सन्ततिप्राप्तिविचारः।**

विवाहानन्तरं पुत्रेशपुत्रकारकपुत्रभावदृष्टग्रहपुत्रभावस्थग्रहाणां स्पष्टराश्यादिमाने नवांशराशेर्वा गोचरभ्रमणेन यदा गुरोरागमनं भवेत्तदा पुत्रप्राप्तिर्भवति। स्पष्टपञ्चमेशलग्नेशयोः राश्यादिमाने

---

[९८] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम्।

[९९] विशेषार्थं परिशिष्टम् –०४ द्रष्टव्यम्।

राश्यादिमानात् त्रिकोणस्थाने वा यदा गोचरावस्थयां गुरुरागच्छेत्तदा जातकः सन्ततियुक्तो भवति। यदा जन्मसमये पञ्चमेशः पञ्चमभावकारको गुरुः पञ्चमभावस्योपरि दृष्टिकर्ता ग्रहः पुत्रभावस्थग्रहाणां राश्यादिमाने गोचरभ्रमणवशात् गुरुरागतो भवेत्तदा जातकः सन्ततिमान् भवति। यदा पञ्चमभावात् पञ्चमेशात् लग्नात् गुरुग्रहात् वा पञ्चमभावे (त्रिकोणभावे) नवमभावे वा गोचरभ्रमणवशात् गुरुरागतो भवेत्तदा संततियोगो भवति। स्पष्टसूर्यचन्द्रगुरूणां राश्यादिमानानुसारेण गतनवमांश तुल्याः पुत्रा भवन्ति। पञ्चमेशनवशमेशचतुर्थेशानां स्पष्टैक्यराश्यादिमानानुसारेण यद् नवांशं प्राप्यते तत् संख्यातुल्याः पुत्रा भवन्ति। पञ्चमनवमचतुर्थभावेषु ये ग्रहाः स्युः तेषां स्पष्टराश्यादिमानं कृत्वा यद् नवांशः प्राप्यते तद् संख्याकाः पुत्रा भवन्ति।

### (आ)पुत्रप्राप्तियोगः पुत्रीप्राप्तियोगः।

यदा पञ्चमभावे पुरुषराश्यां पुरुषनवांशे[१००] पुरुषग्रहो[१०१] भवेत्तदा जातकः पुत्रवान् भवति। यदा पञ्चमभावः पुरुषराश्यां पुरुषनवांशे पुरुषग्रहेण (सूर्येणमङ्गलेनगुरुणा वा) दृष्टो भवेत्तदा जातकः पुत्रसन्ततियुक्तो भवति। यदा पञ्चमेशः पुरुषराश्यां पुरुषनवांशे पुरुषग्रहेण दृष्टो युतो वा भवेत्तदा जातकः पुत्रसन्ततिमान् भवति। यदा पञ्चमेशः पुरुषग्रहो विषमनवांशे (पुरुषनवांशे) स्थितो भवेत्तदा जातकः शीघ्रपुत्रसुखं प्राप्नोति।

यदा पञ्चमभावे स्त्रीराश्यां स्त्रीनवांशे[१०२] स्त्रीग्रहो[१०३] भवेत्तदा जातकः कन्यासन्ततियुक्तो भवति। यदा स्त्रीराश्यां स्त्रीनवांशे पञ्चमभावस्योपरि स्त्रीग्रहस्य दृष्टिर्भवेत्तदा जातकः कन्यासन्ततियुक्तो भवति। यदा पञ्चमेशः स्त्रीराश्यां स्त्रीनवांशे स्त्रीग्रहेण दृष्टो युतो वा भवेत्तदा जातकः कन्यासंततिमान् भवति। यदा पञ्चमेशः स्त्रीग्रहो युग्मराश्यां (समराश्यां) स्थितो भवेत्तदा जातकः कन्यासंततियुक्तो भवति। यदा पञ्चमभावे चन्द्रस्य नवांशे चन्द्रस्य दृष्टिर्भवेत्तदा जातको बहुकन्यासन्ततिमान् भवति।

यदा पञ्चमभावे पञ्चमेशो भवेत्तदा जातकः पुत्रादिसुखयुक्तो भवति (परि.०१, क्र.४६) (परि.०१, क्र.३६) (परि.०१, क्र.५३) (परि.०१, क्र.५४)। यदा पञ्चमभावे शुभग्रहो भवेत्तदा जातकः पुत्रादि

---

[१००] मेष–मिथुन–सिंह–तुला–धनुः–कुम्भराशयः पुरुषराशयः पुरुषनवांशाः कथ्यन्ते।

[१०१] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम्।

[१०२] वृषभ–कर्क–कन्या–वृश्चिक–मकर–मीनराशयः स्त्रीराशयः स्त्रीनवांशाः कथ्यन्ते।

[१०३] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम्।

सुखसम्पन्नो भवति (परि.०१,क्र.४४)। यदा पञ्चमभावे शुभग्रहस्य पञ्चमेशस्य वा दृष्टिर्भवेत्तदा जातकः पुत्रसुखेन सुखी भवति(परि.०१,क्र.४०) (परि.०१,क्र.३८)। यदा पञ्चमभावः पञ्चमेशः गुरुर्वा शुभग्रहेण दृष्टो युतो च भवेत्तदा जातकोऽवश्यं सन्ततिं प्राप्नोति। यदा पञ्चमभावाधिपतिगुरु उपरि लग्नेशस्य दृष्टिभवेत्तदा जातकः पुत्रं प्राप्नोति। यदा पञ्चमेशः प्रथमभावे लग्नेशः पञ्चमभावे अथवा पञ्चमेशलग्नेशयोः युतिः प्रथमभावे पञ्चमभावे वा भवेत्तदा जातकः पुत्रं प्राप्नोति। यदा केन्द्रभावे पञ्चमेशलग्नेशौ शुभग्रहेण दृष्टियुक्तौ बलवान् द्वितीयेशो भवेत्तदा जातकः पुत्रं प्राप्नोति।

यदा पञ्चमभावे मेषराश्यां वृषभराश्यां कर्कराश्यां वा राहुः केतुर्वाभवेत्तदा जातकः शीघ्रसंततिमान् भवति। यदा पञ्चमेशः केन्द्रभावे[१०४] त्रिकोणभावे[१०५] वा शुभराश्यां शुभग्रहेणयुतो दृष्टो भवेत्तदा जातको युवावस्थायाः प्रारम्भे पुत्रवान् भवति। यदा पञ्चमभावे स्वराश्यां पापग्रहोऽस्तङ्गतावस्थाहीनो भवेत्तदा जातकः पुत्रवान् भवति। यदा पञ्चमेशस्य नवांशाधिपतिः शुभग्रहेण युतो दृष्टो वा भवेत्तदा जातकः पुत्रवान् भवति। यदा पञ्चमेशो शुभषष्ट्यंशे[१०६] भवेत्तदा जातकः पुत्रवान् भवति। यदा पञ्चमभावे कर्कधनुमीनराशिभ्यः कोऽपि राशेरुपरि गुरुर्दृष्टिर्भवेत्तदा जातकः संततिवान् भवति। यदा पञ्चमभावस्योपरि गुरोर्दृष्टिर्भवेत्तदा जातकः पुत्रवान् भवति। यदा पञ्चमभावे वृषभराशेः कर्कराशेस्तुलाराशेर्वा शुक्रस्य चन्द्रस्य वा दृष्टिर्भवेत्तदा जातकः सन्ततिमान् भवति। यदा पुत्रेशो[१०७] गुरुश्च गोपुरादिविशिष्टावस्थायां शुभग्रहेण दृष्टोभवेत्तदा जातकः पुत्रवान् भवति।यदा पञ्चमभावे लग्नेशस्तथा पञ्चमेशगुरू बलवान्तौ भवेतां तदा जातकः संततिमान् भवति।

यदा पञ्चमेशो लग्नभावे भवेत्तदा जातकस्य पुत्रः स्वपितुरपि अधिकगुणवान् जायते। यदा पञ्चमेशलग्नेशयोः परस्परं मित्रताभवेत्तदा जातकपुत्रयोः सम्बन्ध मित्रवत् भवति। यदा पञ्चमेशलग्नेशयोः परस्परं दृष्टि सम्बंध भवेत्तदा जातकः पुत्रं प्राप्नोति। यदा पञ्चमेशेन सह राहुर्भवेत्तदा राहुग्रहस्यदशायां जातको दीर्घायुर्पुत्रं प्राप्नोति।

---

[१०४] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम्।
[१०५] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम्।
[१०६] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम्।
[१०७] पराशरमते चरकारकानुसारेण पुत्रेशः।

**(इ) बहुप्रजायोगः।**

यदा पञ्चमेशो लग्नात् सप्तमभावे समराश्यां[१०८] (युग्मराश्यां स्त्रीराश्यां) चन्द्रशुक्राभ्यां युतो दृष्टो वा भवेत्तदा जातकस्याधिकाः कन्याः जायते। यदा पञ्चमेशो लग्नात् सप्तमभावे विषमराश्यां[१०९] (पुरुषराश्यां ओजराश्यां) सूर्यमङ्गलबुधैः सह युतो दृष्टोवा भवेत्तदा जातकस्य बहुपुत्राः भवति।यदा पञ्चमभावे वृषभराश्यां कर्कराश्यां तुलाराश्यां वा शुक्रश्चन्द्रो वा भवेत्तदा जातकः बहुपुत्रयुक्तो भवति। यदा पञ्चमभावस्योपरि बलवान् शुक्रस्य दृष्टिभवेत्तदा जातको बहुसन्ततिमान् भवति। यदा पञ्चमभावे बलवान् द्वितीयेशो गुरुणा दृष्टो भवेत्तदा जातकः पुत्रवान् भवति। यदा पञ्चमभावे शुक्रस्य राशिर्नवांशश्च भवेत्तदा जातको बहुसन्ततिमान् भवति। यदा पञ्चमभावे शुक्रस्यनवांशे शुक्रस्य दृष्टिर्भवेत्तदा जातको बहुसन्ततिमान् भवति । यदा पञ्चमेशो गोपुरादिविशिष्टावस्थायां भवेत्तदा जातकः पुत्रवान् भवति। यदा पञ्चमभावे लग्नेशस्य नवांशाधिपतिस्तथा गुरोर्नवांशाधिपतिर्लग्नभावे भवेत्तदा जातकः सन्ततिमान् भवति। यदा पञ्चमभावे कर्कराश्यां तुलाराश्यां वा चन्द्रशुक्रयोर्युति भवेत्तदा जातको बहुपुत्रवान् भवति। यदा पञ्चमभावे कर्कराश्यां शनेश्चरोऽन्यग्रहस्य युतिर्दृष्टिर्हीनो भवेत्तदा जातको बहुपुत्रवान् भवति। यदा परमोच्चराश्यां पञ्चमेशो लग्नेशेन सह सुतभावकारकः शुभग्रहयुक्तश्चतुर्थषष्ठभावयोः पापग्रहो भवेत्तदा जातको बहुपुत्रवान् भवति। यदा पञ्चमभावकारको गुरुः परमोच्चराश्यां द्वितीयेशो राहुणा सह नवमेशो नवमभावे भवेयुस्तदा जातको बहुपुत्रवान् भवति। यदा पञ्चमभावे नवमभावे वा गुरुः पञ्चमेशो बलसम्पनो द्वितीयेशो दशमभावे भवेत्तदा जातको बहुपुत्रवान् भवति। यदा पञ्चमभावे पञ्चमेशो नवमेभावे शनैश्चरो भवेत्तदा जातको बहुपुत्रवान् भवति। यदा पञ्चमभावे पञ्चमेशद्वितीयेशयोर्युतिर्भवेत्तदा जातको बहुपुत्रवान् भवति। यदा पञ्चमेशोपरि गुरोर्दृष्टिर्भवेत्तदा जातकः पु४वान् भवति (परि.०१, क्र.३८)

यदा पञ्चमभावे स्वोच्चराश्यां गुरोर्भवेत्तदा जातको नैककन्याजनको भवति।

यदा पञ्चमभावे द्वितीयेशपञ्चमेशयोर्युतिभवेत्तदा जातको बहुपुत्रावान् भवति। तेभ्यः सन्ततित्रयं म्रियते।

यदा पञ्चमभावे नवमेशो नवमभावे शनैश्चरो भवेत्तदा जातको बहुपुत्रयुक्तो तेभ्यः सन्ततिद्वयं यमलो भवति।

---

[१०८] वृषभकर्ककन्यावृश्चिकमकरमीनराशयः समराशयः(युग्मराशयः/स्त्रीराशयः) कथ्यन्ते।

[१०९] मेषमिथुनसिंहतुलाधनुकुम्भराशयः विषमराशयः(पुरुषराशयः/ओजराशयः) कथ्यन्ते।

**षष्ठी दृष्टिः।**

यदा पञ्चमेशः द्वितीयभावेऽष्टमभावे वा भवेदथवा पञ्चमभावे चन्द्रो बुधःशुक्रो वा भवेत्तदा जातकाधिकन्याजनको भवति।

यदा पञ्चमेशो गुरुमङ्गलसूर्याः पुरुषराश्यां पुरुषनवांशेभवेयुस्तदा जातको बहुपुत्रवान् भवति ।

यदा पञ्चमभावे सुर्योमङ्गलोगुरुर्वाभवेत्तदा जातक एक–त्रि–पञ्च वा सन्ततिमान् भवति।

यदा पञ्चमभावे गुरुस्तथा कस्मिन्नपिभावे पञ्चमेशशुक्रयोर्युतिर्भवेत्तदा २३ त्तमे वर्षे ३३ त्तमे वर्षे वा जातकः सन्ततिं प्राप्नोति।

यदा पञ्चमेशः केन्द्रभावे[११०] पञ्चमभावाधिपतिना सह भवेत्तदा जातकः २६ वा ३० त्तमे वर्षे सन्ततिं प्राप्नोति।

यदा पञ्चमभावे स्थितस्य सूर्यस्योपरि शनैश्चरस्य दृष्टिर्भवेत्तदा जातकः ६० तमे वर्षे पिता भवति।

यदा एकादशभावे राहुर्भवेत्तदा जातको वृद्धावस्थायां पिता भवति।

यदा पञ्चमभावात् द्वादशभावे राहुः पञ्चमेशेन सह शनैश्चरो यत्र कुत्रापि भावे भवेत्तदा जातकः कन्यात्रयानन्तरं पुत्रं प्राप्नोति।

यदा पञ्चमभावे पुरुषराश्यां नवांशे च पञ्चमेशगुरुमङ्गलसूर्या भवेयुस्तदा जातकः पुत्रवान् भवति। अस्मिन् योगे यदा पञ्चमेशः प्रबलो भवेत्तदा जातकः सत्पुत्रवान् तथा पञ्चमेशो निर्बलो भवेत्तदा जातकः कुपुत्रवान् भवति।

**(ई)एकपुत्रोऽल्पपुत्रयोगः।**

यदा पञ्चमभावे गुरुर्गुरुग्रहात् पञ्चमभावे शनैश्चरः शनैश्चरात् पञ्चमभावे राहुर्भवेत्तदा जातको एक पुत्रयुक्तो भवति। यदा पञ्चमभावे धनूराश्यां गुरुर्भवेत्तदा जातकः कष्टेनौषधिभ्यो मन्त्रैः देवताराधनेन च सन्ततिमान् भवति।

यदा कस्याश्चित् स्त्रियः पञ्चमभावे कर्कराश्यां चन्द्रो भवेत्तदा सा नारी कन्यासन्ततिवती अल्पसन्ततियुक्ता वा भवति। यदा कस्याश्चित् स्त्रियः पञ्चमभावे केतुबुधौ तथा पञ्चमेशो नीचराश्यां त्रिकभावे (षष्ठाष्टमद्वादशभावे वा) भवेत्तदा सा काकवन्ध्या[१११] भवति। यदा कस्याश्चित् स्त्रियः पञ्चमेशो नीचराश्यां पञ्चमभावः शुभग्रहदृष्टिहीनो भवेत्तथा पञ्चमभावे बुधशनैश्चरयो युतिर्भवेत्तदा सा काकवन्ध्या भवति। यदा कस्याश्चित् स्त्रियः पञ्चमभावे धनुर्मीनराशिर्वा भवेत्तदा सा प्रसवरहिता भवति।

---

[११०] विशेषार्थं परिशिष्टम् –०४ द्रष्टव्यम्।

[१११] यदा कस्याश्चित् स्त्रियः प्रथमा प्रसूतिर्भवेत्त अनन्तरं प्रसूतेरभावो भवेत्तदा स योगः काकवन्ध्या कथ्यते।

किन्तु यदा पञ्चमभावे धनूराश्यां मीनराश्यां वा गुरुर्भवेदथवा गुरुग्रहस्य दृष्टिर्भवेत्तदाऽवश्यं सन्तति प्राप्नोति।

यदा पञ्चमभावे अन्यग्रहस्यसम्बन्धरहितो बुधः कर्कराश्यां भवेत्तदा जातकोऽल्पसंततियुक्तो भवति। अथवा द्वितीयविवाहात् सन्ततियुक्तो भवति।

यदा पञ्चमभावे कर्कराश्यां सूर्योमङ्गलः शुक्रो वा भवेत्तदा द्वितीयविवाहेन जातकः पुत्रं प्राप्नोति। यदा पञ्चमभावे मीनराश्यां गुरुर्भवेत्तदा जातकोऽल्पसंततियुक्तो भवति। यदा पञ्चमभावे अन्यग्रहस्य सम्बन्धरहितश्चन्द्रः कर्कराश्यां भवेत्तदा जातकोऽल्पसन्ततियुक्तो भवति। यदा पञ्चमभावे कर्कराश्यां अन्यग्रहस्य युतिर्दृष्टिः सम्बन्धरहितः सूर्योभवेत्तदा जातको द्वितीयविवाहकरणेन सन्ततिमान् भवति। यदा पञ्चमभावे कर्कराश्यां अन्यग्रहस्य युतिर्दृष्टिः सम्बन्धरहितः शुक्रो भवेत्तदा जातको द्वितीयविवाहकरणेन सन्ततियुक्तो भवति।

यदा पञ्चमभावे वृषभराशिःसिंहराशिःकन्याराशिर्वृश्चिकराशिर्वा भवेत्तदा जातकोऽल्प संततियुक्तो भवति। यदा पञ्चमभावे वृषभराश्यां सिंहराश्यां कन्याराश्यां वृश्चिकराश्यां वा चन्द्रो भवेत्तदा जातको-ऽल्पसंततियुक्तो भवति। यदा पञ्चमभावे वृषभराशिःसिंहराशिःकन्याराशिर्वृश्चिकराशिर्वा भवेत्तदा जातको-ऽल्प संततियुक्तो भवति। यदा पञ्चमभावे अल्पसुतराश्यां[११२] सूर्योऽष्टमभावे शनैश्चरस्तथा प्रथमभावे मङ्गलो भवेत्तदा जातकोऽल्पसन्ततियुक्तो भवति। यदा पञ्चमभावे अल्पसुतराशिर्लग्नभावेशनैश्चरो-ऽष्टमभावे गुरुर्द्वादशभावे मङ्गलो जातकोऽल्पसन्ततियुक्तो भवति। यदा पञ्चमभावे पापग्रहः पञ्चमेशः षष्ठभावे अष्टमभावे द्वादशभावे वा पापकर्तरीयोगे पञ्चमभावस्योपरि शनैश्चरस्य दृष्टिः पञ्चमेशस्योपरि गुरोर्दृष्टिर्भवेत्तदा जातकोऽल्पसन्ततियुक्तो भवति। यदा पञ्चमभावे मेषराश्यां वृश्चिमराश्यां कर्कराश्यां धनुर्राश्यां सिंहराश्यां मीनराश्यां वा राहुर्भवेत्तदा जातकः कष्टेनोपायेन सन्ततिमान् भवति। यदा पञ्चमभावे पापग्रहेणसह प्रजापतिर्भवेत्तदा जातको विकलाङ्ग सन्ततियुक्तो भवति।

यदा कस्याश्चित् स्त्रियः कुण्डल्यां पञ्चमभावे पापग्रहेणसह हर्षलः (प्रजापतिः) भवेत्तदा सा प्रसूतिकाले अधिकं कष्टं प्राप्नोति। यदा कस्याश्चित् स्त्रियः पञ्चमभावे मङ्गलहर्षलयोर्युतिर्भवेदथवा मङ्गलनेपच्युनयोः युतिर्भवेदथवा मङ्गलशनैश्चरयो युतिर्भवेदथवा मङ्गलराहुशनैश्चराणां युतिभवेत्तदा सा

---

[११२] मिथुनसिंहकन्याराशयः अल्पसुतराशयः कथ्यते।

सन्ततिप्रसूतिकाले शस्त्राक्रियाभिः पीडिता भवति। यदा कस्याश्चित् स्त्रियः पञ्चमभावे शनैश्चरस्य-युतिर्नेपच्युनेः (वरुणेन) हर्षलेनराहुणा वा सह भवेत्तदा सा सन्ततिहीना भवति अथवा मृतसन्ततिर्भवति।

यदा पञ्चमभावे शनिरशुभो भवेत्तदापि संततिर्नभवति। यदा पञ्चमेशः त्रिकभावे[११३] राहुभौमाभ्यां दृष्टोभवेत्तदा जातकः पितृदूषको भवति। यदा पञ्चमेशः षष्ठभावे द्वादशभावे वा भवेत्तदा जातकस्य पुत्रःशत्रुवत् भवति। यदा पञ्चमभावे राहुःकेतुर्वा भवेत्तदा जातकः कुपुत्रपीडितो भवति । यदा पञ्चमेशश्चतुर्थभावे निर्बलः पञ्चमभावस्योपरि सूर्यमङ्गलशनैश्चराणां दृष्टिस्तथा षष्ठेशोलग्नेशेन सह षष्ठभावेऽष्टमभावे द्वादशभावे वा भवेत्तदा जातकस्य सर्वेपुत्रा म्रियन्ते अथवा दुष्टपुत्रा भवन्ति। यदा पञ्चमभावे कोऽपिग्रहः कृत्तिकानक्षत्रे आश्लेषानक्षत्रे ज्येष्ठानक्षत्रे मूलनक्षत्रे वा भवेत्तदा जातकस्य सन्ततिर्विकारयुक्तो मनस्वी रोगी वा भवति। यदा पञ्चमेशः कृत्तिकानक्षत्रे मूलनक्षत्रे ज्येष्ठानक्षत्रे आश्लेषानक्षत्रे वा षष्ठभावे अष्टमभावे द्वादशभावे वा पापग्रहेणयुतोदृष्टो वा भवेत्तदा जातकस्य सन्ततिर्मनस्वी रोगी विकलङ्गो वा भवति। यदा पञ्चमेशव्ययेशयोः सम्बंधः शत्रुवत् भवेत्तदा जातकस्य पुत्रो न जीवति अथवा दीर्घकालान्ते सन्ततिर्भवत्यथवा सन्तत्याः शरीरेऽसाध्य रोगोत्पत्तिर्भवत्यथवा-ऽन्यावरोधेन सन्ततिचिन्ता भवति। अनेन प्रकारेण पञ्चमेशव्ययेशयोर्युतिः पञ्चमात् षष्ठभावे अष्टमभावे द्वादशभावे वा भवेत्तदा सन्ततिचिन्ता भवति। यदा पञ्चमेशव्ययेशयोर्युतिःप्रतियुतिः परिवर्तनयोगो भवेत्तदा जातकः सन्ततिचिन्तायुक्तो भवति। यदा लग्नात् पञ्चमात् षष्ठभावेऽष्टमभावे द्वादशभावे वा गुरुपञ्चमेशयोर्युतिर्भवेत्तदा जातकस्य जीवने पुत्रचिन्ता भवति। यदा पञ्चमभावे नवमभावे सप्तमभावे वा गुरुर्निर्बलो भवेत्तदा जातकः सन्ततिचिन्ता पीडितो भवति। यदा पञ्चमभावे कोऽपिग्रहः षष्ठशोऽष्टमेशो वा द्वादशेशो भूत्वा नीचराश्यां शत्रुराश्यामस्तङ्गतावस्थायां भवेत्तदा जातकः सन्ततिचिन्तवान् भवति। यदा पञ्चमेशो नीचराश्यां शत्रुराश्यामस्तङ्गतावस्थायां वा लग्नात् षष्ठभावेऽष्टमभावे द्वादशभावे वा भवेत्तदा जातकः सन्ततिचिन्तायुक्तो भवति। यदा पञ्चमेशो नीचराश्यां शत्रुराश्यामस्तङ्गतवस्थायां षष्ठेशोऽष्टमेशेन वा द्वादशेन सह भवेत्तदा जातको नष्टसन्ततिको भवति , किन्त्वत्र पञ्चमभावस्योपरि पञ्चमेशस्योपरि वा शुभग्रहस्य दृष्टिर्भवेत्तदा जातकस्य सन्ततिर्जीवति। यदा पञ्चमभावे मीनराश्यां गुरुर्भवेत्तदा जातकोऽल्पसंततियुक्तो भवति। यदा पञ्चमभावे धनूर्राश्यां गुरुर्भवेत्तदा जातकः कष्टेन सन्ततिं प्राप्नोति। यदा पञ्चमभावे कर्कराश्यां गुरुर्भवेत्तदा जातकः सन्ततिचिन्तायुक्तो भवति। यदा पञ्चमभावे कर्कराश्यां धनूराश्यां कुम्भराश्यां मीनराश्यां वा गुरुर्भवेत्तदा जातकः पुत्रदुःखेन दुःखी भवति।

[११३] विशेषार्थं परिशिष्टम् -०४ द्रष्टव्यम्।

किन्त्वत्र पञ्चमभावे कर्क–धनुः–कुम्भ–मीनराशिर्भवेत्तस्योपरि गुरोर्दृष्टिर्भवेत्तदा जातकः सन्ततिमान् भवति। यदा पञ्चमेशस्त्रिकोणभावे नीचग्रहेन दृष्टो गुरुरपि नीचराश्यां भवेत्तदा जातकः कन्या सन्ततियुको भवति (परि.०१,क्र.९५)। यदा पञ्चमभावे शनिकेतुसूर्यशुक्राणां युति एकादशभावे राहुः पञ्चमात् षष्ठभावे मङ्गलो भवेत्तदा जातकः पूर्वजन्मनि बालकस्य हत्याकरणेनेहजन्मनि सन्तानबाधायुक्तो भवति।

### (उ) अनपत्यतायोगः।

यदि पञ्चमेशपञ्चमभावकारकगुरुसप्तमेशलग्नेशा निर्बला भवेयुस्तदा जातकः सन्ततिहीनो भवति (परि.०१, क्र.७०)। यदा पञ्चमेशःपापग्रहेण युतोदृष्टो भवेत्तथा गुरुर्नीचराश्यां भवत्तदा जातकोऽनपत्यो भवति (परि.०१, क्र.१०१)। यदा सर्वे ग्रहा नीचराश्यां शत्रुराश्यामस्तङ्गतावस्थायां पञ्चमाद् द्वितीयभावे चतुर्थभावेऽष्टमभावे (लग्नात् षष्ठभावेऽष्टमभावे द्वादशभावे वा) वा भवेत्तदा जातकः सन्ततिहीनो भवति। यदा पञ्चमभावे सप्तमेशपापग्रहो भवेत्तदा जातकः पुत्रहीनो भवति। यदा पञ्चमभावे पापग्रहः पञ्चमेशः पापकर्तरीयोगे[११४] शुभग्रहस्य दृष्टिहीनो भवेत्तदा जातकोऽनपत्यो भवति। यदा पञ्चमेशो निर्बलो गुरुः पापकर्तरीयोगे[११५] शुभग्रहस्य दृष्टियुतिर्हीनो भवेत्तदा जातकोऽनपत्यो भवति। यदा पञ्चमभावे पापग्रहः पञ्चमेशः स्वनीचराश्यां शुभदृष्टिहीनो भवेत्तदा जातकोऽनपत्यो भवति (परि.०१, क्र.६८)। यदा पञ्चमभावे मङ्गलः प्रथमभावे सूर्यो भवेत्तदा जातकः सन्ततिहीनो भवति। यदा कन्यालग्ने सूर्यः पञ्चमभावे मकरराश्यां मङ्गलो भवेत्तदा जातकः पुत्रहीनो भवति। यदा पञ्चमभावे गुरुस्तस्मात् पञ्चमभावे क्रूरग्रहो (सूर्यमङ्गलशनैश्चरो वा) भवेत्तदा जातकः सन्ततिहीनो भवति। यदा पञ्चमात् सप्तमभावे चन्द्रशनैश्चरयोर्युतिभवेत्तदा जातकः सन्ततिहीनो भवति। यदा पञ्चमभावकारकगुरुः पापग्रहेण सह लग्नात् षष्ठभावेऽष्टमभावे द्वादशभवे वा भवेत्तदा जातकः सन्ततिहीनो भवति (परि.०१,क्र.६९)। यदा पञ्चमभावे पुरुषराश्यां नवांशेच[११६] चन्द्रो भवेत्तथा एकादशभावेसूर्यो भवेत्तदा जातकः पुत्रहीनो भवति। अथवा पुत्रक्लेशःसन्तप्तो भवति। यदा पञ्चमभावः पापकर्तरीयोगे[११७] भवेत्तदा जातकोऽनपत्यो

---

[११४] विशेषार्थं परिशिष्टम् –०६ द्रष्टव्यम्।

[११५] यस्मिन्भावे गुरुर्भवेत्तस्माद् द्वितीयभावे वक्रिणःपापग्रहो द्वादशभावे मार्गिणःपापग्रहो भवेत्तदा गुरुग्रहस्य पापकर्तरी अवस्था भवति।

[११६] मेषमिथुनसिंहतुलाधनुःकुम्भराशयः पुरुषराशयः पुरुषनवांशराशयः कथ्यन्ते।

[११७] यदा पञ्चमभावात् द्वादशभावे पापग्रहो लग्नात् षष्ठभावे वक्रीपापग्रहो भवेत्तदा पञ्चमभावस्य पापकर्तरीसंज्ञा वर्तते।

पुत्रदु:खेन वा दु:खी भवति। यदा पञ्चमभावे मङ्गलो[११८] नीचराश्यां शत्रुराश्यामस्तङ्गतावस्थायां वा भवेत्तदा जातकोऽपुत्रो भवति। स्त्रियः कुण्डल्यामस्य योगस्य सत्वादवश्यमशुभफलं प्राप्यते। यदा पञ्चमभावकारको गुरुर्नीचराश्यां सूर्यो गुरुनवांशे भवेत्तदा जातकोऽपुत्रो भवति। यदा पञ्चमभावे पापग्रहः पञ्चमादष्टमभावे च पापग्रहो भवेत्तदा द्वयोर्ग्रहयोर्मध्ये षडष्टकयोगकारणाज्जातकः सन्ततिहीनो भवति। यदा पञ्चमभावे नीचस्थः शनैश्चरो द्वादशभावे नीचराश्यां क्षीणचन्द्रो भवेत्तदा जातकोऽपत्यो भवति। यदा पञ्चमभावे पापग्रहः पञ्चमात् सप्तमेऽपि (लग्नात् एकादशभावे) पापग्रहो भवेत्तदा जातकोऽनपत्यो भवति यथा पञ्चमभावे नीचराश्यां शनैश्चरस्तस्मात् सप्तमभावे (एकादशभावे) नीचराश्यां सूर्यो भवेत्तदा जातकोऽनपत्यो भवति। यदा पञ्चमभावे राहुसूर्यमङ्गलशनैश्चराणां युतिर्भवेत्तदा जातकः प्रायोऽपुत्रो भवति। यदा पञ्चमभावकारकगुरुदरिशः[११९] पञ्चमेशलग्नेशा निर्बला भवेयुस्तदा जातकोऽपुत्रो भवति। यदा पञ्चमेशो मङ्गलेन सह षष्ठभावेऽष्टमभावे द्वादशभावे वा तथा शनैश्चरस्य राश्यां (मकरराश्यां कुम्भराश्यां वा) चन्द्रो भवेत्तदा जातकः सन्ततिहीनो भवति। यदा पञ्चमभावे मङ्गलशुक्रराहुग्रहाः सिंहराश्यां गुरुर्गुरुक्षेत्रे च सूर्यबुधौ भवेतां तदा पूर्वजन्मनि भगिन्याः हत्याकरणेनेहजन्मनि जातकोऽपुत्रो भवति। यदा पञ्चमेशो यत्रकुत्रस्थानेऽस्तङ्गतावस्थायां भवेत्तदा जातकोऽनपत्यो भवति। यदा पञ्चमभावे बुधशनैश्चरयोर्युतिर्भवेत्तदा जातकोऽनपत्यो भवति। यदा पञ्चमभावे चन्द्रराहुग्रहयोर्युतिर्भवेत्तदा जातकोऽनपत्यो भवति। यदा द्वितीयभावे पञ्चमभावे दशमभावे वा मङ्गलो भवेत्तदा जातकः सन्ततिहीनो भवति। यदा पञ्चमभावे क्षीणचन्द्रो भवेत्तदा जातको निरपत्यो भवति। यदा पञ्चमभावस्योपरि तृतीयभावे वाऽष्टमभावे वैकादशभावे  स्थितस्य नीचस्थः शत्रुस्थः शनैश्चरस्य दृष्टिर्भवेत्तदा जातकोऽपत्यो भवति (परि.०१,क्र.५९)। यदा पञ्चमेशः शुक्रो लग्नात्केन्द्रभावे चन्द्रेण बुधेन शनैश्चरेण वा राहुणा सह भवेत्तदा जातकः पुत्रहीनो भवति यदा पुत्रो भवेत्तदा स म्रियते। यदा पञ्चमभावात् द्वितीयभावे चतुर्थभावेऽष्टमभावे नवमभावेषु पापग्रहो भवेत्तदा जातको निरपत्यो भवति(परि.०१,क्र.६१) (परि.०१,क्र.६२)। यदा पञ्चमभावे हर्षलो (प्रजापति) द्वितीयभावे पापग्रहो भवेत्तदा जातकः सन्ततिहीनो भवति। अत्र ग्रहयोः परस्परं केन्द्रयोगात् संततिर्न भवति। यदा पञ्चमेशद्वितीयेशौ निर्बलौ पञ्चमभावस्योपरि पापग्रहस्य

---

[११८] बालस्य जन्मकालेतुपञ्चमो धरणीसुतः।
अपुत्रश्च भवेद्कालो नारी चैव विशेषतः।।मा.सा. पृ. ३३०।।
स्त्रियः कुण्डल्यां मङ्गलोरजोधर्मे महत्त्वपूर्णं अधिकारं प्राप्नोति।
पराशरमतेमङ्गलोऽपिपुत्रकारकोऽस्ति।
सत्त्वसद्मभुमिपुत्रशीलचौर्यरोगब्रह्मभ्रातृपराक्रमाग्निसाहसराजशत्रुकारकः कुजः।। बृ.पा.हो.शा.१२/०३

[११९] विशेषार्थं परिशिष्टम् -०३ द्रष्टव्यम्।

दृष्टिर्भवेत्तदाऽनेकविवाहानन्तरमपि जातकोऽनपत्यो भवति। यदा पञ्चमभावस्यकारकोगुरुग्रहात् पञ्चमेशात् लग्नभावात् वा पञ्चमेशनवमेशौ लग्नभावात् त्रिकभावे[१२०] भवेयुस्तदा जातकोऽनिरपत्यो भवति। यदा पञ्चमभावस्योपरि मङ्गलशुक्रयोर्दृष्टिर्न भवेत्तदा जातको निरपत्यो भवति। यदा पञ्चमभावे पापग्रहः केन्द्रभावे पञ्चमेशेन सह हर्षलनेपच्युनौ भवेतां तदा जातको निरपत्यो भवति। यदा लग्नेशः पञ्चमभावे पञ्चमेशो लग्नात् तृतीयभावे तथा लग्नभावे पापग्रहो भवेत्तदाऽपि जातकः पुत्रक्लेशभाक् भवति। यदा पञ्चमभावे राहुर्द्वितीयभावे मङ्गलोऽष्टमभावे शनैश्चरो भवेत्तदा जातकः सन्ततिहीनो भवति। यदा पञ्चमभावे सूर्यो द्वितीयभावे मङ्गलस्तृतीयभावे शनैश्चरो भवेत्तदा जातको निरपत्यो भवति। यदा पञ्चमभावे मङ्गल एकादशभावे सूर्योऽष्टमभावे शनैश्चरो भवेत्तदा जातको निरपत्यो भवति। यदा पञ्चमभावे शनैश्चरो द्वितीयभावे मङ्गल एकादशभावे सूर्यो राहुः केतुर्वा भवेत्तदा जातको निरपत्यो भवति। यदा पञ्चमभावे क्षीणचन्द्रः पापग्रहः सप्तमभावे लग्नभावे द्वादशभावे वा भवेत्तदा जातकः पुत्रहीनो भवति। यदा गुरुणा सह राहुर्द्वितीयभावे पञ्चमेशो मङ्गलो लग्नभावे नीवराश्यां भवेत्तदा जातको निरपत्यो भवति (परि.०१,क्र.५७)। यदा पञ्चमेशशुको नीचराश्यां पञ्चमभावकारको नीचग्रहेण युतो दृष्टो वा भवेत्तदा जातको निरपत्यो भवति (परि.०१,क्र.५८) । यदा पञ्चमेशो नीचग्रहेण सह गुरुः पापग्रहेण सह भवेत्तदा जातको निरपत्यो भवित(परि.०१,क्र.५९)। यदा पञ्चमेशो द्वादशभावे पापग्रहेण युतो भवेत्तदा जातकः पुत्रहीनो भवति (परि.०१,क्र.६१)। यदा पञ्चमभावाद् द्वादशभावे नीचग्रहो गुरुरपि पापग्रहेण दृष्टो युतो वा भवेत्तदा जातको निरपत्यो भवति (परि.०१,क्र.६३)। यदा पञ्चमभावे नीचग्रहः शुभग्रहस्यदृष्टिहीनो पञ्चमात् पञ्चमभावे पापग्रहो भवेत्तदा जातको निरपत्यो भवति (परि.०१,क्र.९०)।

**(ऊ)सन्ततिनाशकयोगाः।**

यदा पुत्रेशः (पञ्चमेशः) पुत्रभावकारकगुरुः पञ्चमभावस्थग्रहः पञ्चमभावोपरिदृष्टिकर्ता ग्रह एते सर्वे निर्बला दुःस्थानस्य (षष्ठभावस्याष्टमभावस्य द्वादशभावस्य वा) अधिपतयो वा दुःस्थाने (षष्ठभावे-ऽष्टमभावे द्वादशभावे वा) भवेयुस्तदा तेषां अन्तर्दशायां जातकस्य सन्ततिनाशो भवति। यदा शनैश्चरः पञ्चमभावे भवेत्तदा जातकस्य पुत्रो म्रियते। यदा जन्मसमये पञ्चमेशः पञ्चमभावकारको गुरुः पञ्चमभावस्योपरि दृष्टिकर्ता ग्रहः पञ्चमभावस्थग्रहाणां राश्यादिमाने गोचरभ्रमणवशा च्छनिरागतो भवेत्तदा जातकस्य सन्ततिनाशो भवति। यदा कन्यालग्ने सूर्यः पञ्चमभावे मकरराश्यां शनैश्चरो भवेत्तदा जातकस्य पुत्रो म्रियते। यदा पञ्चमभावे केतुशनैश्चरौ एकादशभावे राहुः पञ्चमात् द्वितीये सूर्यबुधौ चतुर्थभावे चन्द्रः

[१२०] विशेषार्थं परिशिष्टम् -०४ द्रष्टव्यम्।

षष्ठभावे च मङ्गलो भवेत्तदा जातकस्य पुत्रा म्रियन्ते। यदा पञ्चमेशो राहुण वा केतुना सह भवेत्तदा जातकः सन्ततिनाशको भवति। यदा पञ्चमेशस्तम्भी[१२१] वक्री वा भवेत्तदा जातकः सन्ततिहीनो भवति। यदा पञ्चमेशो निर्बलो भूत्वा षष्ठाष्टमद्वादशभावे वा तथा गुरुः पञ्चमभावे सिंहराश्यां भवेत्तदा जातकः सन्ततिहीनो भवति। यदा पञ्चमभावे सिंहराश्यां गुरोरुपरि शनैश्चरस्य मङ्गलस्य वा दृष्टिर्भवेत्तदा जातकः सन्ततिहीनो भवति। यदा पञ्चमेशो मङ्गलेन सह कस्मिन्नपि भावे षष्ठेशेन दृष्टः शुभग्रहेण दृष्टिहीनो भवेत्तदा जातकः शत्रुदोषेण नष्टसन्ततिको भवति। यदा पञ्चमभावे पापग्रहः पञ्चमात् पञ्चमभावे पापग्रहो नवमभावे क्षीणचन्द्रः पञ्चमभावकारकगुरुरस्तङ्गतावस्थायां भवेत्तदा जातकस्य पुत्रा म्रियन्ते। यदा पञ्चमेशसप्तमेशयोर्नवांशधिपतयोः पापग्रहस्य नवांशे पापग्रहेण युतो भवेत्तदा जातको नष्टसन्ततिको भवति।

### (ऋ)मातृशापात् सन्ततिनाशयोगः।

यदा पञ्चमभावे शनैश्चरः सप्तमभावे क्षीणचन्द्रो लग्नभावं पापकर्तरीयोगे चतुर्थभावे राहुर्भवेत्तदा मातृशापात् जातकः नष्टसन्ततिको भवति। यदा पञ्चमेशोऽष्टमभावेऽष्टमेशः पञ्चमभावे तथा चतुर्थेशचन्द्रयोर्युतिः षष्ठभावेऽष्टमभावे द्वादशभावे वा भवेत्तदा मातृशापात् जातकः सन्ततिहीनो भवति। यदा पञ्चमभावे वृश्चिकराश्यां चन्द्रशनैश्चरौ लग्नभावे मङ्गलराहुग्रहौ भवेतां तदा मातृशापात् जातकः सन्ततिहीनो भवति। पञ्चमभावात् पञ्चमभावे राहुर्लग्नभावे मङ्गर्लेऽष्टमे सूर्यो द्वादशभावे शनैश्चरः चतुर्थेशलग्नेशौ त्रिकभावे भवेयुस्तदा मातृशापात् सन्ततिर्नभवति। लग्नादष्टमभावे गुरुमङ्गलराहुणां युतिः पञ्चमभावे शनैश्चरचन्द्रयोर्युतिर्भवेत्तदा जातको मातृशापात् सन्ततिहीनो । यदा पञ्चमभावे पापग्रहेण सह गुरुचन्द्रौ पञ्चमाद् व्ययेशः (चतुर्थेश) लग्नात् द्वादशभावे लग्ने षष्ठाष्टमाधिपतौ भवेताम् तदा जातको मातृशापात् सन्ततिहीनो भवति। यदा पञ्चमेशः चन्द्रो नीचराश्यां पापकर्तरीयोगे वा भवेत्तथा चतुर्थपञ्चमभावयोः पापग्रहो भवेतां तदा जातकः मातृशापात् सन्ततिहीनो भवति। यदा पञ्चमभावे नीचराश्यां चन्द्रस्योपर्येकादशस्थानस्थितस्य शनैश्चरस्य क्रूरदृष्टिर्भवेत्तथा चतुर्थभावे पापग्रहो भवेत्तदा मातृशापात् सन्ततिर्नभवति। यदा पञ्चमेशः षष्ठभावेऽष्टमभावे द्वादशभावे वा लग्नेशो नीचराश्यां तथा चन्द्रः पापग्रहेण युतोर्भवेत्तदा जातको मातृशापात् सन्ततिहीनो भवति। यदा पञ्चमेशः षष्ठभावेऽष्टमभावे द्वादशभावे वा पञ्चमलग्नभावयोः पापग्रहश्चन्द्रः पापग्रहस्य नवांशे भवेत्तदा जातको मातृशापात् सन्ततिहीनो भवति। यदा गुरुः पञ्चमभावे नीचराश्यां वा पापग्रहेण युतोर्भवेत्तदा जातको मातृशापात्

[१२१] यदा पञ्चमेशो गतिहीनो भवेत्तदा तस्यस्तम्भी संज्ञा भवति।

सन्ततिहीनो भवति। लग्नेशपञ्चमेशौ षष्ठभावे चतुर्थेशोऽष्टमभावे ऽष्टमेशनवमेशौ लग्नभावे भवेत्तदा जातको मातृशापात् सन्ततिहीनो भवति। यदा पञ्चमभावे नीचराश्यां चन्द्रश्चतुर्थभावे पापग्रहः प्रथमभावे शनैश्चरोभवेत्तदा जातको मातृशापात् सन्ततिर्नभवति। यदा पञ्चमेशश्चन्द्रशनैश्चरमङ्गलराहुभिःसह कस्मिनपिभावे भवेत्तदा जातको मातृशापात् सन्ततिहीनो भवति। यदा पञ्चमेश षष्ठभावेऽष्टमभावे द्वादशभावे वा तथा लग्नेशो नीचराश्यां चन्द्रः पापग्रहेण सह दृष्टो वा युतो भवेत्तदा जातको मातृशापात् सन्ततिहीनो भवति। यदा पञ्चमभावे चन्द्रशनैश्चरोयोर्युतीर्राहुमङ्गलगुरव स्त्रिकभावे[१२२] भवेयुस्तदा जातको मातृशापात् सन्ततिहीनो भवति।

### (ॠ)पितृशापात् पुत्रहीनतायोगः।

यदा पञ्चमभावे नीचराश्यां शनिनवांशे पापकर्तरीयोगे च सूर्यो भवेत्तदा जातकः पितृशापात् नष्टसन्ततिको भवति। यदा पापग्रहस्य नवांशे पापग्रहेण युतो वा दृष्टो पंचमेशो सूर्यः त्रिकोणभावे[१२३] भवेत्तदा जातकः पितृशापात् नष्टसन्ततिको भवति। यदा गुरुः सिंहराश्यां पञ्चमेशो सूर्येण सह युतो भवेत् पञ्चमलग्नयोः पापग्रहो भवेत्तदा जातकः पितृशापात् नष्टसन्ततिको भवति। यदा निर्बलो लग्नेशः पञ्चमभावे पञ्चमलग्नयोः पापग्रहः पञ्चमेशः सिंहराश्यां भवेत्तदा जातकः पितृशापादपुत्रो भवति। यदा नवमेशस्य दशमेशस्य स्वामी भौमः पञ्चमेशेन युतो भवेत्तथा नवमदशमभावयोः पापग्रहो भवेत्तदा जातकः पितृशापात् नष्टसन्ततिको भवति। यदा पञ्चमात् पञ्चमभावस्य स्वामी, त्रिकस्थाने, गुरुःपापग्रहस्य राश्यां पञ्चमभावे पापग्रहः लग्नेशः पापग्रहो भवेत्तदा जातकः पितृशापात् नष्टसन्ततिको भवति। यदा सूर्यःशनिर्मङ्गलो वा पञ्चमभावे गुरुराहुग्रहयोर्युतिर्द्वादशभावेऽष्टमभावे वा भवेत्तदा जातकः पितृशापात् नष्टसन्ततिको भवति। यदा सूर्योऽष्टमभावे शनैश्चरः पञ्चमभावे पञ्चमेशो राहुणा सह लग्नभावे भवेत्तदा जातकः पितृशापात् नष्टसन्ततिको भवति। यदा पञ्चमभावेऽष्टमेशो नवमेशोऽष्टमभावे व्ययेशो लग्नभावे भवेत्तदा जातकः पितृशापात्सन्ततिहीनो भवति।

### (ऌ)मातुलशापात्सुतक्षययोगः।

यदा पञ्चमभावे बुधगुरुभौमराहुग्रहा लग्नभावे शनैश्चरोर्भवेत्तदा जातको मातुलशापात् सन्ततिहीनो भवति। यदा लग्नेशपञ्चमेशाभ्यां सह शनैश्चरमङ्गलबुधानां युतिर्भवेत्तदा जातको मातुलशापात् सन्ततिहीनो

[१२२] षष्ठाष्टमद्वादशभावानां त्रिकसंज्ञा वर्तते।

[१२३] विशेषार्थं परिशिष्टम् –०४ द्रष्टव्यम्।

भवति। यदा सप्तमभावे शनैश्चरः सप्तमात्सप्तमाधिपतिः (लग्नेशः) बुधेन सहास्तङ्गतावस्थायां लग्नभावे भवेत्तदा जातको मातुलशापात् सन्ततिहीनो भवति। यदा पञ्चमभावे चन्द्रबुधमङ्गला द्वादशेन सह चतुर्थेशो लग्नभावे भवेत्तदा जातको मातुलशापात् सन्ततिरहितो भवति।

### (ए) पत्नीशापात्सुतक्षययोगः।

पञ्चमभावे सप्तमेशः सप्तमेशस्य नवांशे शनैश्चरोऽष्टमभावे पञ्चमेशो भवेत्तदा जातकः पत्नीशापात् सन्ततिहीनो भवति। यदा पञ्चमभावे द्वादशेशः सप्तमेशोऽष्टमभावे तथा पञ्चमभावकारकः[१२४] शुक्रो वा पापग्रहेण सह भवेत्तदा जातकः पत्नीशापात् सन्ततिहीनो भवति। यदा पञ्चमभावे शुक्रः पञ्चमभावकारकः पापग्रहेण सह युतः सप्तमेशोऽष्टमभावे भवेत्तदा जातकः पत्नीशापात् सन्ततिहीनो भवति। यदा पञ्चमभावे द्वितीयभावे च पापग्रहः सप्तमेशोऽष्टमभावे भवेत्तदा जातकः पत्नीशापात् सन्ततिहीनो भवति। यदा पञ्चमलग्नभावयोः पापग्रहो दारेशोऽष्टमभावे[१२५] भाग्यभावे शुक्रो भवेत्तदा जातकः पत्नीशापात् सन्ततिहीनो भवति। यदा पञ्चमेशःषष्ठभावे प्रथमभावे लग्नेशो दारेशः षष्ठमभावेऽष्टमभावे द्वादशभावे वा भाग्येशः शुक्रो भवेत्तदा जातकः पत्नीशापात् सन्ततिहीनो भवति। यदा पञ्चमभावे वृषभराश्यां तुलाराश्यां वा राहुणा सह चन्द्रः प्रथमद्वितीयद्वादशभावेषु पापग्रहा भवेयुस्तदा जातकः पत्नीशापात् सन्ततिहीनो भवति। यदा पञ्चमभावेऽष्टमाधिपतिः सप्तमभावे शनिशुक्रौ प्रथमभावे सूर्येण सह राहुर्भवेत्तदा जातकः पत्नीशापात् सन्ततिहीनो भवति। यदा पञ्चमभावे शनैश्चरो नवमभावे मङ्गलो लग्नभावे राहुरष्टमभावे पञ्चमेशसप्तमेशोर्युतिर्भवेत्तदा जातकः पत्नीशापात् सन्ततिहीनो भवति।

### (ऐ)ब्राह्मणशापात्सुतक्षययोगः।

यदा पञ्चमभावे गुरुर्मङ्गलशनैश्चराः नवमेशोऽष्टमभावे गुरूक्षेत्रेराहुर्भवेत्तदा जातकः ब्राह्मणशापात् सन्ततिहीनो भवति। यदा पञ्चमेशो नवमभावे नवमेशः पञ्चमभावे लग्नात् अष्टमभावे गुरुमङ्गलराहवो भवेयुस्तदा जातको ब्राह्मणशापात् सन्ततिहीनो भवति। यदा पञ्चमात् पञ्चमभावस्याधिपतिर्नीचराश्यां पञ्चमभावे द्वादशेन सह राहुर्युतो दृष्टो वा भवेत्तदा जातको ब्राह्मणशापात् सन्ततिहीनो भवति। यदा पञ्चमेशः षष्ठभावेऽष्टमभावे द्वादशभावे वा पञ्चमभावे राहुर्नीचराश्यां गुरुर्भवेत्तदा जातको ब्राह्मणशापात् सन्ततिहीनो भवति। यदा पञ्चमेशो गुरुरष्टमभावे पापग्रहेण युतो भवेत्तदा जातको ब्राह्मणशापात्

---

[१२४] विशेषार्थं परिशिष्टम् –०४ द्रष्टव्यम्।

[१२५] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम्।

सन्ततिहीनो भवति। यदा पञ्चमेशो रविरष्टमभावे पापग्रहेण युतो भवेत्तदा जातको ब्राह्मणशापात् सन्ततिहीनो भवति। यदा पञ्चमेशश्चन्द्रोऽष्टमभावे पापग्रहेण युतो भवेत्तदा जातको ब्राह्मणशापात् सन्ततिहीनो भवति। यदा पञ्चमेशो द्वादशभावे शनैश्चरस्य नवांशे गुरुर्मङ्गलशनैश्चराभ्यां युतो भवेत्तदा जातको ब्राह्मणशापात् सन्ततिहीनो भवति।

### (ओ)प्रेतशापात्सुतक्षययोगः।

यदा पञ्चमभावे सूर्यशनैश्चरयोर्युतिः सप्तमभावे क्षीणचन्द्रो लग्नभावे राहुर्द्वादशभावे च गुरुर्भवेत्तदा जातकः प्रेतशापात् सन्ततिहीनो भवति। यदा पञ्चमभावे मङ्गलशनैश्चरबुधाः लग्नभावे पापग्रहो[१२६] द्वादशभावे च सूर्यो भवेत्तदा जातकः प्रेतशापात् सन्ततिहीनो भवति।

यदा पञ्चमभावे शनैश्चरो लग्नभावे राहुरष्टमभावे पुत्रकारको[१२७] भवेत्तदा जातकः प्रेतशापात् सन्ततिहीनो भवति। यदा पञ्चमभावे शनैश्चरो मङ्गलेन सह युतो दृष्टो वा तथा लग्नभावे राहुर्भवेत्तदा जातकः प्रेतशापात् सन्ततिहीनो भवति। यदा पञ्चमेशपञ्चमकारकौ नीचस्थौ नीचस्थेन ग्रहेण दृष्टौ वा युतौ भवेतां तदा जातकः प्रेतशापात् सन्ततिहीनो भवति। यदा पञ्चमभावे पञ्चमात् चतुर्थभावे सूर्योऽष्टमभावे मङ्गलो नवमभावे च शनैश्चरो भवेत्तदा जातकः प्रेतशापात् सन्ततिहीनो भवति। यदा पञ्चमभावे चन्द्रः सप्तमेशः षष्ठभावे अष्टमभावे द्वादशभावे वा लग्नभावे गुलिकेन[१२८] सह शनैश्चरो भवेत्तदा जातकः प्रेतशापात् सन्ततिहीनो भवति। यदा पञ्चमभावेऽष्टमेशशनैश्चरशुक्राणां युतिस्तथा पुत्रकारकोऽष्टमभावे भवेत्तदा जातकः प्रेतशापात् सन्ततिहीनो भवति। यदा पञ्चमेशःशनैश्चरोऽष्टमभावे लग्नभावे मङ्गलस्तथा पुत्रकारकः शुक्रो वाऽष्टमभावे भवेत्तदा जातकः प्रेतशापात् सन्ततिहीनो भवति।

### (औ) सर्पशापात्सुतक्षययोगः।

यदा पञ्चमभावे चन्द्रेण सह शनैश्चरो भवेत्तदा जातकः सर्पशापात् सन्ततिहीनो भवति। यदा पञ्चमभावे राहुमङ्गलयो दृष्टिर्भवेत्तदा जातकः सर्पशापात् सन्ततिहीनो भवति। यदा पञ्चमभावे मेषराश्यां वृश्चिकराश्यां वा राहुर्भवेत्तदा जातकः सर्पशापात् सन्ततिहीनो भवति। यदा पञ्चमभावे चन्द्रस्योपरि

---

[१२६] पराशरमते त्रिषडायाधिपतिः षष्ठाष्टम द्वादशभावानांस्वामी च पापग्रहः संज्ञाः वर्तते।

[१२७] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम्।

[१२८] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम्।

शनैश्चरस्य दृष्टिर्भवेत्तदा जातकः सर्पशापात् सन्ततिहीनो भवति। यदा पञ्चमभावः पञ्चमेशो वा राहुणा केतुना वा युतो दृष्टो वा भवेत्तदा जातकः सर्पशापात् सन्ततिहीनो भवति। यदा पञ्चमभावे मङ्गलक्षेत्रे (मेषराश्यां वृश्चिकराश्यां वा) राहुर्भवेत्तदा जातकः सर्पशापात् सन्ततिहीनो भवति। यदा पञ्चमभावे मङ्गलक्षेत्रे राहुबुधयोर्युतिर्भवेत्तदा जातकः सर्पशापात् सन्ततिहीनो भवति। यदा पञ्चमभावे मङ्गलक्षेत्रे राहुग्रहस्योपरि बुधस्य दृष्टिर्भवेत्तदा जातकः सर्पशापात् सन्ततिहीनो भवति। यदा पञ्चमभावकारको गुरुः पुत्रकारकः वा मङ्गलेन सह युतो भवेत्तथा प्रथमभावे राहुः पञ्चमेशः षष्ठभावेऽष्टमभावे द्वादशभावे वा भवेत्तदा जातकः सर्पशापात् सन्ततिहीनो भवति। यदा पञ्चमभावे राहुग्रहस्योपरि मङ्गलस्य दृष्टिर्भवेत्तदा जातकः सर्पशापात् सन्ततिहीनो भवति। यदा पञ्चमेशो राहुणा सह पञ्चमभावे शनैश्चरो चन्द्रेण सह युतो दृष्टो वा भवेत्तदा जातकः सर्पशापात् सन्ततिहीनो भवति। यदा लग्नेशः राहुणा सह पञ्चमेशः मङ्गलेन सह तथा पञ्चमभावकारको गुरुः पुत्रकारको[१२९] वा राहुणा दृष्टोर्भवेत्तदा जातकः सर्पशापात् सन्ततिहीनो भवति। यदा पञ्चमेशो मङ्गलस्तथा पञ्चमभावे राहुः शुभग्रहेण युतो दृष्टो वा भवेत्तदा जातकः सर्पशापात् सन्ततिहीनो भवति। यदा पञ्चमेशो बुधो मङ्गलस्य नवांशे मङ्गलेन युतो भवेत्तथा लग्नभावे राहुणा सह गुलिको भवेत्तदा जातकः सर्पशापात् सन्ततिहीनो भवति। यदा पञ्चमभावे सूर्यशनैश्चरमङ्गलराहुग्रहाः पञ्चमेशलग्नेशौ निर्बलौ भवेतां तदा जातकः सर्पशापात् सन्ततिहीनो भवति। यदा पञ्चमभावकारको गुरुर्वा राहुणा सह युतो भवेत्तथा लग्नेशो मङ्गलेन सह युतो भवेत् पञ्चमेशो निर्बलो भवेत्तदा जातकः सर्पशापात् सन्ततिहीनो भवति।

### (क) कुलदेवताशापात्सुतक्षययोगः।

यदा सूर्यो मकरराश्यां कुम्भराश्यां पापग्रहेण दृष्टो भवेत्तदा जातकः कुलदेवताशापात् सन्ततिहीनो भवति। यदा गुरुपुत्रेशसप्तमेशमङ्गलानां युतिर्भवेत्तदा दुष्टदेवशापाज्जातकः सन्ततिहीनो भवति। यदा पुत्रेशः पापग्रहेण दुष्टोभवेत्तदा देवशापात् जातकः सन्ततिहीनो भवति। यदा पुत्रभावः षष्ठेशेन सह युतो वा दृष्टोभवेत्तदा जातकः सन्ततिहीनो भवति।

### (ख)दत्तकपुत्रयोगः।

यदा पञ्चमभावे मिथुनराश्यां कन्याराश्यां मकरराश्यां कुंभराश्यां वा गुलिकः(मान्दिः)[१३०] शनैश्चरो वा भवेत्तदा जातको दत्तकपुत्रेण पुत्रवान् भवति। यदा पञ्चमेशो निर्बलो भूत्वा लग्नेशसप्तमेशयोः

---

[१२९] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम्।

[१३०] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम्।

सम्बन्धितो भवेत्तदा (दृष्टिर्युतिःसम्बन्धरहितो) जातको दत्तकपुत्रेण[१३१] पुत्रसुखं प्राप्नोति। यदा पञ्चमभावे शनैश्चस्य नवांशे चन्द्रशनैश्चरयोर्युतिर्भवेत्तदा जातको दत्तकविधानेन पुत्रं लभते। यदा पञ्चमे भावे कोऽपि ग्रहो बलवान् भवेत् पञ्चमेशोऽस्तङ्गतो[१३२]भवेत्तदा जातको दत्तकविधानकारको भवति। यदा पञ्चमेशः समराश्यां (२-४-६-८-१०-१२ वा) चतुर्थभावे शनैश्चरस्य नवांशे भवेत्तदा जातको दत्तकविधिना पुत्रं प्राप्नोति। यदा लग्नेशः पञ्चमभावे पञ्चमेशो लग्नभावे भवेदथवा लग्नात् पञ्चमेशौ दुःस्थाने[१३३] शुभग्रहस्य दृष्टियुक्तौ भवेतां तदा जातको दत्तकविधानेन पुत्रवान् भवति। यदा पञ्चमभावे बुधक्षेत्रे शनैश्चरक्षेत्रे वा शनैश्चरो गुलिको वा भवेदथवा शनैश्चरस्य गुलिकस्य वा पञ्चमभावे दृष्टिर्भवेत्तदा जातकः पुत्रहीनत्वादपि दत्तक विधानेन पुत्रवान् भवति।

**(ग) क्रीतपुत्रयोगः।**

यदा पञ्चमे भावे चन्द्रबुधौ शनैश्चरेण सह भवेतां तदा जातकः क्रयेण[१३४] दत्तकविधिना च सन्ततिवान् भवति।

**(घ) वंशनाशकयोगः।**

यदा पञ्चमभावे चन्द्रस्तथा प्रथमाष्टमद्वादशभावेषु पापग्रहा भवेयुस्तदा जातको वंशनाशको भवति। यदा पञ्चमभावाद् द्वादशभावेऽशुभग्रहः षष्ठभावे (लग्नाद् दशमे) चन्द्रस्तथा पञ्चमभावात् तृतीयभावे शुक्रो भवेत्तदाऽपि जातको वंशनाशको भवति। यदा पञ्चमभावात् चतुर्थनवमदशमद्वादशभावेषु अशुभग्रहा भवेयुस्तदा जातको वंशनाशको भवति। यदा पञ्चमभावे गुरुः सप्तमभावे बुधशुक्रौ तथा पञ्चमभावाद् द्वादशभावे क्रूरग्रहो[१३५] भवेत्तदा जातको वंशच्छेदको भवति। यदा पञ्चमात् दशमभावे पापग्रहो भवेदेवं द्वितीयेशोऽपि निर्बलो भवेत्तदा जातकः कुलनाशकरो भवति। यदि सप्तमभावे बुधशुक्रौ भवेतां पञ्चमेभावे गुरुश्चतुर्थभावे क्रूरग्रहा भवेयुस्तदा जातकः कुलध्वंसी (कुलघ्नो) भवति।

**(च) परजातयोगः।**

---

[१३१] मन्दाक्षैशौ सुते चन्द्रे मन्दान्यतरयुते दत्तपुत्रः।।जा.तत्व.प.वि./२०९।।

[१३२] विशेषार्थं परिशिष्टम् -०३ द्रष्टव्यम्।

[१३३] विशेषार्थं परिशिष्टम् -०३ द्रष्टव्यम्।

[१३४] धीस्थे मन्दे सेन्दुयुते क्रीतपुत्रः।।जा.तत्व.प.वि./२१४।।

[१३५] क्रूरग्रहाः सूर्यमङ्गलशनैश्चराः सन्ति ।

**षष्ठी दृष्टिः।**

यदा पञ्चमेशो राहुणा सह पञ्चमभावे गुरुचन्द्रदृष्टिर्हीनो भवेत्तदा जातकः परजातो भवति। यदा पञ्चमेशराहुचन्द्राणां युतिः पुरुषराश्यां पञ्चमभावे शनैश्चरो भवेत्तदा जातकः परजातो भवति। यदा लग्नातष्टमभावे पञ्चमभावकारको गुरुः पापग्रहेण दृष्टो युतो वा भवेत्तथा लग्नाद् दशमभावे चन्द्रो भवेत्तदा जातकः परजातो भवति।

**०९/०४ मन्त्रोदेवभक्तिश्च।**

यदा पञ्चमभावे पुरुषराश्यां[१३६] पुरुषसंज्ञकः सूर्यो मङ्गलो गुरुर्वा भवेदथवा पुरुषग्रहस्य[१३७] दृष्टिर्भवेत्तदा पुरुषसंज्ञकदेवतानां तथा स्त्रीराश्यां[१३८] चन्द्रः शुक्रो वा भवेत्तदथवा चन्द्रस्य शुक्रस्य वा दृष्टिर्भवेत्तदा स्त्रीदेवतानामाराधको भवति। यदा पञ्चमभावे उच्चराश्यां[१३९] मूलत्रिकोणराश्यां[१४०] स्वराश्यां[१४१] मित्रग्रहस्य राश्यां[१४२] वा सूर्यो भवेदथवा पञ्चमभावस्योपरि सूर्यस्य शुभ दृष्टिर्भवेत्तदा जातकः शिवस्य सूर्यस्य च भक्तो भवति। जातकः सूर्यस्य शिवस्य च मन्त्राराधनेन विशेष लाभं प्राप्नोति। यदा पञ्चमभावे उच्चराश्यां[१४३] मूलत्रिकोणराश्यां[१४४] स्वराश्यां[१४५] मित्रग्रहस्य राश्यां[१४६] वा चन्द्रो भवेदथवा पञ्चमभावस्योपरि चन्द्रस्य शुभ दृष्टिर्भवेत्तदा जातको देवीभक्तो भवति। जातको देव्या मन्त्राराधनेन विशेषलाभं प्राप्नोति। यदा पञ्चमभावे उच्चराश्यां[१४७] मूलत्रिकोणराश्यां[१४८] स्वराश्यां[१४९] मित्रग्रहस्य राश्यां[१५०] वा मङ्गलो भवेदथवा पञ्चमभावस्योपरि मङ्गलस्य शुभ दिृष्टर्भवेत्तदा जातकः कार्तिकेयस्वामिभक्तो भवति। जातकः षडाननमन्त्रारधनेन विशेषलाभं प्राप्नोति। यदा पञ्चमभावे

---

[१३६] विशेषार्थ परिशिष्टम् –०३ द्रष्टव्यम्।
[१३७] विशेषार्थ परिशिष्टम् –०३ द्रष्टव्यम्।
[१३८] विशेषार्थ परिशिष्टम् –०३ द्रष्टव्यम्।
[१३९] विशेषार्थ परिशिष्टम् –०३ द्रष्टव्यम्।
[१४०] विशेषार्थ परिशिष्टम् –०३ द्रष्टव्यम्।
[१४१] विशेषार्थ परिशिष्टम् –०३ द्रष्टव्यम्।
[१४२] विशेषार्थ परिशिष्टम् –०३ द्रष्टव्यम्।
[१४३] विशेषार्थ परिशिष्टम् –०३ द्रष्टव्यम्।
[१४४] विशेषार्थ परिशिष्टम् –०३ द्रष्टव्यम्।
[१४५] विशेषार्थ परिशिष्टम् –०३ द्रष्टव्यम्।
[१४६] विशेषार्थ परिशिष्टम् –०३ द्रष्टव्यम्।
[१४७] विशेषार्थ परिशिष्टम् –०३ द्रष्टव्यम्।
[१४८] विशेषार्थ परिशिष्टम् –०३ द्रष्टव्यम्।
[१४९] विशेषार्थ परिशिष्टम् –०३ द्रष्टव्यम्।
[१५०] विशेषार्थ परिशिष्टम् –०३ द्रष्टव्यम्।

## षष्ठी दृष्टिः।

उच्चराश्यां [१५१] मूलत्रिकोणराश्यां [१५२] स्वराश्यां [१५३] मित्रग्रहस्य राश्यां [१५४] वा बुधो भवेदथवा पञ्चमभावस्योपरि बुधस्य शुभदृष्टिर्भवेत्तदा जातको विष्णोर्भक्तो भवति। विष्णोः मन्त्राराधनेन विशेषलाभं प्राप्नोति। यदा पञ्चमभावे उच्चराश्यां [१५५] मूलत्रिकोणराश्यां [१५६] स्वराश्यां मित्रग्रहस्य राश्यां [१५७] वा गुरुर्भवेदथवा पञ्चमभावस्योपरि गुरोः शुभदृष्टिर्भवेत्तदा जातकः सरस्वत्या दत्तस्य च भक्तो भवति। जातकः सरस्वतीदत्तशङ्करादिसात्विकदेवतानां मन्त्राराधनेन विशेषलाभं प्राप्नोति। यदा पञ्चमभावे उच्चराश्यां [१५८] मूलत्रिकोणराश्यां [१५९] स्वराश्यां [१६०] मित्रग्रहस्य राश्यां [१६१] वा शुको भवेदथवा पञ्चमभावस्योपरि शुक्रस्य शुभदृष्टिर्भवेत्तदा जातको लक्ष्म्यादिदेवतानां भक्तो भवति। जातको देव्या मन्त्राराधनेन विशेषलाभं प्राप्नोति। यदा पञ्चमभावे उच्चराश्यां[१६२] मूलत्रिकोणराश्यां[१६३] स्वराश्यां[१६४] मित्रग्रहस्य राश्यां [१६५] वा शनैश्चरो भवेदथवा पञ्चमभावस्योपरि शनैश्चरस्य शुभदृष्टिर्भवेत्तदा जातको यक्षिण्याः शूद्रदेवतायाः प्रेतस्य वा भक्तो भवति। यक्षिणीशूद्रदेवता प्रेतानामाराधनेन विशेषलाभं प्राप्नोति। यदा पञ्चमभावे उच्चराश्यां[१६६] मूलत्रिकोणराश्यां[१६७] स्वराश्यां[१६८] मित्रग्रहस्य राश्यां[१६९] वा राहुर्भवेत्तदा जातकः  परपीडार्थमाभिचारिकमन्त्राराधनरतो भवति। यदा पञ्चमेशो लग्नेशस्य मित्रं भवेत्तदा पञ्चमेश सम्बद्धदेवतानां विशेषाराधनाकरणेन जातकः पुत्रवान् भवति । यदा पञ्चमेशलग्नेशयोः सम( उदासीन)

---

[१५१] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम्।
[१५२] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम्।
[१५३] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम्।
[१५४] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम्।
[१५५] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम्।
[१५६] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम्।
[१५७] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम्।
[१५८] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम्।
[१५९] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम्।
[१६०] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम्।
[१६१] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम्।
[१६२] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम्।
[१६३] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम्।
[१६४] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम्।
[१६५] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम्।
[१६६] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम्।
[१६७] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम्।
[१६८] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम्।
[१६९] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम्।

सम्बद्धो भवेत्तदा पञ्चमेशस्याराधनेन जातकः पुत्रवान् भवति। यदा पञ्चमेशोलग्नेशयोः शत्रुसम्बद्धो भवेत्तदा पञ्चमेशः सम्बद्धदेवतानां (कुलाचाररहित) विशेषाराधनाकरणेन जातकस्य पुत्रा म्रियन्ते ।

### ०९/०५ पितृसुखादि ।

यदा पञ्चमेशः[१७०]शुभग्रहः शुभग्रहेण युतो दृष्टो वा केन्द्रभावे त्रिकोणभावे वा भवेदथवा पञ्चमभावे शुभग्रहस्य दृष्टिर्भवेदथवा पञ्चमेशः शुभषट्यंशे भवेदथवा पञ्चमभावे शुभग्रहो भवेत्तदा जातकः पितृसुखं पूर्णतया लभते। यदा पञ्चमेशस्त्रिकभावे लग्नेशेन दृष्टो भवेत्तदा पितृःकृतेऽशुभफलदायको भवति। यदा पञ्चमेशो त्रिकभावे मङ्गलेन राहुणा वा दृष्टो भवेत्तदा पिताकृते अशुभफलदयको भवति। यदा पञ्चमभावे [१७१] सूर्यो भवेत्तदा जातकः पितृचिन्तायुक्तो भवति । यदा पञ्चमेशः पितृकारकसूर्यश्च नीचग्रहस्य नवांशे पापग्रहस्य नवांशे वा शनैश्चरेण राहुणा गुलिकेन सह युतो भवेत्तदा जातकः पितृचिन्तायुक्तो भवति। यदा पञ्चमेशेन सह शुभग्रहो नीचराश्यां शत्रुराश्यां क्रूरषट्यंशेऽस्तङ्गतावस्थायां वा भवेत्तदा जातकः पितृचिन्तायुक्तो भवति।

### ०९/०६ हृदयस्वास्थ्यम् ।

यदा पञ्चमभावे पञ्चमाद्द्वादशभावे पापग्रहाःक्रूरषट्यंशे शुभग्रहस्य दृष्टिर्युतिर्रहिता भवेयुस्तदा जातको हृदयरोगी भवति ।

### ०९/०७ उदरस्वास्थ्यम्।

यदा पञ्चमभावो पञ्चमभावकारकः पञ्चमेशो निर्बलो भवेत्तदा जातक उदररोगी भवति। यदा पञ्चमभावे सूर्येण सह राहुग्रहयोर्युतिर्भवेदथवा सूर्येण सह शनैश्चरस्य युतिर्भवेदथवा चन्द्रेण सह राहोः केतोः शनैश्चरस्य वा युतिर्भवेत्तदा जातक उदरशूलेन पीडितो भवति। यदा पञ्चमभावे पापग्रहस्योपरि पापग्रहस्य दृष्टिर्भवेत्तदा जातक उदरशूल पीडितो भवति। यदा पञ्चमभावे षष्ठेशेन सह पापग्रहस्य युतिर्दृष्टिर्भवेत्तदा जातक उदरशूल पीडितो भवति। यदा पञ्चमभावे त्रिकभावाधिपतिर्भवेत्तदा जातक

---

[१७०] पिताऽपि चिन्त्यो नवमे सुतर्क्षे इति वचनात्, पितृस्थानेश्वरे सौम्ये कारके शुभसंयुते। भावे वा शुभसंयुक्ते पितृसौख्य विनिर्द्दिशेत्।।जा.पा१३/२२।।

[१७१] सूर्ये कोणे तात बन्धुचिन्ता ।। जा.त. ६/१८५।।

उदरशूलपीडितो भवति। यदा पञ्चमभावो पञ्चमभावकारकः पञ्चमेशो वा पापकर्तरीयोगे भवेत्तदा जातक उदरशूल- पीडितो भवति। यदा पञ्चमेशो पापग्रहेण सह त्रिकभावे भवेत्तदा जातकउदरशूलयुक्तो भवति।

**०९/०८ यात्रा ।**

यदा पञ्चमभावे शुक्रो[१७२] भवेत्तदा जातको यात्रायां चिन्तातुरो भवति ।

**१०/०१ पञ्चमभावस्य शुभाशुभत्वनियमाः।**

यस्य भावस्य विचारः करणीयो भवति स भावो लग्नम्[१७३] इति गणनीयम्। अतः पञ्चमभावात् प्रथम-द्वितीय-चतुर्थ-पञ्चम-सप्तम-नवम-दशमभावानां स्वामिनां विचारः करणीया यथा स स्वामी शुभो ग्रहोऽस्ति न वा? यदा स स्वामी शुभो भवेत्तदा स शुभफलदायको भवति । यदा च तस्मिनेवभावे पापग्रहो भवेदथवा तस्य भावस्योपरि पापग्रहस्य दृष्टिर्भवेत्तदा तस्याऽशुभफलं मन्तव्यम् । यदा च शुभाशुभग्रहाणां प्रभावो भवेत्तदा मिश्रफलं बोद्धव्यम् । यदा पञ्चमभावस्योपरि शुभग्रहस्य दृष्टिर्भवेत्तदा तस्य शुभफलं भवति।

यदा पञ्चमभावस्याधिपतिः पापग्रहस्तस्माद्भावादथवा लग्नभावादष्टमभावे भवेदथवा सूर्येणाऽस्तङ्गतो भवेदथवा नीचराश्यां भवेदथवा शत्रुग्रहस्य राश्यां शुभग्रहेण दृष्टो युतो वा न भवेत्तदा तस्यभावस्य फलं प्रणश्यति। यदा पञ्चमभावस्याधिपतिः क्रूरग्रहः सूर्येणाऽस्तङ्गतो भवेदथवा नीचराश्यां भवेदथवा शत्रुग्रहस्य राश्यां शुभग्रहेण दृष्टो युतो वा न भवेत्तदा स यस्मिन् भावे भवेत्तस्य भावस्य फलं प्रणश्यति। यदा द्वितीयेशो शुभग्रहो नीचराश्यां शत्रुग्रहस्य राश्यामस्तङ्गतावस्थायां वा भवेत्तदा द्वितीयभावस्य फलहानिं करोति किन्तु शुभग्रहेण युतो दृष्टो वा भवेत्तदा तस्य फलविषयेऽशुभत्वं न्यूनं भवति। यदा पञ्चमभावात् षष्ठभावेऽष्टमभावे द्वादशभावे वा पापग्रहो स्वराशिं विहायान्यराश्यां भवेत्तदा पञ्चमभावस्याशुभफलं भवति। यदा पञ्चमभावस्याधिपतिः षष्ठभावस्यऽष्टमभावस्य द्वादशभावस्य वा स्वामी भवेत्तदा तस्य भावस्याशुभफलं ददाति। किन्तु त्रिकस्थानस्याधिपतिः सन्नपि यदा स लग्नेशो भवति तदा तस्य फलमशुभं न भवति। यदा पञ्चमभावे पञ्चमेशपञ्चमभावकारकौग्रहौ(कारकाः) निर्बलौ

---

[१७२] सुते द्युने शुक्रे यात्रा चिन्ता ।। जा.त.६ /१८६।।

[१७३] भावस्य यस्यैव फलं विचिन्त्यं भावं च तं लग्नमिति प्रकल्प्य।
तस्माद्वदेद्द्वादशभावजानि फलानि तद्रूपदनादिकानि।। फ.दी.१५/२०।।

भवेतामथवा पापकर्तरीयोगे[१७४] भवेतामथवा शत्रुग्रहेन युक्ता भवेतामथवा शत्रुग्रहेणदृष्टाभवेतां तथा शुभग्रहेण युक्ता दृष्टा न भवेतां तदा शुभफलं न लभ्यते अथवा तद् भावस्य दु:खं लभ्यते। पञ्चमभावे यत् द्रेष्काणो भवेत्तस्मात् द्वाविंशतिद्रेष्काणस्य स्वामी पञ्चमभावस्याशुभफलं वितरति। अतो पञ्चमभावात् २२ द्रेष्काणस्वामिनोथवा षष्ठाष्टमद्वदशभावानां स्वामिनां दशाश्चान्तर्दशा: पञ्चमभावस्याशुभफलं वितरन्ति।

यदा पञ्चमभावात् तृतीयषष्ठैकादशभावेषु स्थितेषु पापग्रहाणां दशाऽन्तर्दशाफलं तद्भावस्य शुभफलं ददाति।

यदा पञ्चमभावत् प्रथम-चतुर्थ-पञ्चम-सप्तम-दशमभावेषु शुभग्रहा: सन्ति तदा तद्भावस्य शुभफलस्याभिवृद्धिर्भवति । पञ्चमेशस्य मित्रग्रहदशायां तद्भावस्य शुभफलं प्राप्यते। अत्र ग्रहाणां नैसर्गिकमैत्री -पञ्चधामैत्र्याधारेणमित्राऽमित्रनिर्णयो भवति ।

यदा पञ्चमेशो यस्य कस्य भावस्य मध्यबिन्दो राश्यादिमाने भवेत्तदा स तस्य भावस्य पूर्णफलं ददाति। यदा पञ्चमेशो द्वयोर्भावयो:सन्धौ (संधिराश्यादिमाने) भवेत्तदा स निष्फलो भवति । मध्येऽनुपातेन फलं गणनीयम्। यदा पञ्चमेश: स्वोच्चराश्यां स्वराश्यां मूलत्रकोणराश्यां मित्रराश्यां होरादिषड्वर्गेषु बलवान् वा भवेत् किन्तु स ग्रहो भावसन्धौ भवेत्तदा स निष्फलो भवति। यदा पञ्चमेशो गुरुर्वा पापग्रहेण युतो दृष्टो वा भवेत्तदा जातको मन्द बुद्धिर्भवति।

### १०/०२ पञ्चमभावे धनसुखविचार:।

यदा पञ्चमभावे स्वराशिरुपरि शुक्रस्य तथा एकादशभावे स्थितस्य शनैश्चरस्य दृष्टिर्भवेत्तदा जातको धनवान् भवति। यदा पञ्चमभावे स्वराश्यां बुधस्तथा एकादशभावे चन्द्रमङ्गलयोर्युतिर्भवेत्तदा जातको धनकुबेरो भवति। यदा पञ्चमभावे स्वराश्यां शनैश्चरस्तथा एकादशभावे बुधो भवेत्तदा जातको धनकुबेरो भवति। यदा पञ्चमभावे स्वराश्यां सूर्य एकादशभावे चन्द्रोभवेत्तदा जातको धनकुबरो भवति। यदा पञ्चमभावे स्वराश्यां शनैश्चरस्तथा एकादशभावे मङ्गलो भवेत्तदा जातको धनकुबेरो भवति। यदा पञ्चमभावे स्वराश्यां गुरु एकादशभावे चन्द्रमङ्गलयोर्युतिर्भवेत्तदा जातको धनकुबेरो भवति।

[१७४] विशेषार्थं परिशिष्टम -०६ द्रष्टव्यम्।

**बुद्धिः/विद्या**

**१०/०३ पञ्चमभावात्पञ्चमभावे बुद्धिमत्त्वयोगः।**

यदा पञ्चमभावात्पञ्चमेभावे (लग्नान्नवमभावे इति यावत्) सूर्यबुधयोर्युतिर्भवेत्तदा जातको विशिष्टबुद्धिमान् चन्द्रबुधयोर्युतिर्भवेत्तदा धर्मयुक्तबुद्धिमान् चन्द्रमङ्गलयोर्युतिर्भवेत्तदा प्रगल्भबुद्धिः सूर्यशुक्रयोयुतिर्भवेत्तदाऽत्यन्तज्ञानी सूर्यचन्द्रयोयुतिर्भवेत्तदा नीतिज्ञो बुद्धिमान् सूर्यबुधयोयुतिर्भवेत्तदा जातको विशिष्टप्रज्ञावान् गुरुसूयर्योर्युतिर्भवेत्तदा बुद्धिमान् सूर्यशनैश्चरयोर्युतिर्भवेत्तदा बुद्धिमान् चन्द्र-शुक्रयोयुतिर्भवेत्तदा शास्त्रज्ञो गुरुमङ्गलयोर्युतिर्भवेत्तदा बुद्धिमान् गुरुभक्तो गुरुबुधयोर्युतिर्भवेत्तदा स्थिरप्रज्ञः शास्त्रज्ञो शुक्रशनैश्चरयोर्युतिर्भवेत्तदा विद्यावान् सूर्यचन्द्रगुरूणां धर्मज्ञो नीतिज्ञो सूर्यचन्द्रशनैश्चराणां युतिर्भवेत्तदा ज्ञानपिपासुः श्रुतलालसः सूर्यमङ्गलबुधानां युतिर्भवेत्तदा दुर्बुद्धिः सूर्यमङ्गलशनैश्चराणां युतिर्भवेत्तदा धर्महीनो सूर्यबुधगुरूणां युतिर्भवेत्तदा सुबुद्धिमान् नीतिपरायणः सूर्यबुधशुक्राणां युतिर्भवेत्तदा जितेन्द्रियो धर्मपरायणः सूर्यबुधशनैश्चराणां युतिर्भवेत्तदा धर्मयुक्तो बुद्धिमांश्चन्द्रमङ्गलगुरूणां युतिर्भवेत्तदा धार्मिको बुद्धिमांश्चन्द्रगुरुशनैश्चराणां युतिर्भवेत्तदा नीतिकुशलश्चन्द्रशुक्रशनैश्चराणां युतिर्भवेत्तदा बुद्धिमान् मङ्गलबुधशुक्राणां युतिर्भवेत्तदा बुद्धिमान् मङ्गलबुधशनैश्चराणां युतिर्भवेत्तदा धीमान् मङ्गलगुरूशुक्राणां युतिर्भवेत्तदा शास्त्रज्ञानानुरागी बुद्धिमान् सूर्यचन्द्रगुरुशुक्राणां युतिर्भवेत्तदा शास्त्रज्ञो बुद्धिमान् नीतिकुशलः सूर्यचन्द्रगुरुशनैश्चराणां युतिर्भवेत्तदा धार्मिको बुद्धिमांश्चन्द्रमङ्गलबुधशनैश्चराणां युतिर्भवेत्तदा ऽत्यधिकज्ञानी चन्द्रमङ्गलगुरुशुक्राणां युतिर्भवेत्तदा शास्त्रदक्षो बुद्धिमान् चन्द्रमङ्गलगुरुशनैश्चराणां युतिर्भवेत्तदा धार्मिको बुद्धिमांश्चन्द्रमङ्गलशुक्रशनैश्चराणां युतिर्भवेत्तदा ज्ञानी चन्द्रबुधगुरुशनैश्चराणां युतिर्भवेत्तदा विलक्षणबुद्धिमान् चन्द्रगुरुशुक्रशनैश्चराणां युतिर्भवेत्तदा बुद्धिमान् मङ्गलबुधशुक्रशनैश्चराणां युतिर्भवेत्तदा बुद्धिमान् मङ्गलगुरुशुक्रशनैश्चराणां युतिर्भवेत्तदा विशिष्टबुद्धिमान् बुधगुरुशुक्रशनैश्चराणां युतिर्भवेत्तदा मेधावी सूर्यचन्द्रमङ्गलबुधशनैश्चराणां युतिर्भवेत्तदा विशिष्टबुद्धिमान् सूर्यमङ्गलबुधगुरुशुक्राणां युतिर्भवेत्तदा सद्बुद्धिः सूर्यमङ्गलबुधगुरुशनैश्चराणां युतिर्भवेत्तदा बुद्धिमान् चन्द्रमङ्गलगुरुशुक्रशनैश्चराणां युतिर्भवेत्तदा बुद्धिमान् यदा च चन्द्रबुधगुरुशुक्रशनैश्चराणां युतिर्भवेत्तदा जातको धार्मिको बुद्धिमान् भवति।

**१०/०४ पञ्चमभावाच्चतुर्थभावे बुद्धिहीनत्वयोगाः।**

यदा पञ्चमभावाच्चतुर्थभावे (लग्नादष्टमभावे इति यावत्) सूर्यचंद्रमङ्गलशनैश्चराणां युतिर्भवेत्तदा जातकः बुद्धिहीनः सूर्यमङ्गलशुक्राणां युतिर्भवेत्तदा जातको बुद्धिहीनः सूर्यचन्द्रमङ्गलशुक्राणां युतिर्भवेत्तदा बुद्धिहीनो धर्महीनः सूर्यचन्द्रमङ्गलशनैश्चराणां युतिर्भवेत्तदा बुद्धिहीनः सूर्यमङ्गलबुधशुक्राणां युतिर्भवेत्तदा

बुद्धिहीनः सूर्यचन्द्रमङ्गलबुधगुरुशनैश्चराणां युतिर्भवेत्तदा बुद्धिहीनश्चन्द्रमङ्गलगुरुशनैश्चराणां युतिर्भवेत्तदा बुद्धिहीनः सूर्यचन्द्रमङ्गलशनैश्चराणां युतिर्भवेत्तदा बुद्धिहीनो यदा च सूर्यमङ्गलबुधशुक्राणां युतिर्भवेत्तदा जातको बुद्धिहीनो भवति।

### १०/ ०५ पञ्चमभावादेकादशभावे बुद्धिमत्त्वयोगाः।

यदा पञ्चमभावादेकादशभावे (लग्नात्तृतीयभावे इति यावत्) गुरुमङ्गलयोर्युतिर्भवेत्तदा मेधावी मङ्गलशुक्रयोर्युतिर्भवेत्तदा शिल्पशास्त्रनिपूणो मङ्गलशनैश्चरयोर्युतिर्भवेत्तदा कवित्वशक्तियुक्तः सूर्यमङ्गल-शुक्रणां युतिर्भवेत्तदा बुद्धिमान् सूर्यमङ्गलशनैश्चराणां युतिर्भवेत्तदा कवित्वशक्तियुक्तो सूर्यगुरुशनैश्चराणां युतिर्भवेत्तदा कलाकुशलो मङ्गलगुरुशुक्राणां युतिर्भवेत्तदा ज्ञानप्रधानो सूर्यचन्द्रमङ्गलशनैश्चराणां युतिर्भवेत्तदा विदग्धविद्यायुक्तो सूर्यचन्द्रबुधशनैश्चराणां युतिर्भवेत्तदा शास्त्रज्ञो सूर्यमङ्गलगुरुशनैश्चराणां युतिर्भवेत्तदा विद्यासम्पन्नो सूर्यबुधगुरुशनैश्चराणां युतिर्भवेत्तदा ज्ञानी सूर्यमङ्गलशुक्राणां युतिर्भवेत्तदा बुद्धिमान् सूर्यमङ्गलशनैश्चराणां युतिर्भवेत्तदा शीघ्रकविः सूर्यगुरुशनैश्चराणां युतिर्भवेत्तदा कलाकुशलो मङ्गलगुरुशुक्राणां युतिर्भवेत्तदा ज्ञानी सूर्यचन्द्रमङ्गलशनैश्चराणां युतिर्भवेत्तदा विशिष्टविद्यायुक्तः सूर्यचन्द्रबुधशनैश्चराणां युतिर्भवेत्तदा शास्त्रपण्डितः सूर्यमङ्गलगुरुशनैश्चराणां युतिर्भवेत्तदा विद्यावान् सूर्यबुधगुरुशनैश्चराणां युतिर्भवेत्तदा ऽध्यात्मविद्यानिपुणः सूर्यगुरुशुक्रशनैश्चराणां युतिर्भवेत्तदा ज्ञानी चन्द्रमङ्गलबुधशनैश्चराणां युतिर्भवेत्तदा बुद्धिमान्  मङ्गलबुधगुरुशुक्राणां युतिर्भवेत्तदा जातको बुद्धिमान् मङ्गलबुधगुरुशनैश्चराणां युतिर्भवेत्तदा श्रुतलालसो विद्यावत्सलो सूर्यचन्द्रमङ्गलबुधगुरूणां युतिर्भवेत्तदा विद्यावान् सूर्यचन्द्रमङ्गलबुधगुरूणां युतिर्भवेत्तदा प्रभूतविद्यावान् सूर्यचन्द्रमङ्गलगुरुशुक्राणां युतिर्भवेत्तदा बुद्धिमान् नाट्यविद्याविशारदः सङ्गीतज्ञः कविः सूर्यचन्द्रमङ्गलगुरुशनैश्चराणां युतिर्भवेत्तदा कर्मकाण्डादि-विधिनिपुणो यदा च सूर्यचन्द्रमङ्गलगुरुशुक्रशनैश्चराणां युतिर्भवेत्तदा जातकः प्रभूतविद्यावान् भवति।

यदा गुरुसूर्ययोर्युतिर्भवेत्तदा जातको बुद्धिहीनश्चन्द्रमङ्गलबुधशनैश्चराणां युतिर्भवेत्तदा बुद्धिहीनो चन्द्रमङ्गलबुधशनैश्चराणां युतिर्भवेत्तदा बुद्धिहीनो चन्द्रमङ्गलबुधशनैश्चराणां युतिर्भवेत्तदा बुद्धिहीनो चन्द्रमङ्गलगुरुशुक्राणां युतिर्भवेत्तदा बुद्धिहीनो यदा च चन्द्रगुरुशुक्रशनैश्चराणां युतिर्भवेत्तदा जातको विद्याहीनो भवति।

## षष्ठी दृष्टिः।

### १०/०६ पञ्चमभावाद्द्वितीयभावे पुत्रसुखविचारः।

यदा पञ्चमभावाद् द्वितीयभावे (लग्नात् षष्ठभावे इति यावत्) सूर्यबुधशुक्रशनैश्चराणां युतिर्भवेत्तदा जातको पुत्रवान् भवति।

यदा सूर्यचन्द्रगुरूणां युतिर्भवेत्तदा जातकः पुत्रैःपरित्यक्तः सूर्यबुधशनैश्चराणां युतिर्भवेत्तदा संतति-हीनश्चन्द्रमङ्गलशनैश्चराणां युतिर्भवेत्तदा पुत्रहीनः सूर्यचन्द्रबुधगुरूणां युतिर्भवेत्तदा पुत्रहीनः सूर्यचन्द्रगुरु-शुक्रशनैश्चराणां युतिर्भवेत्तदा जातकः पुत्रहीन श्चन्द्रगुरुशुक्रशनैश्चराणां युतिर्भवेत्तदाऽपुत्रः सूर्यमङ्गल-बुधगुरुशुक्राणां युतिर्भवेत्तदा कुपुत्रपीडितो यदा च चन्द्रबुधगुरुशुक्रशनैश्चराणां युतिर्भवेत्तदा जातकः पुत्रहीनो भवति।

### १०/०७ पञ्चमभावात्तृतीयभावे पुत्रसुखविचारः।

यदा पञ्चमभावात् तृतीयभावे (लग्नभावात् सप्तमभावे इति यावत्) द्वितीयसंततिसुखविचारः कर्तव्यः। अस्मिन् भावे पापग्रहस्य स्थितिर्युतिर्वा भवेत्तदा गर्भपातो गर्भस्त्रावो गर्भविकृति र्वा प्रसूतिकाले शस्त्रक्रियया प्रसवपीडा स्त्रियो भवति। यदा सूर्यशनैश्चरयोर्युतिर्भवेत्तदा जातको द्वितीयपुत्रवियोगेन दुःखी भवति। अनेन प्रकारेण सूर्यराहुग्रहयोर्युति सूर्यकेतुग्रहयोर्युति सूर्यमङ्गलयोर्युति शनिराहुग्रहयोर्युति शनिकेतुग्रहयोर्युति मङ्गलराहुग्रहयोर्युति मङ्गलकेतुग्रहयोर्युति मङ्गलशनैश्चरयोर्युतिर्भवेत्तदाऽपि स्त्रियः गर्भपातेन गर्भस्त्रावेन द्वितीयसंततिः मरणेन दुःखी भवति।

### १०/०८ पञ्चमभावाच्चतुर्थभावे पुत्रसुखविचारः।

यदा पञ्चमभावाच्चतुर्थभावे (लग्नादष्टमभावे इति यावत्) शनैश्चरो भवेत्तदा जातकः कन्यासन्ततियुक्तः किन्तु पुरुषसन्ततिहीनो भवति। यदा पञ्चमेशषष्ठेशयोः परस्परं परिवर्तनयोगः भवेदथवा पञ्चमेशाष्टमेशयोर्युतिर्यदा षष्ठाष्टमद्वादशभावे वा भवेत्तदा सन्ततिबाधा भवति। चन्द्रबुधयो-र्युतिर्भवेत्तदा नपुंसको गुरुशुक्रयोयुतिर्भवेत्तदाऽल्पसंतति सूर्यचन्द्रशनैश्चराणां युतिर्भवेत्तदा पुत्रहीनो सूर्यचन्द्रमङ्गलशुक्राणां युतिर्भवेत्तदा दुष्टपुत्रवान् सूर्यचन्द्रमङ्गलशनैश्चराणां युतिर्भवेत्तदा सन्तानहीनः शनिसूर्ययोर्युतिर्भवेत्तदा सन्ततिहीनः शनिमङ्गलयोर्युतिर्भवेत्तदाऽपुत्रः शनिराहुग्रहयोर्युतिर्भवेत्तदा पुत्रहीनः सूर्यशनैश्चरयोर्युतिर्भवेत्तदा पुत्रहीनः सूर्यमङ्गलयोर्युतिर्भवेत्तदा संततिहीनो सूर्यचन्द्रयोर्युतिर्भवेत्तदा सन्ततिहीनो मङ्गलराहुग्रहयोयुर्तिर्भवेत्तदा निःसन्तानो मङ्गलकेतुग्रहयोर्युतिर्भवेत्तदाऽपुत्रः सूर्ययमयोर्युति-

र्भवेत्तदाऽपुत्रः शनियमयोर्युतिर्भवेत्तदा पुत्रहीनो मङ्गलयमयोः[१७५] युतिर्भवेत्तदा सन्ततिहीनो मङ्गल-प्रजापतिग्रहयोर्युतिर्भवेत्तदा सन्ततिरहितो शनैश्चरप्रजापतिग्रहयोर्युतिर्भवेत्तदाऽपुत्रः सूर्यप्रजापति-ग्रहयोर्युतिर्भवेत्तदा सन्ततिहीनो राहुप्रजापतिग्रहयोर्युतिर्भवेत्तदा सन्ततिचिन्तायुक्तो मङ्गलवरुणग्रहयो-र्युतिर्भवेत्तदा सन्ततिहीनः शनैश्चरवरुणग्रहयोर्युतिर्भवेत्तदा पुत्रहीनो सूर्यवरुणयोः[१७६] युतिर्भवेत्तदा सन्ततिहीनो राहुवरुणयोर्युतिर्भवेत्तदा सन्ततिहीनो केतुवरुणोर्युतिर्भवेत्तदा सन्ततिचिन्तायुक्तः केतुप्रजापतिग्रहयोर्युति[१७७]र्भवेत्तदाऽपुत्रो यदा च केतुयमयोः युतिर्भवेत्तदा जातकः पुत्ररहितो भवति।

## १०/०९ पञ्चमात् पञ्चमभावे पुत्रसुखविचारः।

यदा पञ्चमभावात्पञ्चमभावे (लग्नान्नवमभावे इति यावत्) सूर्यबुधयोर्युतिर्भवेत्तदा जातकः पुत्रवान् चन्द्रबुधयोर्युतिर्भवेत्तदा पुत्रवांश्चन्द्रशनैश्चरयोर्युतिर्भवेत्तदा पुत्रवान् मङ्गलबुधयोर्युतिर्भवेत्तदा विशिष्टपुत्रवान् गुरुशुक्रयोर्युतिर्भवेत्तदा सुतवत्सलः सुपुत्रवान् चन्द्रमङ्गलगुरूणां युतिर्भवेत्तदा पुत्रवान् चन्द्रगुरुशनैश्चराणां युतिर्भवेत्तदा पुत्रवान् मङ्गलबुधशुक्राणां युतिर्भवेत्तदा पुत्रवान् गुरुबुधशनैश्चराणां युतिर्भवेत्तदा बहुप्रजावान् गुरुशुक्रशनैश्चराणां युतिर्भवेत्तदा सुतवत्सलः सूर्यचन्द्रबुधगुरूणां युतिर्भवेत्तदा पुत्रवान् सूर्यमङ्गलबुध-शनैश्चराणां युतिर्भवेत्तदा पुत्रवान् चन्द्रमङ्गलशुक्राणां युतिर्भवेत्तदा प्रजावान् मङ्गलबुधगुरुशनैश्चराणां युतिर्भवेत्तदा पुत्रवान् चन्द्रमङ्गलबुधशुक्रशनैश्चराणां युतिर्भवेत्तदा पुत्रवान् मङ्गलबुधगुरुशुक्रशनैश्चराणां युतिर्भवेत्तदा सुसन्ततिमान् सूर्यचन्द्रबुधानां युतिर्भवेत्तदा पुत्रवत्सलो यदा च सूर्यचन्द्रशुक्रशनैश्चराणां युतिर्भवेत्तदा जातकः सन्ततिमान् भवति। यदा च सूर्यचन्द्रबुधानां युतिर्भवेत्तदा जातकः पुत्रवत्सलो भवति ।

यदा सूर्यचन्द्रशुक्राणां युतिर्भवेत्तदा पुत्रहीनो भवति। अस्मिन् भावेऽशुभग्रहस्य स्थितिर्भवेत्तदा सन्ततिर्न भवति वा कष्टेन भवति। यदा च शनैश्चरमङ्गलराहुर्ग्रहाणां युतिर्भवेत्तदा जातकः सन्तति न भवति।

## ११/०१ दशाफलविचारः।

यदा षड्बलसम्पन्नोऽष्टकवर्गे शुभबिन्दुयुक्तः पञ्चमेशः स्वोच्चराश्यां स्वमित्रराश्यां मूलत्रिकोणराश्यां शुभग्रहस्य राश्यां वाऽस्तङ्गतावस्थाहीनो भवेत्तदा पञ्चमेशस्य दशाऽन्तर्दशायां जातको पुत्रविद्यादि-

[१७५] मङ्गलयमयोः= मङ्लयनेपच्युनयोः।

[१७६] सूर्यवरुणयोः= सूर्यपुल्टयोः।

[१७७] केतुप्रजापतयोः=केतुहर्षलयोः।

सुखयुक्तो भवति। यदाऽऽरोहिणीसंज्ञायुक्तः[१७८] पञ्चमेशो भवेत्तदा जातकः पञ्चमेशस्य दशाऽन्तर्दशायां यशस्वी पुत्रवान् विद्यावांश्च भवति। यदाऽऽरोहिणीसंज्ञायुक्तः पञ्चमेशो नवमांशे नीचराश्यां शत्रुराश्यां वा भवेत्तदा जातकः पञ्चमेशस्य दशाऽन्तर्दशायामल्पशुभफलं प्राप्नोति। ग्रहाणां षड्बलानुसारेण[१७९] पञ्चमेशस्य इष्टबलमधिकं भवेत्तदा पञ्चमेशस्य दशान्तर्दशायां जातको विद्याकुशलः पुत्रवान् सुखी च भवति। यदा पञ्चमेशेन सह योगकारकग्रहो भवेत्तदा योगकारकग्रहस्य दशाऽन्तर्दशायां जातकः पुत्रविद्यादिसुखयुक्तो भवति। यदा पञ्चमेशोऽल्पबलयुक्तः स्वोच्चराश्यां मूलत्रिकोणराश्यां वा भवेत्तदा पञ्चमेशस्य दशाऽन्तर्दशायां जातको विद्यावान् पुत्रवांश्च भवति। यदा पञ्चमेशो वर्गोत्तमास्थायां शुभो भवेत्तदा जातको पुत्रवान् विद्यावांश्च भवति।

यदा पञ्चमेशो निर्बलो भूत्वा नीचराश्यां शत्रुराश्यां वा भवेत्तदा जातकः पञ्चमेशस्य दशाऽन्तर्दशायां सन्ततिचिन्तायुक्तो विद्याकार्ये विघ्नमनुभवति । यदा पञ्चमेशो निर्बलो भूत्वा परमनीचांशे भवेत्तदा जातकः पञ्चमेशस्य दशाऽन्तर्दशायां पुत्रशोकयुक्तः पुत्रहीनो वा विद्यारहितश्च भवति । यदा पञ्चमभावे कोऽपि ग्रहो नीचराश्यां शत्रुराश्यामस्तङ्गतावस्थायां नीचनवांशे वा भवेत्तदा जातकः पञ्चमेशस्य दशाऽन्तर्दशायां पुत्रपिताविद्याविषयकचिन्तायुक्तो भवति। यदा स्वोच्चराश्यां स्वराश्यां स्वमित्रराश्यां मूलत्रिकोणराश्यां वा पञ्चमेशो नवमांशे शत्रुराश्यां नीचराश्यां वा भवेत्तदा पञ्चमेशस्य दशाऽन्तरदशायां पूर्वार्द्धे शुभफलमुत्तरार्द्धेऽशुभफलं भवति। यदा पञ्चमभावे कोऽपि पापग्रहः स्वराशिं स्वमित्रराशिं वा स्वोच्चराशिं विहाय भवेत्तदा पञ्चमेशस्य ग्रहस्य दशाऽन्तर्दशायामशुभफलं प्राप्नोति। यदा पञ्चमेशो वक्री भूत्वा त्रिकभावे[१८०] भवेत्तदा पञ्चमेशस्य दशान्तर्दशायां जातको दुःख्यपमानसहो विद्याहीनः पुत्रचिन्तायुक्तश्च भवति। यदा पञ्चमेशोऽवरोहिणी संज्ञायुक्तो[१८१] भवेत्तदा पञ्चमेशस्य दशान्तर्दशायां जातको विद्यापुत्रचिन्तायुक्तो भवति । किन्तु यदाऽवरोहिणीसंज्ञायुक्तः पञ्चमेशो मित्रराश्यां स्वोच्चराश्यां नवांशे स्वराश्यां वा भवेत्तदा जातकः पञ्चमेशस्य दशान्तर्दशायां मिश्रफलं प्राप्नोति। ग्रहाणां षड्बलानुसारेण पञ्चमेशस्य कष्टबलमधिकं भवेत्तदा पञ्चमेशस्य दशान्तर्दशायां जातको विद्याचिन्तायुक्तो

---

[१७८] यदा कोऽपिग्रहो द्वितीयेशो भूत्वा स्वनीचराशिं त्यक्त्वा स्वोच्चराशिं प्रतिगच्छेत्तदा तस्य आरोहिणी संज्ञा भवति।

[१७९] विशेषार्थं परिशिष्टम् – ०३ द्रष्टव्यम् ।

[१८०] विशेषार्थं परिशिष्टम् – ०४ द्रष्टव्यम् ।

[१८१] यदा कोऽपिग्रहो द्वितीयेशो भूत्वा स्वोच्चराशिं त्यक्त्वा नीचराशिं प्रतिगच्छेत्तदा तस्य अवरोहिणी संज्ञा भवति।

दु:खी पुत्रदु:खभाक् च भवति। यदा पञ्चमेशो राहुणा केतुना वा सह त्रिकभावे भवेत्तदा पञ्चमेशस्य दशाऽन्तर्दशायां  जातको विद्याकष्टं पुत्रदु:खं च प्राप्नोति। यदा पञ्चमेश: पापग्रहेण सह त्रिकभावे[१८२] भवेत्तदा पञ्चमेशस्य पापग्रहस्य वा दशाऽन्तर्दशायां जातको विद्याहीनो पुत्रचिन्तायुक्तश्च भवति। यदा पञ्चमभावे त्रिकभावाधिपति: पापग्रहो भवेत्तदा जातक: पञ्चमेशस्य दशाऽन्तर्दशायां पुत्रविद्याविषयक–चिन्तायुक्त उदररोगी वा भवति। यदा बलवत: शुभग्रहस्य पूर्णदृष्टि:[१८३] पञ्चमभावस्योपरि भवेत्तदा तस्य शुभग्रहस्य दशाऽन्तर्दशायां पञ्चमभावजन्यशुभफलस्याभिवृद्धिर्भवति।

**उपसंहार:–** तदेतत् सुस्पष्टमत्र विलोकितं यज्जातकस्य जन्मकुण्डल्या: पञ्चमात् सुतस्थानात् प्राधान्येन पुत्रपौत्रादिविषयकोविचारकरणीय:। तथापि प्राचीनाग्रन्थकारा ज्योतिर्विदश्च विशेषतया विद्याविषयका उदरस्वास्थगता यश: कीर्त्यादिविषयका चर्चा स्वीकुर्वन्ति। तत: कारणादत्र तषां विषयाणां चर्चा: पुरस्कृत्याऽऽधुनिकसमयस्य शेरसट्टादिकमपि चिन्तयेदिति। किम् बहुना।

-x-x-x-

[१८२] विशेषार्थं परिशिष्टम् – ०४ द्रष्टव्यम् ।

[१८३] विशेषार्थं परिशिष्टम् – ०३ द्रष्टव्यम् ।

# सप्तमी दृष्टिः।

## जन्मकुण्डल्यां कलत्रभावस्य विचारः।

(२५१-२९४)

# सप्तमी दृष्टिः।

## जन्मकुण्डल्यां कलत्रभावस्यविचारः।

यात्रा पुत्र कलत्र सौख्यमखिलं सञ्चिन्तयेत्सप्तमात्।
उक्तं पुत्रसुखासुखागमफलं सर्वं च यत्तद्वदेत[१]।।

अतः पूर्वं पञ्चम्यां दृष्ट्यां कुटुम्ब भावस्य विचारः कृतः ततश्च षष्ठ्यां दृष्ट्यां सुतभावस्य विचारः कृतः अत्र सप्तम्यां दृष्ट्यां कलत्रभावस्यविचारः प्रस्तूयते कलत्रभावस्य जामित्रं अस्तो मदनो द्यूनं कामश्चेति संज्ञाः सन्ति । कलत्रभावसहयोगिनां विविधो विचारः शास्त्रीयग्रन्थेषु प्राप्यते तद्यथा –

१. विवाहोद्वाहौ
२. कलत्रम्
३. पुत्रसौख्यादि।
४. गुह्याङ्गानि ।
५. प्रीतिर्व्यभिचारः ।
६. स्तनविचारः।
७. युद्धम्।
८. यात्रा।

इत्येषां विचारोऽत्र प्रस्तूयते।

### ०१/०१ सप्तमभावे मेषादिराशिफल विचारः

यदा सप्तमभावे मेषराशिर्भवेत्तदा जातकस्य जाया चञ्चला क्रूरा पापरता स्वार्थयुक्ता धनप्रिया च भवति। यदा सप्तमभावे वृषभराशिर्भवेत्तदा जातकस्य जाया सुन्दररदा नम्रा शान्तस्वभावा पतिव्रता देवब्राह्मणसेवारता लक्ष्मीयुक्ता च भवति। यदा सप्तमभावे मिथुनराशिर्भवेत्तदा जातकस्य जायासुचरिता रूपवती गुणवती सुवेषधारिणी च भवति। यदा सप्तमभावे कर्कराशिर्भवेत्तदा जातकस्य जाया गुणवती सौम्या मनोहरा सौभाग्ययुक्ता कलङ्करहिता माननीया च भवति। यदा सप्तमभावे सिंहराशिर्भवेत्तदा

[१] जा.पा.१४/१

**सप्तमी दृष्टिः।**

जातकस्य जायोग्रस्वभावा चञ्चलादुष्टा हीनवेषा परगृहवासी अल्पपुत्रः कटुवचनी च भवति। यदा सप्तमभावे कन्याराशिर्भवेत्तदा जातकस्य जाया रूपवती सौभाग्यवती नीतिज्ञा प्रियभाषिणी सत्यवादिनी दुष्टस्वभावऽपुत्रा च भवति। यदा सप्तमभावे तुलाराशिर्भवेत्तदा जातकस्य जाया पुण्यात्मा धर्मपरायणा सुन्दररदा गुणवती गर्विता स्थूलदेहा च भवति। यदा सप्तमभावे वृश्चिकराशिर्भवेत्तदा जातकस्य जाया कलानिपुणा प्रणयहीना कृपणा भाग्यहीना च भवति। यदा सप्तमभावे धनूराशिर्भवेत्तदा जातकस्य जाया पुरुषाकृतिः शान्तिसुखयुक्ता निष्ठुरा भक्तिहीना नीतिविहीना बुद्धिहीना च भवति। यदा सप्तमभावे मकरराशिर्भवेत्तदा जातकस्य जाया धर्मयुक्ता पतिव्रता सद्गुणसम्पन्ना सौभाग्यशालिनी सत्सुता च भवति। यदा सप्तमभावे कुम्भराशिर्भवेत्तदा जातकस्य जाया स्थिरस्वभावा पतिवचनरता देवब्राह्मणसेवारक्ता सकलसुखभोक्त्री धर्मध्वजा च भवति। यदा सप्तमभावे मीनराशिर्भवेत्तदा जातकस्य जाया कलहप्रिया कुत्सितमतिर्धर्मरता स्नेहहीना विकारयुक्ता कुपुत्रेणपीडिता च भवति।

### ०२/०१ सप्तमभावे सूर्यादिग्रहाणां राशिगतफलविचारः।

### ०३/०१ सप्तमभावे सूर्यस्य राशिगतफलविचारः।

यदा सप्तमभावे मेषराश्यां सूर्यो र्भवेत्तदा जातको बुद्धिमान् युद्धकुशलो व्यवहारदक्षः पशुधनसम्पन्न क्रोधी च भवति। यदा वृषभराश्यां सूर्यो भवेत्तदा जातकः स्थूलदेहः परगृहवासी भिक्षुकश्च भवति। यदा मिथुनराश्यां सूर्यो भवेत्तदा जातकः सन्तोषी क्लेशरहितो बुद्धिमान् धनवांश्च भवति। यदा कर्कराश्यां सूर्यो भवेत्तदा जातकः शान्तो मित्रसाहाय्येन सुखी द्विभार्यश्च भवति। यदा सिंहराश्यां सूर्यो भवेत्तदा जातकः कृपणो विदेशभ्रमणशीलो निर्धनोऽधार्मिकश्च भवति। यदा कन्याराश्यां सूर्यो भवेत्तदा जातकः शठोऽनृतभाषी क्रोधी निर्धनः पत्नीरहितश्च भवति। यदा तुलाराश्यां सूर्यो भवेत्तदा जातकश्चतुरो बुद्धिमान् सरलस्वभावो वृद्धावस्थयां च पत्नीरहितो भवति। यदा वृश्चिकराश्यां सूर्यो भवेत्तदा जातको दयालुः शूरः पत्नीवचनपालको ग्रामजनस्नेही पित्तरोगी च भवति। यदा धनूराश्यां सूर्यो भवेत्तदा जातकः कार्यप्रसिद्धो युद्धप्रियो वृद्धावस्थायां सुखी च भवति। यदा मकरराश्यां सूर्योभवेत्तदा जातकः पिशुनो बहुद्वेषी कामी मन्दबुद्धिः स्त्रीपुत्रहीनश्च भवति। यदा कुम्भराश्यां सूर्यो भवेत्तदा जातकः क्रूरो मलिनः कफवातरोगी दासो निर्धनो दुःखी च भवति। यदा मीनराश्यां सूर्यो भवेत्तदा जातको विनयी शुद्धाचरणेन प्रख्यातो धनवान् सुकलत्रवांश्च भवति।

**सप्तमी दृष्टिः।**

## ०३/०२ सप्तमभावे चन्द्रस्य राशिगतफलविचारः।

यदा सप्तमभावे मेषराश्यां चन्द्रो भवेत्तदा जातको मनोहरमुखाकृतिर्न्यायिनीतिरक्षको मान्यश्च भवति। यदा वृषभराश्यां चन्द्रो भवेत्तदा जातकः कार्यतत्परो राज्यकार्यकुशलः सुकलत्रवांश्च भवति। यदा मिथुनराश्यां चन्द्रो भवेत्तदा जातको वाहनसम्पन्नः सत्यवादी धनवान् पुत्रवान् सुकलत्रवांश्च भवति। यदा कर्कराश्यां चन्द्रो भवेत्तदा जातकः सत्यासत्यज्ञो युवावस्थायां सुकलायुक्तो लुब्धकश्च भवति। यदा सिंहराश्यां चन्द्रो भवेत्तदा जातकः शीघ्रकर्मकर्ता राज्यसेवकः स्त्रीवत्सलश्च भवति। यदा कन्याराश्यां चन्द्रो भवेत्तदा जातको वायुरोगी धनवान् पुत्रवान् स्वाधीनपतिकश्च भवति । यदा तुलाराश्यां चन्द्रो भवेत्तदा जातको भीरुर्दुःस्थानसेवारतः स्त्रीधनेन च जीवननिर्वाहकर्ता भवति। यदा वृश्चिकराश्यां चन्द्रो भवेत्तदा जातकः शूरो मित्रप्रियो नृपराज्यमान्यः स्त्रीसुखरहितश्च भवति । यदा धनूराश्यां चन्द्रो भवेत्तदा जातकः सन्तोषी सुखी गुप्तकार्यकर्ता सकुलत्रवांश्च भवति। यदा मकरराश्यां चन्द्रो भवेत्तदा जातकः साहसिकोऽभिमानी धनिकः स्त्रीवत्सलो द्विभार्योश्च भवति। यदा कुम्भराश्यां चन्द्रो भवेत्तदा जातकः षड्रसज्ञाता प्रज्ञः सुखी कामी द्विभार्यश्च भवति। यदा मीनराश्यां चन्द्रो भवेत्तदा जातकः सत्यासत्यज्ञो कार्यसाधकः पुत्रसौख्यभाक् च भवति।

## ०३/०३ सप्तमभावे मङ्गलस्य राशिगतफलविचारः।

यदा सप्तमभावे मेषराश्यां मङ्गलो भवेत्तदा जातको धनकुबेरो प्रभूताश्वादिवाहनसुखभाक् प्रख्यातः सुखी स्त्रीसुखभाक् च भवति । यदा वृषभराश्यां मङ्गलो भवेत्तदा जातको मधुरभाषी पुत्ररहितो मध्यमवस्थायां सुखी पुत्ररहितश्च भवति। यदा मिथुनराश्यां मङ्गलो भवेत्तदा जातकः शूरोऽनेकाश्वसम्पन्नश्च भवति। यदा कर्कराश्यां मङ्गलो भवेत्तदा जातकः स्त्रीहीनो पुत्रहीनश्च भवति। यदा सिंहराश्यां मङ्गलो भवेत्तदा जातकः कुशाग्रबुद्धि उग्रस्वभावो रोगग्रस्तो निर्धनोऽपुत्रः स्त्रीहीनश्च भवति। यदा कन्याराश्यां मङ्गलो भवेत्तदा जातकः प्रख्यातः क्रोधी स्त्रीसुखहीनः शस्त्रघातेन लब्धमृत्युश्च भवति। यदा तुलाराश्यां मङ्गलो भवेत्तदा जातकः स्नेहस्वभावोऽभिमानी लोभी पिशुनः स्त्रीपुत्रहीनश्च भवति। यदा वृश्चिकराश्यां मङ्गलो भवेत्तदा जातको दानी धनवान् नृपराज्यविरोधी परधनेच्छुकश्च भवति। यदा धनूराश्यां मङ्गलोभवेत्तदा जातको धनधान्यसम्पन्न उत्तमाश्वपालकश्च भवति। यदा मकरराश्यां मङ्गलो भवेत्तदा जातको नृपसचिवो नृपो राजकुलोत्पन्नः परधनेन धनवांश्च भवति। यदा कुम्भराश्यां मङ्गलो भवेत्तदा जातकः शत्रुरहितः स्त्रीसुखरहितश्च भवति। यदा मीनराश्यां मङ्गलो भवेत्तदा जातकः परोपकारी धनधान्यसमृद्धो नृपमान्यश्च भवति।

## ०३/ ०४ सप्तमभावे बुधस्य राशिगतफलविचारः।

यदा सप्तमभावे मेषराश्यां बुधो भवेत्तदा जातकः सुखी सुकलत्रवांश्च भवति। यदा वृषभराश्यां बुधो भवेत्तदा जातकः सद्गुणसम्पन्नः सुकलत्रेच्छुकश्च भवति। यदा मिथुनराश्यां बुधो भवेत्तदा जातकः शान्तो गजाश्वादिधनयुक्तश्च भवति। यदा कर्कराश्यां बुधो भवेत्तदा जातको मधुरवाक् सद्गुणी स्त्रीपुत्रधनसुखसम्पन्नश्च भवति। यदा सिंहराश्यां बुधो भवेत्तदा जातको मनोज्ञः सुकलत्रभाक् शठश्च भवति। यदा कन्याराश्यां बुधो भवेत्तदा जातकः शीघ्रकर्मकर्ता शूरोऽश्वादिधनसुखभाक् उग्रस्वभावः तीर्थे च लब्धमृत्युर्भवति। यदा तुलाराश्यां बुधो भवेत्तदा जातको धर्मिष्ठः श्रद्धावान् सत्यासत्यज्ञो राज्याधिकारी धनवान् धान्यसम्पन्नश्च भवति। यदा वृश्चिकराश्यां बुधो भवेत्तदा जातकः कविः कलाकुशलो महापौरो भीरुर्दीर्घायुश्च भवति। यदा धनूराश्यां बुधो भवेत्तदा जातको मानी राजसम्मानभाक् सुमित्रवान् न्यायाधीशश्च भवति। यदा मकरराश्यां बुधो भवेत्तदा जातकः कुशाग्रबुद्धिर्नृपो राज्याधिकारी धनवान् पुत्रावानश्वादिसुखसम्पन्नश्च भवति। यदा कुम्भराश्यां बुधो भवेत्तदा जातकः प्राज्ञः कृषको धनकुबेरोऽश्वसुखसम्पन्नश्च भवति। यदा मीनराश्यां बुधो भवेत्तदा जातकश्चतुरो धनवान् परकार्यरतः परस्त्रीलोलुपश्च भवति।

## ०३/५ सप्तभावे गुरो राशिगगतफलविचारः।

यदा सप्तमभावे मेषराश्यां गुरुर्भवेत्तदा जातको धर्मकर्मरतः सदानन्दी राज्याधिकारी च भवति। यदा वृषभराश्यां गुरुर्भवेत्तदा जातको भाग्यवान् धनवान् राज्यधनलाभवान् परस्त्रीरतश्च भवति। यदा मिथुनराश्यां गुरुर्भवेत्तदा जातको राज्यमान्यो धनसमृद्धः स्त्रीसुखयुक्तश्च भवति। यदा कर्कराश्यां गुरुर्भवेत्तदा जातकः सत्कुलोत्पन्नो भाग्यवान् पुत्रवान् सुकलत्रवान् च भवति। यदा सिंहराश्यां गुरुर्भवेत्तदा जातको देवगुरुभक्तो बन्धुमान्य उत्तमधनसम्पन्नः सुकलत्रवान् च भवति। यदा कन्याराश्यां गुरुर्भवेत्तदा जातको राज्यमान्यो राज्याधिकारी धनसम्पन्नः पुत्रसुखभाक् च भवति। यदा तुलाराश्यां गुरुर्भवेत्तदा जातकः साहसिकः शूरः प्रख्यातः कफरोगी च भवति। यदा वृश्चिकराश्यां गुरुर्भवेत्तदा जातको धनकुबेरो बहुवाहनस्वामी च भवति। यदा धनूराश्यां गुरुर्भवेत्तदा जातको मनोहर उद्योगशीलो भ्रमणशीलश्च भवति। यदा मकरराश्यां गुरुर्भवेत्तदा जातकः कुलाचाररतो दुष्टस्वभावश्च भवति। यदा कुम्भराश्यां गुरुर्भवेत्तदा जातको विनयी मनोहरमुखाकृतिः सुखी विद्यावान् राज्यकार्यकुशलो वाहनस्वामी च भवति। यदा मीनराश्यां गुरूर्भवेत्तदा जातकः स्वधर्मरतो नृपसचिवोऽश्वदिसुखसम्मपन्नः सर्वजिच्च भवति।

**०३/ ०६ सप्तमभावे शुक्रस्य राशिगतफलविचारः।**

यदा सप्तमभावे मेषराश्यां शुक्रो भवेत्तदा जातको नम्रस्वभावः पुत्रवान् स्त्रीसुखभाक् कफप्रकृतिर्वायुरोगी च भवति। यदा वृषभराश्यां शुक्रो भवेत्तदा जातकः सत्कुलोत्पन्नस्तेजस्वी नृपवत् कार्यकुशल उद्योगकुशलश्च भवति। यदा मिथुनराश्यां शुक्रो भवेत्तदा जातकः शूरो धनवान् सुभृत्यवान् दाम्भिकश्च भवति। यदा कर्कराश्यां शुक्रो भवेत्तदा जातकः सत्कर्मानुरागी बन्धुरहितः कुलटापतिश्च भवति। यदा सिंहराश्यां शुक्रो भवेत्तदा जातको दयालुर्दुर्जनसङ्गी बन्धुपरित्यक्तः पुत्रहीनः स्त्रीरहितश्च भवति। यदा कन्याराश्यां शुक्रो भवेत्तदा जातकः सेवाकार्यकुशलः शत्रुपीडितोऽल्पायुश्च भवति। यदा तुलाराश्यां शुक्रो भवेत्तदा जातकः सदानन्दी गुरुसेवारतो धनप्रियो बन्धुप्रियः पितृवत्सलः पुत्रसुखभाक् च भवति। यदा वृश्चिकराश्यां शुक्रो भवेत्तदा जातकः सेवककार्यरतः कामासक्तः प्रमादी रोगग्रस्तः कुलटापतिः स्त्रीपराजितश्च भवति। यदा धनूराश्यां शुक्रो भवेत्तदा जातको विप्रभक्तः स्त्रीवत्सलो गर्विष्ठो वायुरोगी कफप्रकृतिश्च भवति। यदा मकरराश्यां शुक्रो भवेत्तदा जातकः पुष्टदेहो वैभवयुक्तः स्त्रीवत्सलः शठश्च भवति। यदा कुम्भराश्यां शक्रो भवेत्तदा जातको दयालुः सुकलत्रवान् राज्याधिकारी च भवति। यदा मीनराश्यां शुक्रो भवेत्तदा जातको युद्धविद्याविशारदः शत्रुजिद् धनधान्यसम्पन्नो नृपवदश्वादिवाहनसुखसम्पन्नश्च भवति।

**०३/ ०७ सप्तमभावे शनैश्चस्य राशिगतफलविचारः।**

यदा सप्तमभावे मेषराश्यां शनैश्चरो भवेत्तदा जातकः शूद्रकुलोत्पन्नो नीचजनसङ्गी शठो बहुस्त्रीयुक्तश्च भवति। यदा वृषभराश्यां शनैश्चरो भवेत्तदा जातकः कुकर्मरतः प्रमादी कुस्त्रीसङ्गी च भवति। यदा मिथुनराश्यां शनैश्चरो भवेत्तदा जातकः स्वकार्यचतुरो मनस्वी कुष्ठरोगी कम्परोगी कुस्त्रीसङ्गी च भवति। यदा कर्कराश्यां शनैश्चरो भवेत्तदा जातको मनस्वी विदूषको युद्धप्रियः सुकलत्रयुक्तश्च भवति। यदा सिंहराश्यां शनैश्चरो भवेत्तदा जातकः सिंहतुल्योग्रस्वभावः स्त्रीपुत्रसुखहीनश्च भवति। यदा कन्याराश्यां शनैश्चरो भवेत्तदा जातकः कलाकुशलस्तस्करः स्त्रीपराजितः पुत्ररहितः कन्याजनकश्च भवति। यदा तुलाराश्यां शनैश्चरो भवेत्तदा जातको दयालुर्भृत्यसुखवन्न अश्वादिवाहनसुखसम्पन्नश्च च भवति। यदा वृश्चिकराश्यां शनैश्चरो भवेत्तदा जातकः कफरोगी वायुरोगपीडितः स्त्रीपुत्ररहितो बहुशत्रुपीडितश्च भवति। यदा धनूराश्यां शनैश्चरो भवेत्तदा जातको राज्यकार्यकुशलः पुत्रवांश्च भवति। यदा मकरराश्यां शनैश्चरो भवेत्तदा जातको युद्धविशारदो बुद्धिमान् धनवान् कुलश्रेष्ठः शत्रुजिच्च भवति। यदा कुम्भराश्यां शनैश्चरो

भवेत्तदा जातको बुद्धिमान् धनिकः स्त्रीपुत्ररहितश्च भवति। यदा मीनराश्यां शनैश्चरो भवेत्तदा जातको दयालुर्वाहनस्वामी भृत्यसुखसुखसम्पन्नः पुत्रवान् स्त्रीसुखहीनश्च भवति।

### ०४/०१) जन्मकुण्डल्यां सप्तमेभावेऽन्यभावाधिपतीनां फलविचारः।

यदा सप्तमेभावे लग्नेशः शुभो भवेत्तदा जातकः सुस्वभावयुक्तः रूपशीलतेजस्विकलत्रवांश्च भवति। यदा सप्तमभावे लग्नेशः पापग्रहो भवेत्तदा जातकस्य भार्याऽत्युग्रा भवति। यदा सप्तमभावे द्वितीयेशः शुभो भवेत्तदा जातकः सुकलत्रवान् भवति। यदा सप्तमभावे द्वितीयेशः पापग्रहो भवेत्तदा जातकस्य पत्नी वन्ध्या भवति। यदा सप्तमेभावे तृतीयेशः शुभग्रहो भवेत्तदा जातकः सुशीलसौभाग्यवतीप्रौढापतिर्भवति। यदा सप्तमेभावे तृतीयेशः पापग्रहो भवेत्तदा जातकस्य जाया पितृगृहवासी भवति। यदा सप्तमेभावे चतुर्थेशः शुभो भवेत्तदा जातकस्य पत्नीश्वशुरौ पालयति । यदा सप्तमेभावे चतुर्थेशःपापग्रहो भवेत्तदा जातकस्य पत्नीश्वशुरौ न पालयति । यदा सप्तमभावे चतुर्थेशो मङ्गलो वा शुक्रो भवेत्तदा जातकस्य पत्नी सुचरितावता कुलीना च भवति । यदा सप्तमभावे पञ्चमेशः शुभो भवेत्तदा जातकः सुपुत्रवान् सुकलत्रवांश्च भवति। यदा सप्तमभावे पञ्चमेशः पापग्रहो भवेत्तदा जातकः पुत्रचिन्तायुक्तो भवति । यदा सप्तमभावे षष्ठेशः शुभो भवेत्तदा जातकस्यपत्नी नष्टगर्भा वन्ध्या वा भवति। यदा सप्तमभावे षष्ठेशः पापग्रहो भवेत्तदा जातकस्य दुष्टा भार्याऽत्युग्रा द्वेषिणी च भवति। यदा सप्तमभावेऽष्टमेशः शुभो भवेत्तदा जातक उदररोगी दुर्जनसङ्गी च भवति । यदा सप्तमभावेऽष्टमेशः पापग्रहो भवेत्तदा जातकः स्त्रीद्वेषी स्त्रीदोषेण वा मृत्युं प्राप्नोति । यदा सप्तमेभावे नवमेशःशुभो वा पापग्रहो वा भवेत्तदा जातकः सुभगायाः सत्यवादिन्या रूपवत्याः सुशीलाः पुण्यवत्या लक्ष्मीसम्पन्नायाः च स्त्रियः पतिर्भवति। यदा सप्तमभावे दशमेशःशुभो वा पापग्रहो भवेत्तदा जातकस्य पत्नी पुत्रवती सुरूपा पतिव्रता गुणवती च भवति। यदा सप्तमभावे एकादशेशः शुभो वा पापग्रहो वा भवेत्तदा जातकस्तेजस्वी शीलवान् दीर्घायुरेकस्त्रीपति उच्चपदस्थश्च भवति। यदा सप्तमभावे द्वादशेशः शुभग्रहो भवेत्तदा जातकः वेश्यासङ्गेन मृत्युं प्राप्नोति। यदा सप्तमभावे द्वादशेशः पापग्रहो भवेत्तदा जातको दुष्कर्मरतः परुषवाक् स्त्रीदोषेण च मृत्युं प्राप्नोति।

### ०५/०१ जन्मकुण्डल्यां भावानुसारेणसप्तमेशस्य फलविचारः।

यदा सप्तमेशः प्रथमभावे भवेत्तदा जातको रूपवान् स्वपत्नीरत ईषत् परस्त्रीमोहरतश्च भवति । यदा सप्तमेशो द्वितीयभावे भवेत्तदा जातकः दुष्टभार्यापतिः स्त्रीधनेनसुखी अल्पस्त्रीसङ्गी कुलटापतिश्च भवति।

## सप्तमी दृष्टिः।

यदा सप्तमेश:शुभग्रहस्तृतीयभावे भवेत्तदा जातको दृढमना: परिवारवत्सलो दु:खी च भवति। यदा सप्तमेश: पापग्रहस्तृतीयभावे भवेत्तदा जातकस्य पत्नीदुश्चरिता भवति। यदा सप्तमेशश्चतुर्थभावे भवेत्तदा जातकश्चञ्चल: पितृद्वेषी च भवति। यदा सप्तमेश: पञ्चमेभावे भवेत्तदा जातक: सुभाग्यवान् पुत्रवान्, पराक्रमी दुर्बुद्धिश्च भवति। तस्य च पुत्रो मातृपालको भवति। यदा सप्तमेश: शुभग्रह: षष्ठभावे भवेत्तदा जातक: स्त्रीक्लेशितो भार्या व्याधिसन्तप्तश्च भवति। यदा सप्तमेश:पापग्रह: षष्ठभावे भवेत्तदा जातक: स्त्रीसेवनेन मृत्युं प्राप्नोति क्षयरोगी वा भवति। यदा सप्तमेश: सप्तमभावे भवेत्तदा जातक: दीर्घायु: सुस्वभावस्तेजस्वी च भवति। यदा सप्तमेश: शुभग्रहोऽष्टमभावे भवेत्तदा जातकस्य विवाहो विलम्बेन भवति। यदा सप्तमेश: पापग्रहोऽष्टमभावे भवेत्तदा जातको गणिकारत: विवाहीन: चिन्तितमना दु:खी च भवति। यदा सप्तमेशो नवमेभावे भवेत्तदा जातकस्तेजस्वी सुस्वभाव: सुकलत्रवांश्च भवति। यदा सप्तमेश: पापग्रहो नवमभावे भवेत्तदा जातक: कुरूपो नपुंसकश्च भवति। यदा सप्तमेशो दशमेभावे भवेत्तदा जातको नृपेण न्यायधीशेन दण्डित:कामी कपटचित्त: दु:खी शत्रुपराजितश्च भवति। यदा सप्तमेश एकादशभावे भवेत्तदा जातकस्य रूपवती शीलवती पतिव्रता च भवति। यदा सप्तमेश: शुभग्रहो द्वादशभावे भवेत्तदा जातकस्य विवाहो विलम्बेन भवति। यदा सप्तमेश: पापग्रहो द्वादशभावे भवेत्तदा जातको गृहबन्धुरतस्तस्य च भार्या दुष्टा चञ्चला च भवति।

### ०६/०१ सप्तमभावस्योपरि सूर्यादिग्रहाणां पूर्णदृष्टिफलविचार:।

यदा सप्तमभावस्योपरि सूर्यस्य दृष्टिर्भवेत्तदा [२] जातको नपुंसक: स्त्रीनाशक: शत्रुपीडितश्च भवति। यदा सप्तमभावस्योपरि चन्द्रस्य दृष्टिर्भवेत्तदा जातकस्य पत्नी मनोहरा गुणयुक्ता चतुरा गजगामिनी च भवति। यदा सप्तमभावस्योपरि मङ्गलस्य दृष्टिर्भवेत्तदा जातक: स्त्रीनाशक: स्त्रीपीडितो वा भवति। यदा सप्तमभावस्योपरि बुधस्य दृष्टिर्भवेत्तदा जातको दीर्घायुर्दृढदेह: कलाज्ञ: स्त्रीसुखयुक्तो धनिको धान्यसम्पन्नश्च भवति। यदा सप्तमभावस्योपरि गुरोर्दृष्टिर्भवेत्तदा जातको धनवान् यशस्वी प्रतिष्ठासम्पन्न: पुत्रवान् सुकलत्रवांश्च भवति। यदा सप्तमभावस्योपरि शुक्रस्य दृष्टिर्भवेत्तदा जातक: स्त्रीपुत्रयुक्तो भवति। यदा सप्तमभावस्योपरि शनैश्चरस्य दृष्टिर्भवेत्तदा जातको ज्वरातिसारपाण्डुरोगै: पीडित: स्त्रीविहीन: स्त्रीनाशकर:तस्य च मृत्युतुल्यपीडां प्राप्नोति। यदा सप्तमभावस्योपरि राहुग्रहस्य दृष्टि: [३]भवेत्तदा जातकस्यपत्नी राहुदशायां म्रियते।

---

[२] मङ्गलगुरुशनैश्चराणां विशेषदृष्टि विषयार्थं परिशिष्टम्–०३ द्रष्टव्यम्।

[३] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम् ।

**०७/ ०१ सप्तमभावस्थितग्रहस्योपर्यन्यग्रहाणां दृष्टिफलविचारः।**

**०७/ ०१ कलत्रम्।**

यदा सप्तमभावे मेषराश्यां सूर्यस्योपरि चतुर्थभावे स्थितस्य मङ्गलस्य दृष्टिर्भवेत्तदा जातक उत्तमस्त्रिसुखभाक् स्त्रिप्रियश्च भवति । यदा सप्तमभावे मिथुनराश्यां कन्याराश्यां वा सूर्यस्योपरि प्रथमभावे स्थितस्य गुरोर्दृष्टि भवेत्तदा जातकः स्त्रीकारणाद् गर्विष्ठो भवति। यदा सप्तमभावे मिथुनराश्यां सूर्यस्योपरि चतुर्थभावे स्थितस्य शुक्रस्य दृष्टिर्भवेत्तदा जातकः सुकलत्रवान् भवति। यदा सप्तमभावे कन्याराश्यां सूर्यस्योपरि प्रथमभावे स्थितस्य शुक्रस्य दृष्टिर्भवेत्तदा जातकः सुकलत्रवान् भवति । यदा सप्तमभावे सिंहराश्यां सूर्यस्योपरि चतुर्थभावे स्थितस्य चन्द्रस्य दृष्टिर्भवेत्तदा जातकः सुकलत्रवान् भवति। यदा सप्तमभावे मकरराश्यां कुम्भराश्यां वा सूर्यस्योपरि प्रथमभावे स्थितस्य शुक्रस्य दृष्टिर्भवेत्तदा जातको बहुस्त्रीसाहाय्येन स्वस्त्रीसाहाय्येन वा धनिको भवति। यदा सप्तमभावे मेषराश्यां चन्द्रस्योपरि प्रथमभावे स्थितस्य शुक्रस्य दृष्टिर्भवेत्तदा जातकस्य पत्नी शान्तचित्ता सुशीला मनोहरा च भवति। यदा सप्तमभावे कर्कराश्यां चन्द्रस्योपरि तृतीयभावे वैकादशभावे वा स्थितस्य गुरोर्दृष्टिर्भवेत्तदा जातकः रूपवद्भार्यो भवति। यदा सप्तमभावे कुम्भराश्यां चन्द्रस्योपरि प्रथमभावे तृतीयभावे वैकादशभावे वा स्थितस्य गुरोर्दृष्टिर्भवेत्तदा जातकः सुकलत्रवान् भवति। यदा सप्तमभावे मीनराश्यां चन्द्रस्योपरि प्रथमभावे स्थितस्य बुधस्य दृष्टिर्भवेत्तदा जातकः प्रमदाप्रियो भवति। यदा सप्तमभावे मीनराश्यां चन्द्रस्योपर्यष्टमभावे वैकादशभावे वा स्थितस्य गुरोर्दृष्टिर्भवेत्तदा जातकः सुकलत्रवान् भवति। यदा सप्तमभावे वृश्चिकराश्यां बुधस्यारि प्रथमभावे वैकादशभावे वा स्थितस्य गुरोर्दृष्टिभवेत्तदा जातकः सुकलत्रयुक्तो भवति। यदा सप्तमभावे मेषराश्यां बुधस्योपर्येकादशभावे प्रथमभावे वा स्थितस्य गुरोर्दृष्टिर्भवेत्तदा जातकः स्त्रीसुखयुक्तो भवति।

यदा सप्तमभावे मिथुनराश्यां गुरोरुपरि प्रथमभावे स्थितस्य सूर्यस्य दृष्टिर्भवेत्तदा जातक सुकलत्रवान् भवति। यदा सप्तमभावे कन्याराश्यां गुरोरुपरि प्रथमभावे स्थितस्य शुक्रस्य दृष्टिर्भवेत्तदा जातकः सुकलत्रवान् भवति। यदा सप्तमभावे मिथुनराश्यां गुरोरुपरि चतुर्थभावे प्रथमभावे वा स्थितस्य शुक्रस्य दृष्टिर्भवेत्तदा जातकः स्त्रीसुखभाक् भवति। यदा सप्तमभावे कर्कराश्यां गुरोरुपरि प्रथमभावे स्थितस्य मङ्गलस्य दृष्टिर्भवेत्तदा जातकस्तरुणी भार्यो भवति। यदा सप्तमभावे कर्कराश्यां गुरोरुपरि

## सप्तमी दृष्टिः।

प्रथमभावे तृतीयभावे वा स्थितस्य शुक्रस्य दृष्टिर्भवेत्तदा जातको बहुपत्नीको भवति। यदा सप्तमभावे वृश्चिकराश्यां शुक्रस्योपरि प्रथमभावे तृतीयभावे वैकादशभावे वा स्थितस्य गुरोर्दृष्टिर्भवेत्तदा जातकः सुकलत्रवान् भवति। यदा सप्तमभावे मेषराश्यां शुक्रस्योपरि प्रथमभावे तृतीयभावे वैकादशभावे वा स्थितस्य गुरोर्दृष्टिर्भवेत्तदा जातकःसुकलत्रवान् भवति। यदा सप्तमभावे तुलाराश्यां शुक्रस्योपरि प्रथमभावे तृतीयभावे चतुर्थभावे वैकादशभावे वा स्थितस्य गुरोर्दृष्टिर्भवेत्तदा जातकः सुकलत्रवान् भवति। यदा सप्तमभावे वृषभराश्यां शुक्रस्योपर्येकादशभावे स्थितस्य गुरोर्दृष्टिर्भवेत्तदा जातकः सुकलत्रवान् भवति। यदा सप्तमभावे सिंहराश्यां शुक्रस्योपरि तृतीयभावे वैकादशभावे वा स्थितस्य गुरोर्दृष्टिर्भवेत्तदा जातको बहुस्त्रीसङ्गी सुखी च भवति।यदा सप्तमभावे मीनराश्यां शुक्रस्योपर्येकादशभावे तृतीयभावे स्थितस्य गुरोर्दृष्टिर्भवेत्तदा जातको बहुस्त्रीसङ्गी भवति। यदा सप्तमभावे धनूराश्यां शुक्रस्योपर्येकादशभावे तृतीयभावे स्थितस्य गुरोदृष्टिर्भवेत्तदा जातकः सुकलत्रवान् भवति। यदा सप्तमभावे मकरराश्यां शुक्रस्योपरि प्रथमभावे स्थितस्य गुरोर्दृष्टिर्भवेत्तदा जातकः सुकलत्रवान् भवति। यदा सप्तमभावे मकरराश्यां शुक्रस्योपर्येकादशभावे स्थितस्य गुरोर्दृष्टिर्भवेत्तदा जातकः सुकलत्रवान् भवति। यदा सप्तमभावे मकरराश्यां शुक्रस्योपरि प्रथमभावे स्थितस्य गुरोर्दृष्टिर्भवेत्तदा जातकः सुकलत्रवान् भवति। यदा सप्तमभावे कुम्भराश्यां शुक्रस्योपरि प्रथमभावे तृतीयभावे वैकादशभावे वा स्थितस्य गुरोर्दृष्टिर्भवेत्तदा जातक उत्तमकलत्रवान् भवति। यदा सप्तमभावे तुलाराश्यां शुक्रस्योपरि प्रथमभावे चतुर्थभावे वा स्थितस्य चन्द्रस्य दृष्टिर्भवेत्तदा जातकः प्रमदासङ्गेन धनवान् भवति। यदा तुलाराश्यां शुक्रस्योपरि दशमभावे स्थितस्य शनैश्चरस्य दृष्टिर्भवेत्तदा जातकः स्त्रीप्रियः परदाररतो वा भवति। यदा कर्कराश्यां शनैश्चरस्योपरि तृतीयभावे वैकादशभावे वा स्थितस्य गुरोर्दृष्टिर्भवेत्तदा जातकः सुकलत्रवान् भवति। यदा सप्तमभावे सिंहराश्यां मङ्गलस्योपरि चतुर्थभावे स्थितस्य चन्द्रस्य दृष्टिर्भवेत्तदा जातको विवाहोत्तरं स्त्रीसाहाय्येन धनिको भवति। यदा शुक्रः शुभग्रहणे सह सप्तमभावस्योपरि दृष्टिं करोति तदा जातको बहुपुत्रवान् शुद्धमतिर्व्यवसायेन च धनिको भवति।

यदा सप्तमभावे मेषराश्यां सूर्यस्योपरि द्वादशभावे स्थितस्य मङ्गलस्य दृष्टिर्भवेत्तदा जातकोऽल्पदाम्पत्यसुखवान् भवति। यदा सप्तमभावे मेषराश्यां सूर्यस्योपरि प्रथमभावे स्थितस्य मङ्गलस्य दृष्टिर्भवेत्तदा जातको मध्यमदाम्पत्यसुखवान् भवति। अस्मिन्योगे शुभग्रहस्य दृष्टिर्नभवेत्तदा स्त्रीजातकस्य पति र्भीरुः कापुरुषश्च भवति। यदा सप्तमभावे मेषराश्यां सूर्यस्योपरि दशमभावे स्थितस्य शनैश्चरस्य दृष्टिर्भवेत्तदा जातकस्य भार्या जडबुद्धि र्भवति। प्रथमभावे स्थितस्य शनैश्चरस्य दृष्टिर्भवेत्तदा

**सप्तमी दृष्टिः।**

जातकःस्त्रीक्लेशितस्तथा पञ्चमभावे स्थितस्य शनैश्चरस्य दृष्टिर्भवेत्तदा जातको मध्यमदाम्पत्यसुखवान् प्राप्नोति। यदा सप्तमभावे वृषभराश्यां तुलाराश्यां वा सूर्यस्योपरि प्रथमभावे स्थितस्य शनैश्चरस्य दृष्टिर्भवेत्तदा जातको वृद्धभार्यो भवति। यदा सप्तमभावे वृषभराश्यां तुलाराश्यां वा सूर्यस्योपरि पञ्चमभावे स्थितस्य शनैश्चरस्य दृष्टिर्भवेत्तदा जातकस्य पत्नी रुग्णा पीडिता दुःखिता वृद्धा च भवति। जातकस्य विवाहोऽतिविलम्बेन भवति अथवा जातको नीचस्त्रीसङ्गेनदूषितो भवति।

यदा सप्तमभावे मिथुनराश्यां चन्द्रस्योपरि पञ्चमभावे स्थितस्य शनैश्चरस्य दृष्टिर्भवेत्तदा जातकः स्त्रीहीनः स्त्रीक्लेशीतो दुःखी वा भवति। यदा सप्तमभावे सिंहराश्यां चन्द्रस्योपरि दशमभावे स्थितस्य शनैश्चरस्य दृष्टिर्भवेत्तदा जातकः स्त्रीरहीनो भवति। यदा सप्तमभावे कन्याराश्यां चन्द्रस्योपरि प्रथमभावे पञ्चमभावे दशमभावे वा स्थितस्य शनैश्चरस्य दृष्टिर्भवेत्तदा जातकः स्त्रीसुखहीनो भवति। यदा सप्तमभावे कर्कराश्यां मङ्गलस्योपरि प्रथमभावे स्थितस्य शुक्रस्य दृष्टिर्भवेत्तदा जातकः स्त्रीदुःखेनोद्विग्नमना भवति। यदा सप्तमभावे मीनराश्यां मङ्गलस्योपरि प्रथमभावे स्थितस्य गुर्रोर्दृष्टिर्भवेत्तदा जातकः स्त्रीचिन्हयुक्तोऽथवा स्त्रीहीनो भवति। यदा सप्तमभावे धनूराश्यां मङ्गलस्योपरि प्रथमभावे स्थितस्य गुरोर्दृष्टिर्भवेत्तदा जातकः स्त्रीहीनो भवति। यदा सप्तमभावे कर्कराश्यां बुधस्योपरि प्रथमभावे स्थितस्य चन्द्रस्य दृष्टिर्भवेत्तदा जातकः स्त्रीसङ्गेन नष्टधनो भवति। यदा सप्तमभावे धनूराश्यां मङ्गलस्योपरि प्रथमभावे स्थितस्य गुरोर्दृष्टिर्भवेदथवा सप्तमभावे मीनराश्यां मङ्गलस्योपरि प्रथमभावे स्थितस्य गुरोर्दृष्टिर्भवेत्तदा जातकः स्त्रीहीनो स्त्रीविषयकचिन्तायुक्तो वा भवति।

यदा सप्तमभावे तुलाराश्यां बुधस्योपरि प्रथमभावे स्थितस्य शनैश्चरस्य दृष्टिर्भवेत्तदा जातकः स्त्रीकारणात् दुःखी भवति। यदा सप्तमभावे वृषभराश्यां बुधस्योपरि दशमभावे प्रथमभावे वा स्थितस्य शनैश्चरस्य दृष्टिर्भवेत्तदा जातकः स्त्रीदुःखेन सन्तप्तमना भवति। यदा सप्तमभावे मेषराश्यां गुरोरुपरि दशमभावे स्थितस्य शनैश्चरस्य दृष्टिर्भवेत्तदा जातकः कुलत्रवान् भवति। यदा सप्तमभावे वृषभराश्यां गुरोरुपरि प्रथमभावे स्थितस्य शनैश्चरस्य दृष्टिर्भवेदथवा तुलाराश्यां गुरोरुपरि प्रथमभावे स्थितस्य शनैश्चरस्य दृष्टिर्भवेत्तदा जातकः कुलत्रवान् भवति। यदा सप्तमभावे कर्कराश्यां गुरोरुपरि प्रथमभावे स्थितस्य सूर्यस्य दृष्टिर्भवेत्तदा जातकः स्त्रीहीनो स्त्रीदुःखेन दुःखी वा भवति। यदा सप्तमभावे तुलाराश्यां शुक्रस्योपरि प्रथमभावे स्थितस्य मङ्गलस्य दृष्टिर्भवेत्तदा जातकः कुलटापतिः कामिनीसङ्गेन च नष्टधनो भवति। यदा सप्तमभावे वृषभराश्यां शुक्रस्योपरि द्वादशभावे स्थितस्य मङ्गलस्य दृष्टिर्भवेत्तदा जातकः

कामिनीसङ्गेन च गृहादिहीनो नष्टधनश्च भवति। यदा सप्तमभावे वृषभराश्यां शुक्रस्योपरि दशमभावे द्वादशभावे वा स्थितस्य शनैश्चरस्य दृष्टिर्भवेत्तदा जातकः कुकलत्रवान् भवति। यदा सप्तमभावे तुलाराश्यां शुक्रस्योपरि प्रथमभावे पञ्चमभावे वा स्थितस्य शनैश्चरस्य दृष्टिर्भवेत्तदा जातकः कुकलत्रपीडितो भवति। यदा सप्तमभावे कर्कराश्यां शुक्रस्योपरि द्वादशभावे स्थितस्य मङ्गलस्य दृष्टिर्भवेत्तदा जातकः स्त्रीविषयकचिन्तायुक्तो भवति। यदा सप्तमभावे कुम्भराश्यां मङ्गलस्योपरि प्रथमभावे स्थितस्य शनैश्चरस्य दृष्टिर्भवेत्तदा जातकः स्त्रीसम्बन्धित दुःखेनदुःखी स्त्रीद्वेषी च भवति। यदा सप्तमभावे कुम्भराश्यां मङ्गलस्योपरि प्रथमभावे स्थितस्य शनैश्चरस्य दृष्टिर्भवेत्तदा जातकः स्त्रीद्वेषी भवति।

### ०७/ ०२ प्रीतिर्व्यभिचारीयोगः।

यदा सप्तमभावे मकरराश्यां मङ्गलस्योपरि प्रथमभावे स्थितस्य शुक्रस्य दृष्टिर्भवेत्तदा जातको विषयासक्तो युवतीप्रियश्च भवति। यदा सप्तमभावे वृश्चिकराश्यां शुक्रस्योपरि प्रथमभावे स्थितस्य चन्द्रस्य दृष्टिर्भवेत्तदा जातकः कामातुरो भवति। यदा सप्तमभावे मकरराश्यां बुधस्योपरि प्रथमभावे स्थितस्य शुक्रस्य दृष्टिर्भवेत्तदा जातकः कामी भवति।

यदा सप्तमभावस्योपरि राहुग्रहस्य दृष्टिर्भवेत्तदा जातको व्यभिचारी स्ववाक्यसाधकश्च भवति। यदा सप्तमभावे मङ्गलस्य शनैश्चरस्य वा राश्यामुपरि शनैश्चरमङ्गलाभ्यां र्दृष्टिर्भवेत्तदा जातकस्तत्तपत्नी चोभौ व्यभिचारिणौ भवतः। यदा सप्तमभावे सिंहराश्यां चन्द्रस्योपरि प्रथमभावे स्थितस्य बुधस्य दृष्टिर्भवेत्तदा जातकः परस्त्रीवशगतो भवति। यदा सप्तमभावे कन्याराश्यां चन्द्रस्योपरि प्रथमभावे द्वादशभावे वा स्थितस्य मङ्गलस्य दृष्टिर्भवेत्तदा जातकः परस्त्रीवशगो भवति। यदा सप्तमभावे कन्याराश्यां चन्द्रस्योपरि प्रथमभावे स्थितस्य शनैश्चरस्य दृष्टिर्भवेत्तदा जातकः परस्त्रीवशगो भवति। यदा सप्तमस्थाने कुम्भराश्यां चन्द्रस्योपरि प्रथमभावे स्थितस्य शनैश्चरस्य दृष्टिर्भवेत्तदा जातकः कुस्त्रीसङ्गी भवति। यदा सप्तमभावे मीनराश्यां चन्द्रस्योपरि द्वादशभावे स्थितस्य मङ्गलस्य दृष्टिर्भवेत्तदा जातकः कुलटास्त्रीसङ्गी भवति। यदा सप्तमभावे तुलाराश्यां सूर्यस्योपरि प्रथमभावे स्थितस्य चन्द्रस्य दृष्टिर्भवेत्तदा जातको गणिकागामी भवति। यदा सप्तमभावे वृषभराश्यां सूर्यस्योपरि प्रथमभावे स्थितस्य चन्द्रस्य दृष्टिर्भवेत्तदा जातकः वेश्यारसिको भवति। यदा सप्तमभावे तुलाराश्यां सूर्यस्योपरि प्रथमभावे पञ्चमभावे वा स्थितस्य शनैश्चरस्य दृष्टिर्भवेत्तदा जातको नीचस्त्रीसङ्गी भवति। यदा सप्तमभावे मकरराश्यां कुम्भराश्यां वा

**सप्तमी दृष्टिः।**

सूर्यस्योपरि प्रथमभावे स्थितस्य चन्द्रस्य दृष्टिर्भवेत्तदा जातको नीचस्त्रीसङ्गेन नष्टधनो भवति। यदा सप्तमभावे वृषभराश्यां चन्द्रस्योपरि द्वादशभावे चतुर्थभावे वा स्थितस्य मङ्गलस्य दृष्टिर्भवेत्तदा जातकः परस्त्रीसङ्गेन स्वधनपुत्रस्त्रीत्यागी भवति। यदा सप्तमभावे कर्कराश्यां चन्द्रस्योपरि प्रथमभावे स्थितस्य शुक्रस्य दृष्टिर्भवेत्तदा जातको गणिकागामी भवति। यदा सप्तमभावे तुलाराश्यां चन्द्रस्योपरि पञ्चमभावे स्थितस्य शनैश्चरस्य दृष्टिर्भवेत्तदा जातकः कामी भवति। यदा सप्तमभावे मेषराश्यां मङ्गलस्योपरि प्रथमभावे स्थितस्य चन्द्रस्य दृष्टिर्भवेत्तदा जातकः परस्त्रीलोलुपो भवति। यदा सप्तमभावे वृश्चिकराश्यां मङ्गलस्योपरि प्रथमभावे स्थितस्य बुधस्य दृष्टिर्भवेत्तदा जातकः कुलटासङ्गी च भवति। यदा सप्तमभाव मेषराश्यां मङ्गलस्योपरि प्रथमभावे स्थितस्य बुधस्य दृष्टिर्भवेत्तदा जातकः कुलटासङ्गी च भवति। यदा सप्तमभावे मेषराश्यां मङ्गलस्योपरि प्रथमभावे स्थितस्य शुक्रस्य दृष्टिर्भवेत्तदा जातकः परस्त्रीसङ्गेन नष्टधनो भवति। यदा सप्तमभावे वृश्चिकराश्यां मङ्गलस्योपरि प्रथमभावे स्थितस्य शुक्रस्य दृष्टिर्भवेत्तदा जातकः स्त्रीकारणेन बन्धनेषुपतित नष्टधनश्च भवति। यदा सप्तमभावे मेषराश्यां मङ्गलस्योपरि दशमभावे स्थितस्य चन्द्रस्य दृष्टिर्भवेत्तदा जातकः परस्त्रीलम्पटो भवति। यदा सप्तमभावे मिथुनराश्यां मङ्गलस्योपरि प्रथमभावे स्थितस्य चन्द्रस्य दृष्टिर्भवेत्तदा जातकः स्त्रीलोलुपो भवति। यदा सप्तमभावे सिंहराश्यां सूर्यस्योपरि प्रथमभावे चतुर्थभावे वा स्थितस्य शुक्रस्य दृष्टिर्भवेत्तदा जातको वृद्धस्त्रीसङ्गी भवति। यदा सप्तमभावे धनूराश्यां मङ्गलस्योपरि प्रथमभावे स्थितस्य शुक्रस्य दृष्टिर्भवेत्तदा जातकः कामादिविकारैः संतप्तो भवति। यदा सप्तमभावे मेषराश्यां बुधस्योपरि प्रथमभावे स्थितस्य चन्द्रस्य दृष्टिर्भवेत्तदा जातकः स्त्रीलोलुपो मलीनचित्तश्च भवति। यदा सप्तमभावे मेषराश्यां बुधस्योपरि प्रथमभावे स्थितस्य चन्द्रस्य दृष्टिर्भवेत्तदा जातकः स्त्रीलोलुपो भवति। यदा सप्तमभावे सिंहराश्यां बुधस्योपरि प्रथमभावे स्थितस्य मङ्गलस्य दृष्टिर्भवेत्तदा जातको व्यभिचारी भवति। यदा सप्तमभावे मिथुनराश्यां गुरोरुपरि द्वादशभावे स्थितस्य शुक्रस्य दृष्टिर्भवेत्तदा जातको गणिकागामी भवति।यदा सप्तमभावे मेषराश्यां शनैश्चरस्योपरि प्रथमभावे स्थितस्य चन्द्रस्य दृष्टिर्भवेत्तदा जातको कुस्त्रीसङ्गी भवति। यदा सप्तमभावे मेषराश्यां शनैश्चरस्योपरि प्रथमभावे द्वादशभावे वा स्थितस्य मङ्गलस्य दृष्टिर्भवेत्तदा जातकः कुस्त्रीसङ्गी भवति। यदा सप्तमभावे वृश्चिकराश्यां शनैश्चरस्योपरि प्रथमभावे द्वादशभावे वा स्थितस्य मङ्गलस्य दृष्टिर्भवेत्तदा जातकः कुस्त्रीसङ्गी भवति। यदा सप्तमभावे मेषराश्यां शनैश्चरस्योपरि प्रथमभावे स्थितस्य शुक्रस्य दृष्टिर्भवेत्तदा जातको नीचस्त्रीसङ्गी भवति। यदा सप्तमभावे वृश्चिकराश्यां शनैश्चरस्योपरि प्रथमभावे स्थितस्य शुक्रस्य दृष्टिर्भवेत्तदा जातकः कुस्त्रीसङ्गी नीचस्त्रीसङ्गी वा भवति।

**सप्तमी दृष्टिः।**

यदा सप्तमभावे कर्कराश्यां शनैश्चरस्योपरि प्रथमभावे स्थितस्य शुक्रस्य दृष्टिर्भवेत्तदा जातकः स्त्रीविषयकचिन्तायुक्तोऽविवाहितो वा भवति। यदा सप्तमभावे कर्कराश्यां शनैश्चरस्योपरि द्वादशभावे स्थितस्य मङ्गलस्य दृष्टिर्भवेत्तदा जातकः कुलटापतिर्भवति। यदा सप्तमभावे सिंहराश्यां शनैश्चरस्योपरि प्रथमभावे स्थितस्य मङ्गलस्य दृष्टिर्भवेत्तदा जातकः स्त्रीविषयकचिन्तायुक्तो भवति। यदा सप्तमभावे मकरराश्यां शनैश्चरस्योपरि प्रथमभावे स्थितस्य सूर्यस्य दृष्टिर्भवेत्तदा जातको विरूपदारो भवति। यदा सप्तमभावे कुम्भराश्यां शनैश्चरस्योपरि प्रथमभावे स्थितस्य सूर्यस्य दृष्टिर्भवेत्तदा जातको विरूपदारो भवति। यदा सप्तमभावे मकरराश्यां शनैश्चरस्योपरि प्रथमभावे स्थितस्य सूर्यस्य दृष्टिरथवा चतुर्थभावे स्थितस्य शुक्रस्य दृष्टिर्भवेत्तदा जातको परस्त्रीगामी भवति। यदा सप्तमभावे कुम्भराश्यां शनैश्चरस्योपरि चतुर्थभावे स्थितस्य सूर्यस्य दृष्टिर्भवेत्तदा जातकः परस्त्रीलोलुपो भवति।

## ०८/०१ सप्तमभावे सूर्यादिग्रहाणां विशिष्टफलविचारः।

## ०८/०२ सप्तमभावे सूर्यस्य विशिष्टफलविचारः।

यदा सूर्यः स्वोच्चराश्यां[४]भवेत्तदा जातकस्य पत्नी कलहप्रिया भवति। यदा सूर्यः स्वोच्चनवांशे[५] भवेत्तदा जातकस्य पत्नी परकर्यरता भवति। यदा सूर्यो होरादिषड्वर्गेषु शुभो[६] भवेत्तदा जातकस्य पत्नी दरिद्रा भवति। यदा सूर्यो मूलत्रिकोणराश्यां[७] भवेत्तदा जातकस्य पत्नी भीरुर्भवति। यदा सूर्योमित्रग्रहस्य राश्यां[८] भवेत्तदा जातकस्यपत्नी निर्दया भवति। यदा सूर्यो मित्रग्रहस्य नवमांशे[९] भवेत्तदा जातकस्यपत्नी निर्धना भवति। यदा सूर्यो वर्गोत्तमावस्थायां शुभो[१०] भवेत्तदा जातकस्य पत्नी कामिनी कामक्रियायां निपुणा भवति । यदा सूर्यः शत्रुग्रहस्य राश्यां[११] भवेत्तदा जातकस्य पत्नी व्यसनप्रिया भवति। यदा सूर्यः शत्रुग्रहस्य नवांशे[१२] भवेत्तदा जातकस्य पत्नी हीनकार्मरता भवति। यदा सूर्यो होरादिषड्वर्गेषु पापग्रहस्य

---

[४] विशेषार्थ परिशिष्टम् –०३ द्रष्टव्यम् ।

[५] विशेषार्थ परिशिष्टम् –०३ द्रष्टव्यम् ।

[६] यदा होरादिषड्वर्गेषु सूर्य उच्चराश्यां स्वराश्यां मूलत्रिकोणराश्यामधिमित्रराश्यां मित्रराश्यां वा भवेत्तदा स शुभो मन्यते।

[७] विशेषार्थ परिशिष्टम् –०३ द्रष्टव्यम् ।

[८] विशेषार्थ परिशिष्टम् –०३ द्रष्टव्यम् ।

[९] विशेषार्थ परिशिष्टम् –०३ द्रष्टव्यम् ।

[१०] विशेषार्थ परिशिष्टम् –०३ द्रष्टव्यम् ।

[११] विशेषार्थ परिशिष्टम् –०३ द्रष्टव्यम् ।

[१२] विशेषार्थ परिशिष्टम् –०३ द्रष्टव्यम् ।

राश्यां[१३] भवेत्तदा जातकस्य पत्नी दुश्चरिता भवति। यदा सूर्यो नीचराश्यां[१४] भवेत्तदा जातकस्य पत्नी दुश्चरिता भवति । यदा सूर्यो नीचनवांशे[१५] भवेत्तदा जातकस्य पत्नी रुग्णा भवति।

### ०८/०३ सप्तमभावे चन्द्रस्य विशिष्टफलविचारः।

यदा चन्द्रः स्वोच्चराश्यां[१६] भवेत्तदा जातकस्य पत्नी मनोहारिणी सुभगा च भवति। यदा चन्द्रः स्वोच्चनवांशे[१७] भवेत्तदा जातकस्य पत्नी देवब्राह्मणसेवारता भवति। यदा चन्द्रो होरादिषड्वर्गेषु शुभो[१८] भवेत्तदा जातकस्य पत्नी रूपवती भवति। यदा चन्द्रो मूलत्रिकोणराश्यां[१९] भवेत्तदा जातकस्य पत्नी नैककार्येषुकुशला भवति । यदा चन्द्रो मित्रग्रहस्य राश्यां[२०] भवेत्तदा जातकस्य पत्नी मधुरभाषिणी भवति। यदा चन्द्रो मित्रग्रहस्य नवांशे[२१] भवेत्तदा जातकस्य पत्नी विनीता भवति । यदा चन्द्रो वर्गोत्तमवस्थायां शुभो [२२] भवेत्तदा जातकस्य पत्नी बहुकर्म व्यापृता भवति । यदा चन्द्रः शत्रुग्रहस्य राश्यां[२३] भवेत्तदा जातकस्य पत्नी पतिविरुद्धाचरणरता भवति । यदा चन्द्रः शत्रुग्रहस्य नवांशे[२४] भवेत्तदा जातकस्य पत्नी निष्प्रभावा भवति । यदा चन्द्रो होरादिषड्वर्गेषु पापग्रहस्य राश्यां[२५] भवेत्तदा जातकस्य पत्नी पतिविरुद्धाचरणरता भवति । यदा चन्द्रो नीचराश्यां[२६] भवेत्तदा जातकस्य पत्नी रुग्णा भवति । यदा चन्द्रो नीचनवांशे[२७] भवेत्तदा जातकस्य पत्नी चर्मरोगपीडिता भवति ।

---

[१३] यदा षड्वर्गेषु सूर्यःशनैश्चरक्षेत्रीयो भवेत्तदा स पापसंज्ञकः कथ्यते ।
[१४] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम् ।
[१५] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम् ।
[१६] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम् ।
[१७] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम् ।
[१८] यदा होरादिषड्वर्गेषु चन्द्र उच्चराश्यां स्वराश्यां मूलत्रिकोणराश्यामधिमित्रराश्यां मित्रराश्यां वा भवेत्तदा स शुभो मन्यते।
[१९] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम् ।
[२०] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम् ।
[२१] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम् ।
[२२] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम् ।
[२३] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम् ।
[२४] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम् ।
[२५] यदा षड्वर्गेषु चन्द्रो मङ्गलशनैश्चरक्षत्रीयो भवेत्तदा स पापग्रहः कथ्यते ।
[२६] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम् ।
[२७] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम् ।

## ०८/ ०४ सप्तमभावे मङ्गलस्य विशिष्टफलविचारः।

यदा मङ्गलः स्वोच्चराश्यां[२८] भवेत्तदा जातकस्य पत्नी धनरूपहीना भवति। यदा मङ्गलः स्वोच्चनवांशे[२९] भवेत्तदा जातकस्य भार्या ऽकालवृद्धा दृश्यते । यदा मङ्गलो होरादिषड्वर्गेषु शुभो[३०] भवेत्तदा जातकस्य पत्नी प्रख्याता प्रभावशीला भवति। यदा मङ्गलो मूलत्रकिोणराश्यां[३१] भवेत्तद जातकस्य पत्नी परपुरुषगामिनी भवति। यदा मङ्गलो मित्रग्रहस्य राश्यां[३२] भवेत्तदा जातकस्य पत्नी लघुनेत्रा भवति। यदा मङ्गलो मित्रग्रहस्य नवांशे[३३] भवेत्तदा जातकस्य भार्याऽल्पकेशा लघुनेत्रा च भवति। यदा मङ्गलो वर्गोत्तमावस्थायां शुभो[३४] भवेत्तदा जातकस्य पत्नी प्रभावहीना भवति। यदा मङ्गलः शत्रुग्रहस्य राश्यां[३५] भवेत्तदा जातकस्य पत्नी कठोरस्वभावा भवति। यदा मङ्गलः शत्रुग्रहस्य नवांशे[३६] भवेत्तदा जातको बन्धुहीनो पत्नीहीनश्च भवति। यदा मङ्गलो होरादिषड्वर्गेषु पापग्रहस्य राश्यां[३७] भवेत्तदा जातकस्य पत्नी समाजात् बहिष्कृता स्वकीयपरिवारात् च बहिष्कृता भवति। यदा मङ्गलः स्वनीचराश्यां[३८] भवेत्तदा जातकस्य पत्नी उग्रस्वभावा प्रगल्भा च भवति। यदा मङ्गलः स्वनीचनवांशे[३९]भवेत्तदा जातकस्य पत्नी शत्रुस्वभावा शत्रुयुक्ता वा भवति।

## ०८/ ०५ सप्तमभावे बुधस्य विशिष्टफलविचारः।

यदा बुधः स्वोच्चराश्यां[४०] भवेत्तदा जातकस्य भार्याऽत्यन्तरूपवती विलक्षणा प्रभावशालिनी च भवति। यदा बुधः स्वोच्चनवांशे[४१] भवेत्तदा जातकस्य पत्नी भोगदायिनी सुखप्रदायिनी च भवति। यदा

---

[२८] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम् ।
[२९] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम् ।
[३०] यदा होरादिषड्वर्गेषु मङ्गल उच्चराश्यां स्वराश्यां मूलत्रिकोणराश्यामधिमित्रराश्यां मित्रराश्यां वा भवेत्तदा स शुभो मन्यते।
[३१] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम् ।
[३२] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम् ।
[३३] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम् ।
[३४] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम् ।
[३५] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम् ।
[३६] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम् ।
[३७] यदा षड्वर्गेषु मङ्गलः शनैश्चरक्षेत्रीयो भवेत्तदा स पापसंज्ञकः कथ्यते ।
[३८] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम् ।
[३९] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम् ।
[४०] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम् ।

बुधः षड्वर्गेषु शुभो[४२] भवेत्तदा जातकस्य भार्या अत्यन्तश्रृङ्गारप्रिया भवति। यदा बुधो मित्रग्रहस्य राश्यां[४३] भवेत्तदा जातकस्यपत्नी बहुपुत्रपौत्रवती भवति। यदा बुधो मित्रग्रहस्य नवांशे[४४] भवेत्तदा जातकस्य पत्नी गृहे महर्घपदार्थानां सङ्ग्रहं करोति। यदा बुधो वर्गोत्तमावस्थायां शुभो[४५] भवेत्तदा जातकस्य भार्याऽत्यन्तप्रभावशालिनी तेजस्विनी च भवति। यदा बुधः शत्रुग्रहस्य राश्यां[४६]भवेत्तदा जातकस्य पत्नी धनहीना भवति। यदा बुधः शत्रुग्रहस्य नवांशे[४७]भवेत्तदा जातकस्य पत्नी धनधान्यविहीना भवति। यदा बुधो होरादिषड्वर्गेषु पापग्रहस्य राश्यां[४८] भवेत्तदा जातकस्यपत्नी सद्गुणहीना भवति। यदा बुधः स्वनीचराश्यां[४९] भवेत्तदा जातकस्य पत्नी परपुरुषमोहबद्धा भवति। यदा बुधो मूलत्रिकोणराश्यां [५०] भवेत्तदा जातकस्य पत्नी समाजे लोकप्रिया भवति।

## ०८/०६ सप्तमभावे गुरो विशिष्ट फलविचारः।

यदा गुरुः स्वोच्चराश्यां[५१]भवेत्तदा जातकस्य पत्नी मनोहारासौहार्दमयी भवति। यदा गुरुः स्वोच्चनवांशे[५२] स्थितो भवेत्तदा जातको विवाहानन्तरं पत्नीसुखमधिकं प्राप्नोति। यदा गुरुर्होरादिषड्वर्गेषु[५३] शुभो भवेत्तदा जातकस्य पत्नी उच्चकुलोत्पन्ना भवति। यदा गुरुर्मूलत्रिकोणराश्यां[५४] भवेत्तदा जातकस्य पत्नी गुणहीना भवति। यदा गुरुः स्वमित्रग्रहस्य राश्यां[५५]

---

[४१] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम् ।

[४२] यदा होरादिषड्वर्गेषु बुध उच्चराश्यां स्वराश्यां मूलत्रिकोणराश्यामधिमित्रराश्यां मित्रराश्यां वा भवेत्तदा स शुभो मन्यते।

[४३] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम् ।

[४४] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम् ।

[४५] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम् ।

[४६] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम् ।

[४७] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम् ।

[४८] यदा षड्वर्गेषु बुधो मङ्गलशनैश्चरक्षत्रीयो भवेत्तदा स पापग्रहः कथ्यते ।

[४९] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम् ।

[५०] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम् ।

[५१] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम् ।

[५२] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम् ।

[५३] यदा होरादिषड्वर्गेषु गुरु उच्चराश्यां स्वराश्यां मूलत्रिकोणराश्यामधिमित्रराश्यां मित्रराश्यां वा भवेत्तदा स शुभो मन्यते।

[५४] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम् ।

[५५] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम् ।

भवेत्तदा जातकस्य पत्नी सज्जनप्रिया सत्सङ्गिनी च भवति। यदा गुरुः स्वमित्रग्रहस्य नवांशे[५६] भवेत्तदा जातकस्य पत्नी माणिक्यादिमहार्घरत्नैर्धनिको भवति। यदा गुरुर्वर्गोत्तमावस्थायां शुभो[५७] भवेत्तदा जातकस्यपत्नी शुद्धचरिता दोषरहिता सद्गुणा च भवति। यदा गुरुः शत्रुग्रहस्य राश्यां[५८] भवेत्तदा जातकस्य पत्नी चञ्चला भवति। यदा गुरुः शत्रुग्रहस्य नवांशे[५९] भवेत्तदा जातकस्य पत्नी परुषवचना कटुवचना भवति। यदा गुरुर्होरादिषड्वर्गेषु पापग्रहस्य राश्यां[६०] भवेत्तदा जातकस्य पत्नी पिशुनस्वभावा भवति। यदा गुरुः स्वनीचराश्यां[६१]स्थितो भवेत्तदा जातकस्य पत्नी नीचकुलोत्पन्ना कलुषिता वा भवति। यदा गुरुः स्वनीचनवमांशे[६२] भवेत्तदा जातकस्य भार्या गर्विष्ठा भवति।

## १२) सप्तमभावे शुक्रस्य विशिष्टफलविचारः।

यदा शुक्रः स्वोच्चराश्यां[६३] भवेत्तदा जातकस्य भार्यानैकमित्रा भवति। यदा शुक्रः स्वोच्चनवांशे[६४] भवत्तदा जातकस्य पत्नी सज्जनानुरक्ता भवति। यदा शुक्रः होरादिषड्वर्गेषु शुभो[६५] भवेत्तदा जातकस्य पत्नी पतिव्रता भवति। यदा शुक्रो मूलत्रिकोणराश्यां[६६] भवेत्तदा जातकस्यपत्नी सुशीला शान्तस्वभावा सरला च भवति। यदा शुक्रो मित्रग्रहस्य राश्यां[६७] भवेत्तदा जातकस्यपत्नी मनोहरा सौभाग्यवती वत्सला च भवति। यदा शुक्रो मित्रग्रहस्य नवांशे[६८] भवेत्तदा जातकस्य पत्नी सद्गुणसम्पन्ना भवति। यदा शुक्रो वर्गत्तमावस्थायां शुभो[६९] भवेत्तदा जातकस्य पत्नी लोकप्रख्याता भवति। यदा शुक्रो नीचग्रहस्य राश्यां[७०]

---

[५६] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम् ।
[५७] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम् ।
[५८] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम् ।
[५९] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम् ।
[६०] यदा षड्वर्गेषु गुरुः शनैश्चरक्षेत्रीयो भवेत्तदा स पापग्रहः कथ्यते ।
[६१] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम् ।
[६२] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम् ।
[६३] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम् ।
[६४] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम् ।
[६५] यदा होरादिषड्वर्गेषु शुक्र उच्चराश्यां स्वराश्यां मूलत्रिकोणराश्यामधिमित्रराश्यां मित्रराश्यां वा भवेत्तदा स शुभो मन्यते।
[६६] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम् ।
[६७] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम् ।
[६८] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम् ।
[६९] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम् ।
[७०] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम् ।

भवेत्तदा जातकस्य पत्नी प्रसन्नवदना भवति। यदा शुक्रः शत्रुग्रहस्य नवांशे[७१] भवेत्तदा जातकस्य पत्नी कपटस्वभावा दुष्टा निर्णयदुर्बला च भवति। यदा शुक्रः होरादिषड्वर्गेषु पापग्रहस्य राश्यां[७२] भवेत्तदा जातकस्य पत्नी निर्दया भवति। यदा शुक्रो नीचराश्यां[७३] भवेत्तदा जातकस्य पत्नी प्रसन्नमुखा भवति । यदा शुक्रो नीचनवांशे[७४] भवेत्तदा जातकस्य पत्नी मनोहरनेत्रवता सुन्दरदेहा च भवति।

## ०८/०७ सप्तमभावे शनैश्चरस्य विशिष्टफलविचारः।

यदा शनैश्चरः स्वोच्चराश्यां[७५] भवेत्तदा जातकस्यपत्नी स्थूलदेहा भवति। यदा शनैश्चरः स्वोच्चनवमांशे[७६] भवेत्तदा जातकस्य पत्नी कृष्णवर्णा भवति। यदा शनैश्चरः होरादिषड्वर्गेषु शुभो[७७] भवेत्तदा जातकस्यपत्नी बहुदु:खभागिनी भवति। यदा शनैश्चरो मूलमित्रकोणराश्यां[७८] भवेत्तदा जातकस्य पत्नी धनहीना च भवति। यदा शनैश्चरो मित्रग्रहस्य राश्यां[७९] भवेत्तदा जातकस्य पत्नी उग्रस्वभावा भवति। यदा शनैश्चरो मित्रग्रहस्य नवांशे[८०]स्थितो भवेत्तदा जातकस्य पत्नी गुणहीना भवति। यदा शनैश्चरो वर्गोत्तमावस्थायां शुभो[८१] भवेत्तदा जातकस्य पत्नी दुष्टस्वभावा भवति। यदा शनैश्चरः शत्रुग्रहस्य राश्यां[८२] भवेत्तदा जातकस्य पत्नी बहुपापरता भवति। यदा शनैश्चरः शत्रुग्रहस्य नवांशे[८३] भवेत्तदा जातकस्यपत्नी पतित्यक्ता लोकनिन्दिता वा भवति। यदा शनैश्चरः होरादिषड्वर्गेषु पापग्रहस्य राश्यां[८४]

---

[७१] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम् ।

[७२] यदा षड्वर्गेषु शुक्रः मङ्गलक्षेत्रीयो भवेत्तदा स पापग्रहः कथ्यते ।

[७३] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम् ।

[७४] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम् ।

[७५] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम् ।

[७६] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम् ।

[७७] यदा होरादिषड्वर्गेषु शनैश्चर उच्चराश्यां स्वराश्यां मूलत्रिकोणराश्यामधिमित्रराश्यां मित्रराश्यां वा भवेत्तदा स शुभो मन्यते।

[७८] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम् ।

[७९] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम् ।

[८०] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम् ।

[८१] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम् ।

[८२] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम् ।

[८३] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम् ।

[८४] यदा षड्वर्गेषु शनैश्चरः सूर्यमङ्गलक्षेत्रीयो भवेत्तदा स पापग्रहः कथ्यते ।

भवेत्तदा जातकस्य पत्नी परपुरुषरता भवति। यदा शनैश्चरो नीचराश्यां[८५] भवेत्तदा जातकस्यपत्नी विकरालदेहा भवति। यदा शनैश्चरो नीचनवांशे[८६] भवेत्तदा जातकस्य पत्नी धर्महीना भवति।

## ०९/०१ विवाहोद्वाहौ।

विवाहसम्बन्धितकालस्यपौर्वापर्यत्वेन ज्योतिर्ग्रंथेषु विविधाः सन्दर्भाः प्राप्यन्तेतेऽधुना प्रदीयन्ते एतेषां गणनेन विवाहकालः कदा सम्पस्यते तद्वगम्यते। वस्तुतः विवाहकालस्यारम्भः फलदीपिकायामेवं कथितो यत् यदा गोचरावस्थायां सप्तमेशः लग्नशस्य राशिस्थानात् नवांशराशिस्थानात् वा त्रिकोणे (पंचमेनवमेवा) समागतो भवेत्तत्कालादूर्द्ध्वं जातकस्य विवाहसमयो निर्धायते तत्रैवमपि स्पष्टं लिखितं यत् यदा यः कोऽपि ग्रहः सप्तमेभावे भवेत् यो वा ग्रहः सप्तमभावं पश्येत् सप्तमेशस्य वा दशायां सप्मतेभावे गोचरावस्थायां लग्नेशः समागतो भवेत्तदाऽपि जातकस्य विवाहो भवति। जातकपारिजाते च कथितं यद् सप्तमेशस्य शुक्रस्य वा राश्यां गोचरावस्थायां गुरुचन्द्रौ भवेतां तदा जातकस्य विवाहो भवति। यदा सप्तमेशस्य शुक्रस्य वा राशिस्थानात् गोचरावस्थायां केन्द्रे गुरुः समागतो भवेत्तदा जातकस्य विवाहो भवति। यदा सप्तमेशो यस्यां राश्यां नवांशराश्यां वा भवेत्तस्याः राशेः नवाशराशिस्थानात् वा त्रिकोणे शुक्रो गोचरावस्थायां समागतो भवेत्तदाऽपि जातकस्य विवाहोभवति।

### (अ)समयपूर्वविवाहस्यसिद्धान्ताः ।

यदा सप्तमेशेन सह लग्नेशो भवेत्तदा जातकस्य विवाहो युवावस्थायां[८७] भवति । यदा सप्तमेशाद् द्वितीये द्वादशस्थाने वा लग्नेशो भवेत्तदा जातकस्य विवाहो युवावस्थायां भवति । यदा सप्तमभावाद् द्वितीयभावे द्वादशभावे वा शुभग्रहो भवेत्तदा जातकस्य विवाहो युवावस्थायां भवति । यदा सप्तमेशः पारावतादि वैशेषिकांशावस्थानां[८८] कस्यामपि बली भवेत्तदा जातकस्य विवाहो युवावस्थायां भवति । यदा सप्तमेशो द्वितीयभावे भवेत्तदा जातकस्य विवाहो युवावस्थायां भवति । यदा सप्तमेशः शुभग्रहस्य राश्यां शुक्रश्च स्वराश्यां स्वोच्चराश्यां वा भवेत्तदा जातकस्य विवाहो युवावस्थायां भवति । यदा द्वितीयभावे शुक्रः सप्तमेशश्चैकादशभावे भवेत्तदा जातकस्य विवाहो युवावस्थायां भवति । यदा

---

[८५] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम् ।

[८६] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम् ।

[८७] सम्प्रति विवाहस्य वयोनिर्धारणं देश जाति वर्णव्यवस्थाधारेण निश्चितं भवति ।

[८८] विशेषार्थं परिशिष्टम्–०३ द्रष्टव्यम्।

द्वितीयभावे शुक्रः द्वितीयेशेन सह मङ्गलो भवेत्तदा जातकस्य विवाहो युवावस्थायां[८९] भवति। यदा सप्तमभावे सूर्यः सप्तमेशःशुक्रेण सह भवेत्तदा जातकस्य विवाहो युवावस्थायां भवति। यदा सप्तमभावकारकः शुक्रः केन्द्रे लग्नेशःशनैश्चरस्य दृष्टि मकरराश्यां कम्भराश्यां वा भवेत्तदा जातकस्य विवाहो युवावस्थायां भवति। यदा लग्नात् केन्द्रभावे शुक्रः शुक्रात्सप्तमभावे शनैश्चरो भवेत्तदा जातकस्य विवाहो युवावस्थायां भवति ।

**सप्तभावादन्यत्र**

यदा द्वितीयेशो लाभभावे लग्नेशश्च दशमेभावे भवेत् तदा जातकस्य विवाहः बाल्यावस्थायां भवति । यदा द्वितीयभावे शुक्रो द्वितीयेशोमङ्गलेन सह भवेत्तदा जातकस्य विवाहो युवावस्थायां भवति।

**(आ)समयपश्चात्विवाहस्य सिद्धान्ताः।**

यदा सप्तमेशो द्वादशभावे लग्नेशराशिः सप्तमभावस्य नवांशराश्यां भवेत्तदा जातकस्य विवाहो विलम्बेन भवति। यदा सप्तमेभावेऽष्टमभावस्य नवांशराशिर्लग्नभावस्य च नवांशराश्यां शुक्रो भवेत्तदा जातकस्य विवाहो विलम्बेन भवति। यदा पञ्चमभावे शुक्रः शुक्राद् द्वादशेभावे राहुर्भवेत्तदा जातकस्य विवाहो विलम्बेन भवति। यदा सप्तमेशः सप्तमभावकारकःशुको वा षष्ठभावेऽष्टमभावे द्वादशभावे वा पापग्रहेण युतो दृष्टो वा भवेत्तदा जातकस्य विवाहो विलम्बेन भवति। यदा सप्तमभावस्योपरि शुक्रस्योपरि वा नीचराशिगत शुत्रराशिगत शनैश्चरस्य दृष्टिर्भवेत्तदा जातकस्य विवाहो विलम्बेन भवति (परि.०१,क्र.५०)। यदा सप्तमभावे शुभग्रेहण सह पापग्रहस्य युतिर्दृष्टिर्वा भवेत्तदा जातकस्य विवाहो विलम्बेन भवति। यदा सप्तमभावकारकशुकसप्तमशौ पापग्रहेण दृष्टौ भवेतां तदा जातकस्य विवाहो विलम्बेन भवति (परि.०१,क्र.८५)।

**(इ)विवाहकालः।**

यदा सप्तमेशलग्नेशयोः स्पष्टराश्यादिमाने गोचरवशाद् गुरुरागतो भवेत्तदा जातकस्य विवाहो भवति। यदा सप्तमेशचन्द्रयोः स्पष्टराश्यादि माने गोचरभ्रमणवशाद्गुरुरागतो भवेत्तदा जातकस्य विवाहो भवति। यदा सप्तमेशाधिपतिस्तथा सप्तमेशस्य नवांशाधिपतिर्द्वयोर्मध्ये यो ग्रहो बलवान् भवेत्तथा चन्द्रशुक्रयोर्मध्ये

---

[८९] दारपसन्निहितेऽङ्गपे बाल्ये विवाहः।।लग्नाद्वाऽस्रात्समीपे शुभे बाल्ये विवाहः ।। दारपे पारावतादौ सबले वा धने तादृशे बाल्ये विवाहः।। जातकत्वे० पृ. २९७/१२४तः१२६।।

**सप्तमी दृष्टिः।**

यो ग्रहो बलवान् भवेत्तस्य ग्रहस्य दशाऽन्तदशायां सप्तमेशस्य राशिस्थानात् सप्तमेशस्य नवांशराशिस्थानाद्वा त्रिकोणे गोचरभ्रमणवशाद्गुरुरागतो भवेत्तदा जातकस्योद्वाहो भवति।

**(ई)दूरदेशेविवाहयोगः।**

यदा सप्तमेशः सप्तमभावकारकशुक्रो वा पापग्रहेण सह त्रिकोणे[९०]भवेत्तदा जातकस्य विवाहो दूरदेशे भवति।

**(उ)विवाहदिशा ।**

शुक्रात् सप्तमभावस्याधिपतिर्यस्यां राश्यां भवेत्तदा तस्य ग्रहस्य सूचितदिशायां जातकस्य विवाहो भवति। यदा सप्तमभावस्थग्रहस्य दिशानुसारेण[९१] जातकस्य विवाहो भवति। यस्यां राश्यां शुक्रो भवेत्तस्या राशेर्दिशायां[९२] जातकस्य विवाहो भवति। सप्तमभावकारकः शुक्रो नवमांशे यस्यां राश्यां भवेत्तस्या राशेः सूचितदिशायां जातकस्य विवाहो भवति। यद सप्तमेभावे स्थितराश्यनुसारेण सूचितदिशायां[९३] जातकस्य विवाहो भवति। यदा सप्तमभावात् सप्तमेशस्य दिशायां[९४] जातकस्य विवाहो भवति। यदा शुक्रात् सप्तमेशस्य दिशायां[९५] जातकस्य विवाहो भवति। सप्तमभावस्योपरि यस्य शुभग्रहस्यदृष्टिर्भवेत्तदा तस्य ग्रहस्य दिशानुसारेण जातकस्य विवाहो भवति।

**०९/०२ कलत्रम्।**

कुटुम्बसुतभावयोः विश्लेषणं कृत्वा सप्तमभावस्य विचारोऽत्र प्रस्थाप्यते सप्तमभावो नारीविषयकः। अत एव पुरुषजातकस्यार्धाङ्गिनीरूपेण स्वयं स्त्री जातकस्य विषयकमध्ययनमत्र प्रस्तूयते। तत्र 'स्त्री प्राथम्यमर्हति' इति न्यायेन स्त्रीजातकविषयकं वर्णनमत्र प्रस्तूयते।

---

[९०] विशेषार्थं परिशिष्टम् –०४ द्रष्टव्यम् ।
[९१] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम् ।
[९२] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम् ।
[९३] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम् ।
[९४] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम् ।
[९५] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम् ।

## सप्तमी दृष्टिः।

**(अ)पितृगृहे सुखी**

यदा कस्याश्चित् स्त्रियः बुधक्षेत्रे चन्द्रशुक्रयोर्युतिर्भवेत्तदा सा नारी पितृगृहे सदैव सुखमधिगच्छति प्रकृत्या च चञ्चला जायते ।

कलाज्ञासुन्दरनारीयोगः – यदा कस्याश्चित् स्त्रियः सप्तमेभावे बुधशुक्रयोर्युति भवेत्तदा सा नारी गुणवती कलाप्रिया सुन्दरी च भवति ।

**(आ)पतिसौभाग्ययोगः**

यदा कस्याश्चित् स्त्रियः सप्तमे भावे उच्चराश्यां[९६] पापग्रहः[९७] भवेत्तदा सा सर्वसौभाग्यफलं चिरं लभते ।

यदा कस्याश्चित् स्त्रियः सप्तमभावे मङ्गलः स्वराश्यां (वृश्चिकराश्यां मेषराश्यां वा ) स्वनवमांशे (मेषे वृश्चिके वा ) च स्थितो भवेत्तदा तस्या नार्यः पतिर्धनिको भवति ।

यदा कस्याश्चित् स्त्रियः सप्तमभावे मङ्गलः स्वराश्यां स्वनवमांशे वर्गोत्तमावस्थायां[९८] भवेत्तदा तस्या पतिः स्त्रीवल्लभो भवति ।

यदा कस्याश्चित् स्त्रियः सप्तमभावे स्वनवमांशरहितो बलवांश्चन्द्रो वृषभराश्यां भवेत्तदा सा पतिपरायणा भवति । यदा कस्याश्चित् स्त्रियः सप्तमभावे परिवेषोपग्रहो[९९] भवेत्तदा सा वन्ध्याऽपि सती भवति । यदा कस्याश्चित् स्त्रियः सप्तमभावे केतुरुपग्रहो[१००] भवेत्तदा सा वन्ध्याऽपि सती भवति । यदा कस्याश्चित् स्त्रियः सप्तमभावे शनैश्चरस्य मङ्गलस्य राशेर्वा चन्द्रशुक्रयोयुर्तिर्भवेत्तत्र च पापग्रहस्य दृष्टिर्भवेत्तदा सा नारी वन्ध्या भवति।

यदा कस्याश्चित् स्त्रियः सप्तमभावः स्वराश्यामेव नवमांशे उदितोभवेत्तदा तस्याः पतिर्गुणवान् जितेन्द्रियश्च[१०१] भवति।

यदा कस्याश्चित् स्त्रियः सप्तमभावे चन्द्रः स्वराशेर्नवमांशे भवेत्तदा तस्याः पतिर्मृदुः कामी च भवति। यदा कस्याश्चित् स्त्रियः सप्तमभावे सूर्यः स्वराश्यां नवमांशे च भवेत्तदा तस्याः पतिः रतीप्रियो[१०२] रतिकार्ये कुशलश्च भवति।

---

[९६] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम् ।

[९७] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम् ।

[९८] यदा मङ्गलो जन्मकुण्डल्यां नवमांश कुण्डल्यां च मेषराश्यां वृश्चिकराश्यां वा भवेत् ।

[९९] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम् ।

[१००] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम् ।

[१०१] यस्य सर्वाङ्गी इन्द्रियाणी वंशगच्छन्ति स जितेन्द्रिय इति उच्चयते।

यदा कस्याश्चित् स्त्रियो द्वितीयभावे शुभग्रहोऽष्टमभावे च पापग्रहो भवेत्तदा सा नारी भर्तुः पूर्वं म्रियते तल्लौकिकभाषायां सौभाग्यवतीनार्याः लक्षणं वर्तते।

यस्या कस्याश्चित् स्त्रियः सप्तमभावे बुधः स्वराश्यां स्वनवांशे स्थितो भवेत्तदा तस्याः नार्या भर्ता विद्वान् धनवान् च भवति।

यदा कस्याश्चित् स्त्रियः सप्तमभावे चरराशिर्भवेत्तथा सप्तमेशोऽपि चरनवांशे भवेत्तदा तस्यानार्याः पतिर्विदेशगामी भवति।

यदा कस्याश्चित् स्त्रियः सप्तमभावे स्थिरराशिस्तथा सप्तमेशोऽपि स्थिरनवांशे भवेत्तदा तस्याः भार्यायाः पतिः स्वदेशेव वसति।

यदा कस्याश्चित् स्त्रियः सप्तमभावे द्विस्वभावराशिस्तथा सप्तमेशो द्विस्वभावराशिर्नवांशे भवेत्तदा तस्या भर्ता देशे विदेश च विचरणशीलो भवति।

यदा कस्याश्चित् नार्याः सप्तमात् सप्तमस्थानं चन्द्रश्च पुरुषराश्यां पुरुषनवांशे च पापग्रहेण युतोदृष्टो वा भवेतां तदा सा नारी पुरुषस्वभावयुक्ता भवति।

यदा कस्याश्चित् स्त्रियः सप्तमभावे शनैश्चरः स्वनवांशे स्वराश्यां च भवेत्तदा तस्या भर्ता वृद्धो[१०३]मूर्खो वा भवति।

यदा कस्याश्चित् स्त्रियः सप्तमभावे नीचग्रहस्यास्तङ्गतग्रहस्य वा नवांशराशिर्भवेत्तदा सा दुष्टा भवति।

यदा कस्याश्चित् स्त्रियः सप्तमभावाद् द्वितीयभावेऽष्टमभावे वा स्वराशिविहाय पापग्रहो भवेदथवा सप्तमभावाद् द्वितीयभावस्योपर्यष्टमभावस्योपरि वा स्वस्वामिरहितपापग्रहस्य दृष्टिर्भवेत्तदा जातका विवाहरहिता विवाहानन्तरं पतिदुःखेन दुःखिता पतिसुखरहिता वा भवति। यदा सप्तमभावसप्तम-भावकारकशुकौ शनैश्चरेण दृष्टो भवेत्तदा सा विवाहहीना भवति (परि.०१,क्र.७६)।

यदा सप्तमभावे कोऽपिग्रहो न भवेत्तदा जातकायाः पतिर्भीरुः कापुरुषो भवति।

यदा कस्याश्चित् स्त्रियः सप्तमभावे शनैश्चरस्योपरि सर्वपापग्रहाणां दृष्टिर्भवेत्तदा सा विवाहहीना भवत्यथवा विवाहपश्चात् तस्या भर्ताऽकाले म्रियते।

यदा कस्याश्चित् स्त्रियः सप्तमभावे राहुग्रह एकाधिकपापग्रहैर्दृष्टो भवेत्तदा सा विवाहरहिता वा भर्तृनाशिनी भवति।

---

[१०२] अस्तेर्के स्वांशगे स्वक्षे भर्ता रतिपरोमृदुः स्त्री.जा.पृ. १४

[१०३] अत्र वृद्धशब्दस्य अर्थ द्वय वयसा वृद्धो वा स्वरूपवृद्धो ज्ञेयः।

**सप्तमी दृष्टिः।**

यदा कस्याश्चित् स्त्रियः सप्तमभावे धूमोपग्रहो[१०४] भवेत्तदा सा विवाहहीना भवति । यदा कस्याश्चित् स्त्रियः सप्तमभावे परिवेषोपग्रहो[१०५]भवेत्तदाऽपि सा विवाहहीना भवति।

**(इ) पतित्यक्तायोगः।**

यदा निर्बलसप्तमभावे पापग्रहः शुभग्रहग्रहस्य दृष्टिहीनो भवेत्तदा सा नारी पत्या त्यक्ता भवति। एवं स एव पापग्रहः सप्तमभावे नीचराश्यां शत्रुराश्यां वा भवेत्तदा सा नारी व्यभिचारिणी भवति।

यदा जन्मसमये कन्यालग्ने चन्द्रःसप्तमभावे पापकर्तरी[१०६]योगे भवेत्तदा जातकःकन्याचेद्तदा सा पितृश्वशुरकुलघातिनी जायते।

यदा कस्याश्चित् स्त्रियः सप्तमभावे मङ्गलो भवेत्तदा जातका भर्तुरग्रेम्रियते।

यदा कस्याश्चित् स्त्रियः सप्तमभावे शनैश्चरो भवेत्तदा जातका दुर्भगा भवति।

यदा कस्याश्चित् स्त्रियः सप्तमभावात् सप्तमभावे मङ्गलस्य राशिर्नवांशराशिर्वा भवेत्तदा सा दासीतुल्या भवति।

**(ई) पतिघातिनी।**

यदा कस्याश्चित् स्त्रियः द्वितीयभावे सप्तमेभावे वा नीचराश्यां शत्रुराश्या मस्तङ्गतावस्थायां[१०७]वा चन्द्रशनैश्चरौ भवेतां तदा सा पतिघातिनी भवति। यदा कस्याश्चित् स्त्रियः सप्तमेभावे क्षीणचन्द्रो[१०८]ऽशुभग्रहेण (पापग्रहेण) दृष्टो भवेत्तदा सा पतिघ्नी भवति। यदा कस्याश्चित् स्त्रियः सप्तमेशः क्षीणचन्द्रः पापग्रहेणयुतो भवेत्तदा सा पतिघ्नी भवति। यदा कस्याश्चित् स्त्रियः क्षीणचन्द्रः सप्तमेशो भूत्वा पापग्रहस्य नवांशे भवेत्तदा सा पतिघ्नी भवति। यदा कस्याश्चित् स्त्रियो जन्मसमये सप्तमभावे कर्कराशिनवांशे चन्द्रेण सह पापग्रहो भवेत्तदा सा पतिघ्नी भवति। यदा कस्याश्चित् स्त्रियः कुण्डल्यां सप्तमभावाद् द्वितीयभावे पापग्रहो नीचराश्यां शत्रुराश्यां वा भवेत्तदा सा पतिनाशिनी भवति।

---

[१०४] विशेषार्थः परिशिष्टं ०३ दृष्टव्यम् ।

[१०५] विशेषार्थः परिशिष्टं ०३ दृष्टव्यम् ।

[१०६] यदा जन्मकुण्डल्यां चन्द्रात् द्वितीयेवक्रीयपापग्रहो द्वादशभावे च मार्गी पापग्रहो भवेत्तदा पापकर्तरी योगो भवति।

[१०७] विशेषार्थः परिशिष्टं ०३ दृष्टव्यम् ।

[१०८] विशेषार्थः परिशिष्टं ०३ दृष्टव्यम् ।

यदा कस्याश्चित् स्त्रियः सप्तमभावे कर्कनवांशे चन्द्रो भवेत्तदा सा पतिघ्नी भवति। यदा कस्याश्चित् स्त्रियः सप्तमभावेचाष्टमभावे  पापग्रहयुतिर्भवेदथवा दृष्टिर्भवेत्तदा नारी पतिघ्नी भवति

**(उ) वैधव्ययोगः**

यदा कस्याश्चित् स्त्रियः सप्तमेभावे शनैश्चरः शत्रुग्रहयोरेकतरेणोभाभ्यां दृष्टो भवेत्तदा सा नारी विधवाऽविवाहिता वृद्धा वा भवति। यदा कस्याश्चित् स्त्रियः सप्तमभावे स्वराशिं विहाय पापग्रहस्य राश्यां पापग्रहो भवेत्तदा सा विधवा भवति(परि.०१,क्र.७५)। यदा कस्याश्चित् स्त्रियः सप्तमभावे मङ्गलः[१०९] स्यात्तदा सा बालविधवा भवति। यदा कस्याश्चित् स्त्रियः सप्तमभावे सर्वेपापग्रहा भवेयुस्तदा साऽवश्यं विधवा भवति। यदा कस्याश्चित् स्त्रियः सप्तमभावेचन्द्रःस्वनीचराश्यां[११०]शत्रुराश्याम्[१११] अस्तङ्गतावस्थायां[११२] सर्पोविहङ्गःपाशःद्रेष्काणे[११३]राशिसन्धौ[११४] वा भवेत्तदा सा विधवा भवति। यदा कस्याश्चित् स्त्रियः सप्तमभावे नीचग्रहस्यास्तङ्गतग्रहस्य वा नवांशराशिर्भवेत्तदा सा युवावस्थायां विधवा भवति। यदा कस्याश्चित् स्त्रियः सप्तमभावे सूर्यशनैश्चरयोर्युतेरुपरि मङ्गलस्य दृष्टिर्भवेदथवा सूर्यमङ्गलयोर्युतेरुपरि शनैश्चरस्य दृष्टिर्भवेत्तदा सा विधवा भवति। यदा कस्याश्चित् स्त्रियः सप्तमभावे सूर्यकेतुग्रहयोरुपरि शनैश्चरस्य मङ्गलस्य वा दृष्टिर्भवेदथवा सूर्यराहुग्रहयोरुपरि शनैश्चरस्य मङ्गलस्य वा दृष्टिर्भवेत्तदा सा विधवा भवति। यदा  सप्तमेशो नीचराश्यां सप्तमभावेऽपि नीचग्रहो पापग्रहो युतो दृष्टो वा भवेत्तदा सा विधवा भवति (परि.०१,क्र.७५)।

**(ऊ) पुनर्विवाहयोगः।**

यदा कस्याश्चित् स्त्रियः सप्तमभावे शुभाशुभग्रहौ स्यातां तदा तस्याः पुनर्विवाहस्य योगो भवति।

यदा सप्तमभावे बुधशनैश्चरयोर्युतिर्भवेत्तदा जातकस्य पत्नी पुनर्विवाहिता भवति। यदा सप्तमभावे चन्द्रशनैश्चरयोर्युतिभवेत्तदा पुनर्विवाहितकन्यया सह जातकस्य विवाहो भवति। यदा सप्तमभावे चन्द्रशनैश्चरौ भवेतां तदा जातको विधवया सह विवाहं करोति।

---

[१०९] यदा सप्तमे कर्कराशेः नीचमङ्गलोभवेत्तदैवदोषो न भवतीति वराहमिहिर।

[११०] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम् ।

[१११] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम् ।

[११२] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम् ।

[११३] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम् ।

[११४] विशेषार्थं परिशिष्टम् –०६ द्रष्टव्यम् ।

## सप्तमी दृष्टिः।

**(ऋ) निरुद्यमी प्रमादीपतियोगः।**

यदा कस्याश्चित् स्त्रियः सप्तमभावोनिर्बलो भवेत्तत्र वा न कोऽपि ग्रहोभवेदथवा पापग्रहेण दृष्टोभवेदथवा शुभग्रहदृष्टिहीनोभवेत्तदा तस्याः पतिः निरुद्यमी वा नपुंसको वाऽऽलसो वा भवति। यदा कस्याश्चित् स्त्रियः सप्तमभावो ग्रहरहितो भवेदथवा पापकर्तरीयोगोऽथवा शुभग्रहस्य दृष्टिहीनो भवेत्तदा जातकायाः पतिर्निरुद्यमो भवति।

यदा सप्तमभावे शुक्रहर्षलयोर्युति (शुक्रप्रजापत्योर्युतिर्भवेत्तदा जातकस्य विवाहभङ्गो भवति वा दाम्पत्यजीवनेदुःखं प्राप्यते। यदा कस्याश्चित् स्त्रियः सप्तमेभावेसूर्यः शत्रुग्रहेण दृष्टो भवेत्तदा सा त्यक्ता भवति। यदा सप्तमेशो नीचराश्यां पञ्चमेशोऽस्तगतावस्थायां शुभग्रहदृष्टिहीनो भवेत्तदा जातकस्य विवाभङ्गो भवति वा दाम्पत्यजीवने दुःखं प्राप्यते (परि.०१,क्र.८२)।

यदा सप्तमभावे शुक्रेण सह यावत्संख्याका ग्रहाः भवेयुस्तावत् संख्याका भार्या जातकस्य भवन्ति। किन्त्वस्मिन् विषये उच्चग्रहस्य गणना न कार्या। यदा द्वितीयभावे शुक्रस्य राश्यां सप्तमेशो यावत् संख्याभिर्ग्रहैः सह भवेतस्तावद्ग्रहसंख्याका भार्या जातकस्य भवन्ति। यदा सप्तमभावे सप्तमेशेन दृष्टा यावात् संख्याका ग्रहा भवेयुस्तावत्संख्याका भार्या[११५] भवन्ति।

यदा सप्तमभावकारकः शुक्रो वक्रीग्रहस्य राश्यां (यो ग्रहो वक्री भवेत्तस्यां राश्यां) भवेत्तदा जातकः पत्न्यै पूर्णं रतिसुखं ददाति। यदा सप्तमभावे वृषभराश्यां तुलाराश्यां वा शुक्रो भवेत्तदा जातकः पत्न्यैपूर्णंरतिसुखं ददाति। यदा सप्तमभावे गुरुर्भवेत्तदा जातकः स्वपत्न्यामनुरक्तो भवति।

यदि सप्तमेशद्वितीयेशौ बलिनौ भूत्वोच्चराश्यां मूलत्रिकोणराश्यां स्वराश्यां स्वमित्रराश्यां वा केन्द्रे त्रिकोण वा भवेतां तदा जातक सुकलत्रवान् भवति। यदा सप्तमभावे स्वराश्यां शुभग्रहोऽष्टमेशः षष्ठेशद्वादशेशरहितो भवेत्तदा जातकोऽवश्यमेव सुकलत्रवान् भवति। यदा पापग्रहः स्वराश्यां सप्तमभावे भवेत्तदा जातकः सुकलत्रवान् भवति। यदा सप्तमेशेन सह बलवान् शुभग्रहः केन्द्रेशो वा त्रिकोणेशो भूत्वा शुभो भवेत्तदा शुभग्रहसम्बन्धित स्त्रीसुखं जातकस्य जीवने प्राप्तं भवति। यदा सप्तमभावे लग्नेशः शुभराश्यां शुभग्रहेण सह भवेत्तदा जातकस्य पत्नी मनोहरा चरित्रवती च भवति। यदा सप्तमभावे

---

[११५] अस्मिन् विषये देशजाति व्यवस्थानुसारेण निर्णयः कर्तव्यः।

**सप्तमी दृष्टिः।**

शुभराशिर्नवांशो भवेत्तदा जातकस्य पत्नी मनोहरा गुणवती च भवति। सप्तमभावे स्थितराशिर्नवमांशग्रहानुसारेण जातकस्य पत्न्याः रूपस्वभाववर्णादिनी भवन्ति। सप्तमेशानुसारेण रूपवर्णस्वभावगुणा जातकस्य जायायां भवन्ति। यदा सप्तमेशश्चतुर्थभावे दशमभावे वा भवेत्तदा जातकस्य पत्नी सुचरिता भवति। यदा बलवान् सप्तमेशः सप्तमभावकारकशुक्रेण वा गुरुणा युतो दृष्टो वा भवेत्तदा जातकस्य पत्नी सुचरिता भवति।

यदा सप्तमेश:सूर्यः शुभग्रहणे युतो दृष्टो वा भवेत्तदा जातकस्य पत्नी उत्तमचरिता भवति। यदा सप्तमेशशुक्रः शुभग्रहेण युतो दृष्टो वा भवेत्तदा जातकस्य पत्नी सुचरिता भवति। यदा सप्तमभावे गुरुर्भवेत्तदा जातकस्य पत्नी धर्मशीला सुचरिता भवति। यदा शुभग्रहस्य नवांशेस्थितः सप्तमेशः शुभग्रहेण युतो दृष्टोवा केन्द्रभावे भवेत्तदा जातकस्य पत्नी धर्मानुरागिणी सुचरिता भवति। यदा सप्तमेशः पारिजाताद्यवस्थायां केन्द्रे त्रिकोणे गुरुणा सह युतो दृष्टो वा भवेत्तदा जातकः सुकलत्रवान् भवति। यदा सप्तमेश उच्चराश्यां शुभग्रहेण सह सप्तमभावे भवेत्तदा जातकः सुकलत्रवान् भवति। यदा सप्तमेश उच्चराश्यां मित्रराश्यां स्वराश्यां स्ववर्गस्थो वा केन्द्रे त्रिकोणभावे वा भवेत्तदा जातकः सुकलत्रवान् भवति। यदा सप्तमेशेन सह बलवान् शुभग्रहः केन्द्राधिपतिर्भूत्वा त्रिकोणभावे भवेदथवा सप्तमेशेन सह बलवान् त्रिकोणाधिपतिः शुभग्रहो दशमभावे चतुर्थभावे प्रथमभावे वा भवेत्तदा जातकस्य पत्नी धर्मयुक्ता सुकलत्रा भवति। यदा लग्नात् सप्तमभावे समराश्यां[११६] सप्तमेशशुक्रौ समराशयोस्तथा पञ्चमेशसप्तमेशौ अस्तङ्गतावस्थारहितौ भवेतां तदा जातकः सुकलत्रवान् पुत्रवान् च भवति।

**(ॠ) बहुपत्नीयोगः**

यदा सप्तमभावे गुरुबुधयोर्युतिर्भवेत्तदा जातको बहुपत्नीयुक्त उत्तमपत्नीयुक्तो वा भवति। यदा सप्तमभावे पूर्णबलवान्[११७] शुक्रो भवेत्तदा जातको बहुस्त्रीभोक्ता भवति। यदा सप्तमभावस्योपरि वक्रीशुक्रस्य दृष्टिर्भवेत्तदा जातको बहुपत्नीवान् भवति। यदा सप्तमभावस्योपरि बलवान् शुक्रस्य दृष्टिर्भवेत्तदा जातको बहुपत्नीयुक्तो भवति। यदा सप्तमेशः षड्वर्गे स्वराश्यां मित्रराश्यां स्वोच्चराश्यां शुभग्रहस्य राश्यां[११८] वा केन्द्रभावे[११९] त्रिकोणभावे[१२०] वा दशमेशस्य दृष्टिर्युक्तो भवेत्तदा जातको

---

[११६] विशेषार्थं परिशिष्टम् –०५ द्रष्टव्यम् ।

[११७] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम् ।

[११८] यदा सप्तमेशः षडवर्गेषु चन्द्रबुधगुरुशुक्रेभ्य एकस्यां राश्यां भवेत्तदा तस्य शुभग्रहराशिसंज्ञा भवति।

बहुपत्नीयुक्तो भवति। यदा सप्तमेशैकादशयोः परस्परं दृष्टिसम्बन्धो भवेत्तदा जातको बहपत्नीयुक्तो भवति। यदा सप्तमेशैकादशयोर्युर्तिर्भवेत्तदा जातको बहुकलत्रवान् भवति। यदा सप्तमेशः[१२१]शुक्रस्य वा शनैश्चरस्यराश्यां शुभग्रहेण दृष्टोभवेत्तदा जातको बहुपत्नीयुक्तो भवति। यदा सप्तमेशः स्वोच्चराश्यां भवेत्तदा जातको बहुभार्यायुक्तो भवति। यदा सप्तमेशः शनैश्चरः पापग्रहेण युतोर्भवेत्तदा जातको बहुभार्यायुक्तो भवति। यदा सप्तमेशो द्वितीयभावे भवेत्तदा जातकोऽनेक स्त्रीभोक्ता भवति। यदा सप्तमेशः शनैश्चरः पापग्रहेण युतोभवेत्तदा जातको बहुभार्यायुक्तो भवति।

**(लृ) द्विभार्यायोगः**

यदा द्विस्वभावराश्यां [१२२] नवमांशे च सप्तमेशः शुक्रेण सह भवेत्तदा जातकस्य भार्याद्वयं भवति। यदा सप्तमभावे मङ्गलो भवेत्तदा जातको द्विभार्यायुक्तो भवति। यदा सप्तमभावे पापग्रहःसप्तमेशोऽस्तङ्गतावस्थयां शुक्रश्च नीचो भवेत्तदा जातको द्विभार्यायुक्तो भवति (परि.०१, क्र.१०२)।

यदा सूर्यशुक्रयोर्युति पञ्चमभावे सप्तमभावे वा भवेत्तदा जातकस्य पत्नी विकलाङ्गा भवति। यदा सप्तमभावः पापकर्तरीयोगे[१२३] भवेत्तदा जातकस्य पत्नी दुर्भगा रोगिणी पतिसुखरहिता भवति (परि.०१, क्र.५७) (परि.०१,क्र.१०३)।

यदा सप्तमेशः पापकर्तरीयोगे भवेत्तदा जातकः कुकलत्रवान् भवति। यदा सप्तमभावकारकः शुक्रः पापकर्तरीयोगे भवेत्तदा जातकः कुकलत्रवान् भवति। यदा सप्तमभावे नीचराश्यां शनैश्चरो भवेत्तदा जातकः कुकलत्रवान् भवति। यदा सप्तमेशः पापग्रहस्य नवांशे [१२४] भवेत्तदा जातकः कुकलत्रवान् भवति। यदा सप्तमेशः कूरषष्ट्यंशे[१२५] भवेत्तदा जातकः कुकलत्रवान् भवति। यदा सप्तमेशसप्तमभाव–

---

[११९] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम् ।

[१२०] विशेषार्थं परिशिष्टम् –०४ द्रष्टव्यम् ।

[१२१] पराशरमतेन दारेशः, दारेशार्थं परिशिष्टम् –०३ द्रष्टव्यम् ।

[१२२] मिथुन–कन्या–धनुर्मीनराशयःद्विस्वभावराशयो द्विस्वभावनवांशराशयश्च कथ्यन्ते।

[१२३] विशेषार्थं परिशिष्टम् –०६ द्रष्टव्यम्।

[१२४] यदा सप्तमेशः स्वराशिंविहाय सूर्यमङ्गलशनैश्चरेभ्य एकस्यां राश्यां नवमांशे भवेत्तदा।

[१२५] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम् ।

कारकशुक्रौ नीचग्रहस्य नवांशे भवेतां तदा जातकस्य पत्नी कुशीला भवति। यदा सप्तमभावे चन्द्रः सूर्यराश्यां नवमांशे वा (सिंहराश्यांनवांशे वा) भवेत्तदा जातकस्य पत्नी कुशीला भवति। यदा सप्तमेशः सूर्यचन्द्रो वा पापग्रहस्य नवांशे पापग्रहेण युतो दृष्टो वा भवेत्तदा जातकः कुकलत्रवान् भवति। यदा सप्तमेशः पापग्रहेण सह षष्ठभावेऽष्टमभावे द्वादशभावे वा पापग्रहस्यदृष्टियुक्तो भवेत्तदा जातकः कुकलत्रवान् भवति(परि.०१,क्र.७४) (परि.०१,क्र.८७)। यदा शुक्रः पापग्रहेण सह षष्ठभावे–ऽष्टमभावे द्वादशभावे वा पापग्रहस्य दृष्टियुक्तो भवेत्तदा जातकः कुकलत्रवान् भवति। यदा सप्तमेशः षड्वर्गेषु शत्रुराश्यां नीचराश्यां पापग्रहस्यराश्यां वा भवेत्तदा जातकः कुकलत्रवान् भवति। यदा सप्तमभावकारकशुक्रः षड्वर्गेषु नीचराश्यां शत्रुराश्यां पापग्रहराश्यां वा भवेत्तदा जातकः कुकलत्रवान् भवति।

**(ए) पतिघातिनी कुलनाशिनी**

यदा सप्तमेशो बुधः पापग्रहेण सह नीचराश्यां शत्रुराश्यां षष्ठभावेऽष्टमेभावे वा पापकर्तरीयोगे[१२६] पापग्रहेण दृष्टो भवेत्तदा जातकस्य पत्नी पतिघातिनी कुलनाशिनी च भवति।

**(ऐ) विधुरोविरक्तयोगः**

यदि सप्तमेभावे लग्नेशोभवेत्तदा जातकस्य पत्नी मृत्युं प्राप्नोति स च विधुरोभवत्यथवा विरक्तो भवति।

**(ओ) स्वामिना सह मृत्युयोगः**

यदा कस्याश्चित् स्त्रियः सप्तमेशलग्नेशयोर्युतिः कस्मिन्नपि भावे भवेदथवा सप्तमेशलग्नेशयोः परस्परं परिवर्तनयोगो भवेत्तत्र च शुभग्रहस्य दृष्टिर्भवेत्तदा पत्या सहैकस्मिन्नेवकाले मृत्युं प्राप्नोति।

**(औ)द्विभार्यायोगः**

यदा सप्तमेशः स्वशत्रुराश्यां नीचराश्यां शुभग्रहेण सह सप्तमभावे भवेत्तदा जातको द्विभार्यायुक्तो भवति। यदा सप्तमभावकारकःशुक्रः[१२७] पापग्रहेण सह षष्ठभावेऽष्टमभावे द्वादशभावे वा युतो भवेत्तदा

---

[१२६] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम् ।

[१२७] पराशरमतेन जायाकारकग्रहः, विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम् ।

जातको द्विपत्नीयुक्तो भवति। यदा सप्तमभावकारकः[१२८] शुक्रः स्वनीचराश्यां शत्रुराश्यामस्तङ्गतावस्थायां वा भवेत्तदा जातको द्विपत्नीयुक्तो भवति। यदा सप्तमभावः पापाक्रान्तो भवेत्तदा जातको द्विभार्यायुक्तो भवति। यदा सप्तमेशः पापग्रहः पापराश्यां पापग्रहेण सह तथा सप्तमभावे नपुंसकग्रहो भवेत्तदा जातको द्विभार्यायुक्तो भवति।

यदा पापग्रहः सप्तमेशो नीचराश्यां भवेत्तदा जातको द्विभार्यायुक्तो भवति। यदा सप्तमभावे बुधशनैश्चरयोर्युतिर्भवेत्तथा चैकादशभावे द्वौ ग्रहौ भवेतां तदा जातको द्विभार्यो भवति। यदा सप्तमेशः सप्तमभावकारकःशुक्रश्च पापग्रहेणयुतौ दृष्टौ वा षष्ठभावेऽष्टमभावे द्वादशभावे वा भवेतां तदा जातको द्विभार्यायुक्तो भवति। यदा सप्तमेशेन सह शुक्रो द्विस्वभावराश्यां द्विस्वभावनवांशराश्यां वा षष्ठभावेऽष्टमभावे द्वादशभावे वा भवेत्तदा जातकस्य पत्नीद्वयं भवति। यदा सप्तमभावकारकशुक्रो राहुना सह पापग्रहेण दृष्टो भवेत्तदा जातको द्विपत्नीयुक्तो भवति (परि.०१,क्र.३३)।

**(क)शत्रुस्त्रीयोगः।**

यदा सप्तमेशलग्नेशयोः शत्रुसम्बधो भवेत्तदा जातकस्य पत्नी शत्रुवद् भवति। यदा सप्तमभावाद् द्वादशभावे मङ्गलस्योपरि शनैश्चरस्य दृष्टिर्भवेत्तदा जातकस्य पत्नी शत्रुवद् भवति।

**(ख)पत्नीराहित्ययोगः।**

यदा सप्तमेशात् सप्तमभावे क्रूरपापग्रहो भवेत्तदा जातकः पत्नीरहितो भवति (परि.०१,क्र.६८) (परि.०१, क्र.९१)। यदा सप्तमभावे तुलाराश्यां सूर्येण सह अस्तङ्गतावस्थायां शुक्रो भवेत्तदा जातकः पत्नीराहित्ययोगवान् भवति। यदा सप्तमभावे बुधशुक्रयोर्युतिर्भवेत्तदा जातकः स्त्रीहीनो भवति। यदा द्वितीयभावे पञ्चमभावे सप्तमभावे वा परंनीचांशे[१२९] सूर्योभवेत्तदा जातको राजकुलोत्पन्नोऽपिस्त्रीविहीनो भवति। यदा सप्तमभावकारकः शुक्रः पापग्रहेण युतो भवेत्तदा जातकः स्त्रीहीनो भवति (परि.०१, क्र.७०) । यथा पञ्चमभावे सप्तमभावे वा शुक्रमङ्गलयोर्युतिर्भवेत्तदा जातकः स्त्रीहीनो भवति। यदा सप्तमेशो निर्बलो भूत्वा षष्ठभावेऽष्टमभावे द्वादशभावे वा भवेत्तदा जातकः स्त्राीहीनो भवति(परि.०१, क्र.७१)। यदा सप्तमेशो नीचराश्यां षष्ठभावेऽष्टमभावे द्वादशभावे वा भवेत्तदा जातकः स्त्रीहीनो भवति।

---

[१२८] पराशरमतेन जायाकारकग्रहः, विशेषार्थं परिशिष्टम् -०३ द्रष्टव्यम् ।

[१२९] विशेषार्थं परिशिष्टम्- ०३ दृष्टव्यम्।

**सप्तमी दृष्टि:।**

यदा सप्तमभावे कालग्रहो[१३०] भवेत्तदा जातक: स्त्रीहीनो भवति। यदा सप्तमभावे नीचराश्यां शत्रुराश्यां वा शनिचन्द्रयोर्युतिर्भवेत्तदा जातक: पत्नीराहित्ययोगवान् भवति। यदा सप्तमभावकारकाच्छुक्रात् सप्तमभावे पापग्रहो भवेत्तदा जातक: पत्नीराहित्ययोगवान् भवति। यदा द्वितीयभावे सप्तमेश: पापग्रहेण सह सप्तमभावकारकशुक्रो नीचग्रहेण सह तथा सप्तमभावस्योपरि नीचग्रहस्य दृष्टिर्भवेत्तदा जातकोऽविवाहहीनो स्त्रीदु:खेन दु:खी वा भवति (परि.०१,क्र.८९)। यदा सप्तमभावात् सप्तमभावे पापग्रह: सप्तमभावे च पापग्रहो भवेत्तदा जातक: स्त्रीहीनो भवति । यदा द्वादशभावे नीचग्रहेण सह शुको भवेत्तदा जातक: स्त्रीहीनो स्त्रीदु:खेन दु:खी वा भवति (परि.०१,क्र.१००) । यदा सप्तमेशोऽस्तगता–वस्थायां सप्तमभावात्सप्तमभावे पापग्रहो भवेत्तदा जातको विवाहीनो भवति (परि.०१, क्र.७९)। यदा सप्तमभावे सूर्योराहुर्वा शनैश्चरेण दृष्टो भवेत्तदा जातक: स्त्रीहीनो भवति। यदा सप्तमेशो नीचराश्यां शुक्रोऽपि नीचराश्यां[१३१] भवेत्तदा जातक: पत्नीविहीनो भवति। यदा नीचसप्तमेशस्योपरि मङ्गलस्य शनैश्चरस्य वा क्रूरदृष्टिर्भवेत्तदा जातक: पत्नीविहीनो भवति (परि.०१,क्र.७१) (परि.०१,क्र.७२) (परि.०१, क्र.९१)। यदा सप्तमभावकारकशुक्र: षष्ठभावे पापग्रहेण दृष्टो भवेत्तथा सप्तमेश: पापग्रहेण युतो दृष्टो भवेत्तदा जातक: स्त्रीहीनो दाम्पत्यजीवने दु:खी वा भवति (परि.०१,क्र.८६)। यदा सर्वेग्रहा: स्वनीचराशिषु शत्रुराशेर्नवांशे दशमस्थानादन्यस्मिन्स्थाने स्थिता भवेयुस्तदा जातको स्त्रीहीनो भवति। यदा सप्तमभावे पापग्रहस्योपरि प्रथमभावे स्थितस्य पापग्रहस्य दृष्टिर्भवेत्तदा जातक: स्त्रीहीनो भवति। यदा सप्तमभावसप्तमेशशुक्रा निर्बला भवेयुस्तदा जातक: स्त्रीसुखहीनो भवति (परि.०१,क्र.७०) (परि.०१, क्र.९१) (परि.०१,क्र.९७)। यदा सप्तमभावे मेषराश्यां राहुग्रहस्योपरि नीचराशिस्थितस्य सूर्यस्य दृष्टिस्तथा शुक्रो नीचराश्यां भवेत्तदा जातकोऽविवाहितो स्त्रीदु:खेन दु:खी भवति (परि.०१, क्र.७३)।

**(ग)दासीस्त्रीयोग:।**

यदा सप्तमभावे चन्द्रो नीचराश्यां[१३२] अस्तङ्गतावस्थायां[१३३] वा भवेत्तदा जातकस्य पत्नी दासीतुल्या भवति। यदा सप्तमभावे क्षीणचन्द्रो[१३४] भवेत्तदा जातकस्य पत्नी दासीतुल्या भवति । यदा सप्तमभावे

---

[१३०] विशेषार्थ परिशिष्टम् –०३ दृष्टव्यम्।

[१३१] विशेषार्थ परिशिष्टम् –०३ द्रष्टव्यम् ।

[१३२] विशेषार्थ परिशिष्टम् –०३ द्रष्टव्यम् ।

[१३३] विशेषार्थ परिशिष्टम् –०३ द्रष्टव्यम् ।

[१३४] विशेषार्थ परिशिष्टम् –०३ द्रष्टव्यम् ।

मङ्गलस्य राशिर्नवांशराशिर्वा भवेत्तदा जातकस्य पत्नी दासीतुल्या भवति। यदा सप्तमभावे राहुरेकाधिकपापग्रहैर्दृष्टो भवेत्तदा जातकः स्त्रीहीनः स्त्रीनाशको वा भवति।

यदा स्पष्टसप्तमेशराश्यादिमानात् स्पष्टलग्नराश्यादिमानं न्यूनकरणात् यद् राश्यादिमानं प्राप्तं स्यात् तस्मात् त्रिकोणराश्यां यदा गुरुर्गोचरावस्थायामागतो भवेदथवा स्पष्ट लग्नात् स्पष्ट सप्तमेशं न्यूनीकृत्या फलप्राप्तिर्भवेत्तस्यां राश्यां गोचरावस्थायां गुरुरागतो भवेत्तदा जातकस्य नार्यकाले म्रियते। यावत् संख्याका दुर्बलग्रहाः षष्ठाष्टमद्वादशभावानां स्वामिनो भूत्वा द्वितीयेशेन सप्तमेशेन सह युताः भवेयुस्तदा जातकस्य तावत्संख्याकः स्त्रीनाशो भवति। यदा कन्यालग्ने सूर्यः सप्तमभावे मीनराश्यां शनैश्चरो भवेत्तदा जातकः स्त्रीविहीनो भवत्यथवा स्त्रीनाशकरो भवति। यदा सप्तमभावे इन्द्रचापोपग्रहो[१३५] भवेत्तदा जातकस्य स्त्री म्रियते। यदा सप्तमभावकारकः शुक्रेण सह षष्ठेशस्य युतिसम्बधो भवेदथवा सप्तमभावे सूर्यमङ्गलयोर्युतीराहुणा वा केतुना सह भवेत्तदा जातकस्य पत्नीकष्टं प्राप्नोति।

यदा सप्तमभावे शुक्रस्य नवांशराश्यां मङ्गलो भवेदेवं सप्तमेशः पञ्चमभावे भवेत्तदा जातकस्य स्त्री कष्टं प्राप्नोति। यदा द्वितीयेशसप्तमेशौ शुक्रेण सह षष्ठभावेऽष्टमभावे द्वादशभावे तृतीयभावे वा भवेतां तदा जातकः स्त्रीद्वारा दुःखी भवत्यथवा स्त्रियो मरणं भवति। यदा सप्तमेशद्वितीयेशशुक्रा यावत् संख्याकाः पापग्रहैः सह युता दुःस्थानेषु भवेयुस्तावत् संख्याकः स्त्रीनाशो भवति।

यदा सप्तमेशोऽष्टमभावेऽथवा सप्तमेशोऽस्तराश्यां शत्रुराश्यां नीचराश्यां वा भवेदथवा स्वराशिं विहायान्यराशिषु सप्तमेशः[१३६] षष्ठाष्टमद्वादशभावे वा भवेत्तदा जातकस्य पत्नी रुग्णा क्रोधयुक्ता च भवति। यदा सप्तमभावकारकः शुक्रः पापग्रहेण सह पञ्चमभावे सप्तमभावे नवमभावे वा भवेत्तदा जातकस्य पत्नी रुग्णा विकला च भवति। यदा सप्तमभावे शुक्रस्तथा द्वादशभावे चन्द्रो भवेत्तदा जातकः स्वस्त्रीघातुको भवति।

---

[१३५] विशेषार्थं परिशिष्टम्–०३ दृष्टव्यम् ।

[१३६] पराशरमतेनऽत्र दारेशानुसारेण फलं कथितम् – दारेशज्ञानार्थं परिशिष्टम् –०३ द्रष्टव्यम् ।

### (घ) विलासहानियोगः।

यदा सप्तमेशः पापग्रहेण सह शीर्षोदयराश्यां[१३७] भवेदथवा सप्तमभावस्थितराहुमङ्गलयोरुपरि सूर्यशनैश्चरयोर्दृष्टिर्भवेदथवा सप्तमभावे मङ्गलो भवेदथवा सप्तमभावे राहुशनैश्चरयोर्युतिर्भवेदथवा सप्तमेशः पापग्रहेण सह षष्ठभावेऽष्टमभावे द्वादशभावे वा भवेत्तदा जातकः स्त्रीहीनो भार्यया दुःखी वा भवति (परि.०१,क्र.८४)। यदा सप्तमेशः शुक्रस्त्रिकभावाधिपतिर्भूत्वा नीचराश्यां पापग्रहेण दृष्टो भवेत्तदा जातकस्य विवाहभङ्गो भवति (परि.०१,क्र.३४)। यदा पापग्रहेण युतो दृष्टो वा सप्तमेशो द्वादशभावे सप्तमभावकारको नीचराश्यां सप्तमभावे नीचग्रहो भवेयुस्तदा जातकस्य विवाहभङ्गो भवति(परि.०१,क्र.३५)।

यदा सप्तमभावकारकशुक्रोऽस्तङ्गतावस्थायां सप्तमभावाद् द्वादशभावे नीचग्रहो भवेत्तदा जातकः स्त्रीसुखहीनो भवति (परि.०१,क्र.९६) । यदा सप्तमभावकारकशुक्रात् चतुर्थभावेऽष्टमभावे च पापग्रहो भवेत्तदा जातकस्य पत्नी मृत्युं प्राप्नोति। यदा शुक्रः पापकर्तरीयोगे[१३८] भवेत्तदा जातकस्य पत्नी मृत्युं प्राप्नोति। यदा सप्तमभावेऽशुभशुक्रस्योपरि शुभग्रहदृष्टिर्युतिर्वा न भवेत्तदाऽपि जातकस्य पत्नी मृत्युं प्राप्नोति। यदा सप्तमेशः क्रूरषष्ट्यंशे[१३९] भवेत्तदा जातकस्य पत्नी मृत्यं प्राप्नोति। यस्य जातकस्य सप्तमभावे राहुः सप्तमाद् द्वादशभावे मङ्गलः सप्तमाद् द्वितीयभावे शनैश्चरो भवेत्तदा जातकस्य पत्नी दीर्घं न जीवति।

यदा सप्तमभावे राहुः षष्ठभावे मङ्गलोऽष्टमेभावे शनैश्चरो भवेदथवा द्वितीयसप्तमभावौ पापग्रहेणयुतौ दृष्टौ वा भवेतामथवा सप्तमेशो नीचराश्यां शुक्रश्चाष्टम भावे षष्ठभावे वा भवेदथवा सप्तमेशोऽष्टमभावे तथा द्वादशेशः सप्तमभावे भवेदथवा सप्तमभावकारकः शुक्रः पापग्रहेण पीडितो यत्रकुत्रभावे शुभग्रहदृष्टिर्हीनो भवेदथवा सप्तमभावे पञ्चमेशसप्तमेशयोः पापग्रहेण युतः शुक्रो निर्बलो भवेदथवा सप्तमभावे मकरराश्यां गुरुर्भवेदथवा सप्तमभावे मीनराश्यां शनैश्चरोभवेदथवा सप्तमभावे मीनराश्यां मङ्गलो भवेदथवा सप्तमभावे वृषभराश्यां बुधो भवेदथवा सप्तमभावे वृश्चिकराश्यां शुक्रो भवेदथवा सप्तमाधिपतिः पञ्चमभावे वृश्चिकराश्यां शुक्रो भवेदथवा सप्तमाधिपतिः पञ्चमभावे

---

[१३७] अस्मिन् विलासहानियोगे समुत्पन्नस्य बालकस्य दोषपरिहारार्थं राहुकेतुचन्द्राणां बीजसहितं जपमावश्यकं दृश्यते।

[१३८] सप्तमभावे शुक्रः शुक्रात् द्वितीयभावे वक्रीपापग्रहो द्वादेशाऽपि पापग्रहो भवेत्तदा शुक्रपापकर्तरीयोगो भवति।

[१३९] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम् ।

भवेदथवा सप्तमभावे चन्द्रशनैश्चरयो रुपरि नीचराशिगतस्य सूर्यस्य दृष्टिर्भवेत्तदा जातकस्य पत्न्य अकाले म्रियते। यदा सप्तमभावे पञ्चमाधिपति[१४०]र्वाऽष्टमाधिपतिर्भवेत्तदा जातकस्य पत्नी म्रियते। यदा सप्तमभावे नीचस्थशुक्रेण सह सूर्यकेतुशनिबुधानां युतिर्भवेत्तदा जातकस्य पत्न्य अकाले म्रियते (परि.०१,क्र.९२)।

## ०९/०३ पुत्रसौख्यादि।

यदा कस्याश्चित् स्त्रिय: सप्तमभावे बलवान् बुधो भवेत्तदा सा सुपुत्रवती भवति। यदा कस्याश्चित् स्त्रिय: सप्तमभावे बलवान् गुरोर्भवेत्तदा सा सुपुत्रवती गुणवती भवति। यदा कस्याश्चित स्त्रिय: सप्तमभावे शुक्रो बलयुक्त: शुक्रो भवेत्तदा सा पुत्रवान् भवति। यदा कस्याश्चित् स्त्रिय: सप्तमभावे पूर्णबलवान् चन्द्रो भवेत्तदा साऽधिककन्यायुक्ता भवति।

### (अ) गर्भस्त्रावयोग:

यदा कस्याश्चित् स्त्रिय: सप्तमभावे मङ्गलो शनिना दृष्टो भवेत्तदा सा नारी नैकवारं गर्भपातदोषेण पुत्रसुखहीना भवति। यदा कस्याश्चित् स्त्रिय: सप्तमभावे पापग्रहो भवेत्तदा तस्या गर्भपतनं भवति। यदा कस्याश्चित् स्त्रिय: सप्तमभावे राहुर्भवेत्तदा सा नारी नैकवारं गर्भपातदोषेण पुत्रसुखहीना भवति।

यदा कस्याश्चित् स्त्रिय: सप्तमभावे परिवेषोपग्रहो[१४१] भवेत्तदा सा वन्ध्या भवति। यदा कस्याश्चित् स्त्रिय: सप्तमभावे केतरुपग्रहो[१४२] भवेत्तदा सा वन्ध्या[१४३] भवति। यदा कस्याश्चित् स्त्रिय: सप्तमभावे शुक्रो गण्डान्तराश्यां[१४४] लग्नस्थशनैश्चरेण दृष्टोभवेत्तदा सा वन्ध्या[१४५] भवति।

यदा कस्याश्चित् स्त्रिय: सप्तमभावे सूर्यो राहुर्वा भवेत्तथा तस्योपरि शनेर्दृष्टिर्भवेत्तदा सा नारी मृतमपत्यं प्रसूते।

---

[१४०] मीनराजमते शुभफलं वर्तते। तनयपतौ सप्तमगे सुभगार्थदेवगुरुभक्ता।
प्रियवादिनी सुशीला नरस्य जायते दयिता।।बृद्ध.य.जा.३७/५५।।

[१४१] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम् ।

[१४२] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम् ।

[१४३] वन्ध्यत्व निवारणार्थं परिशिष्टम् –०७ द्रष्टव्यम् ।

[१४४] विशेषार्थं परिशिष्टम् –०६ द्रष्टव्यम् ।

[१४५] यदा स्त्रिय: सन्ततिर्नभवेत्तदा सा स्त्री वन्ध्या कथ्यते एवं एक प्राप्त्यन्तरं द्वितीयसंतानस्य प्राप्ति: कदापि न स्यात् तदा स्त्री काकवन्ध्या कथ्यते अमरकोशेपि वचनं लभ्यते यथा काकवन्ध्या सकृतप्रजा।

**सप्तमी दृष्टिः।**

यदा कस्याश्चित् स्त्रियो जन्मकुण्डल्यां सप्तमभावस्योपरि बुधशनैश्चरयोर्दृष्टिर्भवेत्तदा तस्याः पतिर्नपुंसको भवति। यदा कस्याश्चित् स्त्रियः सप्तमभावे क्षीणचन्द्रेण सह पापग्रहो भवेत्तदा सा सन्ततिप्रतिबन्धेन दुःखिनी भवति।

यदा कस्याश्चित् स्त्रियः सप्तमभावे चन्द्रबुधयोर्युतिर्भवेत्तथा तयोरुपरि शनेर्दृष्टिर्भवेत्तदा सा नार्यधिकाः कन्याः प्रसूते।

यदा कस्याश्चित् स्त्रियः पञ्चमेशो सप्तमेशो वा शुभग्रहेण तथा षष्ठेशेन दृष्टो युक्तो वा भवेत्तदा सा स्वस्वामिनं विहाय परपुरुषेण सन्ततियुक्ता भवति।

यदा सप्तमभावे राशिसन्धौ शुभदृष्टिहीनशुक्रस्योपरि लग्नभावे स्थितस्य शनैश्चरस्य दृष्टिर्भवेत्तथा पञ्चमभावे शुभग्रहो वा भवेत्तदा जातको वन्ध्यास्त्रीपतिर्भवति।

यदा सप्तमभावकारकशुक्रात् सप्तमभावे मङ्गलशनैश्चरौ भवेतां तदा जातकः पुत्रहीनो भवति। यदा सप्तमभावः पापकर्तरीयोगे सप्तमेशः पापग्रहेण दृष्टो युतो वा भवेत्तदा जातकः पुत्रहीनो भवति। यदा सप्तमेशः पुत्रेशेन सह षष्ठभावेऽष्टमभावे द्वादशभावे वा शत्रुराश्या मस्तङ्गतावस्थायां नीचराश्यां वा भवेत्तदा जातकः पुत्रस्त्रीरहितो भवति। यदा सप्तमेशः पञ्चमभावे भवेदथवा पञ्चमभावे क्षीणचन्द्रः[१४६] सप्तमलग्नद्वादशभावेषु पापग्रहो भवेत्तदा जातकः पुत्रस्त्रीहीनो भवति। मेषलग्ने लग्नेशेन सह सप्तमेशो षष्ठमभावे अष्टमभावे द्वादशभावे वा भवेत्तदा जातको वीर्यविकारी स्त्रीचिन्तायुक्तः स्त्रीरतिहीनश्च भवति।

## ०९/०३ गुह्याङ्गानि।

यदा सप्तमेशो गुरुः शुक्रो वा भवेत्तदा जातकस्य पत्नी सुन्दराकृतिश्चार्द्रचारुयोनियुक्ता भवति। यदा सप्तमेशो जलराश्यां भवेत्तदा जातकस्य भार्याऽऽर्द्रचारुयोनियुक्ता भवति। यदा स्त्रीकारकशुक्रो जलराश्यां[१४७] भवेत्तदा जातकस्य भार्याऽऽर्द्रचारुयोनियुक्ता भवति। यदा सप्तमभावे जलराशिर्भवेत्तदा जातकस्यपत्न्या र्द्रचारुयोनियुक्ता भवति।

यदा सप्तमभावे स्थितस्य बुधस्योपरि शनैश्चरस्य दृष्टिर्भवेत्तदा जातकस्य भार्याऽऽर्द्रचारुयोनियुक्ता भवति। यदा सप्तमभावे चन्द्रस्योपरि शुक्रस्य दृष्टिर्भवेत्तदाऽपि जातकस्य भार्याऽऽर्द्रचारुयोनियुक्ता भवति। यदा सप्तमभावे चन्द्रस्योपरि शनैश्चरस्य दृष्टिर्भवेत्तदा जातकस्य भार्या शुष्कभगयुक्ता भवति।

[१४६] दारेशेसुतगे प्रणष्टवनितोऽपुत्रेऽथवाधीश्वरो।

[१४७] जलराशयः कर्कवृश्चिकमकरउत्तरार्धमीनराशयः।

## सप्तमी दृष्टि:।

यदा सप्तमेशो बुधस्य शनैश्चरस्य चन्द्रस्य वा राश्यां भवेत्तदा जातकस्य भार्या ह्रस्वयोनियुक्ता भवति। यदा कस्याश्चित् स्त्रिय: सप्तमभावे शुक्रग्रहस्य नवांशस्योपरि शुभग्रहस्य दृष्टिर्भवेत्तदा सा चारुयोनियुक्ता भवति। यदा कस्याश्चित् स्त्रिय: सप्तमेश: पापग्रहेण युतो भवेत्तदा तस्या बृहतीयोनिर्भवित। यदा कस्याश्चित् स्त्रिय: सप्तमेश: सप्तमभावकारको[१४८] जलराश्यां[१४९] भवेत्तदा सा सुचारुसमयोनियुक्ता भवति। यदा कस्याश्चित् स्त्रिय: सप्तमेशो बृहस्पति: शुक्रो वा भवेत्तदा सा चारुसमयोनियुक्ता भवति।

यदा कस्याश्चित् स्त्रिय: सप्तमभावे स्थितस्य चन्द्रस्योपरि शुक्रस्य दृष्य्टिर्भवेत्तदा साऽऽर्द्रशीतलयोनियुता भवति। यदा कस्याश्चित् स्त्रिय: सप्तमभावे जलराशेर्नवमांशे चन्द्रो भवेत्तदा साऽऽद्रशीतलयोनियुता भवति।

यदा कस्याश्चित् स्त्रिय: सप्तमेशो बुधस्यचन्द्रस्य शनैश्चरस्य वा राश्यां भवेत्तदा तस्या लघुयोनिर्जायते। यदा कस्याश्चित् स्त्रिय: सप्तमभावे पापग्रहो भवेत्तदा तस्या: शुष्कयोनिर्भवति।

यदा कस्याश्चित् स्त्रिय: सप्तमभावे शुभग्रहस्य दृष्टिर्भवेदथवा सप्तमभावे गुरो:शुक्रस्य बुधस्य चन्द्रस्य वा नवमांश: शुभग्रहस्य दृष्टियुक्तो भवेत्तदा सा नारी वरणीयमङ्गं धारयति भर्तु: प्रियतमा भवति।

यदा कस्याश्चित् स्त्रिय: जन्मकुण्डल्यां सप्तमभावे मङ्गलशनैश्चरयोर्युतिर्भवेत्तदा जातका गुप्तरोगिणी योनिविकारयुक्ता च भवति।

यदा सप्तमभावे सिंहनवांशे मङ्गलो भवेत्तदा सा भाग्यहीना गुप्तरोगिणी योनिविकारयुक्ता च भवति।

यदा सप्तमभावे मङ्गलस्योपरि शनैश्चरस्य दृष्टिर्भवेत्तदा जातक: गुह्याङ्गरोगपीडितो भवति। यदा सप्तमभावे पापग्रहाणां युतिर्भवेत्तदा जातको गुह्यरोगिणी भवति। यदा सप्तमभावे वृश्चिकराश्यां राहुमङ्गलशनैश्चराणां युतिर्भवेत्तदा जातको गुप्ताङ्गपीडितो भवति। यदा सप्तमभावे क्षीणचन्द्रेण सह शनैश्चरो मेषराश्यां वृश्चिकराश्यां सिंहराश्यां वा भवेत्तदा जातको मूत्रकृच्छरोगेण पीडितो भवति। यदा सप्तमभावात् षष्ठभावेऽष्टमभावे द्वादशेभावे वा वृश्चिकराश्यां क्षीणचन्द्रेण सह पापग्रहो भवेत्तथा शुभग्रहस्य दृष्टि सप्तमभावस्योपरि न भवेत्तदा जातक गुह्याङ्ग जन्यरोगोपद्रवेण पीडितो भवति। यस्या कस्याश्चित् स्त्रयि: सप्तमभावे मङ्गलस्य नवांशोपरि शनैश्चरस्य दृष्टिर्भवेत्तदा सा योनिरोगपीडिता भवति।

---

[१४८] सप्तमभावकारक: शुक्र:।

[१४९] कर्कवृश्चिकमकरोत्तरार्द्धमीनराशय:।

## ०९/ ०५ प्रीतिव्यभिचारोवा

### (अ) कामियोगः।

यदा सप्तमभावकारकशुक्रः स्वोच्चराशिस्थितः शनैश्चरेण सह  भवेत्तदा जातको कामी भवति (परि.०१, क्र.६७)। यदा सप्तमात्सप्तमभावे वृषभराश्यां धनूराश्यां वा शनैश्चरो भवेत्तदा जातकोऽल्पकामी भवति। यदा सप्तमात् सप्तमभावे पुरुषराश्यां[१५०] शुक्रो भवेत्तदा जातकोऽल्पकामी भवति। यदा सप्तमभावे शुक्रस्योपरि लग्नेशस्य पूर्णदृष्टिर्भवेत्तदा जातकोऽल्पकामी भवति। यदा सप्तमभावे द्वितीयभावे पञ्चमभावे वा वृषभराश्यां तुलाराश्यां वा चन्द्रो भवेत्तदा जातकोऽल्पकामी भवति।

यदा कस्याश्चित् स्त्रियः सप्तमभावे शुक्रचन्द्रमङ्गलानां युतिर्भवेत्तदा सा नारी स्वभर्तृनिर्देशात्पर-पुरुषगामिनी भवति।

यदा सप्तमद्वितीयषष्ठाधिपतिभिः सह शुक्रपापग्रहौ लग्नेर्भवेतां तदा जातकः कामी भवति। यदा सप्तमेशशुक्रयोर्युतिः पापराश्यां षष्ठभावेऽष्टमभावे द्वादशभावे वा भवेत्तदा जातकः कामी भवति। यदा शुक्रः सप्तमभावे पञ्चमभावे द्वितीयभावे वा पापग्रहेण दृष्टो भवेत्तदा जातकः कामी भवति। यदा वृषभराश्यां मिथुनराश्यां तुलाराश्यां वा शुक्रो भवेत्तदा जातकोऽति कामी भवति। यदा सप्तमभावे शुक्रो भवेत्तदा जातकः कामी भवति। यस्मिन् कस्मिन् भावे सप्तमभावकारकशुक्रेण सह मङ्गलो भवेत्तदा जातकः कामी भवति। यदा सप्तमभावकारकशुक्रः षष्ठभावेऽष्टमभावे द्वादशभावे वा स्वोच्चराश्यां नीचराश्यां सिंहनवांशेः प्रथमतः पञ्चदशांशपर्यन्तं वृषभनवांशे तुलानवांशे वा भवेत्तदा जातकः कामी भवति। यदा शुक्रशनैश्चरयोर्युति वृषभराश्यां तुलाराश्यां वा सप्तमभावे भवेत्तदा जातकोऽति कामी भवति। यदा सप्तमभावकारकशुक्रः शनैश्चरराश्यां तथा शनैश्चरः शुक्रराश्यां भवेत्तदा जातकः कामी भवति। यदा सप्तमभावकारकशुक्रः शनैश्चरराश्यां तथा शनैश्चरः शुक्रराश्यां भवेत्तदा जातकः कामी भवति। यदा सप्तमभावकारकशुक्रः शनैश्चरेण सह नवांशकुंडल्यां परस्परं परिवर्तनयोगे भवेत्तदा जातकोऽति कामी भवति। यदा शुक्रः शनैश्चरराश्यां नवांशे वा शनैश्चरेण युतो दृष्टो वा भवेत्तदा जातकः शिश्नचुम्बनशीलो भवति। यदा सप्तमभावे शुक्रो मङ्गलनवांशे (मेषनवांशे वृश्चिकनवांश वा) मङ्गलराश्यां (मेषराश्यां वृश्चिकराश्यां वा) भवेदथा मङ्गलग्रहेण दृष्टोयुतो वा भवेत्तदा जातको भगचुम्बनशीलो भवति। यदा

[१५०] विशेषार्थं परिशिष्टम्–०५ दृष्टव्यम् ।

## सप्तमी दृष्टिः।

सप्तमेश: शुक्रक्षेत्रे (वृषभराश्यां तुलाराश्यां वा शुक्रेण युतो दृष्टो वा) भवेत्तदा जातको भगचुम्बनशीलो भवति। यदा सप्तमभावे शुक्रदशमेशयोर्युतिर्भवेत्तदा जातको भगचुम्बनशीलो भवति।

### (आ) व्यभिचारयोगः।

यदा सप्तमभावे क्षीणचन्द्रो[१५१] भवेत्तदा जातकस्य पत्नी व्यभिचारिणी भवति। यदा सप्तमभावे राहुर्भवेत्तदा जातकस्य पत्नी व्यभिचारिणी भवति। यदा सप्तमभावे शनैश्चरेयस्य मङ्गलस्य वा नवांशे गुरुर्भवेत्तदा जातकस्य पत्नी व्यभिचारिणी भवति।

यदा सप्तमभावे मेषराश्यां वृश्चिकराश्यां मकरराश्यां कुम्भराश्यां वा शुक्रो भवेत्तदा जातको व्यभिचारी भवति। यदा सप्तमभावकारकशुको नीचग्रहेण वा राहुणा सह भवेत्तदा जातको व्यभिचारि भवति (परि.०१,क्र.६४) (परि.०१,क्र.६५) (परि.०१,क्र.६६)। यदा सप्तमभावे क्षीणचन्द्रो पापग्रहेण सह भवेत्तदा जातको व्यभिचारी भवति। यदा सप्तमभावे शुक्रो मङ्गलेन शनैश्चरेण वा दृष्टो भवेत्तदा जातकस्य पत्नी व्यभिचारिणी भवति। यदा सप्तमेशो नीचराश्यां शत्रुराश्यामस्तङ्गतग्रहस्यराशिनवांशे भवेत्तदा जातको व्यभिचारी भवति। यदा निर्बलसप्तमेश: सप्तमभावे पापग्रहेण दृष्टो भवेत्तदा जातक: परस्त्रीलोलुपो भवति। यदा सप्तमाष्टमभावयो: पापग्रहस्तथा द्वादशभावे मङ्गलो भवेत्तदा जातक: परस्त्रीरतो भवति। यदा सप्तमेशोऽदृश्योलार्द्धे (सप्तमभावारभ्य द्वादशभावपर्यन्तम्) अस्तङ्गतावस्थायां भवेत्तदा जातक: परस्त्रीरतो भवति। यदा सूर्यचन्द्रशनैश्चरा: क्रूरषष्ट्यंशे[१५२] नीचराश्यां वा भवेयुस्तदा जातक: परस्त्रीरतो भवति। यदा सप्तमभावे चन्द्रमङ्गलशुक्रराहूणां युतिर्भवेत्तदा जातकस्तस्यपत्नीचोभौ व्यभिचारिणौ भवत:। यदा सप्तमभावे चन्द्रमङ्गलशुक्रशनैश्चराणां युतिर्भवेत्तदा जातकस्तस्य पत्नीचोभौ व्यभिचारिणौ भवत:। यदा सप्तमभावे शनैश्चरमङ्गलचन्द्रा भवन्ति तदा जातकस्तस्य पत्नीचोभौ व्यभिचारिणौ भवत:। यदा सप्तमभावे शुक्रबुधयोर्युतिर्भवेत्तदा जातको व्यभिचारी भवति। यदा सप्तमेशो द्वितीयेशदशमेशाभ्यां सह दशमभावे भवेत्तदा जातको व्यभिचारी भवति। यदा सप्तमेशो राहुणा केतुना वा सह पापग्रहेण दृष्टो भवेदथवा सप्तमभावे गुरु:शुक्रो वा पापग्रहेण सह भवेत्तथा जातकोऽवश्यमेव व्यभिचारी भवति। यदा द्वितीयेशसप्तमेशषष्ठेशशुक्रा: पापग्रहेण सह प्रथमभावे भवेयुस्तदा जातको व्यभिचारी भवति। यदा

---

[१५१] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम् ।

[१५२] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम् ।

सप्तमभावे द्वितीयेशलग्नेशषष्ठेशा: पापग्रहेण सह भवेयुस्तदा जातको व्यभिचारी भवति। यदा सप्तमेश: षष्ठेशपापग्रहाभ्यां सह नवमभावे भवेत्तदा जातको व्यभिचारी भवति। यदा मङ्गल: शनैश्चरो वा सप्तमेशो भूत्वा सप्तमभावे भवेत्तदा जातकस्तस्य पत्नीचोभौ व्यभिचारिणौ भवत: । अथवा जातकस्य पत्नी वेश्यावृत्ति संलग्ना भवति। यदा सप्तमभावेऽप्रकाशग्रहो[१५३] भवेत्तदा जातकस्य पत्नी व्यभिचारिणी भवति। यदा सप्तमभावे पापग्रहो नीचराश्यां शत्रुराश्यां वा पापग्रहेण युतो दृष्टो वा भवेत्तदा जातकस्य पत्नी व्यभिचारिणी भवति। यदा सप्तमभावे सूर्यचन्द्रयोरुपरि नीचराशि स्थितस्य शनैश्चरस्य दृष्टिर्भवेत्तदा जातको व्यभिचारी भवति। यदा सप्तमभावे शुक्रो राहुर्वा भवेत्तदा जातको गर्भिण्यास्त्रिया सह मैथुनं करोति। यदा सप्तमभावे सूर्यो भवेत्तदा जातको वन्ध्यया सह समागमरतो भवति । यदा सप्तमभावे मङ्गलो भवेत्तदा जातको वध्यया रजस्वलया वा सह समागमरतो भवति। यदा सप्तमभावे तुलाराश्यां सूर्यस्योपरि चतुर्थभावे स्थितस्य मङ्गलस्य दृष्टिर्भवेत्तदा जातक: पशुगामी पशुवन् मैथुनशीलो वा भवति। यदा सप्तमेशो मेषराश्यां वृश्चिकराश्यां वा शुक्रेण दृष्टो भवेत्तदा जातक: पशुगामी भवति। यदा सप्तमभावे तुलाराश्यां राहुश्चतुर्थेमङ्गल: प्रथमभावे शनैश्चरो भवेत्तदा जातक: पशुगामी भवति। यदा सप्तमभावे गुरु: पापग्रहेण सह भवेत्तदा जातको ब्राह्मण्या सह मैथुनक्रियां करोति(परि.०१,क्र.६४)। यदा सप्तमभावे सप्तमात् षष्ठभावे वा बुधो नीचराश्यां पापराश्यां शत्रुराश्यामस्तङ्गतावस्थायां ग्रहयुद्धे पराजितावस्थायां वा शुभग्रहस्य युतिर्दृष्टिोहीनोऽशुभग्रहेण युतो दृष्टो वा भवेत्तदा जातको वेश्यागामी भवति। यदा सप्तमभावे निर्बलो सूर्यो भवेत्तदा जातको वन्ध्यासह पूणश्चन्द्रो भवेत्तदा स्वपत्न्या सह अथवा चन्द्रराश्यानुसारलक्षणयुतो स्त्रियासह क्षीणचन्द्रोभवेत्तदा रजस्वल्या वन्ध्यया सह गुरोर्भवेत्तदा विप्रस्त्रिया सह शुक्रो भवेत्तदा गर्भिण्याा सह शनैश्चरराहुकेतुर्वाभवेत्तदा रजस्वलया नीचजातिस्त्रिय: सह सङ्गं करोति। अत्र पराशरमते शनैश्चरो भवेत्तदा वन्ध्यया कुब्जया वा सह सम्भोगो भवति। बुधो भवेत्तदा वैश्यया वेश्ययावा सह पुरुषस्य गमनं भवति।

### ०९/०६ स्तनविचारः।

यदा सप्तमेश: शुभग्रहेण युतो भवेदथवा सप्तमभावे सूर्यो भवेदथवा सप्तमेश: केन्द्रे चन्द्रेणसह वा बुधेन सह वा शुक्रेणसह वा गुरुणासह भवेत्तदा जातकस्य पत्नी विशालस्तनयुक्ता भवति। यदा सप्तमभावे मङ्गलोभवेत्तदा जातकस्य पत्नी शुष्कस्तनी भवति। यदा सप्तमभावे गुलिकेन [१५४] सह राहुशनैश्चरौ वा केतुशनैश्चरौ भवेताम् तदा जातकस्य पत्नी बृहत्तस्तनयुक्ता भवति। यदा सप्तमभावे

---

[१५३] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम् ।

[१५४] विशेषार्थं परिशिष्टम् –०३ द्रष्टव्यम् ।

धूमादिरुपग्रहो[१५५] भवेदथवा सप्तमेशो षष्टाष्टमद्वादशभावे वा भवेत्तदा जातकस्य पत्नी विषमाकृतिस्तनयुक्ता भवति।

### (अ) सप्तमभावात् सन्ततिविचारः।

सप्तमभावात् पञ्चमभावे शुभग्रहो भवेत्तदा जातक उत्तमसंततिसुखं प्राप्नोति। किन्तु यदि सप्तमभावात् पञ्चमेभावे (लग्नैकादशभावे) पापग्रहो भवेत्तदा संततिबाधाकारणं भवति । शुभग्रहस्य दृष्टिः पञ्चमभावस्योपरि भवेत्तदा जातकः सन्तति प्राप्नोति।

### ०९/०७ युद्धम्।

यदा सप्तमभावात् नवमभावाधिपति उच्चराश्यां भवेत्तदा जातको युद्ध विषये भीरुर्भवति। यदा सप्तमभावाद् द्वादशाधिपतिर्नीचराश्यां क्रूरषष्ट्यंशे पापग्रहेदृष्टो युतो वा भवेत्तदा जातको युद्धे पराजितो भवति। यदा सप्तमान्नवमे नवमाधिपति उच्चराश्यां षष्ठेन युतो भवेत्तदा जातक युद्धे पराजितो भवति।

### ०९/०८ यात्रा।

यदा सप्तमभावे शुक्रो भवेत्तदा जातको यात्रायां कष्टं प्राप्नोति। यदा सप्तमभावे शुक्रक्रूरग्रहेण युतो वा दृष्टो भवेत्तदा जातको यात्रायां कष्टं प्राप्नोति।

### १०/०१ सप्तमभावस्य शुभाशुभत्वनियमाः।

यस्य भावस्य विचारः करणीयो भवति स भावो लग्नमिति[१५६] गणनीयम्। अतः सप्तमभावात् प्रथम-द्वितीय-चतुर्थ-पञ्चम-सप्तम-नवम-दशमभावानां स्वामिनां विचारः करणीर्ये यथा स स्वामी शुभोग्रहोऽस्ति न वा? यदा स स्वामी शुभो भवेत्तदा स शुभफलदायको भवति । यदा च तस्मिन्नेवभावे पापग्रहो भवेदथवा तस्य भावस्योपरि पापग्रहस्य दृष्टिर्भवेत्तदा तस्याऽशुभफलं मन्तव्यम्। यदा च शुभाशुभग्रहाणां प्रभावो भवेत्तदा मिश्रफलं बोद्धव्यम् ।

---

१५५ विशेषार्थ परिशिष्टम् -०३ द्रष्टव्यम् ।

१५६ भावस्य यस्यैव फलं विचिन्त्यं भावं च तं लग्नमिति प्रकल्प्य।
तस्माद्वदेद्द्वादशबावजानि फलानि तद्रूपदनादिकानि।। फ.दी.१५/२०।।

**सप्तमी दृष्टिः।**

यदा सप्तमभावस्याधिपतिः पापग्रहस्तस्माद्भावादथवा लग्नभावादष्टमभावे भवेदथवा सूर्येणाऽस्तङ्गतो भवेदथवा नीचराश्यां भवेदथवा शत्रुराश्यां शुभग्रहेण दृष्टो युतो वा न भवेत्तदा तस्य भावस्य फलं प्रणश्यति।

यदा सप्तमभावस्याधिपतिःक्रूरग्रहःसूर्येणाऽस्तङ्गतो भवेदथवा नीचराश्यां भवेदथवा शत्रुराश्यां शुभग्रहेण दृष्टो युतो वा न भवेत्तदा स यस्मिन् भावे भवेत्तस्मिन् भावस्य फलं प्रणश्यति।

यदा सप्तमेशशुभग्रहो नीचराश्यां शत्रुराश्यामस्तङ्गतावस्थायां वा भवेत्तदा सप्तमभावस्य फलहानिं करोति किन्तु शुभग्रहेण युतो दृष्टो वा भवेत्तदा तस्य फलविषये ऽशुभत्वं न्यूनं भवति।

यदा सप्तमभावात् षष्ठभावेऽष्टमभावे द्वादशभावे वा पापग्रहो स्वराशिं विहायान्यराश्यां भवेत्तदा सप्तमभावस्याशुभफलं भवति (परि.०१,क्र.८०) (परि.०१,क्र.८३) (परि.०१,क्र.८४), (परि.०१,क्र.८८), (परि.०१, क्र.९३) (परि.०१,क्र.९८) (परि.०१,क्र.९९) (परि.०१, क्र.१०४)।

यदा सप्तमभावस्याधिपतिः षष्ठभावस्याष्टमभावस्य द्वादशभावस्य वा स्वामी भवेत्तदा सप्तमभावस्याशुभफलं ददाति। किन्तु त्रिकस्थानस्याधिपति सन्नपि यदा स लग्नेशो भवति तदा तस्य फलमशुभं न भवति।

यदा सप्तमभावस्योपरि शुभग्रहस्य दृष्टिर्भवेत्तदा सप्तमभावस्य शुभफलं भवति।

यदा सप्तमभावः सप्तमेशो सप्तमभावकारकश्च निर्बला भवेयुरथवा पापकर्तरीयोगे[१५७] भवेयुरथवा शत्रुग्रहयुक्ता भवेयुरथवा तैर्दृष्टा भवेयुस्तथा शुभग्रहेण युक्ता दृष्टा न भवेयुस्तदा शुभफलं न लभ्यतेऽथवा तस्य भावस्य दुःखं लभ्यते।

सप्तमभावे यद्द्रेष्काणो भवेत्तस्माद् द्वाविंशतिद्रेष्काणस्यस्वामी सप्तमभावस्याशुभफलं वितरति। अतः सप्तमभावात् २२ द्रेष्काणस्वामिनामथवा षष्ठाष्टमद्वादशभावानां स्वामिनां दशाश्चान्तर्दशाः सप्तमभावस्याशुभफलं वितरति।

यदा सप्तमभावात् तृतीयषष्ठैकादशभावेषु स्थितेषु पापग्रहाणां दशाऽन्तर्दशाफलं सप्तमभावस्य शुभफलं ददाति।

यदा सप्तमभावात् प्रथम–चतुर्थ–पञ्चम–सप्तम–दशमभावेषु शुभग्रहाः सन्ति तदा सप्तमभावस्य शुभफलस्याभिवृद्धिर्भवति ।

---

[१५७] विशेषार्थं परिशिष्टम् –०६ द्रष्टव्यम् ।

**सप्तमी दृष्टिः।**

सप्तमेशस्य मित्रग्रहदशायां सप्तमभावस्य शुभफलं प्राप्यते। अत्र ग्रहाणां नैसर्गिकमैत्री पञ्चधामैत्र्याधारेण मित्राऽमित्रनिर्णयो भवति ।

यदा सप्तमेशो यस्य कस्य भावस्य मध्यबिन्दो राश्यादिमाने भवेत्तदा स यस्मिन् भावे स्थितो भवेत्तस्य भावस्य पूर्णफलं ददाति। यदा सप्तमेशो द्वयो र्भावयो:सन्धौ (संधिराश्यादिमाने) भवेत्तदा स निष्फलो भवति । मध्येऽनुपातेन फलं गणनीयम्।

यदा सप्तमेश: स्वोच्चराश्यां स्वराश्यां मूलत्रिकोणराश्यां मित्रराश्यां होरादिषड्वर्गेषु बलवान् वा भवेत् किन्तु स ग्रहो भावसन्धौ भवेत्तदा स निष्फलो भवति।

**१०/०२ सप्तमभावात् पञ्चमभावे सन्ततिविचारः।**

सप्तमभावात् पञ्चमभावे (लग्नादैकादशभावे इति यावत्) शुभग्रहो भवेत्तदा जातक उत्तमसन्ततिसुखं प्राप्नोति। किन्तु यदि सप्तमभावात् पञ्चमभावे (लग्नभावातैकादशभावे इति यावत् ) पापग्रहो भवेत्तदा सन्ततिबाधाकारणं भवति । शुभग्रहस्य दृष्टि: पञ्चमभावस्योपरि भवेत्तदा जातक: सन्ततिं प्राप्नोति।

**१०/०३ सप्तमान्नवमभावे स्त्रीसुखविचारः।**

यदा सप्तमभावान् नवमेभावे (लग्नात्तृतीयभावे इति यावत्) सूर्यचन्द्रयोर्युतिर्भवेत्तदा जातक: सुन्दरपत्नीसुखभाक् चंद्रमङ्गलयोयुतिर्भवेत्तदा सुतलालस: सूर्यचन्द्रगुरूणां युतिर्भवेत्तदा वंध्यास्त्रीपति: चंद्रमङ्गलशुक्राणां युतिर्भवेत्तदा विनीतदारः, मङ्गलबुधशुक्राणां युतिर्भवेत्तदा स्त्रीवल्लभो धनिको बुधगुरुशुक्राणांयुतिर्भवेत्तदा स्त्रीपराजितो बुधशुक्रशनैश्चराणां युतिर्भवेत्तदा स्त्रीप्रियो भवति। चन्द्रबुधशुक्रशनैश्चराणां युति भवेत्तदा स्त्रीप्रियो सूर्यमङ्गलबुधगुरुशुक्राणां युतिर्भवेत्तदा जातक: स्त्रीसुखयुक्तो, चंद्रमङ्गलबुधगुरुशनैश्चराणांयुति भवेत्तदा जातक: उग्रदारो भवति। चन्द्रबुधगुरुशुक्र–शनैश्चराणां युतिर्भवेत्तदा जातक: कुकलत्रवान् भवति।

**१०/०४ सप्तमाद् दशमे स्त्रीसुखविचारः।**

यदा सप्तमाद् दशमेभावे (लग्नाच्चतुर्थभावे इति यावत्) चन्द्रमङ्गलयोयुर्तिभवेत्तदा जातक: परस्त्रीरतो भवति। सूर्यचन्द्रशुक्राणां युतिर्भवेत्तदा जातक: स्त्रीयुक्तो भवति। यदा सूर्यबुधशनैश्चराणां युतिर्भवेत्तदा जातक: दुष्टस्त्रीपति: कुलटापतिर्भवति । यदा मङ्गलबुधशनैश्चराणां युतिर्भवेत्तदा जातक: परस्त्रीलोलुपो भवति। यदा सूर्यचन्द्रगुरुशनैश्चराणां युतिर्भवेत्तदा जातको गणिकारतो भवति। यदा

सूर्यमङ्गलशुक्रशनैश्चराणां युतिर्भवेत्तदा जातक उत्तमकलत्रवान् भवति। यदा चन्द्रमङ्गलशुक्रशनैश्चराणां युतिर्भवेत्तदा जातकः स्त्रीणामभीष्टो भवति। यदा चन्द्रबुधशुक्रशनैश्चराणां युतिर्भवेत्तदा जातकः स्त्रीणामभीष्टो भवति।

### १०/ ०५ सप्तमाद् द्वादशभावे स्त्रीसुखविचारः।

यदा सप्तमभावद् व्ययेभावे (लग्नात् षष्ठभावे इति यावत्) चन्द्रबुधयोर्युतिर्भवेत्तदा जातकः कुलटापतिर्भवति। यदा चन्द्रशनैश्चरयोर्युतिर्भवेत्तदा जातको विरूपदारो रतिसुखहीनश्च भवति। यदा मङ्गलशुक्रयोर्युतिर्भवेत्तदा जातकः स्त्रीअनुरगी स्त्रीवशश्च भवति। यदा बुधशुक्रयोर्युतिर्भवेत्तदा जातको वनिताविरक्तो भवति। यदा गुरुशुक्रयोर्युतिर्भवेत्तदा जातकः स्त्रीचञ्चलो भवति। यदा गुरुशनैश्चरयोर्युतिर्भवेत्तदा जातकः स्त्रीवत्सलो भवति। यदा सूर्यबुधशनैश्चराणां युतिर्भवेत्तदा जातकः स्त्रीहीनो भवति। यदा चन्द्रबुधशुक्राणां युतिर्भवेत्तदा जातकः स्त्रीरहितो भवति। यदा मङ्गलबुधशनैश्चराणां युतिर्भवेत्तदा जातकःस्वस्त्रीरतो भवति। यदा मङ्गलशुक्रशनैश्चराणां युतिर्भवेत्तदा जातकः स्त्रीप्रियो भवति। यदा सूर्यचन्द्रमङ्गलानां युतिर्भवेतत्तदा जातकः स्त्रीपराजितो भवति। यदा सूर्यचन्द्रगुरुशुक्राणां युतिर्भवेत्तदा जातकः स्त्रीलम्पटो भवति। यदा सूर्यगुरुशुक्रशनैश्चराणां युतिर्भवेत्तदा जातकः प्रमदास्वभीष्टो भवति। यदा चन्द्रबुधशुक्रशनैश्चराणां युतिर्भवेत्तदा जातको वनितारहितो भवति। यदा चन्द्रगुरुशुक्रशनैश्चराणां युतिर्भवेत्तदा जातको वनिताहीनो भवति। यदा बुधगुरुशुक्रशनैश्चराणां युतिर्भवेत्तदा जातकः स्त्रीपराजितो भवति। यदा सूर्यबुधगुरुशुक्रशनैश्चराणां युतिर्भवेत्तदा जातकः स्त्रीलम्पटो भवति। यदा चन्द्रमङ्गलगुरु-शुक्रशनैश्चराणां युतिर्भवेत्तदा जातकः परस्त्रीरतो भवति। यदा चन्द्रबुधगुरुशुक्रशनैश्चराणां युतिर्भवेत्तदा जातकः स्त्रीहीनो भवति। यदा सूर्यमङ्गलबुधगुरुशुक्रशनैश्चराणां युतिर्भवेत्तदा जातकः स्त्रीहीनो भवति।

**उपसंहारः-** अत्र सप्तमम्यां दृष्ट्यां चर्चितविषयाणामध्ययेन तदेत्त स्पष्टं भवति यत् कलत्रभावेति ख्यातस्य सप्तमस्थानस्य प्रभावेन विवाहादिविषयकः पुत्रपौत्रादिसौख्यगतो धनायव्ययौ सम्बन्धीचेति बहुव्यापको विचारः करणीयः अत एव जातकस्य जीवने सप्तकभावस्यात्यन्तं महत्वं प्रतिपाद्यते।

एवं कुटुम्बसुतकलत्रभावनामाधुनिके कालेत्यावश्यक्ता समाजे दृश्यते। यतः जातकस्य वैयक्तिकसुखशान्तयादि सर्वेषु कालेषु सर्वेषु देशेषु सर्वेषु च समाजेषु महत्तरं वर्तते। इति शम्।

-x-x-x-

## अष्टमी दृष्टिः।

## उपसंहारः।

(२९५-३००)

## अष्टमी दृष्टिः।

### उपसंहारः।

अस्मिन् शोधनिबन्धे जन्मकण्डल्यां कुटुम्ब–सुत–कलत्रभावत्रिकस्य सघनमध्ययनं पारितम्। एतदर्थमावश्यकाजन्मकुण्डल्योऽपि प्रथमे परिशिष्टे संगृहीताः सन्ति। ताषां जन्मकुण्डलीनां प्रयोगो यत्र यत्र कृतस्तत्रतत्र ताषां क्रमांकाऽपि प्रर्दशिताः।

**प्रथमादृष्टि**र्ज्यौतिःशास्त्रेतिहासेत्याख्या यत्र वैदिककालिकं ज्यौतिषशास्त्रविषयकमध्ययनं ज्यौतिषशास्त्रवृक्षस्य बीजरूपं वर्तते। यस्य वेदाङ्गकालिकं ज्यौतिषमङ्कुररूपम्। तस्य कल्पसूत्रादिकालिकं ज्यौतिषं पल्लव एवं पुराणकालिकं ज्यौतिषं स्कन्धः। वराहमिहिराचार्यभट्टादीनां प्रदानमेव ज्यौतिस्य पुष्पाणिफलानि चेति सुष्ठु फलितं तत्र वराहमिहिरादारभ्यैकविंशतिशतक पर्यन्तां ज्योतिर्विदां जीवनं प्रदानञ्च प्रस्तुतं वर्तते। अतः परं पण्डितवर्याणां आचार्यश्री शिरोमणीनां श्रीमतां बलदेवोपाध्यायानां काशी कि पाण्डित्य परम्परा नामकग्रन्थस्य निर्देशोऽवश्यतया कृतः।

**द्वितीयादृष्टि**र्जन्मकुण्डल्यां भावविचारेत्याख्या जन्मकुण्डली जातकस्य भूतभविष्यद्वर्तमान–जीवनस्य दर्पणं इति मन्यत स्विक्रीयते च । अतो जातकस्य जन्मकुण्डलीमनुसारेण प्रारम्भिकरूपेण यत् सामान्यज्ञानमावश्यकं तत् द्वितीयादृष्ट्यां प्रस्तुम्। अत्र सूयादिकेतूपर्यनतानां नवानं मुख्यग्रहाणां जन्मकुण्डल्यां स्थित्यनुसारेण यद् यद् फलं दिश्यते तत्तत्फलं निरूपितम्। आधुनिकज्यौतिषशास्त्रे च स्वीकृतानां हर्षलप्लुटोनेपच्यूनग्रहाणामपि सामान्यफलविचारः प्रस्तूतः। विशिष्टफलविचारे चापाधूमाद्युपग्रहाणामपि समावेशः कृतः।

**तृतीया दृष्टिर्ज**न्मकुण्डल्यां ग्रहाणांयुतिविचारेतिनामिकाऽस्ति। जन्मकुण्डल्यां प्रथमभावादारभ्य द्वादशभावपर्यन्तेषु कुटुम्बसुतकलत्राख्यानां सूर्यादिसप्तग्रहाणां एकैकस्य फलविचारः प्रस्तुतः। सूर्यचन्द्रयोश्चन्द्रमङ्गलश्चेति ग्रहद्वयस्य सूर्यचन्द्रमङ्गलानां चन्द्रमङ्गलबुधानाञ्चेतिग्रहत्रयस्येत्यादिक्रमेण सप्तग्रहपर्यन्तं विचारः प्रस्तुतः।

## अष्टमी दृष्टिः।

द्वयोर्ग्रहयोः त्रयाणां तदधिकानाञ्चांशात्मके सामीप्यजाते युतिफलविचारः क्रियते। अत्र ग्रहयुतिविचारेराहुकेतुग्रहयोः सम्पर्कः पूर्वाचार्यैः न गृहीतो यत एतयोः फलकथनेऽतीव भिन्नभिन्नमतानि प्रवर्ततन्ते । यद्यप्युभयो राहुकेतुनामकयोश्छयाग्रहयोर्विचारऽत्र न कृतस्तयोस्तु।

**<u>चतुर्थीदृष्टि</u>**र्जन्मकुण्डल्यां ग्रहाणां दृष्टिविर्चोत्याख्याऽस्ति। यत्र जन्मकुण्डल्यां सूर्यचन्द्रमङ्गलादि-ग्रहाणामन्यान्यक्षेत्रस्थानां दृष्टिर्जातकस्य जीवने प्रभावं दर्शयति। तेषां ग्रहाणांमेषवृषभादिराशिपतीनां क्षेत्रेषु स्थित्वा प्रभावस्य यत्फलं भवति तस्य विचारः कृतः। मेषवृश्चिकयोर्मङ्गलो वृषभतुलयोः शुक्रो मिथुनकन्ययोर्बुधः कर्कस्य चन्द्रः सिंहस्य सूर्यो धनुर्मीनयोर्गुरुः मकरकुम्भयोश्च शनिरिति राशिपतीनां क्षेत्रेषु स्थितानां सूर्यादिनामुपरिचन्द्रदिग्रहाणां दृष्टिपातेन जातकस्य फलप्राप्तिर्भवति।

सर्वेग्रहाः स्वस्थानात् सप्तमभावे पूर्णदृष्ट्या पश्यन्ति मङ्गलश्चतुर्थाष्टमभावयोः पूर्णदृष्ट्या पश्यति। गुरुः पञ्चमनवमभावयोः पूर्णदृष्ट्या पश्यति। अत्र जातकस्य जन्मकुण्डलीगतानां सूर्योदिग्रहाणां दृष्टिविशेषेण यद् यद् सामान्यफलं सारावली जातकाभरणादिग्रन्थेषु लिखितं वर्तते तस्य तस्य चर्चा प्रस्थापिता। मेषादिराशिषु स्थितानां ग्रहाणां तेषां च ग्रहाणां राशिगतत्वं क्षेत्रीयत्वमपि चर्चितम्। तेषां ग्रहाणां कैर्ग्रहैःसह मित्रता शत्रुता वा तेषां बलाबलानुसारेणैव फलं प्रदर्शितम्। तत्र च ग्रहाणामन्यग्रहैः सह शत्रुता वा मित्रतावापरिशिष्टे तृतीये प्रदर्शिताऽस्ति। अत्र पाश्चात्यानां विचारोऽपि प्रदर्शितः। सूर्यस्य चन्द्र-मङ्गल-गुरुभिः सह मित्रता। चन्द्रस्य सूर्यबुधाभ्यां सह मित्रेत्यादि एवं च सूर्यस्य शुक्रशनैश्चरराहुभिः सह शत्रुता शनैश्चरस्य च सूर्यचन्द्रमङ्गलैः सह शत्रुतेत्यादि चर्चा कृता। पाश्चात्यज्योतिःशास्त्रविदां मते मित्रतायाः शत्रुताया वा सिद्धान्तो भिन्नः। यद्यप्युभयो राहुकेतुनामकयोश्छयाग्रहयोर्विचारऽत्र न कृतस्तयोस्तु अधिकविशेषफलवत्त्वात्।

**<u>पञ्चमी दृष्टिर्ज</u>**न्मकुण्डल्यां कुटुम्बभावस्य विचारेति नामनी वर्तते। दैवज्ञे वैद्यनाथेन जातकपारिजाते वित्तनेत्रमुखादिविषयेयत् कथितमस्ति तदनुसारेणाऽत्र चर्चाविचारः कृतः।

जन्मकुण्डल्यां द्वितीयभावस्य 'कुटुम्बभाव' इति नामकरणम् । ज्यौतिषशास्त्रे जातकस्य केवलं कुटुम्बस्य विचारो न क्रियते किन्तु तत् सम्बन्धिनौ क्रयविक्रयौ सुखं भोगोऽशनपानादि भोगसाधनानि च समान्यतया विचार्यन्ते। बहुशो वित्तस्य विचारोऽप्यन्तः सामाविश्यते। यत् साहाय्येन

## अष्टमी दृष्टिः।

मणिमाणिक्यादि–धनमपि विचार्यते। कुटुम्ब सम्बन्धिविद्याया अपि वाण्याः सत्यवाचोपि चिन्तनं वर्तते। कुटुम्बं सत्यमित्यारभ्यनेत्रपर्यन्तेषु सप्तशीर्षकेषु द्वितीयभावस्य (कुटुम्भभावस्य) राश्यादिफलविचारः कृतः।

जन्मकुण्डल्यां कुटुम्बभावस्य फलविचारस्य चर्चायां प्रत्येकभावस्य तत्तत् स्थितराश्यास्तत्तद्राशिपतेश्च परस्परं भावपरिवर्तने जातकस्य यत्फलं भवेत्तदर्शितानां तेषां ग्रहाणां परस्परं स्थानगतानां शुभाशुभफलविचारस्तेषाञ्चनियमाऽपि संगृहीता तस्य चर्चा कृता।

**षष्ठी दृष्टि**र्जन्मकुण्डल्यां सुतभावस्य विचारेत्याख्या वर्तते। पराशरमुनि विरचिते बृहत्पराशरहोराशास्त्रे सुतभावानुसारेण यन्त्रमन्त्रावारभ्योदरस्वास्थ्यपर्यन्तेषु सप्तशीर्षकेषु आधुनिक कालफलज्योतिषानुसारेणाऽत्र क्रमो बुद्धिर्विद्याविनयः प्रबन्धश्चेति गृहीतोऽध्ययने सौकर्यात्। तदेतत् जातकस्य जन्मकुण्डल्याः पञ्चमात् सुतस्थानात् प्राधान्येन पुत्रपौत्रादिविषयको विचारक्रियते। तथापि प्राचीनाग्रन्थकारा ज्योतिर्विदश्च विशेषतया विद्याविषयका उदरस्वास्थगता यशः कीर्त्यादिविषयका चर्चा स्वीकुर्वन्ति । ततः कारणादत्र विषयाणां चर्चाः पुरस्कृत्वाऽऽधुनिकसमयस्य शेरसट्टादिकमपि चिन्तनीयमिति।

**सप्तमी दृष्टि**र्जन्मकुण्डल्यां कलत्रभावस्य विचारः। अत्र कलत्रभावस्यविचारः प्रस्तुतः। कलत्रभावस्य जामित्रं अस्तो मदनो द्यूनं कामश्चेति संज्ञाः सन्ति । कलत्रभावसहयोगिनां विचारः शास्त्रीयग्रन्थेषु प्राप्यते। विवाहोद्वाहारभ्यधनायव्ययपर्यन्तेषु अष्टशीर्षकेषु विचारः प्रस्तुतः। अत्र चर्चितविषयाणामध्ययेन तत् स्पष्टं भवति यत् कलत्रभावेति सप्तमस्थानस्य प्रभावेन विवाहादिविषयकः पुत्रपौत्रादिसौख्यगतो धनायव्ययौ सम्बन्धीचेति बहुव्यापको विचारो ज्योतिर्विद्भिः करणीयः। अत एव जातकस्य जीवने सप्तकभावस्यात्यन्तं महत्वं प्रतिपादितम्।

अस्मात् कारणात् अस्मिन् शोधनिबन्धे कुटुम्बसुतकलत्रभावानां तत्सम्बन्धानां राशीनां राशीपतिनां युतिनां ग्रहोपग्रहाणां तत्प्रभावस्य च यत्र यत्र समीक्षणमवलोकनं चर्चाविचारश्च समधिकतयाकरणीया इति सर्वं प्रमतितम्। अस्तु।

## अष्टमी दृष्टिः।

प्राचीनज्योतिर्विदां फलज्योतिषविषयाणां नामात्याधुनिककाले व्यापकरूपेण स्वीक्रियन्ते। तद्यथा नृपविषये प्रधानाः (M.L.A.) नृपसंमानविषये सर्वकारतः पारितोषिकम् (Award) यन्त्रज्ञविषये इन्जिनीयरः रसायणविषये केमीष्टः शिल्पकामकुशलविषये भवनादिनिर्माण (Architect) राजकुलोत्पन्नविषये धनकुबेरः राजनेतृकुलोत्पन्नो वा नृपसचिवविषये सेक्रेटरी सर्वकारमन्त्रालयमहाशयाः (Secretariats) इत्येवं फलविचारः कर्तव्य इत्यस्य शोधनिबन्धस्य चरमं प्रयोजनम्।

यदा विषयराश्यां लग्नं भवेत्तदा धनभावस्य उपपद संज्ञा भवति। तस्याऽपर संज्ञा उपारूढ गौणपदं च भवति। यदोपपदाद् द्वितीयभावे(लग्नात् तृतीयाभावे) यावत् पापग्रहः पापग्रहस्य राशिरथवा पापग्रहस्य दृष्टिर्भवेत् तदा जातकः स्त्रीद्वेषी, सन्यासी वा भवति। किन्तु अस्मिन् योगे स्वराशिगतपापग्रहस्याऽशुभफलं न भवति। स्वराशिं विहाय सूर्य उपपदात् (द्वितीयात्) द्वितीयभावे भवेत्तदा जातकः स्त्रीद्वेषी भवति। उपपदात् द्वितीयभावे नीचग्रहस्य राशिर्नीचग्रहो नीचग्रहस्य दृष्टिर्वा भवेत् तदा जातकः स्त्रीनाशकः सन्यासीवा भवति। यदोपदाद् द्वितीयभावे शुभग्रहस्य राशिः शुभग्रह उच्चराशिगतग्रहस्य स्थितिर्वा भवेत् तदा जातकस्य नैकारूपवत्यः स्त्रियः सन्ति। उपपदात् द्वितीयभावे मिथुनराशिर्भवेत्तदा जातको बहुस्त्रीयुक्तो भवति।

यदोपपदे शनैश्चरराहुग्रहयोर्युतिर्भवेत्तदा जातकः स्त्रीनाशकः स्त्रीत्यागी वा भवति। यदोपपदे केतुर्शुक्रयोर्युतिर्भवेत्तदा जातकस्य पत्नी रोगिणी भवति। यदा केतुर्बुधयोर्युतिः सूर्यराहुशनैश्चराणां युतिर्वाभवेत्तदा जातकस्य पत्नी रोगिणी भवति। यदोपपदे बुधक्षेत्रे मङ्गलक्षेत्रे वा शनिमङ्गलयोर्युतिभवेत्तदा जातकस्य पत्नी रोगिणि भवति। यदोपपदे गुरुशनैश्चरयोर्युतिभवेत्तदा जातकस्य पत्नी कर्णनेत्ररोगिणी भवति। यदोपपदे कुम्भराश्यां मीनराश्यां वा शनैश्चरोभवेत्तदा जातकस्य पत्नी वातरोगिणी भवति। यदोपपदे बुधमङ्गलयोर्युतिर्गुरुराह्वोर्युतिवा भवेत्तदा जातकस्य पत्नी दन्तरोगी भवति। उपरोक्य रोगेषु शुभग्रहस्य दृष्टिर्युतिर्वा भवेत् तदा दोषो न भवति।

**अष्टमी दृष्टिः।**

एवं कुटुम्बसुतकलत्रभावनामाधुनिके कालेत्यावश्यक्ता समाजे दृश्यते । यतः जातकस्य वैयक्तिकसुखशान्तयादि सर्वेषु कालेषु सर्वेषु देशेषु सर्वेषु च समाजेषु महत्तरं वर्तते। इति शम् ।

अन्ते च मधुरेण समापयेत्।

ब्रह्मा तनोतु दीर्घायुर्विष्णुः कर्याच्च सम्पदम्।
हरो रक्षतु गात्राणि येषामर्थोऽत्र चिन्ततः।।

# परिशिष्टम्-०१

## शोधनिबन्धसम्बन्धितकुण्डलीनां सङ्ग्रहः।

(सू.=सूर्यः। चं.=चन्द्रः। मं.=मङ्गलः। बु.=बुधः। गु.=गुरुः। शु.=शुक्रः। श.=शनैश्चरः। रा.=राहुः। के.=केतुः। ह.=हर्षलः। ने.=नेपच्यून्। प्लु.=प्लुटो।)

क्रमाङ्कः १ जन्मदिनाङ्कः ०६/०२/०१
जन्मस्थलम्: वडोदरा जन्मसमयः ५.३४




क्रमाङ्कः २ जन्मदिनाङ्कः १३/०१/९९
जन्मस्थलम् : वडोदरा जन्मसमयः ११.२०




क्रमाङ्कः ३ जन्मदिनाङ्कः ११/०१/२००१
जन्मस्थलः वडोदरा जन्मसमयः २०.१४




क्रमाङ्कः ४ जन्मदिनाङ्कः ०५/१२/२००३
जन्मस्थलः वडोदराः जन्मसमयः १०.४२




क्रमाङ्कः ५ जन्मदिनाङ्कः २१/०७/२००४
जन्मस्थलः वडोदरा जन्मसमयः १४.२८




क्रमाङ्कः ६ जन्मदिनाङ्कः ३१/०३/२००३
जन्मस्थलः वडोदरा जन्मसमयः १९.३०



# परिशिष्टम्-०१

क्रमाङ्कः ७ जन्मदिनाङ्कः २१/०८/२०००
जन्मस्थलम्: वडोदरा जन्मसमयः ८.४५




क्रमाङ्कः ८ जन्मदिनाङ्कः २७/१२/२०००
जन्मस्थलम् : वडोदरा जन्मसमयः १.५५




क्रमाङ्कः ९ जन्मदिनाङ्कः ०५/०२/२००४
जन्मस्थलः वडोदरा जन्मसमयः १०.३५




क्रमाङ्कः १० जन्मदिनाङ्कः २७/१०/२००४
जन्मस्थलः वडोदराः जन्मसमयः २३.४५




क्रमाङ्कः ११ जन्मदिनाङ्कः २७/१०/२००४
जन्मस्थलः वडोदरा जन्मसमयः २३.४५




क्रमाङ्कः १२ जन्मदिनाङ्कः ११/०५/०६
जन्मस्थलः वडोदरा जन्मसमयः ०७.३०



# परिशिष्टम्-०१

क्रमाङ्कः १३ जन्मदिनाङ्कः ०३/१०/२००६
जन्मस्थलम्:वडोदरा जन्मसमयः १०:२५




क्रमाङ्कः १४ जन्मदिनाङ्कः ११/११/२००५
जन्मस्थलम्वडोदरा जन्मसमयः १७:४५




क्रमाङ्कः १५ जन्मदिनाङ्कः १२/१२/१९९४
जन्मस्थलः अहमदाबाद जन्मसमयः ०१:२७




क्रमाङ्कः १६ जन्मदिनाङ्कः १०/०९/२००१
जन्मस्थलः वडोदरा जन्मसमयः १६:२१




क्रमाङ्कः १७ जन्मदिनाङ्कः १०/०९/१९९९
जन्मस्थलः वडोदरा जन्मसमयः १९:३०




क्रमाङ्कः १८ जन्मदिनाङ्कः १४/११/२००२
जन्मस्थलः वडोदरा जन्मसमयः ०४:२०



# परिशिष्टम्-०१

क्रमाङ्कः १९ जन्मदिनाङ्कः ०१-०२/११/१९५९
जन्मस्थलम्: वडोदरा जन्मसमयः ०६:२५




क्रमाङ्कः २० जन्मदिनाङ्कः २०/०२/२००३
जन्मस्थलम् :पारडी जन्मसमयः २३:२०




क्रमाङ्कः २१ जन्मदिनाङ्कः १९/०७/१९९७
जन्मस्थलः छोटा उदेपुर जन्मसमयः १३:४०




क्रमाङ्कः २२ जन्मदिनाङ्कः १६/०३/२००१
जन्मस्थलः छेटा उदेपुर जन्मसमयः १३:१५




क्रमाङ्कः २३ जन्मदिनाङ्कः २१/०८/१९९८
जन्मस्थलः वडोदरा जन्मसमयः ०७:००




क्रमाङ्कः २४ जन्मदिनाङ्कः ०८/०७/२००१
जन्मस्थलः गोधरा जन्मसमयः ०८.००



# परिशिष्टम्-०१

क्रमाङ्कः २५ जन्मदिनाङ्कः १४/११/१९९७
जन्मस्थलम्: राजपीपला जन्मसमयः ०२:००




क्रमाङ्कः २६ जन्मदिनाङ्कः ०५/०५/२००२
जन्मस्थलम् :वडोदरा जन्मसमयः ०७:००




क्रमाङ्कः २७ जन्मदिनाङ्कः ०४/०६/१९९७
जन्मस्थलः छोटाउदेपुर जन्मसमयः १२:१०




क्रमाङ्कः २८ जन्मदिनाङ्कः २०/०२/१९५६
जन्मस्थलः कडी (गुज) जन्मसमयः ०१:०९




क्रमाङ्कः २९ जन्मदिनाङ्कः १३/०५/१९९२
जन्मस्थलः वडोदरा जन्मसमयः ०२:१०




क्रमाङ्कः ३० जन्मदिनाङ्कः २६/०९/१९३२
जन्मस्थलः झेलम जन्मसमयः १४.००



# परिशिष्टम्-०१

क्रमाङ्कः ३१ जन्मदिनाङ्कः १०/०४/१९६९
जन्मस्थलम्:राजकोट जन्मसमयः २१:१५




क्रमाङ्कः ३२ जन्मदिनाङ्कः २४/१२/१९७२
जन्मस्थलम् बालाशिनोर जन्मसमयः ०३:००




क्रमाङ्कः ३३ जन्मदिनाङ्कः ३१/०३/१९६७
जन्मस्थलः वडोदरा जन्मसमयः ११:०१




क्रमाङ्कः ३४ जन्मदिनाङ्कः ०३/०९/१९६०
जन्मस्थलः भुज (गुज) जन्मसमयः १३:५०




क्रमाङ्कः ३५ जन्मदिनाङ्कः३१/०८/१९७३
जन्मस्थलः अमदावाद जन्मसमयः ०३:२५




क्रमाङ्कः ३६ जन्मदिनाङ्कः१३/१०/१९८२
जन्मस्थलः वडोदरा जन्मसमयः०२.२०



# परिशिष्टम्-०१

क्रमाङ्कः ३७ जन्मदिनाङ्कः २७-२८/०४/१९८६
जन्मस्थलम्:वडोदरा जन्मसमयः ०१:२५




क्रमाङ्कः ३८ जन्मदिनाङ्कः ३१/१०/१९८६
जन्मस्थलम् :राजकोट जन्मसमयः १२.५५




क्रमाङ्कः ३९ जन्मदिनाङ्कः १५/११/१९७५
जन्मस्थलः भय्च जन्मसमयः ०१:००




क्रमाङ्कः ४० जन्मदिनाङ्कः २८/०२/१९७८
जन्मस्थलः अमदावाद जन्मसमयः १०:३०




क्रमाङ्कः ४१ जन्मदिनाङ्कः०४/०९/१९८३
जन्मस्थलः न्यूयॉर्क(USA)जन्मसमयः १३:४१




क्रमाङ्कः ४२ जन्मदिनाङ्कः २९/११/१९८१
जन्मस्थलः मुम्बई जन्मसमयः १६:५८



क्रमाङ्कः ४३ जन्मदिनाङ्कः २९/०३/१९८६
जन्मस्थलम्:वडोदरा जन्मसमयः ०९:३०




क्रमाङ्कः ४४ जन्मदिनाङ्कः १५/०२/१९२१
जन्मस्थलम् :राग जन्मसमयः ०१:००




क्रमाङ्कः ४५ जन्मदिनाङ्कः २५/११/१९८८
जन्मस्थलः वडोदरा जन्मसमयः २२:३२




क्रमाङ्कः ४६ जन्मदिनाङ्कः २०/०४/१९८४
जन्मस्थलः वडोदरा जन्मसमयः १४:२५




क्रमाङ्कः ४७ जन्मदिनाङ्कः ०३/०२/१८८४
जन्मस्थलः जीरादेइ जन्मसमयः ०८:४५




क्रमाङ्कः ४८ जन्मदिनाङ्कः ०१/०७/१९९१
जन्मस्थलः वडोदरा जन्मसमयः १०:५५



# परिशिष्टम्-०१

क्रमाङ्कः ४९ जन्मदिनाङ्कः ०१/१२/१९७२
जन्मस्थलम्: छोटा उदे. जन्मसमयः २०:५५




क्रमाङ्कः ५० जन्मदिनाङ्कः १६/०८/१९८४
जन्मस्थलम् : वडोदरा जन्मसमयः २१:४५




क्रमाङ्कः ५१ जन्मदिनाङ्कः २२/०७/१९८०
जन्मस्थलः धनबाद जन्मसमयः १२:१०




क्रमाङ्कः ५२ जन्मदिनाङ्कः १०/०९/२००१
जन्मस्थलः वडोदरा जन्मसमयः १६:२१




क्रमाङ्कः ५३ जन्मदिनाङ्कः १२/०१/१९७३
जन्मस्थलः भरूच जन्मसमयः १९:०५




क्रमाङ्कः ५४ जन्मदिनाङ्कः १३/०१/१९६६
जन्मस्थलः सुरेन्द्रनगर(गुज) जन्मसमयः ०२:३०



क्रमाङ्कः ५५ जन्मदिनाङ्कः ११/११/१९६४
जन्मस्थलम्: भरुच जन्मसमयः ०४:२१




क्रमाङ्कः ५६ जन्मदिनाङ्कः २०/०७/१९७२
जन्मस्थलम् :वडोदरा जन्मसमयः ५:४५




क्रमाङ्कः ५७ जन्मदिनाङ्कः ०५/११/१९७९
जन्मस्थल: सिनोर (गुज) जन्मसमयः २३:३०




क्रमाङ्कः ५८ जन्मदिनाङ्कः १७/११/१९७२
जन्मस्थल: वडोदरा जन्मसमयः २१:३०




क्रमाङ्कः ५९ जन्मदिनाङ्कः १०/०६/१९६९
जन्मस्थल: वडोदरा जन्मसमयः ०७:४८




क्रमाङ्कः ६० जन्मदिनाङ्कः ३०/०३/१९६८
जन्मस्थल: मुम्बई जन्मसमयः ११:४०



क्रमाङ्कः ६१ जन्मदिनाङ्कः २८/११/१९४६
जन्मस्थलम्: सूरत जन्मसमयः ०८:५०




क्रमाङ्कः ६२ जन्मदिनाङ्कः ०१/०७/१९६९
जन्मस्थलम् : वडोदरा जन्मसमयः २०:२०




क्रमाङ्कः ६३ जन्मदिनाङ्कः १०/११/१९६८
जन्मस्थलः भुज जन्मसमयः ००:००




क्रमाङ्कः ६४ जन्मदिनाङ्कः ०३/११/१९९०
जन्मस्थलः जेतपुर(गुज.) जन्मसमयः १२:५७




क्रमाङ्कः ६५ जन्मदिनाङ्कः ३१/१०/१९८२
जन्मस्थलः वडोदरा जन्मसमयः १६:२०




क्रमाङ्कः ६६ जन्मदिनाङ्कः २२/०७/१९६३
जन्मस्थलः वडोदरा जन्मसमयः २३:१७



## परिशिष्टम्-०१

क्रमाङ्कः ६७ जन्मदिनाङ्कः ०८/१२/१९८३
जन्मस्थलम्: जेतपुर जन्मसमयः १३:३०




क्रमाङ्कः ६८ जन्मदिनाङ्कः २७/१०/१९६९
जन्मस्थलम् : अमदावाद जन्मसमयः १८:४५




क्रमाङ्कः ६९ जन्मदिनाङ्कः ०२/०६/१९६५
जन्मस्थलः वडोदरा जन्मसमयः २०:१५




क्रमाङ्कः ७० जन्मदिनाङ्कः ३०/१०/१९७७
जन्मस्थलः दाहोद(गुज.) जन्मसमयः १३:१५




क्रमाङ्कः ७१ जन्मदिनाङ्कः ३१/०१/१९६२
जन्मस्थलः हिम्मतनगर जन्मसमयः १५:००




क्रमाङ्कः ७२ जन्मदिनाङ्कः ०३/०७/१९७२
जन्मस्थलः नैनिताल जन्मसमयः १५:१०



# परिशिष्टम्-०१

क्रमाङ्कः ७३ जन्मदिनाङ्कः २०/१०/१९६६
जन्मस्थलम्: वडोदरा जन्मसमयः ०८:२०




क्रमाङ्कः ७४ जन्मदिनाङ्कः ११/०३/१९८०
जन्मस्थलम् :मुम्बई जन्मसमयः २०:५६




क्रमाङ्कः ७५ जन्मदिनाङ्कः ०५/०८/१९७३
जन्मस्थल: पोरबंदर जन्मसमयः ०४:१०




क्रमाङ्कः ७६ जन्मदिनाङ्कः २१/०७/१९५७
जन्मस्थल: गोधरा जन्मसमयः १६:१५




क्रमाङ्कः ७७ जन्मदिनाङ्कः ०९/१२/१९७७
जन्मस्थल: मुम्बई जन्मसमयः १३:४५




क्रमाङ्कः ७८ जन्मदिनाङ्कः ०६/०७/१९८८
जन्मस्थल: कालोल जन्मसमयः ११:५५



क्रमाङ्कः ७९ जन्मदिनाङ्कः ३१/१२/१९६७
जन्मस्थलम्: वडोदरा जन्मसमयः १३:१४




क्रमाङ्कः ८० जन्मदिनाङ्कः १७/०९/१९७९
जन्मस्थलम् :गोधरा जन्मसमयः ०६:१०




क्रमाङ्कः ८१ जन्मदिनाङ्कः ०८/११/१९७५
जन्मस्थल: बेहरामपुर(उ) जन्मसमयः ०८:५०




क्रमाङ्कः ८२ जन्मदिनाङ्कः १९/१०/१९८१
जन्मस्थल: वडोदरा जन्मसमयः १६:१२




क्रमाङ्कः ८३ जन्मदिनाङ्कः ११/०८/१९८०
जन्मस्थल: हालोल जन्मसमयः ०८:००




क्रमाङ्कः ८४ जन्मदिनाङ्कः ०६/०२/१९६९
जन्मस्थल: वडोदरा जन्मसमयः १०:५०



(सू.=सूर्यः।चं.=चन्द्रः।मं.=मङ्गलः।बु.=बुधः।गु.=गुरुः।शु.=शुक्रः।श.=शनैश्चरः।रा.=राहुः।के.=केतुः।ह.=हर्षलः।ने.=नेपच्यून्।प्लु.=प्लुटो।)

क्रमाङ्कः ८५ जन्मदिनाङ्कः २८/११/१९७८
जन्मस्थलम्: दिल्ली जन्मसमयः ११:१५




क्रमाङ्कः ८६ जन्मदिनाङ्कः ०९/१०/१९७०
जन्मस्थलम् : वडोदरा जन्मसमयः २१:२०




क्रमाङ्कः ८७ जन्मदिनाङ्कः २१/१०/१९७०
जन्मस्थल: धिनोज (गुज) जन्मसमयः १७:१६




क्रमाङ्कः ८८ जन्मदिनाङ्कः ०२/०६/१९६५
जन्मस्थल: वडोदरा जन्मसमयः २०:१५




क्रमाङ्कः ८९ जन्मदिनाङ्कः २०/१०/१९७९
जन्मस्थल: गोधरा जन्मसमयः २३:५५




क्रमाङ्कः ९० जन्मदिनाङ्कः २२/०६/१९७४
जन्मस्थल: वडोदरा जन्मसमयः ०१:२६



## परिशिष्टम्-०१

क्रमाङ्कः ९१ जन्मदिनाङ्कः २०/०१/१९८६
जन्मस्थलम्: वडोदरा जन्मसमय: ०७:१५




क्रमाङ्कः ९२ जन्मदिनाङ्कः ०५/१०/१९५०
जन्मस्थलम् : सूरत जन्मसमय: १८:१५




क्रमाङ्कः ९३ जन्मदिनाङ्कः २३/०९/१९८१
जन्मस्थल: वडोदरा जन्मसमय: ०५:३०




क्रमाङ्कः ९४ जन्मदिनाङ्कः १९/१२/१९७३
जन्मस्थल: पेटलाद(गुज) जन्मसमय: २१:३०




क्रमाङ्कः ९५ जन्मदिनाङ्कः ०१/०९/१९७३
जन्मस्थल: वडोदरा जन्मसमय: ११:००




क्रमाङ्कः ९६ जन्मदिनाङ्कः १०/०२/१९७०
जन्मस्थल: मुम्बई जन्मसमय: ०२:३०



# परिशिष्टम्-०१

क्रमाङ्कः ९७ जन्मदिनाङ्कः ०९/०२/१९८१
जन्मस्थलम्:राजकोट जन्मसमयः ११:३०




क्रमाङ्कः ९८ जन्मदिनाङ्कः २४/११/१९७३
जन्मस्थलम् : अमरेली जन्मसमयः २३:४५




क्रमाङ्कः ९९ जन्मदिनाङ्कः १६/०१/१९६१
जन्मस्थलः वडोदरा जन्मसमयः ००:१०




क्रमाङ्कः १०० जन्मदिनाङ्कः १८/०३/१९६९
जन्मस्थलः अमदावाद जन्मसमयः ११:०५




क्रमाङ्कः १०१ जन्मदिनाङ्कः२६/०६/१९७३
जन्मस्थलःवडोदरा जन्मसमयः ०२:३०




क्रमाङ्कः ९०२ जन्मदिनाङ्कः१५/१०/१९७४
जन्मस्थलः सूरत जन्मसमयः २१:१०



# परिशिष्टम्-०१

क्रमाङ्कः जन्मदिनाङ्कः

जन्मस्थलम्: जन्मसमयः




क्रमाङ्कः जन्मदिनाङ्कः

जन्मस्थलम् : जन्मसमयः




क्रमाङ्कः १०५ जन्मदिनाङ्कः १७/०४/१९५२

जन्मस्थलः पूणे जन्मसमयः ०४:००




क्रमाङ्कः १०६ जन्मदिनाङ्कः २६/०४/१९८३

जन्मस्थलः शिकागो( युएसए)जन्मसमयः १४:००




क्रमाङ्कः १०७ जन्मदिनाङ्कः ०५/०२/१९५१

जन्मस्थलः वडोदरा जन्मसमयः ०६:१०




क्रमाङ्कः १०८ जन्मदिनाङ्क१७/०३/१९३८

जन्मस्थलः वडोदरा जन्मसमयः ११:५१



## परिशिष्टम्-२
## होरादि-दशवर्गाणां परिचयः।

गृहहोराद्रेष्काणनवांशद्वादशांशत्रिंशांशाः षड्वर्गाः।। जा.त.सं.त. /८।
षड्वर्गा एव सप्तमांशसहिताः सप्तवर्गाः।। जा.त.सं.त. /१४।।
सप्तवर्गा दशांशषोडशांशषष्ट्यंशयुता दशवर्गाः।। जा.त.सं.त./१६।।

**होरा ।**
समेचन्द्रार्कयोर्विषमे व्यत्ययेन होरा ।।जा.त.सं.त./९।।
राश्यार्द्धम् होरा कथ्यते।

विषमराश्यां (मेष- मिथुन- सिंह - तुला - धनुः - कुम्भ) शून्यांशारभ्य पञ्चदशांश पर्यंतम् होराभागस्वामिः सूर्यस्तथा षोडशारभ्य त्रिंशदंशपर्यन्तमं होराभागस्य स्वामिः चन्द्रो भवति। समराश्यां (वृषभ - कर्क - कन्या, वृश्चिक- मकर - मीन) शून्यांशारभ्य पञ्चदशांश पर्यंतम् होराभागस्वामिश्चन्द्रो वर्तते तथा समराश्यांशेषभागस्य होरास्वामिः सूर्योऽस्ति।

**होरा चक्रम्।**

| **क्रमाङ्कः** | **राशिः** | **होराः** | |
|---|---|---|---|
| | | **० तः १५ अंश पर्यंतम्** | **१६ तः ३० अंश पर्यंतम्** |
| १ | मेषः | सूर्यः | चन्द्रः |
| २ | वृषभः | चन्द्रः | सूर्यः |
| ३ | मिथुनम् | सूर्यः | चन्द्रः |
| ४ | कर्कः | चन्द्रः | सूर्यः |
| ५ | सिंहः | सूर्यः | चन्द्रः |
| ६ | कन्या | चन्द्रः | सूर्यः |
| ७ | तुला | सूर्यः | चन्द्रः |
| ८ | वृश्चिकः | चन्द्रः | सूर्यः |
| ९ | धनुः | सूर्यः | चन्द्रः |
| १० | मकरः | चन्द्रः | सूर्यः |
| ११ | कुंम्भः | सूर्यः | चन्द्रः |
| १२ | मीनः | चन्द्रः | सूर्यः |

**द्रेष्काणः।**

स्वेषुनवर्क्षेशा द्रेष्काणपाः।। जा.तत्वे.सं.त./१०।।

## परिशिष्टम्-२

एकस्या राशे स्त्रिंशदंशाः सन्ति। राश्याः प्रत्येकं एकतः दशांश पर्यतम् प्रथमो द्रेष्काणः, एकादशतः विंशति पर्यंतं द्वितीयो द्रेष्काणः एकविंशतः त्रिशंत्पर्यन्तम् तृतीयो द्रेष्काणः कथ्यते। प्रत्येकराशेः प्रथम द्रेष्काणस्य सैवराशिः द्वितीयद्रेष्काणस्य प्रथमतः पञ्चमीराशिः एवं तृतीयद्रेष्काणस्य प्रथमतः नवमीराशिः वर्तते।

### द्रेष्काणचक्रम्।

| क्रमाङ्कः | राशिः | प्रथम द्रेष्काणः १ तः १० अंशाः | द्वितीय द्रेष्काणः ११ तः २० अंशाः | तृतीय द्रेष्काणः २१ तः ३० अंशाः |
|---|---|---|---|---|
| १ | मेषः | मेषः | सिंहः | धनुः |
| २ | वृषभः | वृषभः | कन्या | मकरः |
| ३ | मिथुनम् | मिथुनम् | तुला | कुम्भः |
| ४ | कर्कः | कर्कः | वृश्चिकः | मीनः |
| ५ | सिंहः | सिंहः | धनुः | मेषः |
| ६ | कन्याः | कन्या | मकरः | वृषभः |
| ७ | तुला | तुला | कुम्भः | मिथुनम् |
| ८ | वृश्चिकः | वृश्चिकः | मीनः | कर्कः |
| ९ | धनुः | धनुः | मेषः | सिंहः |
| १० | मकरः | मकरः | वृषभः | कन्या |
| ११ | कुम्भः | कुम्भः | मिथुनम् | तुला |
| १२ | मीनः | मीनः | कर्कः | वृश्चिकः |

**द्रेष्काणस्वरूपम्।**

कुलीरमीनालिगता दृगाणाः मध्यावसानप्रथमा भुजङ्गः।
अलिद्वितीयो मृगलेयपूर्वः क्रमेण पाशो निगडोविहङ्गः।।जा.पा.५/५५।।

कर्कराशेर्द्वितीये द्रेष्काणस्य, मीनस्य तृतीयद्रेष्काणस्य वृश्चिकस्य प्रथमद्रेष्काणस्य भुजङ्गसंज्ञा वर्तते। वृश्चिकस्य द्वितीयद्रेष्काणस्यपाशसंज्ञा मकरस्य प्रथमद्रेष्काणस्य निगडसंज्ञा, सिंहस्य प्रथमद्रेष्काणस्य विहङ्ग संज्ञा भवति।

## परिशिष्टम्-२

**नवमांशः।**

चरमे स्वस्मात्स्थिरे नवमभाद्द्विस्वभावे पञ्चमभान्नवांशाः ।।जा.त.सं.त./११।।

एकस्यां राश्यां त्रिंशदंशाः भवन्ति। त्रिंशदंशाः नवाङ्केनभाजनेन एकभागः ३°२० कलात्मको भवति। मेषसिंहधनुराशिषु प्रथमनवमांशारम्भ मेषराशेः वृषभकन्यामकरराशिषु प्रथमनवमांशो मकरराशेः मिथुनतुलाकुम्भराशिषु प्रथमनवमांश तुलाराशेः कर्कवृश्चिकमीनराशिषु प्रथमनवमांश कर्कराशेराभ्य भवति।

**नवमांशचक्रम्।**

| क्रमाङ्कः | राशिः<br>अंशाः। कलाः | मेषः | वृषभः | मिथुनः | कर्कः | सिंहः | कन्या |
|---|---|---|---|---|---|---|---|
| १ | ०३।२० | मेषः | मकरः | तुला | कर्कः | मेषः | मकरः |
| २ | ०६।४० | वृषभः | कुम्भः | वृश्चिकः | सिंहः | वृषभः | कुम्भः |
| ३ | १०।०० | मिथुनः | मीनः | धनुः | कन्या | मिथुनः | मीनः |
| ४ | १३।२० | कर्कः | मेष : | मकरः | तुला | कर्कः | मेष : |
| ५ | १६।४० | सिंहः | वृषभः | कुम्भः | वृश्चिकः | सिंहः | वृषभः |
| ६ | २०।०० | कन्या | मिथुनः | मीनः | धनुः | कन्या | मिथुनः |
| ७ | २३।२० | तुला | कर्कः | मेष : | मकरः | तुला | कर्कः |
| ८ | २६।४० | वृश्चिकः | सिंहः | वृषभः | कुम्भः | वृश्चिकः | सिंहः |
| ९ | ३०।०० | धनुः | कन्या | मिथुनः | मीनः | धनुः | कन्या |

| क्रमाङ्कः | राशिः<br>अंशाः। कलाः | तुला | वृश्चिकः | धनुः | मकरः | कुम्भः | मीनः |
|---|---|---|---|---|---|---|---|
| १ | ०३।२० | तुला | कर्कः | मेषः | मकरः | तुला | कर्कः |
| २ | ०६।४० | वृश्चिकः | सिंहः | वृषभः | कुम्भः | वृश्चिकः | सिंहः |
| ३ | १०।०० | धनुः | कन्या | मिथुनः | मीनः | धनुः | कन्या |
| ४ | १३।२० | मकरः | तुला | कर्कः | मेष : | मकरः | तुला |
| ५ | १६।४० | कुम्भः | वृश्चिकः | सिंहः | वृषभः | कुम्भः | वृश्चिकः |
| ६ | २०।०० | मीनः | धनुः | कन्या | मिथुनः | मीनः | धनुः |
| ७ | २३।२० | मेष : | मकरः | तुला | कर्कः | मेष : | मकरः |
| ८ | २६।४० | वृषभः | कुम्भः | वृश्चिकः | सिंहः | वृषभः | कुम्भः |
| ९ | ३०।०० | मिथुनः | मीनः | धनुः | कन्या | मिथुनः | मीनः |

# परिशिष्टम्-२

## द्वादशांशः।

एकस्याराशे स्त्रिंदंशाः सन्ति । राशिमानं द्वादशसंख्यया विभज्यः प्रत्येकभागः सार्धद्विअंशात्मको भवति। प्रत्येकराशेः प्रथमोभागाः तद्तत् राशिपतिना आरभ्यते सरल्यार्थं द्वादशांश चक्रं दृष्टव्यम्।

## द्वादशांशचक्रम्।

| क्रमाङ्कः | राशिभागः अंशवः/ कलाः | मेषः | वृषभः | मिथुनः | कर्कः | सिंहः | कन्या | तुला | वृश्चिकः | धनुः | मकरः | कुम्भः | मीनः |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|
| ०१ | ०२.३० | मेषः | वृषभः | मिथुनः | कर्कः | सिंहः | कन्या | तुला | वृश्चिकः | धनुः | मकरः | कुम्भः | मीनः |
| ०२ | ०५.०० | वृषभः | मिथुनः | कर्कः | सिंहः | कन्या | तुला | वृश्चिकः | धनुः | मकरः | कुम्भः | मीनः | मेषः |
| ०३ | ०७.३० | मिथुनः | कर्कः | सिंहः | कन्या | तुला | वृश्चिकः | धनुः | मकरः | कुम्भः | मीनः | मेष : | वृषभः |
| ०४ | १०.०० | कर्कः | सिंहः | कन्या | तुला | वृश्चिकः | धनुः | मकरः | कुम्भः | मीनः | मेष : | वृषभः | मिथुनः |
| ०५ | १२.३० | सिंहः | कन्या | तुला | वृश्चिकः | धनुः | मकरः | कुम्भः | मीनः | मेष : | वृषभः | मिथुनः | कर्कः |
| ०६ | १५.०० | कन्या | तुला | वृश्चिकः | धनुः | मकरः | कुम्भः | मीनः | मेष : | वृषभः | मिथुनः | कर्कः | सिंहः |
| ०७ | १७.३० | तुला | वृश्चिकः | धनुः | मकरः | कुम्भः | मीनः | मेष : | वृषभः | मिथुनः | कर्कः | सिंहः | कन्या |
| ०८ | २०.०० | वृश्चिकः | धनुः | मकरः | कुम्भः | मीनः | मेष : | वृषभः | मिथुनः | कर्कः | सिंहः | कन्या | तुला |
| ०९ | २२.३० | धनुः | मकरः | कुम्भः | मीनः | मेष : | वृषभः | मिथुनः | कर्कः | सिंहः | कन्या | तुला | वृश्चिकः |
| १० | २५.०० | मकरः | कुम्भः | मीनः | मेष : | वृषभः | मिथुनः | कर्कः | सिंहः | कन्या | तुला | वृश्चिकः | धनुः |
| ११ | २७.३० | कुम्भः | मीनः | मेष : | वृषभः | मिथुनः | कर्कः | सिंहः | कन्या | तुला | वृश्चिकः | धनुः | मकरः |
| १२ | ३०.०० | मीनः | मेष : | वृषभः | मिथुनः | कर्कः | सिंहः | कन्या | तुला | वृश्चिकः | धनुः | मकरः | कुम्भः |

## परिशिष्टम्-२

**त्रिशांशः ।**

समे शुक्रज्ञेज्यार्किकुजानां पञ्चाङ्ग्ध्र्यष्टशरेषवस्त्रिंशांशा:विषमेऽन्यथा ।। जा.त.सं.त./१३।।

विषमराश्यां शून्यतः पञ्चांशपर्यन्तं मङ्गलस्य पुनः षडंशमारभ्य दशांशपर्यन्तम् शनैश्चरस्य एकादशांशमारभ्याष्टादशांशपर्यन्तम् गुरो एकोनविंशांशमारभ्य पञ्चविंशत्यांशपर्यन्तम् बुधस्य, षड्विंशत्यसमारभ्य त्रिंशतंशपर्यन्तं शुक्रस्य त्रिंशंशा भवन्ति। समराशिषु प्रथमभागस्य (०° तः पञ्चांशपर्यन्तम्) स्वामी शुक्रः द्वितीयस्य (५° तः १३° पर्यन्तम् स्वामी बुधस्तृतीयस्य (१२° तः २०° पर्यन्तम्) स्वामी गुरुश्चतुर्थस्यस्वामी (२१° तः २५° पर्यन्तम्) शनैश्चरः एवं पञ्चमस्य स्वामी ( २५° तः ३०° पर्यन्तम्) मङ्गलो भवति।

**त्रिशांशचक्रम् ।**

| क्रमाङ्कः | विषमराश्यां (१,३,५,७,९,११) | | समराश्यां (२,४,६,८,१०,१२) | |
|---|---|---|---|---|
| | अंशाः | स्वामी | अंशाः | स्वामी |
| १ | ० तः ५ | मङ्गलः | ० तः ५ | शुक्रः |
| २ | ५ तः १० | शनैश्चरः | ५ तः १२ | बुधः |
| ३ | १० तः १८ | गुरुः | १२ तः २० | गुरुः |
| ४ | १८ तः २५ | बुधः | २० तः २५ | शनैश्चरः |
| ५ | २५ तः ३० | शुक्रः | २५ तः ३० | मङ्गलः |

**सप्तमांशः।**

विषमे स्वस्मात्समे सप्तमात्सप्तमांशः।। जा.त.सं.त./१५।।

एकस्यां राशौ त्रिंशदंशा सन्ति तान् सप्ताङ्केन भागं कृत्वा प्रत्येकभागस्य ०४ अंशाः १७ कलाः ०८ विकलाः एवं ३४ प्रतिविकलाः परिमाणं भवति। प्रथमभागतुल्यं परिमाणं गृहीत्वा द्वितीयादि भागानां परिमाणं भवति अनेन प्रकारेण सप्तभागाः भवन्ति। विषमराशिषु सप्तमांशेशः तस्याएवराश्याः स्वामि क्रमेण भवति। समराशिषु सप्तामंशेशः प्रथमभगस्य स्वामि तस्या एवं राश्याः सप्तमराशेः अधिपतिः भवति एवमेव क्रमेण बाध्यम्।

## परिशिष्टम्-२

**सप्तमांशचक्रम्।**

| क्रमाङ्कः | राशिः | भागः | | | | | | |
|---|---|---|---|---|---|---|---|---|
| | | प्रथमः | द्वितीयम् | तृतीयम् | चतुर्थं | पञ्चमम् | षष्ठ | सप्तम् |
| १ | मेषः | मेषः | वृषभः | मिथुनम् | कर्कः | सिंहः | कन्या | तुला |
| २ | वृषभः | वृश्चिकः | धनुः | मकरः | कुम्भः | मीनः | मेषः | वृषभः |
| ३ | मिथुनम् | मिथुनम् | कर्कः | सिंहः | कन्या | तुला | वृश्चिक | धनुः |
| ४ | कर्कः | मकरः | कुम्भः | मीनः | मेषः | वृषभः | मिथुनम् | कर्कः |
| ५ | सिंहः | सिंहः | कन्या | तुला | वृश्चिकः | धनुः | मकरः | कुम्भः |
| ६ | कन्या | मीनः | मेषः | वृषभः | मिथुनम् | कर्कः | सिंहः | कन्याः |
| ७ | तुला | तुला | वृश्चिकः | धनुः | मकरः | कुम्भः | मीनः | मेषः |
| ८ | वृश्चिकः | वृषभः | मिथुनम् | कर्कः | सिंहः | कन्या | तुला | वृश्चिकः |
| ९ | धनुः | धनुः | मकरः | कुम्भः | सिंहः | कन्या | तुला | वृश्चिकः |
| १० | मकरः | कर्कः | सिंहः | कन्या | तुला | वृश्चिकः | धनुः | मकरः |
| ११ | कुम्भः | कुम्भः | मीनः | मेषः | वृषभः | मिथुनः | कर्कः | सिंहः |
| १२ | मीनः | कन्या | तुला | वृश्चिकः | धनुः | मकरः | कुम्भः | मीनः |

# परिशिष्टम्-२

**दशांशः ।**

एकस्याराशेस्त्रिंशांशाः सन्ति। राशिमानं दशसंख्यया विभज्यः प्रत्येकभागः अंशत्रयात्मकोः भवति। विषमराश्यां प्रथमभागः तयैवराश्यां आरभ्यते। समराश्यां प्रथमभागः तयाराश्या नवमीराश्यां आरभ्यते।

**दशांशचक्रम् ।**

| क्रमाकः | अंशाः | मेषः | वृषभः | मिथुनः | कर्कः | सिंहः | कन्या | तुला | वृश्चिकः | धनुः | मकरः | कुम्भः | मीनः |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|
| १ | ० तः ३ | मेषः | मकरः | मिथुनः | मीनः | सिंहः | वृषभः | तुला | कर्कः | धनुः | कन्या | कुम्भः | वृश्चिकः |
| २ | ३ तः ६ | वृषभः | कुम्भः | कर्कः | मेषः | कन्या | मिथुनः | वृश्चिकः | सिंहः | मकरः | तुला | मीनः | धनुः |
| ३ | ६ तः ९ | मिथुनः | मीनः | सिंहः | वृषभः | तुला | कर्कः | धनुः | कन्या | कुम्भः | वृश्चिकः | मेष : | मकरः |
| ४ | ९ तः १२ | कर्कः | मेष : | कन्या | मिथुनः | वृश्चिकः | सिंहः | मकरः | तुला | मीनः | धनुः | वृषभः | कुम्भः |
| ५ | १२ तः १५ | सिंहः | वृषभः | तुला | कर्कः | धनुः | कन्या | कुम्भः | वृश्चिकः | मेष : | मकरः | मिथुनः | मीनः |
| ६ | १५ तः १८ | कन्या | मिथुनः | वृश्चिकः | सिंहः | मकरः | तुला | मीनः | धनुः | वृषभः | कुम्भः | कर्कः | मेष : |
| ७ | १८ तः २१ | तुला | कर्कः | धनुः | कन्या | कुम्भः | वृश्चिकः | मेष : | मकरः | मिथुनः | मीनः | सिंहः | वृषभः |
| ८ | २१ तः २४ | वृश्चिकः | सिंहः | मकरः | तुला | मीनः | धनुः | वृषभः | कुम्भः | कर्कः | मेष : | कन्या | मिथुनः |
| ९ | २४ तः २७ | धनुः | कन्या | कुम्भः | वृश्चिकः | मेष : | मकरः | मिथुनः | मीनः | सिंहः | वृषभः | तुला | कर्कः |
| १० | २७ तः ३० | मकरः | तुला | मीनः | धनुः | वृषभः | कुम्भः | कर्कः | मेष : | कन्या | मिथुनः | वृश्चिकः | सिंहः |

## परिशिष्टम्-२

### षोडशवर्ग

एकस्यां राश्यां त्रिंशदंशा भवन्ति। राशिमानं षोडशाङ्केन एकभागस्यमानं १ अंशः पूरकलाः ३० विकला भिस्तुल्योभवति। अनेन प्रकारेण एकस्यांराशे षोडशभागां सन्ति। मेषकर्कतुलामकरराशिषु प्रथमभागस्यारम्भो मेषराशेर्भवति। वृषभसिंहवृश्चिककुम्भराशिषु प्रथमभागस्यारम्भः सिंहराशिर्भवति। मिथुनकन्याधनुर्मीनराशिषु प्रथमभागस्यारम्भो धनूराशि तो भवति।

**सरल बोधनार्थं षोडशांशचक्रम्।।**

| क्रमाङ्कः | राशिभागः अंशवः/ कलाः | मेषः | वृषभः | मिथुनः | कर्क | सिंह | कन्या | तुलाः | वृश्चिकः | धनु | मकरः | कुम्भः | मीनः |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|
| १ | १।५२।२० | मेषः | वृषभः | मिथुनम् | कर्कः | सिंहः | कन्या | तुला | वृश्चिकः | धनुः | मकरः | मीनः | मेषः |
| २ | ३। ४५।० | वृषभः | मिथुनम् | कर्कः | सिंहः | कन्या | तुला | वृश्चिकः | धनुः | मकरः | कुम्भः | मेषः | वृषभः |
| ३ | ५।३७।३० | मिथुनम् | कर्कः | सिंहः | कन्या | तुला | वृश्चिकः | धनुः | मकरः | कुम्भः | मीनः | वृषभः | मिथुनम् |
| ४ | ७।३०।० | कर्कः | सिंहः | कन्या | तुला | वृश्चिकः | धनुः | मकरः | कुम्भः | मीनः | मेषः | मिथुनम् | कर्कः |
| ५ | ९।२२।३० | सिंहः | कन्या | तुला | वृश्चिकः | धनुः | मकरः | कुम्भः | मीनः | मेषः | वृषभः | कर्कः | सिंहः |
| ६ | ११।१५।० | कन्या | तुला | वृश्चिकः | धनुः | मकरः | कुम्भः | मीनः | मेषः | वृषभः | मिथुनम् | सिंहः | कन्या |
| ७ | १३।७।३० | तुला | वृश्चिकः | धनुः | मकरः | कुम्भः | मीनः | मेषः | वृषभः | मिथुनम् | कर्कः | कन्या | तुला |
| ८ | १५।०।० | वृश्चिकः | धनुः | मकरः | कुम्भः | मीनः | मेषः | वृषभः | मिथुनम् | कर्कः | सिंहः | तुला | वृश्चिकः |
| ९ | १६।५२।३० | धनुः | मकरः | कुम्भः | मीनः | मेषः | वृषभः | मिथुनम् | कर्कः | सिंहः | कन्या | वृश्चिकः | धनुः |
| १० | १८।४५।० | मकरः | कुम्भः | मीनः | मेषः | वृषभः | मिथुनम् | कर्कः | सिंहः | कन्या | तुला | धनुः | मकरः |
| ११ | २०।३७।३० | कुम्भः | मीनः | मेषः | वृषभः | मिथुनम् | कर्कः | सिंहः | कन्या | तुला | वृश्चिकः | मकरः | कुम्भः |
| १२ | २२।३०।० | मीनः | मेषः | वृषभः | मिथुनम् | कर्कः | सिंहः | कन्या | तुला | वृश्चिकः | धनुः | कुम्भः | मीनः |
| १३ | २४।२२।३० | मेषः | वृषभः | मिथुनम् | कर्कः | सिंहः | कन्या | तुला | वृश्चिकः | धनुः | मकरः | मीनः | मेषः |
| १४ | २६।१५।० | वृषभः | मिथुनम् | कर्कः | सिंहः | कन्या | तुला | वृश्चिकः | धनुः | मकरः | कुम्भः | मेषः | वृषभः |
| १५ | २८।७।३० | मिथुनम् | कर्कः | सिंहः | कन्या | तुला | वृश्चिकः | धनुः | मकरः | कुम्भः | मीनः | वृषभः | मिथुनः |
| १६ | ३०।०।० | कर्कः | सिंहः | कन्या | तुला | वृश्चिकः | धनुः | मकरः | कुम्भः | मीनः | मेषः | मिथुनः | कर्क |

# परिशिष्टम्-२

**षष्ट्यंशः।**

एकस्याः राशेः षष्टीभागा भवन्ति तदा स षष्टयंशः इति कथ्यते प्रस्तुत कोष्टके विषमराश्यां समराश्यां च स्वस्वामियुक्ताः षष्टीभागाः शुभशुभफलैः प्रदर्शिताः यथा विषमराशेः प्रथमभागस्य स्वामि एवम् समराशेः ६०त्तमो भागस्य स्वामि घोरः वर्तते। प्रत्येक भागानां स्वामि निर्देशः कोष्टके वर्तते तदनुसारेण यथानामः तथैव तेषां शुभाशुभ फलम् ज्ञेयम् ।

**बृहद्पाराशरहोराशास्त्रानुसारेणषष्टयांशानां स्वामिनामानि।**

घोरस्य राक्षसो देवः कुबेरो यक्ष किन्नरौ। भ्रष्टः कुलघ्नो गरलो वह्निमाया पुरीषकः।।
अपांपत्तिर्मरुत्वाश्च कालः सर्पामृतेन्दुकाः। मृदुः कोमलहेरम्ब-ब्रह्म-विष्णु-महेश्वराः।।
देवार्द्रौ कलिनाशश्च क्षितीशकमलाकरौ । गुलिको मृत्युकालश्च दावाग्निघोरसंज्ञकः ।।
यमश्च कण्टकसुधाऽमृतौ पूर्णनिशाकरः। विषदग्धकुलान्तश्च मुख्यो वंशक्षयस्तथा ।।
उत्पात कालसौमाख्या कोमलः शीतलाभिधः। कराल दंष्ट्र चन्द्रास्यौ प्रवीणःकालपावकः।।
दण्डभृन्निर्मलः सौम्यः क्रूरोऽतिशीतलोमृतः। पयोधिभ्रमणाख्यौ च चन्द्ररेखा स्वयुग्मपौ।।
समेभेव्यत्ययाज्ञेयाः षष्टयांशाश्चप्रकीर्तिताः। षष्टयंशस्वामिनस्त्वोजेतदीशाद् व्यत्यतः समे।।
शुभषष्टयंशसंयुक्ताः ग्रहाः शुभफलप्रदाः। क्रूरषष्टयंशसंयुक्ता नाशयन्ति खचारिणः।।
राशीन् विहायखेटस्य द्विघ्नमंशाद्यमर्कहुत् । शेषंसैकंचतद्राशिनाथषष्ट्यंशपाःस्मृताः।।

।।बृ.पा.हो.शा.१६/३१तः३९।।

**जातकतत्वग्रन्थानुसारेणषष्ट्यंशानां स्वामिनामानि।**

षष्टयंशेशास्त्वयुग्मे घोर-राक्षस-देव कुबेर-रक्षोगण-किन्नर-भ्रष्टं-कुलघ्नं-विषाग्नि-मायौ-प्रेतपुरीष-वरुणेन्द्र-कला-ऽहि-चन्द्र-चन्द्र-मृदु-मृदु-पद्म-विष्णु-वागीश-दिगम्बर-देवो-ऽद्ध-कालनाश-क्षितीश कमलाकर-मन्दात्मज-मृत्यु-काल-दावाग्नि-घोर-यमकण्टक-सुधा-ऽमृत-पूणेन्दु-विषदिग्ध-कुलनाश मुख्य-वंशक्षयोत्पात - कालरूप - सौम्य - मृदु - शीतल - दंष्ट्राकराले - न्दुमुख -प्रवीण - कालाग्नि - दण्डायुध-निर्मल-शुभ-ऽशुभ-ऽतिशीतल-सुधा-पयोधि-भ्रमणेन्दु - रेखा - युग्मेते व्यत्यया:।।

।। जा.त.स.त./२१।।

## परिशिष्टम्-२

## बृहद् पाराशरहोराशास्त्रग्रन्थाधारेणषष्ट्यांशचक्रम्।

| विषमराश्यां क्रमाङ्कः | विषमराशेःअंशः/कलाः | अंशपतिः | अंशफलम् |
|---|---|---|---|
| १ | ०।३० | घोरः | अशुभः |
| २ | १।०० | राक्षसः | अशुभः |
| ३ | १।३० | देवः | शुभः |
| ४ | २।०० | कुबेरः | शुभः |
| ५ | २।३० | यक्षः | अशुभः |
| ६ | ३।०० | किन्नरः | शुभः |
| ७ | ३।३० | भ्रष्टः | अशुभः |
| ८ | ४।०० | कुलघ्नः | अशुभः |
| ९ | ४।३० | गरलम् | अशुभम् |
| १० | ५।०० | अग्निः | अशुभः |
| ११ | ५।३० | माया | शुभा |
| १२ | ६।०० | पुरीषः | अशुभः |
| १३ | ६।३० | अपाम्पतिः | शुभः |
| १४ | ७।०० | मरुत्वदंशः | शुभः |
| १५ | ७।३० | कालः | अशुभः |
| १६ | ८।०० | अहिभागः | अशुभः |
| १७ | ८।३० | अमृतम् | शुभम् |
| १८ | ९।०० | चन्द्रः | शुभः |
| १९ | ९।३० | मृदुः | शुभः |
| २० | १०।०० | कोमलः | शुभः |
| २१ | १०।३० | हेरम्बः | शुभः |
| २२ | ११।०० | ब्रह्मा | शुभः |
| २३ | ११।३० | विष्णुः | शुभः |
| २४ | १२।०० | महेश्वरः | शुभः |
| २५ | १२।३० | देवः | शुभः |
| २६ | १३।०० | आर्द्रः | शुभः |
| २७ | १३।३० | कलिनाशः | शुभः |
| २८ | १४।०० | क्षितीश्वरः | शुभः |
| २९ | १४।३० | कमलाकरः | शुभम् |
| ३० | १५।०० | गुलिकः | अशुभः |

## परिशिष्टम्-२

## बृहद् पाराशरहोराशास्त्रग्रन्थाधारेणषष्ट्यांशचक्रम्।

| विषमराश्यां क्रमाङ्कः | विषमराशेःअंशः/कलाः | अंशपतिः | अंशफलम् |
|---|---|---|---|
| ३१ | १५।३० | मृत्युः | अशुभः |
| ३२ | १६।०० | कालः | अशुभः |
| ३३ | १६।३० | दावाग्निः | अशुभः |
| ३४ | १७।०० | घोरः | अशुभः |
| ३५ | १७।३० | यमः | अशुभः |
| ३६ | १८।०० | कंटकः | अशुभः |
| ३७ | १८।३० | सुधा | शुभः |
| ३८ | १९।०० | अमृतम् | शुभम् |
| ३९ | १९।३० | पूर्णचन्द्रः | शुभः |
| ४० | २०।०० | विषप्रदग्धः | अशुभः |
| ४१ | २०।३० | कुलनाशः | अशुभः |
| ४२ | २१।०० | वंशक्षयः | अशुभः |
| ४३ | २१।३० | उत्पातः | अशुभः |
| ४४ | २२।०० | कालः | अशुभः |
| ४५ | २२।३० | सौम्यः | शुभः |
| ४६ | २३।०० | कोमलः | शुभः |
| ४७ | २३।३० | शीतलम् | अशुभम् |
| ४८ | २४।०० | दंष्ट्राकरा | अशुभा |
| ४९ | २४।३० | इन्दुमुखम् | शुभम् |
| ५० | २५।०० | प्रवीणः | शुभः |
| ५१ | २५।३० | कालाग्निः | अशुभः |
| ५२ | २६।०० | दाण्डायुधम् | अशुभम् |
| ५३ | २६।३० | निर्मलम् | शुभम् |
| ५४ | २७।०० | सौम्यम् | शुभम् |
| ५५ | २७।३० | क्रूरः | अशुभः |
| ५६ | २८।०० | अतिशीतलः | शुभः |
| ५७ | २८।३० | सुधा | शुभा |
| ५८ | २९।०० | पयोधीशः | शुभः |
| ५९ | २९।३० | भ्रमणम् | अशुभम् |
| ६० | ३०।०० | इन्दुरेखा | शुभा |

# परिशिष्टम्-२

## बृहद् पाराशरहोराशास्त्रग्रन्थाधारेणषष्टयांशचक्रम्।

| समराश्यां क्रमाङ्कः | समराशेःअंशः/कलाः | अंशपतिः | अंशफलम् |
|---|---|---|---|
| १ | ०।३० | इन्दुरेखा | शुभा |
| २ | १।०० | भ्रमणम् | अशुभम् |
| ३ | १।३० | पयोधीशः | शुभः |
| ४ | २।०० | सुधा | शुभा |
| ५ | २।३० | अतिशीतलः | शुभः |
| ६ | ३।०० | क्रूरः | अशुभः |
| ७ | ३।३० | शौम्यम् | शुभम् |
| ८ | ४।०० | निर्मलम् | शुभम् |
| ९ | ४।३० | दण्डायुधम् | अशुभम् |
| १० | ५।०० | कालाग्निः | अशुभः |
| ११ | ५।३० | प्रवीणः | शुभः |
| १२ | ६।०० | इन्दुमुखम् | शुभम् |
| १३ | ६।३० | दंष्ट्राकरा | अशुभा |
| १४ | ७।०० | शीतलम् | अशुभम् |
| १५ | ७।३० | कोमलः | शुभः |
| १६ | ८।०० | सौम्यः | शुभः |
| १७ | ८।३० | कालः | अशुभः |
| १८ | ९।०० | उत्पातः | अशुभः |
| १९ | ९।३० | वंशक्षयः | अशुभः |
| २० | १०।०० | कुलनाशः | अशुभः |
| २१ | १०।३० | विषप्रदग्धः | अशुभः |
| २२ | ११।०० | पूर्णचन्द्रः | शुभः |
| २३ | ११।३० | अमृतम् | शुभम् |
| २४ | १२।०० | सुधा | शुभः |
| २५ | १२।३० | कंटकः | अशुभः |
| २६ | १३।०० | यमः | अशुभः |
| २७ | १३।३० | घोरः | अशुभः |
| २८ | १४।०० | दावाग्निः | अशुभः |
| २९ | १४।३० | कालः | अशुभः |
| ३० | १५।०० | मृत्युः | अशुभः |

## परिशिष्टम्-२

## बृहद् पाराशरहोराशास्त्रग्रन्थाधारेणषष्ट्यांशचक्रम्।

| समराश्यां क्रमांङ्कः | समराशेःअंशः/कलाः | अंशपतिः | अंशफलम् |
|---|---|---|---|
| ३१ | १५।३० | गुलिकः | अशुभः |
| ३२ | १६।०० | कमलाकरः | शुभम् |
| ३३ | १६।३० | क्षितीश्वरः | शुभः |
| ३४ | १७।०० | कलिनाशः | शुभः |
| ३५ | १७।३० | आर्द्रः | शुभः |
| ३६ | १८।०० | देवः | शुभः |
| ३७ | १८।३० | महेश्वरः | शुभः |
| ३८ | १९।०० | विष्णुः | शुभः |
| ३९ | १९।३० | ब्रह्मा | शुभः |
| ४० | २०।०० | हेरम्बः | शुभः |
| ४१ | २०।३० | कोमलः | शुभः |
| ४२ | २१।०० | मृदुः | शुभः |
| ४३ | २१।३० | चन्द्रः | शुभः |
| ४४ | २२।०० | अमृतम् | शुभम् |
| ४५ | २२।३० | अहिभागः | अशुभः |
| ४६ | २३।०० | कालः | अशुभः |
| ४७ | २३।३० | मरुत्वदंशः | शुभः |
| ४८ | २४।०० | अपाम्पतिः | शुभः |
| ४९ | २४।३० | पुरीषः | अशुभः |
| ५० | २५।०० | माया | शुभा |
| ५१ | २५।३० | अग्निः | अशुभः |
| ५२ | २६।०० | गरलम् | अशुभम् |
| ५३ | २६।३० | कुलघ्नः | अशुभः |
| ५४ | २७।०० | भ्रष्टः | अशुभः |
| ५५ | २७।३० | किन्नरः | शुभः |
| ५६ | २८।०० | यक्षः | अशुभः |
| ५७ | २८।३० | कुबेरः | शुभः |
| ५८ | २९।०० | देवः | शुभः |
| ५९ | २९।३० | राक्षसः | अशुभः |
| ६० | ३०।०० | घोरः | अशुभः |

## परिशिष्टम्-२

**जातकपारिजातग्रन्थानुसारेणषष्ट्यांशस्वामिनामानि।**

षष्टयंशकानामधिपास्त्वयुग्मे घोरांशकाद्यासुरदेवभागाः।
य इन्दुरेखादिशुभाशुभांशाः क्रमेणयुग्मे तु यथाविलोमात्।।
घोरांशकोराक्षसदेवभागौ कुबेरयक्षोगणकिन्नरांशाः।
भ्रष्टः कुलघ्नो गरलाग्निसंज्ञौ मायांशकः प्रेतपुरीशभागः।।
अपांपतिर्देवगणेशभागः कलाहिभागावमृतांश चन्द्रौ।
मृद्वंशकः कोमलपद्मभागलक्ष्मीश वागीशदिगम्बरांशाः।।
देवार्द्रभागः कलिनाशसंज्ञः क्षितीश्वराख्यः कमलाकरांशः।
मन्दात्मजो मृत्युकरस्तु कालो दावाग्निघोराधयमकण्टकांशाः।।
सुधाऽमृतांशौ परिपूर्णचन्द्रो विषप्रदिग्धः कुलनाशभागः।
मुख्यास्तु वंशक्षयपातकांशौ कालस्तु सौम्यो मृदुशीतलांशौ।।
दष्ट्रांकरालेन्द्रमुखाः प्रवीणः कालाग्निदण्डायुध निर्मलाख्याः।
शुभाकरोऽशोभनशीतलांशौ सुधापयोधिभ्रमणेन्दुरेखाः।।
।। जापा.१/३९त:४३।।

१) घोरः २) राक्षसः ३) देवः ४) कुबेरः ५) यक्षोगणः ६) किन्नरः ७) भ्रष्टः ८) कुलघ्नः ९) गरलम् १०) अग्निः ११) माया १२) यमः १३) वरुणः १४) इन्द्रः १५) कला १६) सर्प १७) अमृतम् १८) चन्द्रः १९) मृदुः २०) कोमलः २१) पद्मम् २२) विष्णुः २३) गुरुः २४) शिवः २५) देवः २६) आर्द्रम् २७) कलिनाशः २८) क्षितीशः २९) कमलाकरः ३०) मन्दात्मजः ३१) मृत्युकरः ३२) कालः ३३) दावाग्निः ३४) घोरः ३५) अधमः ३६) कण्टकः ३७) सुधा ३८) अमृतम् ३९) पूर्णचन्द्रः ४०) विषदग्धः ४१) कुलनाशः ४२) मुख्यम् ४३) वंशक्षयः ४४) उत्पातकः ४५) कालः ४६) सौम्यः ४७) मृदुः ४८) शीतलम् ४९) दंष्ट्राकरालः ५०) इन्दुमुखम ५१) प्रवीणः ५२) कालाग्निः ५३) दण्डायुधम् ५४) निर्मलम् ५५) शुभाकरः ५६) अशोभनम् ५७) शीतलम् ५८) सुधा समुद्रः ५९) भ्रमणम् ६०) इन्दुरेखा

## परिशिष्टम्-२

## जातकपारिजातग्रन्थानुसारेणषष्ट्यंशचक्रम्।

| विषमराश्यां क्रमाङ्कः | विषमराशेःअंशः/कलाः | अंशपतिः | अंशफलम् |
|---|---|---|---|
| १ | ०।३० | घोरः | अशुभः |
| २ | १।०० | राक्षसः | अशुभः |
| ३ | १।३० | देवः | शुभः |
| ४ | २।०० | कुबेरः | शुभः |
| ५ | २।३० | यक्षोगणः | अशुभः |
| ६ | ३।०० | किन्नरः | शुभः |
| ७ | ३।३० | भ्रष्टः | अशुभः |
| ८ | ४।०० | कुलघ्नः | अशुभः |
| ९ | ४।३० | गरलम् | अशुभम् |
| १० | ५।०० | अग्निः | अशुभः |
| ११ | ५।३० | माया | शुभा |
| १२ | ६।०० | यमः | अशुभः |
| १३ | ६।३० | अपामपतिः | शुभः |
| १४ | ७।०० | ईन्द्रः | शुभः |
| १५ | ७।३० | कला | शुभा |
| १६ | ८।०० | सर्पः | अशुभः |
| १७ | ८।३० | अमृतम् | शुभम् |
| १८ | ९।०० | चन्द्रः | शुभः |
| १९ | ९।३० | मृदुः | शुभः |
| २० | १०।०० | कोमलः | शुभः |
| २१ | १०।३० | पद्मः | शुभः |
| २२ | ११।०० | विष्णुः | शुभः |
| २३ | ११।३० | वागीशः | शुभः |
| २४ | १२।०० | दिगम्बरः | शुभः |
| २५ | १२।३० | देवः | शुभः |
| २६ | १३।०० | आर्द्रः | शुभः |
| २७ | १३।३० | कलिनाशः | शुभः |
| २८ | १४।०० | क्षितीश्वरः | शुभः |
| २९ | १४।३० | कमलाकरः | शुभम् |
| ३० | १५।०० | मन्दात्मजः | अशुभः |

## परिशिष्टम्-२

## जातकपारिजातग्रन्थानुसारेणषष्ट्यंशचक्रम्।

| विषमराश्यां क्रमाङ्कः | विषमराशेःअंशः/कलाः | अंशपतिः | अंशफलम् |
|---|---|---|---|
| ३१ | १५।३० | मृत्युः | अशुभः |
| ३२ | १६।०० | कालः | अशुभः |
| ३३ | १६।३० | दावाग्निः | अशुभः |
| ३४ | १७।०० | घोरः | अशुभः |
| ३५ | १७।३० | अधमः | अशुभः |
| ३६ | १८।०० | कंटकः | अशुभः |
| ३७ | १८।३० | सुधा | शुभः |
| ३८ | १९।०० | अमृतम् | शुभम् |
| ३९ | १९।३० | पूर्णचन्द्रः | शुभः |
| ४० | २०।०० | विषदग्धः | अशुभः |
| ४१ | २०।३० | कुलनाशः | अशुभः |
| ४२ | २१।०० | मुख्यः | शुभः |
| ४३ | २१।३० | वंशक्षयः | अशुभः |
| ४४ | २२।०० | उत्पातः | अशुभः |
| ४५ | २२।३० | कालरूपः | अशुभः |
| ४६ | २३।०० | सौम्यः | शुभः |
| ४७ | २३।३० | मृदुः | शुभः |
| ४८ | २४।०० | सुशीतलः | शुभः |
| ४९ | २४।३० | दंष्ट्राकरालः | शुभम् |
| ५० | २५।०० | इन्दुमुखम् | शुभम् |
| ५१ | २५।३० | प्रवीणः | शुभः |
| ५२ | २६।०० | कालाग्निः | अशुभम् |
| ५३ | २६।३० | दण्डायुधम् | अशुभम् |
| ५४ | २७।०० | निर्मलः | शुभः |
| ५५ | २७।३० | शुभाकरः | शुभः |
| ५६ | २८।०० | अशोभनम् | अशुभम् |
| ५७ | २८।३० | अतिशीतलम् | शुभम् |
| ५८ | २९।०० | सुधासमुद्रः | शुभः |
| ५९ | २९।३० | भ्रमणम् | अशुभम् |
| ६० | ३०।०० | इन्दुरेखा | शुभा |

## परिशिष्टम्-२

## जातकपारिजातग्रन्थानुसारेणषष्ट्यंशचक्रम्।

| समराश्यां क्रमांङ्कः | समराशेःअंशः/कलाः | अंशपतिः | अंशफलम् |
|---|---|---|---|
| १ | ०।३० | इन्दुरेखा | शुभा |
| २ | १।०० | भ्रमणम् | अशुभम् |
| ३ | १।३० | सुधासमुद्रः | शुभः |
| ४ | २।०० | अतिशीतलः | शुभा |
| ५ | २।३० | अशोभन् | अशुभः |
| ६ | ३।०० | शुभाकरः | शुभः |
| ७ | ३।३० | निर्मलम् | शुभम् |
| ८ | ४।०० | दण्डायुधम् | अशुभम् |
| ९ | ४।३० | कालाग्निः | अशुभम् |
| १० | ५।०० | प्रवीणः | शुभः |
| ११ | ५।३० | ईन्दुमुखम् | शुभः |
| १२ | ६।०० | दंष्ट्राकरा | अशुभम् |
| १३ | ६।३० | शीतलम् | शुभम् |
| १४ | ७।०० | मृदुः | शुभः |
| १५ | ७।३० | सौम्यः | शुभः |
| १६ | ८।०० | कालः | अशुभः |
| १७ | ८।३० | उत्पातः | अशुभः |
| १८ | ९।०० | वंशक्षयः | अशुभः |
| १९ | ९।३० | मुख्यः | शुभः |
| २० | १०।०० | कुलनाशः | अशुभः |
| २१ | १०।३० | विषदग्धः | अशुभः |
| २२ | ११।०० | पूर्णचन्द्रः | शुभः |
| २३ | ११।३० | अमृतम् | शुभम् |
| २४ | १२।०० | सुधा | शुभः |
| २५ | १२।३० | कंटकः | अशुभः |
| २६ | १३।०० | अधमः | अशुभः |
| २७ | १३।३० | घोरः | अशुभः |
| २८ | १४।०० | दावाग्निः | अशुभः |
| २९ | १४।३० | कालः | अशुभः |
| ३० | १५।०० | मृत्युः | अशुभः |

## परिशिष्टम्-२

## जातकपारिजातग्रन्थानुसारेणषष्ट्यंशचक्रम्।

| समराश्यां क्रमांङ्कः | समराशेःअंशः/कलाः | अंशपतिः | अंशफलम् |
|---|---|---|---|
| ३१ | १५।३० | मन्दात्मजः | अशुभः |
| ३२ | १६।०० | कमलाकरः | शुभम् |
| ३३ | १६।३० | क्षितीश्वरः | शुभः |
| ३४ | १७।०० | कलिनाशः | शुभः |
| ३५ | १७।३० | आर्द्रम् | शुभम् |
| ३६ | १८।०० | देवः | शुभः |
| ३७ | १८।३० | दिगम्बरः | शुभः |
| ३८ | १९।०० | वागीशः | शुभः |
| ३९ | १९।३० | विष्णुः | शुभः |
| ४० | २०।०० | पद्मः | शुभः |
| ४१ | २०।३० | कोमलः | शुभः |
| ४२ | २१।०० | मृदुः | शुभः |
| ४३ | २१।३० | चन्द्रः | शुभः |
| ४४ | २२।०० | अमृतम् | शुभम् |
| ४५ | २२।३० | अहिभागः | अशुभः |
| ४६ | २३।०० | कलाः | शुभा |
| ४७ | २३।३० | ईन्द्रः | शुभः |
| ४८ | २४।०० | अपाम्पतिः | शुभः |
| ४९ | २४।३० | यमः | अशुभः |
| ५० | २५।०० | माया | शुभा |
| ५१ | २५।३० | अग्निः | अशुभः |
| ५२ | २६।०० | गरलम् | अशुभम् |
| ५३ | २६।३० | कुलघ्नः | अशुभः |
| ५४ | २७।०० | भ्रष्टः | अशुभः |
| ५५ | २७।३० | किन्नरः | शुभः |
| ५६ | २८।०० | यक्षोगणः | अशुभः |
| ५७ | २८।३० | कुबेरः | शुभः |
| ५८ | २९।०० | देवः | शुभः |
| ५९ | २९।३० | राक्षसः | अशुभः |
| ६० | ३०।०० | घोरः | अशुभः |

# परिशिष्टम्-२
## जातकतत्वग्रन्थानुसारेणषष्ट्यंशचक्रम्।

| विषमराश्यां क्रमाङ्कः | विषमराशेःअंशः/कलाः | अंशपतिः | अंशफलम् |
|---|---|---|---|
| १ | ०।३० | घोरः | अशुभः |
| २ | १।०० | राक्षसः | अशुभः |
| ३ | १।३० | देवः | शुभः |
| ४ | २।०० | कुबेरः | शुभः |
| ५ | २।३० | यक्षोगणः | अशुभः |
| ६ | ३।०० | किन्नरः | शुभः |
| ७ | ३।३० | भ्रष्टः | अशुभः |
| ८ | ४।०० | कुलघ्नः | अशुभः |
| ९ | ४।३० | विषम् | अशुभम् |
| १० | ५।०० | अग्निः | अशुभः |
| ११ | ५।३० | माया | शुभा |
| १२ | ६।०० | प्रतपुरीषः | अशुभः |
| १३ | ६।३० | वरुणः | शुभः |
| १४ | ७।०० | ईन्द्रः | शुभः |
| १५ | ७।३० | कला | शुभा |
| १६ | ८।०० | अहिः | अशुभः |
| १७ | ८।३० | चन्द्रः | शुभः |
| १८ | ९।०० | चन्द्रः | शुभः |
| १९ | ९।३० | मृदुः | शुभः |
| २० | १०।०० | मृदुः | शुभः |
| २१ | १०।३० | पद्मः | शुभः |
| २२ | ११।०० | विष्णुः | शुभः |
| २३ | ११।३० | वागीशः | शुभः |
| २४ | १२।०० | दिगम्बरः | शुभः |
| २५ | १२।३० | देवः | शुभः |
| २६ | १३।०० | आर्द्रः | शुभः |
| २७ | १३।३० | कलिनाशः | शुभः |
| २८ | १४।०० | क्षितीशः | शुभः |
| २९ | १४।३० | कमलाकरः | शुभम् |
| ३० | १५।०० | मन्दात्मजः | अशुभः |

**परिशिष्टम्-२**

**जातकतत्वग्रन्थानुसारेणषष्ट्यंशचक्रम्।**

| विषमराश्यां क्रमाङ्कः | विषमराशेःअंशः/कलाः | अंशपतिः | अंशफलम् |
|---|---|---|---|
| ३१ | १५।३० | मृत्युः | अशुभः |
| ३२ | १६।०० | कालः | अशुभः |
| ३३ | १६।३० | दावाग्निः | अशुभः |
| ३४ | १७।०० | घोरः | अशुभः |
| ३५ | १७।३० | यमकंटक | अशुभः |
| ३६ | १८।०० | सुधा | शुभा |
| ३७ | १८।३० | अमृतम् | शुभम् |
| ३८ | १९।०० | पूर्णचन्द्रः | शुभः |
| ३९ | १९।३० | विषदग्धः | अशुभः |
| ४० | २०।०० | कुलनाशः | अशुभः |
| ४१ | २०।३० | मुख्यः | शुभः |
| ४२ | २१।०० | वंशक्षयः | अशुभः |
| ४३ | २१।३० | उत्पातः | अशुभः |
| ४४ | २२।०० | कालरूपः | अशुभः |
| ४५ | २२।३० | सौम्यः | शुभः |
| ४६ | २३।०० | मृदुः | शुभः |
| ४७ | २३।३० | शीतलः | शुभः |
| ४८ | २४।०० | दंष्ट्राकरालः | शुभम् |
| ४९ | २४।३० | इन्दुमुखम् | शुभम् |
| ५० | २५।०० | प्रवीणः | शुभः |
| ५१ | २५।३० | कालाग्निः | अशुभम् |
| ५२ | २६।०० | दण्डायुधम् | अशुभम् |
| ५३ | २६।३० | निर्मलः | शुभः |
| ५४ | २७।०० | शुभा | शुभा |
| ५५ | २७।३० | अशुभा | अशुभा |
| ५६ | २८।०० | अतिशीतलम् | शुभम् |
| ५७ | २८।३० | सुधा | शुभा |
| ५८ | २९।०० | पयोधिः | शुभः |
| ५९ | २९।३० | भ्रमणम् | अशुभम् |
| ६० | ३०।०० | ईन्दुरेखा | शुभम् |

## परिशिष्टम्-२

## जातकतत्वग्रन्थानुसारेणषष्ट्यंशचक्रम्।

| समराश्यां क्रमांङ्कः | समराशेःअंशः/कलाः | अंशपतिः | अंशफलम् |
|---|---|---|---|
| १ | ०।३० | इन्दुरेखा | शुभा |
| २ | १।०० | भ्रमणम् | अशुभम् |
| ३ | १।३० | पयोधिः | शुभः |
| ४ | २।०० | सुधा | शुभा |
| ५ | २।३० | अतिशितलम् | शुभम् |
| ६ | ३।०० | अशुभा | अशुभा |
| ७ | ३।३० | शुभा | शुभा |
| ८ | ४।०० | निर्मलम् | शुभम् |
| ९ | ४।३० | दंडायुधम् | अशुभम् |
| १० | ५।०० | कालाग्निः | अशुभः |
| ११ | ५।३० | प्रवीणः | शुभः |
| १२ | ६।०० | ईन्दुमुखः | शुभः |
| १३ | ६।३० | दंष्ट्राकरालः | शुभम् |
| १४ | ७।०० | शीतलः | शुभः |
| १५ | ७।३० | मृदुः | शुभः |
| १६ | ८।०० | सौम्यः | शुभः |
| १७ | ८।३० | कालरुपः | अशुभः |
| १८ | ९।०० | उत्पातः | अशुभः |
| १९ | ९।३० | वंशक्षयः | अशुभः |
| २० | १०।०० | मुख्यः | शुभः |
| २१ | १०।३० | कुलनाशः | अशुभः |
| २२ | ११।०० | विषदग्धः | अशुभः |
| २३ | ११।३० | पूर्णचन्द्रः | शुभः |
| २४ | १२।०० | अमृतम् | शुभम् |
| २५ | १२।३० | सुधा | शुभा |
| २६ | १३।०० | यमकंटकः | अशुभः |
| २७ | १३।३० | घोरः | अशुभः |
| २८ | १४।०० | दावाग्निः | अशुभः |
| २९ | १४।३० | कालः | अशुभः |
| ३० | १५।०० | मृत्युः | अशुभः |

## परिशिष्टम्-२

### जातकतत्वग्रन्थानुसारेणषष्ट्यंशचक्रम्।

| समराश्यां क्रमांङ्कः | समराशेःअंशः/कलाः | अंशपतिः | अंशफलम् |
|---|---|---|---|
| ३१ | १५।३० | मन्दात्मजः | अशुभः |
| ३२ | १६।०० | कमलाकरः | शुभम् |
| ३३ | १६।३० | क्षितीशः | शुभः |
| ३४ | १७।०० | कलिनाशः | शुभः |
| ३५ | १७।३० | आर्द्रम् | शुभम् |
| ३६ | १८।०० | देवः | शुभः |
| ३७ | १८।३० | दिगम्बरः | शुभः |
| ३८ | १९।०० | वागीशः | शुभः |
| ३९ | १९।३० | विष्णुः | शुभः |
| ४० | २०।०० | पद्मः | शुभः |
| ४१ | २०।३० | मृदुः | शुभः |
| ४२ | २१।०० | मृदुः | शुभः |
| ४३ | २१।३० | चन्द्रः | शुभः |
| ४४ | २२।०० | चन्द्रः | शुभः |
| ४५ | २२।३० | अहिः | अशुभः |
| ४६ | २३।०० | कलाः | शुभा |
| ४७ | २३।३० | ईन्द्रः | शुभः |
| ४८ | २४।०० | वरुणः | शुभः |
| ४९ | २४।३० | यमः | अशुभः |
| ५० | २५।०० | माया | शुभा |
| ५१ | २५।३० | अग्निः | अशुभः |
| ५२ | २६।०० | विषम् | अशुभम् |
| ५३ | २६।३० | कुलघ्नः | अशुभः |
| ५४ | २७।०० | भ्रष्टः | अशुभः |
| ५५ | २७।३० | किन्नरः | शुभः |
| ५६ | २८।०० | यक्षोगणः | अशुभः |
| ५७ | २८।३० | कुबेरः | शुभः |
| ५८ | २९।०० | देवः | शुभः |
| ५९ | २९।३० | राक्षसः | अशुभः |
| ६० | ३०।०० | घोरः | अशुभः |

## परिशिष्टम्-०३

### सूर्यादिग्रहाणां विविधा:संज्ञाः।

### ग्रहाणां षड्बलविचारः।

ग्रहाणां षदडबलं भारतीय ज्यौतिषस्यैकोविशिष्टोंऽशो वर्तते । यथा स्थानबलं दिग्बलं कालबलं चेष्टाबलं नैसर्गिकबलं दृगबलं च।

**स्थानबलम्।**

उच्चबलम्- यदा कोऽपि ग्रह: स्वपरमोच्चांशे[१] भवेत्तदा तस्य ६० षष्ट्यंशबलं=पूर्णबलं = १००% बलं भवति । यदा कोऽपि ग्रह: परमनीचांशे[२] भवेत्तदा तस्य ०० बलं भवति। यदा कोऽपि ग्रह: स्वमूलत्रिकोणराश्यां भवेत्तदा तस्य ४५ षष्ट्यंशबलं=पादोनबलं = ७५% बलं भवति । यदा कोऽपि ग्रह: स्वराश्यां भवेत्तदा तस्य ३० षष्ट्यंशबलं=अर्धबलं = ५०% बलं भवति । यदा कोऽपि ग्रहोऽधिमित्रराश्यां भवेत्तदा तस्य २२.३० षष्ट्यंशबलं = ३७.५०% बलं भवति । यदा च कोऽपि ग्रहो मित्रराश्यां भवेत्तदा तस्य १५ षष्ट्यंशबलं=एकपादबलं = २५% बलं भवति । यदा कोऽपि ग्रह उदासीनराश्यां (समराश्यां) भवेत्तदा ७.३० षष्ट्यंशबलं=अर्धपादबलं = १२.५०% बलं भवति । यदा कोऽपि ग्रह: स्वशत्रुराश्यां भवेत्तदा ३.४५ षष्ट्यंशबलं=०६.२५% बलं भवति। यदा कोऽपि ग्रहोऽधिशत्रुरास्यां भवेत्तदा १.५२ षष्ट्यंशबलं= ०३.१२% बलं भवति ।

**सप्तवर्गजफलम्।**

यदा कोऽपि ग्रह: सप्तवर्गेषु स्वराश्यां भवेत्तदा ३० षष्ट्यंशबल मधिमित्रराश्यां २२.३० षष्ट्यंशबलं मित्रराश्यां १५ षष्ट्यंशबलं उदासीनराश्यां ७.५०षष्ट्यंशबल शत्रुराश्यां ३.४५ षष्ट्यंशबलं यदा चाधिशत्रुराश्यां भवेत्तदा तस्य १.५२ षष्ट्यंशबलं
भवति ।

**ओजयुग्मराशिबलम्(पुरुषस्त्रीराशिबलम्)/ ओजयुग्मनवांशबलम् (पुरुषस्त्रीनवमांशबलम्)।**

यदा सूर्यमङ्गलबुधगुरुशनैश्चरेभ्य: कोऽपि ग्रह: पुरुषराश्यां पुरुषनवमांशे वा भवेत्तदा स ग्रह: १५ षष्ट्यंशबलं प्राप्नोति। यदा चन्द्रशुक्राभ्यां कोऽपि ग्रह: स्त्रीराश्यां स्त्रीनवांशे वा भवेत्तदा स १५ षष्ट्यंशबलं प्राप्नोति। यदा कोऽपि ग्रह: केन्द्रे (१-४-७-१० भावे वा) भवेत्तदा स ६०षष्ट्यंश बलं प्राप्नोति। यदा कोऽपि ग्रह: पणफरे (२-५-८-११ भावे वा) भवेत्तदा स ३०षष्ट्यंशबलं प्राप्नोति। यदा कोऽपि ग्रह: आपोकिल (३-५-९-१२ भावे वा) भवेत्तदा स १५ षष्ट्यंश बलं प्राप्नोति।

**दिग्बलम्।**

यदा जन्मकुण्डल्यां सूर्यो मङ्गलो वा दशमभावे भवेत्तदा ६०षष्ट्यंश बलं तथा चतुर्थभावे भवेत्तदा शून्यबलं प्राप्नोति। यदा जन्मकुण्डल्यां चन्द्र: शुक्रो वा चतुर्थभावे भवेत्तदा स ६० षष्ट्यंशबलं

---

[१] विशेषार्थं परिशिष्टम् -०३ द्रष्टव्यम् ।

[२] विशेषार्थं परिशिष्टम् -०३ द्रष्टव्यम् ।

तथा दशमभावे शून्यबलं प्राप्नोति। यदा जन्मकुण्डल्यां बुधो गुरु वा७ प्रथमभावे भवेत्तदा ६०षष्ट्यंश बलं तथा सप्तमभावे भवेत्तदा शून्यबलं प्राप्नोति। यदा जन्मकुण्डल्यां शनैश्चर: सप्तमभावे भवेत्तदा ६०षष्ट्यंश बलं तथा प्रथमभावे शून्य बलं प्राप्नोति।

**कालबलम्।**

**दिवारात्रिबलम्**

दिनस्यार्धभागे=दिनार्धे=मध्याह्ने सूर्यगुरुशुक्रा: ६०षष्ट्यंशबलं तथा मध्यरात्रौ शून्यबलं प्राप्नुवन्ति। मध्यरात्रौ=अर्धरात्रे चन्द्रमङ्गलशनैश्चरा: ६०षष्ट्यंशबलं तथा मध्याह्ने शून्य बलं प्राप्नुवन्ति। बुध: सदैव (अहोरात्रं) ६०षष्ट्यंशबलं प्राप्नोति।

**पक्षबलम्।**

यदा जन्मकुण्डल्यां सूर्यचन्द्रयोरन्तरं १८० अंशात्मकम् (प्रतियुतियोग:) भवेत्तदा शुभग्रहा: ६०षष्ट्यंशबलं क्रूरग्रहा: शून्यबलं प्राप्नुवन्ति। यदा सूर्यचन्द्रौ एकस्यांराश्यां अंशे च भवेत्तां तथा शुभग्रहा: शून्यबलं क्रूरग्रहा: ६० षष्ट्यांश बलं प्राप्नुवन्ति ।

अत्र चन्द्रबुधगुरुशुक्रा: शुभग्रहा मन्यन्ते केशवी जातकमते बुधग्रहस्य शुभाशुभत्वमन्य ग्रहस्य संयोगाधीनम् । सूर्यमङ्गलशनैश्चरा: क्रुरग्रहा: सन्ति। सूर्यचन्द्रयोरन्तरं न्यूनाधिक भवेत्तदा त्रिराशिगणितानुसारेण ग्रहाणां बलं आनयत। अत्र चन्द्रस्यपक्षबलं द्विगुणितकरणेन चन्द्रस्यबलं प्राप्यते।

**दिनस्य त्रिभागबलम् :**

यदि जन्मदिवसे भवेत्तदा दिनमानं (सूर्योदयारभ्यसूर्यास्तपर्यन्तं कालमानं) त्रिभिर्विभज्य दिनस्य प्रथमभागे जन्मभवेत्तदा बुध: ६० षष्टयंशबलं प्राप्नोति दिनमानस्य द्वितीयभागे जन्मभवेत्तदा सूर्यस्य ६० षष्ट्यंश बलं भवति तथा दिनमानस्य तृतीयभागे जन्मभवेत्तदा शनैश्चरस्य ६० षष्ट्यंश बलं भवति।

यदा जन्मरात्रौ भवेत्तदा रात्रिमानं त्रिभिर्विभज्य रात्रिमानस्य (सूर्यास्तदाराभ्य द्वितीयदिनस्य सूर्योदयपर्यन्तं कालमानस्य) प्रथमभागे जन्म भवेत्तदा चन्द्रस्य ६० षष्ट्यंश बलं भवति। यदा रात्रिमानस्य द्वितीयभागे जन्मभवेत्तदा शुक्रस्य ६० षष्ट्यंशबलं भवति तथा रात्रिमानस्य तृतीयभागे जन्मभवेत्तदा मङ्गलस्य ६० षष्ट्यंश बलं भवति। दिनस्य रात्रिमानस्य कस्यापिभागे जन्मभवेत्तदा गुरु: ६० षष्ट्यंश बलं प्राप्नोति।

**अष्टबलम् । मासबलम् । वारबलम् । होराबलम्।**

सृष्टेरारभ्य ३६० दिनात्मक १ वर्ष भवति। तथा च ३०-३० दिनानामेको मासा भवति। अनयारीत्या जन्मदिन पर्यन्तम् गणनां कृत्वा गत वर्षस्य प्रथमदिवसस्य यो वाराधिपतिर्भवेत्त स वारेशो वर्षेश इति कथ्यते। वर्षश: १५ षष्ट्यंश बलं प्राप्नोति। विस्तारभायादधिकं न लिख्यते। विशेषज्ञानार्थं सूर्यसिद्धान्ते प्रथमऽध्याये ४५ त: ५१ पर्यन्तं श्लोका: दृष्टव्य:।

सृष्टेरारभ्य ३० दिनात्मकस्यमासस्य गणनांकृत्वा जन्मदिने को मासा इति ज्ञात्वा तस्मिन् मासारम्भे वर्तमानस्य वारस्य अधिपति: ३० षष्ट्यंशबलं प्राप्नोति। यस्मिन् वारे जन्मभवेत्तस्याधिपति: ४५ षष्ट्यंशबलं प्राप्नोति। यस्य ग्रहस्यहोरायां जन्मभवेत्त स ग्रह: ६० बल प्राप्नोति। प्रत्येक

वारस्यहोरा तस्याधिपतिमारभ्य भवति यथा रविवासरे सूर्यस्य प्रथमहोरा भवति। तदन्नतरं अधिपति ग्रहा दारभ्य षष्ठवारस्य अधिपतेरद्वितीयहोरा भवति अनेन क्रमेण अग्रेऽपि बोधव्यम्।

**अयनबलम्** ।

यदा कोऽपि ग्रह आकाशीय मध्यरेखाया उत्तरभागे भवेत्तदा तस्य ग्रहस्योत्तरक्रांतिर्भवति तथा दक्षिणभागे भवेत्तदा तस्य ग्रहस्य दक्षिणक्रान्तिर्भवति। यदा कोऽपिग्रहो मध्यरेखायां भवेत्तदा तस्यग्रहस्य शून्यक्रान्तिर्भवति। यदा सूर्यमङ्गलगुरुशुक्रेभ्यः कोऽपिग्रहः २४° उत्तरक्रान्तिसमीपे भवेत्तदा ६० षष्ट्यंशबलं तथा २४° दक्षिणक्रान्त्यां भवेत्तदा शून्यबलं भवति। मध्येऽनुपातेन ज्ञातव्यम्। चन्द्रशनैश्चरौ २४° दक्षिणक्रान्त्यां भवेतां तदा ६० षष्ट्यांश बलं २४° उत्तरक्रान्त्यां शून्यबलं तयोरज्ञेयम् । मध्येऽनुपातेन ज्ञातव्यम् । यदा बुधस्य क्रान्तिः शून्यो भवेत्तदा ३० षष्ट्यंशबलं, २४° उत्तरक्रान्त्यां ६० षष्ट्यंशबलं प्राप्नोति यदा बुधस्य गमनं ०° तः २४° दक्षिणक्रान्त्यां भवेत्तदोत्तरोत्तरमधिकाधिकबलं प्राप्नोति। अर्थात् २४° दक्षिणक्रान्त्यां सर्वाधिकं ६० षष्ट्यंशबलं प्राप्नोति। मध्ये अनुपातेन बलं ज्ञातव्यम् । अत्र सूर्यस्यायनबलं द्विगुणीतकरणेन सूर्यबलं प्राप्यते।

**युद्धबलम् ।**

भौमादिपञ्चताराग्रहेषु परस्परं युद्धं भवति। यदा भौमादि पञ्चताराग्रहेभ्य' कौ अपि द्वौ ग्रहौ एकश्यां राश्यां अंशे कलायां च भवेतां तदा द्वयोर्गहयोर्मध्ये युद्धं भवति। विशेषार्थं सूर्यसिद्धांतादौ दृष्टव्यम् (सूर्यसिद्धान्ते ग्रहयुत्यधिकारो दृष्टव्यम्)।

**चेष्टाबलम्।**

सूर्यचन्द्रौ कदापि वक्रिणौ न भवतः। ग्रहाणामष्टधागत्यानुसारेण यद् बलं प्राप्यति। तच्चेष्टाबलम् कथ्यते। मङ्गलबुधगुरुशुक्रशनैश्चराः कदाचित्मार्गिणः कदाचित् च वक्रिणो भवन्ति।
स्थूलमाने चेष्टाबलबोधार्थं मधस्तालिका दीयते।

**ग्रहाणां चेष्टाबलचक्रम्।**

| | **ग्रहाणां अष्टधागतिः** | **चेष्टाबलम्** |
|---|---|---|

## परिशिष्टम्-०३

| | | |
|---|---|---|
| १ | वक्रागतिः | ६० षष्ट्यंशाः |
| २ | अनुवक्रा/ऋजुर्गतिः | ३० षष्ट्यंशाः |
| ३ | विकल गतिः | १५ षष्ट्यंशाः |
| ४ | समागमः (युतिः) | ३० षष्ट्यंशाः |
| ५ | मन्दापिमार्गीगतिः | १५ षष्ट्यंशाः |
| ६ | मन्दतरा गतिः | ७¹/₂ षष्ट्यंशाः |
| ७ | शीघ्र गतिः | ४५ षष्ट्यंशाः |
| ८ | शीघ्रतरा गति | ३० षष्ट्यंशाः |

**नैसर्गिक बलम् ।**

ग्रहाणां स्वभावतो यद्बलं प्राप्यते तन्नैसर्गिकबलं कथ्यते।

**ग्रहाणां नैसर्गिबलचक्रम्।**

| **ग्रहाः** | **नैसर्गिकबलम्। षष्ट्यांशात्मकबलम्** |
|---|---|
| सूर्यः | ६० |
| चन्द्रः | ५१.४३ |
| मङ्गलः | ४२.८५ |
| बुधः | ३४.२८ |
| गुरुः | २५.७० |
| शुक्रः | १७.१४ |
| शनैश्चरः | ८.५७ |

**दृग् बलम् (दृष्टिबलम्)।**

सर्वेग्रहाः[३] स्वस्थानात् सप्तमभावे पूर्णदृष्ट्या पश्यन्ति मङ्गलश्चतुर्थाष्टमभावयोः पूर्णदृष्ट्या पश्यति। गुरुः पञ्चमनवमभावयोः पूर्णदृष्ट्या पश्यति। मङ्गलं विहाय सर्वेग्रहाः स्वस्थानात् चतुर्थाष्टमभावयोः त्रिपाद्दृष्ट्या पश्यन्ति। गुरुं विहाय सर्वेग्रहाः स्वस्थानात् पञ्चमनवमभावयोरर्धदृष्ट्या पश्यन्ति। शनैश्चरं विहाय सर्वेग्रहाः स्वस्थानात् तृतीयदशमभावयोरेकपाददृष्ट्या पश्यन्ति। शुभउच्चमित्रमूलत्रिकोणसंज्ञकानां ग्रहाणां दृष्टिः शुभफलदायिनी भवति नीचपापशत्रुमूढसंज्ञकानां ग्रहाणां दृष्टिरशुभफलदायिनी भवति ।

**गृहाणां दृष्टिविचारः।**

३ त्रिदशत्रिकोणचतुरस्रसप्तमान्यवलोकयन्ति चरणाभिवृद्धितः।
रविजामरेज्यरुधिराःपरे च ये क्रमशो भवन्ति किल वीक्षणेऽधिकाः।। बृ.जा. २/१३ ।।

होराशास्त्रे भिन्नदृष्टिः खेटानां च परस्परम्।
त्रिदशे च त्रिकोणे च चतुरस्त्रे च सप्तमे ।।
शनिर्देवगुरुर्भौमः परे च वीक्षणेऽधिकाः।
पदार्धं त्रिपदं पूर्णं वदन्ति गणकोत्तमाः ।।
शनिपादं त्रिकोणेषु चतुरसे द्विपादकम्।
त्रिपादं सप्तमे विप्र त्रिदशे पर्णमेवहि।।
त्रिपादं सप्तमे विप्र त्रिदश पूर्णमेव हि।।
चतुरस्ते गुरु पादं सप्तमे च द्विपादकम्।
त्रिपादं त्रिदशे विप्र पूर्ण पश्यति कोणभे।।
सप्तमे पादमेकं च द्विपादं त्रिदशे द्विज।
त्रिपादं च त्रिकोणेषु भौमः पूर्णं चतुरस्रगे ।।
अन्येषां त्रिदशे पादं द्विपादं च त्रिकोणगे।
चतुरस्त्रे त्रिपादं च पूर्णं पश्यति सप्तमे।। बृ.पा.हो.शा. ७/१८तः२३।।

पादेक्षणं भवति सोदरमानशश्योरर्धं त्रिकोणयुगलेऽखिलखेचराणाम्।
पादोनदृष्टिनिचयश्चतुरस्त्रयुग्मे सम्पूर्णदृग्बलमनङ्गगृहे वदन्ति।।

शनिरतिबलशाली पाददृग्वीर्ययोगे सुरकुलपतिमन्त्री कोणदृष्टौ शुभः स्यात्।
त्रितयचरणदृष्ट्या भूकुमारः समर्थः सकलगगनवासाः सप्तमे दृग्ल्बलाढ्याः।।
।।जा.पा.२/ ३० तः ३१।।

संपश्यन्ति स्थानात् सदा ग्रहाश्चरणवृद्धितः सर्वे।
त्रिदशत्रिकोणचतुरस्रसप्तमानि च फलं क्रमेणैवम्।।सारावली४/३२।।

पूर्णं पश्यति रविजस्तृतीयदशमं त्रिकोणमपि जीवः।
चतुरस्त्रं भूमिसुतो द्यूनं सर्वे ग्रहाः क्रमशः।।सारावली ४/३३।।

त्रिदशत्रिकोणचतुरस्रसप्तमान्यवलोकयन्ति चरणाभिवृद्धितः।
रविजामरेज्यरुधिराः परे च ये क्रमशो भवन्ति किल वीक्षणेऽधिकाः।।बृ.जा.२/१३।।

पुरुषग्रहाः राशेः प्रथमभागे (०° तः १०° पर्यन्तमद्य) बलवन्ते भवन्ति। स्त्रीग्रहौ (चन्द्रशुक्रौ) राशेरन्तिमभागे/तृतीयभागे (२१° तः ३०° पर्यन्तम्) भवतः बलवन्तो तथा नपुंसकग्रहौ बुधशनैश्चरोराशेर्मध्यभागे / द्वितीयभागे (११° तः २०° पर्यन्तम्) बलवन्तौ भवतः।

**अष्टकवर्गः**

## परिशिष्टम्-०३

अष्टकवर्गसाधनार्थं जन्मपत्रिकानिर्माणविषयकं भारतीयजन्मकुण्डलीविज्ञानम्, ज्योतिषकल्पद्रुमादयो ग्रन्था द्रष्टव्याः। यदा सूर्यादिशनिपर्यन्तेषु ग्रहेषु यो ग्रह एकबिन्दुयुक्तो भवेत् स रोगादिभयदाता बिन्दुद्वययुक्तो ग्रहो मनःसन्तापदाता नृपचौरभयदाताऽन्नचिन्तायुक्तो बिन्दुत्रयुक्तो ग्रहो अशुभफलदायकश्चतुर्बिन्दुयुक्तो ग्रहो मिश्रफलदायकः पञ्चबिन्दुयुक्तो ग्रहः पुत्रादिसुखदाता षड्बिन्दुयुक्तो ग्रहो धनयशबलरूपदाता सप्तबिन्दुयुक्तो ग्रहोऽश्वसेनाधनादिसुखदाताऽष्टबिन्दुयुक्तो ग्रहः सकलैश्वर्यदाता भवति।

**ग्रहाणां जाग्रत्स्वप्नसुषुप्तावस्थाः।**

मेषमिथुनसिंहतुलाधनुकुम्भराशिषु शून्य तः दशान्तपर्यन्तं ग्रहस्य जाग्रतावस्था एकादश तः विशत्यंशपर्यन्तं स्वप्नावस्था एकविशत्यारभ्य त्रिंशतशपर्यन्तं सुषुप्तावस्था भवति। वृषभकर्ककन्यावृश्चिकमकरमीनराशिषु शून्य तः दशान्तपर्यन्तं ग्रहस्य सुषुप्तावस्था एकादश तः विशत्यंशपर्यन्तं स्वप्नावस्था एकविशत्यारभ्य त्रिंशतशपर्यन्तं जाग्रतावस्था भवति। जाग्रतावस्थायां ग्रहःशुभफलदयकःस्वप्नवस्थायां मिश्रफलदयकः सुषुप्तावस्थायां च विफलो भवति।।बृ.पा.हो.शा.२५/३तः५।।

**ग्रहाणां बालाद्यवस्थाः।**

कोऽपि ग्रहो विषमराश्यां ००तः०६ अंशपर्यन्तं बाल्यावस्था,०७ तः१२ अंशपर्यन्तं कुमारावस्था १३ तः १८ अंशपर्यन्तं युवावस्था,१९तः२४ अंशपर्यन्तं वद्धावस्था,एवं शेषांशेषु मृतावस्था भजते। तद् विपरिता समराश्यां ग्रहावस्था ज्ञातव्या।

**ग्रहाणां लज्जिताद्यवस्थाः।**

यदा कोऽपि ग्रहः पञ्चमभावे राहुणा केतुना सूर्येण शनैश्चरेण मङ्गलेन वा युतो भवेत्तदा तस्य लज्जितसंज्ञा भवति । यदा कोऽपि ग्रहः स्वोच्चराश्यां मूलत्रिकोणराश्यां वा भवेत्तदा तस्य गर्वितसंज्ञा भवति । यदा कोऽपि ग्रहः शत्रुग्रहस्य राश्या शत्रुग्रहेण युक्तो भवेदथवा शनैश्चरेणयुक्तो भवेत्तदा तस्य क्षुधितसंज्ञा भवति। यदा कोऽपि ग्रहो जलराश्यां शत्रुग्रहेण दृष्टः शुभग्रहस्य दृष्टिहीनो भवेत्तदा तस्यतृषितसंज्ञाभवतियदा कोऽपि ग्रहो मित्रराश्यां मित्रग्रहेण गुरुना वा युक्तो दृष्टो वा भवेत्तदा तस्य ग्रहस्य मुदित संज्ञा भवति। यदा कोऽपि ग्रहः सूर्येण युतः शत्रुग्रहेण पापग्रहेण च दृष्टो भवेत्तदा तस्य क्षोभितसंज्ञा भवति। येषु येषु भावेषु क्षुधितसंज्ञकग्रहः क्षोभितसंज्ञखग्रहो वा भवेत्तेषां भावना फलनाशो भवति। यदा कुण्डल्यां दशमभावे क्षोभितक्षुधिततृषितलज्जितसंज्ञको वा भवेत्तदा जातको दुःखी भवति। यदा पुत्रस्थाने लज्जितसंज्ञकग्रहो भवेत्तदद पुत्रनाशो भवति। यस्य कुण्डल्यां क्षोभितस्तृषितसंज्ञकग्रहो वा भवेत्तदा स्त्रीनाशो भवति । यदा कुण्डल्यां गर्वितग्रहो भवेत्तदा तदा गर्वितग्रहस्य दशायां जातकः नूतनगृहस्य उद्यानस्य सुखं नृपत्वं कलापाटवं सदाधनलाभः व्यवहारकौशल्यं लभते। मुदितसंज्ञकग्रह; जातकस्य जीवने शुभफलदायको भवति। लज्जितग्रहस्य दशाऽशुभफलदायका भवति। क्षोभिततुषितक्षुभितग्रहाणां दशा कष्टदुष्ट–फलदायिनी भवति।।बृ.पा.हो.शा.२५/२४तः४२।।

## परिशिष्टम्-०३

**पराशरमतेनग्रहाणां चरकारकाः।**

अथाग्रे सम्प्रवक्ष्यामि ग्रहाणां कारकान् द्विज।
आत्मादिकारकान् सप्त यथावत् कथ्यामि ते।।
रव्यादिशनिपर्यन्ता भवन्ति सप्तकारकाः।
अंशैः समो ग्रहा द्वौ च राह्वन्तान् गणयेद् द्विज।।
रव्यादिपङ्गुपर्यन्तमंशाधिकग्रहो द्विज।
कारकेन्द्रोऽथ स ज्ञेयो आत्माकारक उच्यते।।
अंशसाम्यग्रहो यत्र कलाधिक्यं च पश्यति।
कलासाम्ये पलाधिक्यमात्मकारक ईर्यते।।।बृ.पा.हो.शा.१२/१त:४।।
आत्मकारकखेटेन न्यूनभागो हि यद् ग्रहः।
अमात्यसंज्ञा तस्यैव ज्ञायते द्विजसत्तम।।
अमात्यन्यूनो भ्राता च भ्रातृन्यूनं च मातृकम्।
मातृकारकखेटेन न्यूनभागो हि यो ग्रहः।।
सपुत्रकारको ज्ञेयस्तद्धीनो ज्ञातिकारकः।
ज्ञातिकारकखेटेन हीनभागो हि यो ग्रहः।।
दारकारक विज्ञेयो निर्विशङ्कं द्विजोत्तम
चराश्य कारकाः सप्त ब्रह्मणाचोदिताः पुरा।।
सपुत्रकारको ज्ञेयस्तद्धीनो ज्ञातिकारकः।
ज्ञातिकारकखेटेन हीनभागो हि यो ग्रहः।।
दारकारकविज्ञेयो निर्विशङ्कं द्विजोत्तम।
चराश्च कारकाः सप्त ब्रह्मणा चोदिताः पुरा।।
अंशसाम्यौ ग्रहौ द्वौ च जायेतां यस्य जन्मनि।
स्वकारकं विना विप्र लुप्यति चान्त्यकारकः।।
तत्कारकं लुप्यति चेदन्यन्नेवास्ति कारकम्।
कारकाणां स्थिराणां च मध्ये सच्चिन्तयेद् द्विज।। बृ.पा.हो.शा.१२/१५त:२०।।

स्पष्ट सूर्यादिसप्तग्रहाणां राशिंत्यक्त्वा यो ग्रहः सर्वाधिकगतांशयुक्तोभवेत्तदा तस्यग्रहस्य आत्माकारकसंज्ञा भवति। तस्मात् न्यूनगतांशयुक्तो ग्रहः अमात्यकारको भवति अनेन प्रकारेण तस्मात् (अमात्यात्) न्यूनगतांशा युक्तो ग्रहाणां अनुक्रमेण भातृकारकः पुत्रकारको जाति कारकः स्त्रीकारकः संज्ञा भवन्ति।

**पराशरमतेनग्रहाणां चरकारकत्वम्।**

| | **ग्रहाणांचरकारकचक्रम्** |
|---|---|
| क्रमाङ्कः | संज्ञाः |
| १ | आत्माकारकः |

| | |
|---|---|
| २ | अमात्यकारक: |
| ३ | भातृकारक: |
| ४ | मातृकारक: |
| ५ | पुत्रकारक: |
| ६ | ज्ञातिकारक: |
| ७ | स्त्रीकारक: |

उदाहरण:

सूर्यादिस्पष्टग्रहा:

| **ग्रहा:** | **सूर्य:** | **चन्द्र:** | **मङ्गल:** | **बुध:** | **गुरु:** | **शुक्र:** | **शनि:** | **राहु:** |
|---|---|---|---|---|---|---|---|---|
| राशि: | ०३ | ०२ | १० | ०४ | ०४ | ०२ | ०७ | ०७ |
| अंशा: | १८ | २२ | २२ | ०५ | १२ | ०५ | ०१ | १३ |
| कला: | २६ | ३० | ३२ | २२ | ५० | ०३ | ४८ | २७ |
| विकला: | ३४ | ४७ | ०८ | ५९ | ५४ | ०५ | ५३ | २७ |

| **क्रमाङ्क:** | **चरकारकसंज्ञा:** | **ग्रहा:** |
|---|---|---|
| १ | आत्मकारक: | मङ्गल: |
| २ | अमात्यकारक: | चन्द्र: |
| ३ | भ्रातृकारक: | सूर्य: |
| ४ | मातृकारक: | गुरु: |
| ५ | पुत्रकारक: | बुध: |
| ६ | ज्ञातिकारक: | शुक्र: |
| ७ | स्त्रीकारक: | शनैश्चर: |

**दु:स्थग्रहलक्षणम्।**

मूढोऽपि[४] नीचरिपुत्रोऽष्टमषट्व्ययस्थो

[४] चन्द्रादिग्रहाणां अस्तांशा: (मूढांशा:)
यदा कोडिग्रह सूर्यात् निश्चितांशान्तरं भवेत्तदा तस्य मूढावस्था (अस्तङ्गतावस्था) भवति।

दु:स्थ: स्मृतो भवति सुस्थ इतीतर: स्यात्। ।।फ.दी.२/३६।।

यदा कोऽपिग्रह: अस्तङ्गतावस्थायां नीचराश्यां नीचांशे शत्रुराश्यां लग्नात् षष्टाष्टमद्वादशस्थानेषु भवेत्तदा ग्रहस्य दु:स्थानसंज्ञा भवति शेषेषु स्थानेषु ग्रहस्यसुस्थानावस्था भवति। गणककालिदासमतेन (उत्तरकालामृतंकर्ता) युद्धेपरास्तग्रह: पापग्रहदृष्टग्रह: पापग्रहयुक्तग्रह: वक्रीग्रहेणयुक्तग्रह भावसंधिस्थितग्रहस्तथा षष्टाष्टयद्वादशभावानां स्वामिन: यत्र स्थिता: भवेयुस्तत्र केन्द्रत्रिकोणभावेत्तदा केन्द्रत्रिकोणग्रहै: उत्पन्नशुभफलानां नाशका: मन्यन्ते अर्थात् सर्वेषां दु:स्थसंज्ञा: भवन्ति।

दु:स्थानपस्तदित रस्वगृहस्थितश्चेत् स्वक्षेत्रभावफलमेव करोति नान्यत्।
मन्दो मृगे सुतगुहे येदि पुत्रसिद्धि: षष्ठाधिपत्यकृतदोष फलं च नात्र।
।।फ.दी.१५/२९।।

यदा कोऽपि ग्रहो जन्मकुण्डल्यां शुभाशुभभावयो रधिपतिर्भूत्वाशुभभावे भवेत्तदा स शुभफलं प्रदाति। किन्तु यदा स षष्टाष्टमद्वादशभावेषु भवेत्तदा तस्य ग्रहस्यऽशुभफलं बोध्यम्। यथा कन्यालग्ने पञ्चमभावे शनैश्चरो मकरराश्यां शुभफलदायको भवति । अत्र षष्टेशस्यशनैश्चरस्य फलं न चिन्तनीयम्।

**ग्रहाणामस्तसंज्ञा: (मूढसंज्ञा:।)**

चन्द्रादिग्रहाणां अस्तांशा: (मूढांशा:)
एकादशमरेज्यस्यनिधिसंख्यार्कजस्यच।अस्तांशाभूमिपुत्रस्यदशसप्तादिकास्तत:।।
पश्चादस्तमयोऽष्टाभिरुदय: प्राङ्महत्तया।प्रागस्तमुदय: पश्चादल्पत्वा द्दशभिर्भृगो:।।
एवं बुधो द्वादशभिश्चतुर्दशभिरंशकै:।वक्री शीघ्रगतिश्चार्कात्करोत्यस्तमयोदयौ।।
।। सू.सि.९/६त:८।।

यदा कोडिग्रह: सूर्यात् निश्चितांशान्तरं भवेत्तदा तस्यमूढावस्था(अस्तङ्गतावस्था) भवति। यस्यां राश्यां अशे सूर्योभवेत्तस्मात् द्वादशांशानां प्राक्पश्चादन्तरे चन्द्रोऽस्तो भवति।
अनेन प्रकारेण कोष्टकानुसारेण सर्वेषां ग्रहाणां अंशानुसारेण अस्तसंज्ञा: ज्ञातव्या:।

**चन्द्रादिग्रहाणामस्तांशाचक्रम् ।**

| **क्रमाङ्क:** | **ग्रहा:** | **मूढांशा:** |
|---|---|---|
| १ | चन्द्र: | १२ |
| २ | मङ्गल: | १७ |

यस्यां राश्यां अशे सूर्योभवेत्तस्मात् द्वादशांशानां प्राक्पश्चादन्तरे चन्द्रोऽस्तो भवति
अनेन प्रकारेण कोष्टकानुसारेण सर्वेषां ग्रहाणां अंशानुसारेण अस्तसंज्ञा: ज्ञातव्या:।

| | | |
|---|---|---|
| ३ | मार्गीबुधः | १४ |
| ४ | वक्रीबुधः | १२ |
| ५ | गुरुः | ११ |
| ६ | मार्गीशुक्रः | १० |
| ७ | वक्रीशुक्रः | ०८ |
| ८ | शनैश्चरः | १५ |

**ग्रहाणां वर्गोत्तमावस्थाः ।**

यदा कोऽपिग्रहो जन्मकुंडल्यां यस्यां राश्यां भवेत्तस्यमेवराश्यां नवमांशकुंडल्यामपि भवेत्तदा तस्य ग्रहस्य वर्गोत्तम अवस्था भवति। चरराश्यां (मेष-कर्क-तुला-मकर) प्रथमनवांशे, स्थिरराश्यां (वृषभ-सिंह-वृश्चिक-कुम्भ) पंचमनवांशे, द्विस्वभावराश्यां (मिथुन-कन्या-धनु-मीन) अन्तिमनवमवांशे ग्रहस्य वर्गोत्तमावस्था भवति। यथा मेषराश्यां मेषनवांशे सूर्यः, वृषभराश्यां वृषभनवांशे शुक्रः, कन्याराश्यां कन्यानवांशे बुधः वर्गोत्तम अवस्था मन्यते। यदा ग्रहः स्वोच्चराश्यां मूलत्रिकोणराश्यां स्वराश्यां मित्रराश्यां वा भवेत्तदा तस्य शुभफलं तथा नीचराश्यां शत्रुराश्यां वा भवेत्तदा तस्य शुभाशुभफलं लभ्यते ।

वर्गोत्तमाश्चरगृहादिषु पूर्वमध्यपर्यन्ततः शुभफला नवभागसंज्ञाः।
।।बृ.जा.१/१४।।
वर्गोत्तमस्वपरगेषु शभं युदुक्तं तत्पुष्टमध्यलघुताशुभमुत्क्रमेण।
वीर्यान्वितोंऽशकपतिर्निरुणद्धि पूर्वं राशीक्षणस्य फलमंशफलं ददाति।।
।।बृ.जा.१९/०९।।

वर्गोत्तमांवास्थदशा शुभप्रदा मिश्रभवे सा चास्तमिते च नीचगे।
यदा कोऽपिग्रहो वर्गोत्तमावस्थायां भवेत्तदा तस्य ग्रहस्य दशा शुभफलदयिको भवति किन्तु स ग्रहः स्वनीचराश्यां अस्तङ्गतावस्थायां भवेत्तदा तस्य ग्रहस्य मिश्रफलं (शुभाशुभफलं) भवति।

**ग्रहाणां मैत्रीविचारः।**
चन्द्रेज्यक्षितिजा रवीन्दुतनेयौ गुर्विन्दुसूर्याः क्रमात्
शुक्रार्कौ रविचन्दभूमितनया ज्ञार्की सितज्ञौ मताः।
अर्कादेः सुहृदः समा अथ बुधः सर्वेहि शुक्रार्कजौ
भौमाचार्ययमायमः कुजगुरू पूज्यः परे वैरिणः।।जा.ल.१/१०।।

**सूर्यादिग्रहाणां नैसर्गिकमैत्रीचक्रम्।**

| क्रमाङ्कः; | ग्रहाः | मित्रग्रहाः | समग्रहाः | शत्रुग्रहाः |
|---|---|---|---|---|
| १ | सूर्यः | चन्द्रः मङ्गलः | बुधः | शुक्रः शनैश्चरः |

| | | | | |
|---|---|---|---|---|
| | | गुरुः | | |
| २ | चन्द्रः | सूर्यः, बुधः | मङ्गलः गुरुः शुक्रः शनैश्चरः | – |
| ३ | मङ्गलः | सूर्यः चन्द्रः गुरुः | शुक्रः, शनैश्चरः | बुधः |
| ४ | बुधः | सूर्यः शुक्रः | मङ्गलः गुरुः शनैश्चरः | चन्द्रः |
| ५ | गुरुः | सूर्यः चन्द्रः मङ्गलः | शनैश्चरः | गुरुः शुक्रः |
| ६ | शुक्रः | बुधः शनैश्चरः | मङ्गलः गुरुः | सूर्यः चन्द्रः |
| ७ | शनैश्चरः | बुधः शुक्रः | गुरुः | सूर्यःचन्द्रः मङ्गलः |
| ८ | राहुः | बुधः शुक्रः शनैश्चरः | मङ्गलः | सूर्यः चन्द्रः गु.रुः |
| ९ | केतुः[५] | बुधः शुक्रः शनैश्चरः | मङ्गलः | सूर्यः चन्द्रः गुरुः |

**ग्रहाणां तात्कालिक मैत्रीविचारः।**

अन्योन्यतः सोदरलाभमानपातालवित्तव्ययराशिसंस्थाः।
तत्कालमित्राणि खगा भवन्ति तदन्ययाता यदि शत्रवस्ते।।जा.पा.२/४१।।

जन्मकुण्डल्यां ग्रहः स्वस्थानात् द्वितीये-तृतीये-चतुर्थे-दशमे-एकादशे-द्वादशे एतेषुभावेषु स्थितेषुग्रहैः सह मैत्रीं करोति, शेषेषु (एक-पञ्चम-षष्ठ-सप्तम-अष्टम-नवम) भावेषु स्थितेषु ग्रहैः सह शत्रुत्वमाप्नोति।

**ग्रहाणां पञ्चधामैत्रीविचारः।**

तत्कालिकेनिसर्गे च मित्रत्वे त्वधिमित्रकम्।
द्वयोर्मित्रसमत्वे च मित्रं शत्रुः शत्रुसमत्वके।।
समौ तु शत्रुमित्रत्वे शत्रुशत्रौ त्वधिशत्रुकम्
एवं पञ्चप्रकाराः स्युः ग्रहाणां मित्रता बुधैः।।बृ.पा.हो.शा.३/४९तः५०।।

**ग्रहाणां पञ्चधामैत्रीचक्रम्।**

| क्रमाङ्कः | नैसर्गिकचक्रे | तात्कालिचक्रे | पञ्चधामैत्रीचक्रे | फलम् |
|---|---|---|---|---|

[५] मित्राणि विच्छनिसितास्तमसोर्द्धयोस्तु
भौमः समो निगदितो रिपवश्च शेषाः।। ।।फ.दी. २/३३।।

## परिशिष्टम्-०३

| | | | | |
|---|---|---|---|---|
| १ | मित्रम् | मित्रम् | अधिमित्रम् | अतिशुभम् |
| २ | मित्रम् | समः | मित्रम् | शुभम् |
| ३ | समः | मित्रम् | मित्रम् | शुभम् |
| ४ | मित्रम् | शत्रुः | समः | मिश्रम् |
| ५ | शत्रुः | मित्रम् | समः | मिश्रम् |
| ६ | समः | शत्रुः | शत्रु | अशुभम् |
| ७ | शत्रुः | शत्रुः | अधिशत्रु | अतिअशुभम् |

**यवनाचार्योक्त सत्याचायोक्तञ्च ग्रहाणां मैत्रीविचारः**

जीवो जीवबुधौ सितेन्दुतनयौ व्यर्काविभौमः क्रमा–
द्वीन्द्वर्का विकुजेन्द्विनाश्च सुहृके: केषाञ्चिदेवंमतम्।
सत्योक्ते सुहृदस्त्रिकोणभवनात्स्वा त्सवान्त्यधीर्मपाः
स्वोच्चायुः सुखपाः स्वलक्षणविधेर्नान्यैर्विरोधादिति।।बृ.जा.२/१५।।

### यवनाचार्योक्त ग्रहमैत्रीचक्रम्।

| क्रमाङ्कः | ग्रहाः | मित्राणि | शत्रवः |
|---|---|---|---|
| १ | सूर्य | गुरुः | चन्द्रः मङ्गलः बुधः शुक्रः शनैश्चरः |
| २ | चन्द्रः | गुरुः बुधः | सूर्यः मङ्गलः शुक्रः शनैश्चरः |
| ३ | मङ्गलः | बुधः शुक्रः | सूर्यः चन्द्रः गुरुः शुक्रः |
| ४ | बुधः | चन्द्रः, मङ्गलः, गुरुः, शुक्रः, शनैश्चरः | सूर्यः |
| ५ | गुरुः | सूर्यः, चन्द्रः, शुक्रः, बुधः, शनैश्चरः | मङ्गलः |
| ६ | शुक्रः | मङ्गलः, बुधः, गुरुः, शनैश्चरः | सूर्यः, चन्द्रः |
| ७ | शनैश्चरः | बुधः, गुरुः, शुक्रः | सूर्यः, चन्द्रः, मङ्गलः |

**सत्याचायोक्तग्रहमैत्रीविचारः**

## परिशिष्टम्-०३

सत्याचार्यमतेन ग्रहस्य मूलत्रिकोणराशि[६]स्थानात् द्वितीयचतुर्थपञ्चमनवमद्वादशभावानां स्वामिनस्तस्य ग्रहस्य मित्राणि भवन्ति। शेषस्थानानां स्वामिनस्तस्य ग्रहस्य शत्रवः भवन्ति। यदा ग्रहः मित्रं एवं शत्रुःभवति तदा ग्रहस्य सम संज्ञा भवति।

| क्रमांकः | ग्रहाः | ग्रहाणां मूलत्रिकोण राशिः | मित्रग्रहाः | शत्रुग्रहाः | समग्रहः |
|---|---|---|---|---|---|
| १ | सूर्यः | सिंहः | चन्द्रः मङ्गलः गुरुः | शनिः शुक्रः | बुधः |
| २ | चन्द्रः | वृषभः | सूर्यः बुधः | – | मङ्गलः गुरुः शुक्रः शनैश्चरः |
| ३ | मङ्गलः | मेषः | चन्द्रः सूर्यः गुरुः | बुधः | शुक्रः शनैश्चरः |
| ४ | बुधः | कन्या | सूर्यः शुक्रः | चन्द्रः | मङ्गलः गुरुः शनैश्चरः |
| ५ | गुरुः | धनुः | चन्द्रः सूर्यः मङ्गलः | शुक्रः, बुधः | शनैश्चरः |
| ६ | शुक्रः | तुला | बुधः शनैश्चरः | सूर्यः चन्द्रः | मङ्गलः गुरुः |
| ७ | शनैश्चरः | कुम्भः | बुधः शुक्रः | चन्द्रः सूर्यः मङ्गलः | गुरुः |

**सूर्यादिग्रहाणामुच्चादिसंज्ञाः।**

मूलत्रिकोणाहरिताबुरक्रिया वधूधनुस्तौलिघटादिवाकरात्।
सितासिताक्र्काङ्गिरसां नखांशकास्त्रिकोणमादौपरतःस्वमन्दिरम्।।
वृषादिभागत्रयमुच्चमिन्दोर्मूलत्रिकोणं परतस्तु सर्वम्।
मेषादिगाद्वादशभागसंज्ञा कुजस्यकोणं परतःस्वभं स्यात्।।
कन्यार्द्धमुच्चं शशिजस्य कोणंदशांशकाः स्वर्क्षफलं सरांशाः।
कुम्भस्त्रिकोणं फणिनायकस्य तङ्गंनृयुग्मं रमणीगृहं स्यात्।।जा.पा.१/२६तः२८।।

अजवृषभ मृगाङ्गनाकुलीरा झषवणिजौ च दिवाकरादि तङ्गाः।
दशशिखिमनुयुक् तिथीन्द्रियांशै स्त्रिनवक विंशतिभिश्च तेस्तनीचाः। ।बृ.जा.१/१३।।

सूर्यः मेषराश्या दशांशयुक्तः उच्च कथ्यते अनयारीत्या, चंद्रः वृषभराश्यां अंशत्रययुक्तः, मङ्गलः मकरराश्यामष्टाविंशति अंशात्मकः, बुधः कन्याराश्यां पंचदशांशत्मकः, गुरुः कर्कराश्यां पंचांशात्मक, शुक्रः मीनराश्यां सप्तविंशत्य, शनैश्चर तुलाराश्यां विंशाउच्चाः इति कथ्यन्ते। उपर्युक्तप्रकारेण ये ये ग्रहाः येषुयेषु अंशेषु उच्चाः भवन्ति ते ते ग्रहाः तेषु तेषु अंशेषु तत्तत्सप्तमराशिषु नीचाः इति कथ्यन्ते।

यदा सूर्यो सिंहराशमारभ्य विंशतिअंश पर्यंतो मूलत्रिकोणमन्यते। चन्द्रो वृषभराशेः। चतुरांशमारभ्य त्रिंशदंशः पर्यतः, मङ्गलो मेषराशिमारभ्य द्वादशांशपर्यतः, बुधः कन्याराशेः

[६] विशेषार्थ परिशिष्टम्-०३ द्रष्टव्यम्।

**परिशिष्टम्-०३**

षोडशांशमारभ्य पंचविंशति अंश पर्यतः गुरुर्धनुराशिमारभ्य विंशतिअंशपर्यतः, शुक्रः तुलाराशिमारभ्य विंशति अंश पर्यतः, शनैश्चरः कुभराशिमारभ्य विंशति अंशपर्यतः, मूलत्रिकोणाः इति मन्यन्ते राहुस्तु कुम्भराश्यां मूलत्रिकोणः इति मन्यते।

यदा सूर्यः सिंहराशेः एकविंशतिअंशमारभ्य त्रिंशदंशः पर्यतः स्वगृहीति मण्यते। चन्द्रः कर्कराशेः मङ्गलः मेषराशेः त्रयोदशांशमारभ्य त्रिंशदंश पर्यतः, बुधः कन्याराशेः षड्विंशत्यंशमारभ्य त्रिंशदंशपर्यतः, गुरुर्धनुराशेः एकविंशत्यंमारभ्य त्रिशदंशपर्यतः, शनैश्चरश्च कुम्भराशेः एकविंशत्यंसमारभ्य त्रिंशदंशपर्यतः स्वगृहिणः इति मण्यन्ते। चन्द्रमङ्गलौ कर्कवृश्चिकौ, बुधगुरौ मिथुनमीनयोः शनैश्चरश्च मकरस्वगृहिणः इति मन्यन्ते।

**सूर्यादिग्रहाणामुच्चादिसंज्ञाःसांशाः।।**

| क्रमाङ्कः | ग्रहाः | स्वगृही अंशसहिता | उच्चराशिः | परमोच्चराशिः (अंशसहिता) | मूलत्रिकोणराशिः (अंशसहिता) | नीचराशिः | परम्नीचराशिः (अंशसहिता) |
|---|---|---|---|---|---|---|---|
| १ | सूर्यः | सिंह २० तः ३० | मेषः | मेषस्य दशांऽशाः | सिंहः ०० तः २० | तुला | तुला ०० तः १० |
| २ | चंद्रः | कर्कः पूर्णांशाः | वृषभः | वृषभस्यत्रयोंऽशा | वृषभः ०४ तः ३० | वृश्चिकः | वृश्चिकः ०० तः ३ |
| ३ | मङ्गलः | मेषः १३ तः ३० वृश्चिकः पूर्णांशाः | मकरः | मकरस्य अष्टाविंशत्यांशाः | मेषः ०० तः १२ | कर्कः | कर्कः ०० तः २८ |
| ४ | बुधः | मिथुनम् पूर्णांशाः कन्या २६ तः ३० | कन्या | कन्यायाः पंचदशांऽशाः | कन्या १६ तः २५ | मीनः | मीनः ०० तः १५ |
| ५ | गुरुः | धनुः २० तः ३० मीनः पूर्णांशाः | कर्कः | कर्कस्य पञ्चांऽशाः | धनुः ०० तः २० | मकरः | मकरः ०० तः ५ |
| ६ | शुक्रः | वृषभः पूर्णांशाः तुला २० तः ३० | मीनः | मीनस्यसप्तविंशत्यांशाः | तुला ०० तः २० | कन्या | कन्या ०० तः २० |
| ७ | शनैश्चरः | मकरः पूर्णांशाः कुम्भः २० तः ३० | तुला | तुलायाः विंशत्यांशाः | कुम्भः ०० तः २० | मेषः | मेषः ०० तः २० |
| ८ | राहुः | कन्यापूर्णांशाः | मिथुनम् | – | कुम्भः | धनुः | धनुः |

तुङ्गं तद् वृषभश्चवृश्चिक इति स्याद्राहुकेत्वोगृहौ
कुम्भोऽलीमिथुनाङ्गने तु भवतो मूलत्रिकोणाभिधे।
सिंहः कर्कटको द्वयो रिपुगृहौ तौली मृगो मित्रभे
ऽजोदेवेज्यगृहे समेऽखिलबलं तुङ्गादिगौ तौ यदि।। उ.का.६/२०।।

**राहु-केतुग्रहयोः उच्चादिराशिसंज्ञाः।**

## परिशिष्टम्-०३

| क्रमाङ्काः | सञ्ज्ञाः | ग्रहाः | |
|---|---|---|---|
| | | राहुः | केतुः |
| १ | उच्चराशिः | वृषभः | वृश्चिकः |
| २ | स्वक्षेत्रराशिः | कुम्भः | वृश्चिकः |
| ३ | मूलत्रिकोणराशिः | मिथुनः | कन्या |
| ४ | शत्रुराशिः | सिंहः | कर्कः |
| ५ | मित्रराशिः | तुला | मकरः |
| ६ | समराशिः | मेषः धनुः मीनः | मेषः धनुः मीनः |
| ७ | अतिबलवान्राशिः | वृषभः | वृश्चिकः |

**ग्रहाणां दीप्तादि अवस्था तत्तफलञ्च।।**

दीप्तः प्रमुदितः स्वस्थः शान्तः शक्तः प्रपीडितः।
दीनः खलस्तु विकलो भीतोऽवस्थ दश क्रमात्।। जा.पा.२/१६।।
स्वोच्चत्रिकोणोपगतः प्रदीप्तः स्वस्थः स्वगेहेमुदितः सुहृदभे।
शान्तस्तु सोम्यग्रहवर्गयातः शक्तोऽतिशुद्धः स्फुटरश्मिजालैः।।
ग्रहाभिभूतस्त्वतिपीडितः स्यादरातिराश्यंगतोऽतिदीनः।
खलस्तु पापग्रहवर्गयोगान्नी वेऽतिभीतो विकलोऽस्तयातः।।जा.पा.२/१७तः१८।।
दीप्तस्तुङ्गगतः खगो निजगृहे स्वस्थो हिते हर्षितः
शान्तः शोभनवर्गगश्च खचरः शक्तः स्फुरद्रश्मिभाक्।
लुप्त स्याद्विकलः स्वनीचगृहगो हीनः खलः पापयुक्
खेटो यः परिपीडितश्च खचरैः स प्रोच्यते पीडितः।।जा.भ.११/१।।

**प्रदीप्तः** यदा कोऽपिग्रहः स्वौच्चराश्यां मूलत्रिकोणराश्यां वा जलकुंडल्यां भवेत्तदा तस्यग्रहस्य दीप्तसंज्ञा (प्रदिप्तसंज्ञा) वर्तते।

**स्वस्थः** यदा कोऽपि ग्रहः स्वराशौ भवेत्तदा तस्यसंज्ञा स्वस्थो भवति।

**मुदितः** यदा कोऽपि ग्रहो मित्रराश्यां भवेत्तदा तस्यग्रहस्य मुदितसंज्ञा(हर्षितः) मन्यते।

**शान्तः** यदा कोऽपि ग्रहः शुभवर्गस्थितोभवेत्तदा तस्य ग्रहस्य शान्तसंज्ञा भवति।

**शक्तः** यदा कोऽपि ग्रहः बलयुक्तो उत्तमरश्मियुक्तो भवेत्तदा सः शक्तः कथ्यते।

**पीडितः** यदा कोऽपि ग्रहः युद्धे[७] (भौमादिपंचतारकाणां युद्धे) पराजितोभवति तदा तस्य ग्रहस्य पीडितः संज्ञा वर्तते।

**दीनः** यदा कोऽपि ग्रहः शत्रुराश्यां एवं शत्रुनवांशे स्थितो भवेत्तदा तस्य ग्रहस्य दीनः संज्ञा भवति।

**खलः** यदा कोऽपिग्रहः पापग्रहस्य वर्गेस्थितोभवेत्तदा तस्य ग्रहस्य खलःसंज्ञा भवति।

---
[७] विशेषार्थं परिशिष्टम्-०३ द्रष्टव्यम्। (ग्रहाणां षड्बलं द्रष्टव्यम्)

## परिशिष्टम्-०३

**भीतः** यदा कोऽपि ग्रहः स्वनीचराश्यां भवेत्तदा ग्रहस्य भीतः संज्ञा भवति किन्तु ढुण्ढिराजमते तस्य दीनसंज्ञा वर्तते

**विकलः** यदा कोऽपिग्रहः सूर्यकिरणात् अस्तङ्गतो[8] भवेत्तदा तस्य ग्रहस्य विकलसंज्ञा भवति।

**ग्रहाणां दीप्तादि अवस्थाफलम्।**

दीप्ते विचरति पुरुषः प्रतापविषमाग्निदग्धरिपुवर्गः।
लक्ष्म्यालिंगितदेहो गजमदसंसिवक्तभूपृष्ठः ।।

यदा ग्रहो दीप्तावस्थायां भवेत्तदा जातकः स्वपराक्रमेण शत्रुनाशकरो बहुधनिकोगजाश्वादिऐश्वर्यवान्पराशरमतेयस्मिन्भावेजन्मकुण्डल्यांदीप्तावस्थायुक्तो ग्रहो भवेत्तदा स्थानसम्बंधित शुभ फलस्य वृद्धिर्भवति।

स्वस्थः करोति जन्मनि रत्नानि सुखानि कनकपरिवारान्।
नृपतेर्दण्डपतित्वं गृहधान्यकुटुम्बपरिवृद्धिम् ।।

यदा ग्रहः स्वस्थावस्थायां भवेत्तदा जातको न्यायविद् न्यायाधीशः
रक्षणाधिकारी धनिकः सुखी धान्यसम्पन्नश्च भवति।

मुदिते विलसति मुदितो विलासिनी कनकरत्नपरिपूर्णः ।
विजितसकलारिपक्षः समस्तसुखभाङ्नरो भवति ।।

यदा मुदितावस्थायां ग्रहो भवेत्तदा जातकः प्रसन्नचित्तो धनसम्पन्नः शत्रुनाशकरः सुकलत्रवान् च भवति।

शान्ते प्रशान्तचित्तः सुखधनभागी महीपतेः सचिवः ।
विद्वान् परोपकारी धर्मपरो जायते सुभगः ।।

यदा शान्तावस्थायां ग्रहो भवेत्तदा तस्य ग्रहस्य दशान्तरदशायां वा जातकः प्रसन्नः शान्तः सुखी धनवान् नृपवचिवो मन्त्रीः विद्वान् परोपकारी लोकप्रियो धर्मरक्षकश्च भवति।

स्त्रीवस्त्रमाल्यगन्धैर्विलसति पुरुषः विततकीर्तिः
दयितः सर्वजनस्य च शक्ताख्ये भवति विख्यातः ।।

---

[8] विशेषार्थं परिशिष्टं –०३ द्रष्टव्यम् ।

**परिशिष्टम्-०३**

यदा ग्रहः शक्तावस्थायां भवेत्तदा जातकः कीर्तिमान् प्रसिद्धः स्त्रीवस्त्राभूषण–गन्धमाल्यादिसुखभाक् च भवति।

दु:खैर्व्याधिभिररिभिः प्रपीड्यते पीडिताख्ये तु।
देशाद्देशं विचरति बन्धु वियोगाभिसंतप्तः ।।

यदा पीडितावस्थायां ग्रहो भवेत्तदा जातकः बहुदु:खी रोगग्रस्तः शत्रुपीडितो वृथाभ्रमणशीलो बन्धुवियोगी च भवति।

बहुसाधनोऽपि राजा प्रध्वस्तबलः प्रपीडितो रिपुणा।
नाशमुपयाति विजितो भीते दैन्यं परं प्राप्तः।

यदा ग्रहो भीतावस्थायां भवेत्तदा जातकः सेजासम्पन्ननृपोऽपिशत्रुपराजितो दीनः शत्रुघातेन हतसैन्यः च भवति।

स्वस्थानपरिभ्रष्टः क्लिष्टो मलिनः प्रयाति परदेशम्।
विध्वस्तबलो विकले रिपुवलसंचकितचित्तश्च।।

यदा ग्रहो विकलावस्थायां भवेत्तदा जातकः स्थानभ्रष्टः कष्टभाक् मलिनः अपरिचितदेशनिवासी निर्बलः शत्रुप्रभावेन पीडितश्च भवति।

स्त्रीमरणदु:खतप्तः समस्तधननाश कलुषित मनस्कः।
न जहाति शोकभारं कथमपि खलसंज्ञिते पुरुषः।।

यदा ग्रहो खलावस्थायां भवेत्तदा जातकः स्त्रीमरणेन दु:खसन्तप्ते निर्धन उदासीनः शेकमग्नो दरिद्र च भवति।।सारावली ५/५तः१३।।

**वक्री उच्चग्रहस्य फलविचारः।**

उच्चराशौ विलोमे यत् फलं नान्यैरिहेष्यते ।
कालस्याति बहुत्वाच्च तथा स्वोच्चेऽतिवक्रिते ।।सारावली५/१४।।

यदा कोऽपि ग्रहो उच्चराश्यां वक्री भवेत्तदा स अधिकःप्रबलोभूत्वा शुभफलं ददाति। किन्तु फलस्य प्रभावोऽल्पो भवति । यदा कोऽपि ग्रहो नीचराश्यां वक्रि भवेत्तदा तस्य अशुभत्व अल्पं भवति । शुभग्रहो वक्रि भवेत्तदा शुभफलं ददाति । पापग्रहो वक्रि भवेत्तदा अशुभफलं ददाति ।अत्र ग्रहाणां शुभाशुभत्वं पराशरमतानुसारेण निश्चियते।

## परिशिष्टम्-०३

वक्रं गतो रुचिररश्मिसमूहपूर्णो
नीचारिभांशशसहितोऽपि भवेत्स खेटः।
वीर्यान्वितस्तुहिनरश्मिरवोच्चमित्र
स्वक्षेत्रगोऽपि विबला हतदीधितिश्चेत्। फ.दी. ४/४

यदा कोऽपिग्रहः स्वनीचराश्यां नीचनवांशे वा वक्रगतियुक्तोऽस्तगतावस्थाहीनो भवेत्तदा स ग्रहो बलवान् मन्यते। यदा कोऽपि ग्रहः स्वोच्चराश्यां मित्रराश्यां स्वराश्यां मूलत्रिकोणराश्यां वा किन्तु अस्तङ्गतावस्थायां भवेत्तदा स निर्बलो मन्यते।

धर्मे सूर्यः शीतगुर्बन्धुभावे शौर्ये भौमः पञ्चमे देवमन्त्री ।
कामे शुक्रश्चाष्टमे भानुपुत्रः कुर्यात्तस्य क्लेशमित्याहुरन्ये।।फ.दी.१५/२६।।

केषांश्चिज्ज्यौतिर्विदां मते नवमबावे सूर्यश्चतुर्थभावे चन्द्रस्तृतीयभावे मङ्गलः पञ्चमभावे गुरुः सप्तमभावे शुक्रस्तथाऽष्टमभावे शनैश्चरस्तद् भावसम्बन्धि क्लेशं ददाति।

अत्र तत्तद्भावे ग्रहो नीचराश्यां शत्रुराश्यां पापराश्यां(स्वराशिविहाय) अस्तङ्गतावस्थायां पापग्रहेण युतो दृह्टो वा भवेत्तदाऽवश्यमेवाऽशुभफलं ददाति, अन्यत्राऽशुभं न मन्यते।

**ग्रहाणां पारिजातादिदशवर्गसंज्ञाः।**

मूलत्रिकोणस्वगृहोच्चभागवर्गोत्तमानां दशवर्गजानाम्।।
संयोगजातोत्तमनामपूर्वा वैशेषिकांशा इति ते वदन्ति।।

उत्तमं तु त्रिवर्गैक्यं चातुर्वर्गन्तु गोपुरम्। वर्गपञ्चकसंयोगं सिंहासनमिहोच्यते।
वर्गद्वयं पारिजातं षण्णं पारावतांशकःसप्तमं देवलोकः स्यादष्टमंच तथा भवेत्।
ऐरावतं तु नवकं फलं तेषां पृथक् पृथक्।।जा.पा.१/४४तः४६।।

### ग्रहाणां पारिजातादिदशवर्गसंज्ञाचक्रम्।

| २ | ३ | ४ | ५ | ६ | ७ | ८ | ९ | १० | वर्गैक्ये |
|---|---|---|---|---|---|---|---|---|---|
| पारिजातः | उत्तमः | गोपुरः | सिंहासनं | पारावतः | देवलोकः | ब्रह्मलोकः | शक्रवाहनं/ ऐरावतः | श्रीधामं /वैशिषिकः | योगः संज्ञाः |

गृहं (जन्मलग्नम्) होरा द्रेष्काणः नवमांशः द्वादशांशः त्रिशांशः एते सर्वेषड्वर्गनाम्ना कथ्यन्ते। षड्वर्गेषु सप्तमांशः सम्मिल्य सप्तवर्गाः भवन्ति। सप्तवर्गेषु दशमांशः षोडशांश एवं षष्ट्यंशः एतेषां सम्मिलनं दशवर्गाः भवन्ति।

## परिशिष्टम्-०३

यदा कोऽपिग्रहः स्वमूलत्रिकोणराश्यां[९] स्वराश्यां[१०] स्वोच्चराश्यां[११], अधिमित्रादिराश्यां[१२], शुभवर्गोत्तमावस्थायां[१३], दशवर्गेषु वर्गद्वये भवेत्तदा पारिजातः, वर्गत्रयेणउत्तमः, चतुर्वर्गेषु गोपुरः, पंचवर्गेषु सिंहासनं।षड्वर्गेषु पारावतः, सप्तवर्गेषु देवलोकः,अष्टमवर्गेषु ब्रह्मलोकः नववर्गेषु शक्रवाहनम् (ऐरावतः) सर्वेषु (दशवर्गेषु) श्रीधाम इति संज्ञा भवन्ति।

यदा ग्रहः पारिजातांशस्थो भवेत्तदा जातकः शुभगुणयुक्तो मानी स्वस्थः सुखी शक्तिमान् उत्तमांशस्थग्रहेण जातकः विनयी पदुः व्यवहारदक्षः, गोपुरांशस्थग्रहेण जातकः कुशाग्रबुद्धिः भूसम्पत्तिवानैश्वर्ययुक्तः गोधनी, सिंहासनस्थग्रहेण जातकः नृपो नृपमित्रं वा पारावतांशस्थग्रहेण जातकः गजादिराजचिह्नसम्पन्नः देवलोकांशस्थग्रहेणजातकः विश्वप्रसिद्धनृपः, ऐतावतांशस्थग्रहेण जातकः चक्रवर्ती राजा, श्रीधामांशस्थग्रहेण जातकः धनधान्यसौभग्य पुत्रादिभिः पूरिपूर्णो भवति।

द्विवर्गैक्ये पारिजातयोस्तज्जो धनीभवेत् त्रिवर्गैक्य उत्तमः श्रीश्चतुवर्गैस्तु गोपुरः।।
सिंहासनःपञ्चवर्गैयोगस्तज्जोनृपो भवेत। षड्वर्गैक्ये पारावतयोगोऽत्र शास्त्रविन्नरः।।
सप्ताष्टैक्येदेवलोकयोगस्तज्जःसुदो नृपःनववर्गैक्य ऐरावतयोगोऽत्र सार्वभौमकः।।
दिग्वर्गैक्ये वैशिषिको योगोऽस्मिन्बुद्धिमान्नरः।।जा.पा.१/पृ.२४।।

### ग्रहाणां क्रूरादिसंज्ञाः

क्रूरग्रहोऽर्क कूजसूर्यजौच पापौ शुभाः शुक्रशशङ्क जीवाः।
सौम्यस्तु सौम्यो व्यतिमिश्रितोऽयैवर्णैः स्वतुल्य प्रतिमत्वमेति।
।।वृ.य.जा. संग्रहाध्यायः/१४।।

यदा चन्द्रः क्षीणो भवेत्तदा चन्द्रस्य पापसंज्ञा भवति। चान्द्रमासानुसारेण शुक्लप्रतिपदारभ्य शुक्लदशमी पर्यन्तं चन्द्रोमध्यमबलयुक्तः शुक्लएकादशी आरभ्य कृष्णपञ्चमी पर्यन्तं चन्द्रः पूर्णबली एवं शेषतिथिषु चन्द्रः क्षीणबली भवति। अस्य क्षीणबली संज्ञा चन्द्रस्य पापसंज्ञा कथिता।

मासेतु शुक्लप्रतिपत्प्रवृत्ततः पूर्णः शशीमध्यबलो दशाहे श्रेष्ठो द्वितीयेऽल्पबलस्तृतीये सौम्यस्य दृष्टो बलवान्सदैव।

प्रायो बुधः शुभो मन्यते किन्तु येन ग्रहेण सहबुधो भवेत्तदनुसारेण तस्य संज्ञा भवति।

### ग्रहाणां दिशा।

प्रागादिका भानुसितारराहुमन्देन्दुविद देवपुरोहिताःस्युः।
शुक्रारचन्द्रज्ञसुरेज्यमन्दा वसन्तमुख्य त्वंधिया दुगाणैः।।जा.पा.२/२३।।

---

[९] विशेषार्थ परिशिष्टम्-०३ द्रष्टव्यम्।

[१०] विशेषार्थ परिशिष्टम्-०३ द्रष्टव्यम्।

[११] विशेषार्थ परिशिष्टम्-०३ द्रष्टव्यम्।

[१२] विशेषार्थ परिशिष्टम्-०३ द्रष्टव्यम्।

[१३] विशेषार्थ परिशिष्टम्-०३ द्रष्टव्यम्।

## परिशिष्टम्-०३

**सूर्यादिग्रहाणां क्रूरादिसंज्ञा:**

| क्रमांङ्क: | ग्रह: | क्रूर: |
|---|---|---|
| १ | सूर्य: | क्रूर: |
| २ | चन्द्र: | शुभ:[१४] |
| ३ | मङ्गल: | पाप: |
| ४ | बुध: | शुभ:[१५] |
| ५ | गुरु: | शुभ: |
| ६ | शुक्र: | शुभ: |
| ७ | शनैश्चर: | पाप: |
| ८ | राहु: | पाप: |
| ९ | केतु: | पाप: |

**ग्रहाणां अग्नादिस्वामीनामानि।**

बह्न्यम्बुशिखिजा विष्णुर्विडौजशचिकाद्विज।
सूर्यादीनां खगानाञ्च नाथा: ज्ञेया क्रमेण च।।बृ.पा.हो.शा.३/७।।

**ग्रहाणां दिशा।**
प्रागादिका भानुसिताकरराहुमन्देन्दुविद्देवपुरोहिता:स्यु:।
शुक्रारचन्द्रज्ञसुरेज्यमन्दा वसन्तमुख्य र्त्वधिया दृगाणै:।।जा.पा.२/२३।।
**ग्रहाणां पुरुषादि संज्ञा:।**
क्लीबौ द्वौ सौम्यसौरी च युवतीन्दुभृगुर्द्विज।
नरा: शेषास्य विज्ञेया भानुभौमो गुरुस्तथा।। बृ.पा.हो.शा.३/८।।
**ग्रहाणां पापादिसंज्ञा/ तत्त्वानुसारेण स्वामीविचार:।**
क्षीणेन्द्वर्ककुजाहिकेतुरविजा: पापा: सपापश्च वित्
क्लीवा: केतु बुधर्कजा: शशितम: शुक्रा: स्त्रियोऽन्येनरा:।।
रुद्राम्बागुहविष्णुधातृकमलकालह्यजा देवता:
सूर्यादग्नि जलाग्नि भूमिखपयोवाय्वात्मका: स्युर्ग्रहा:।।फ.दी.२/२७।।

---

[१४] क्रूरग्रहोऽर्क कूजसूर्यजौच पापौ शुभा: शुक्रशशङ्क जीवा:।
सौम्यस्तु सौम्यो व्यतिमिश्रितोऽयैवर्णै: स्वतुल्य प्रतिमत्वमेति। १४ श्लो.संग्रहाध्याय: वृ.य.जा.
यदा चन्द्र: क्षीणो भवेत्तदा चन्द्रस्य पापसंज्ञा भवति।
चान्द्रमासानुसारेण शुक्र प्रतिपदारभ्य शुक्ल दशमी पर्यन्तम् चन्द्रो मध्यमबलयुक्त: शुक्लएकादशीमारभ्य कृष्णपञ्चमी पर्यन्तं चन्द्र: पूर्णबली एवं शेष तिथिषुचन्द्र: क्षीणबली भवति। अस्य क्षीणबली संज्ञा चन्द्रस्य पापसंज्ञा कथिता।
मासेतु शुक्लप्रतिपत्प्रवृत्तत: पूर्ण: शशीमध्यबलो दशाहे श्रेष्ठो द्वितीयेऽल्पबलस्तृतीये सौम्यस्य दृष्टो बलवान्सदैव।

[१५] प्रायो बुध: शुभो मन्यते किन्तु येन ग्रहेणसहबुधो भवेत् तदनुसारेण तस्य संज्ञा भवति।
ग्रहाणां गुणा: चन्द्रसूर्य गुरुसौम्या भृग्वारशनयो द्विज। सत्वंरजस्तम इति स्वभावो ज्ञायते क्रमात्।

## परिशिष्टम्-०३

ग्रहाणां दिशापुरुषादिसंज्ञाचक्रम्।

| ग्रहः | दिशाः | पुरुष/स्त्री | तत्त्वानुसार देवता |
|---|---|---|---|
| सूर्यः | पूर्वा | पुरुषः | रुद्रः |
| चन्द्रः | वायव्य | स्त्री | देवी (लक्ष्मी) |
| मङ्गलः | दक्षिणा | पुरुषः | कार्तिकः |
| बुधः | उत्तरा | नपुंसकः | विष्णुः |
| गुरुः | ईशान | पुरुषः | ब्रह्मा |
| शुक्रः | अग्नि | स्त्री | देवी (लक्ष्मी) |
| शनैश्चरः | पश्चिमा | नपुंसकः | यमः |
| राहुः | नैऋत्य | - | शेषनागः |
| केतुः | - | - | ब्रह्मा |

**ग्रहाणामयनादिस्वामित्वम्।**

अयनक्षणवासरर्तुमासपक्षसमा द्विज।
सूर्यादीनां क्रमाज्ज्ञेया निर्विशङ्कं द्विजोत्तमम्।।बृ.पा.हो.शा.३/२२।।

**ग्रहाणां अस्थ्यादि स्वामित्वम्।**

अस्थिरक्तस्तथा मज्जा त्वक्तसावीर्यस्नायवः।
तासामीशा क्रमेणोक्ता ज्ञेयाः सूर्यादयो द्विज।।बृ.पा.हो.शा.३/२०।।

**ग्रहाणां नृपादि संज्ञाः।**

राजानौभानुहिमगू नेता ज्ञेयो धरात्मजः।
बुधो राजकुमारश्च सचिवौ गुरुभार्गवौ।।बृ.पा.हो.शा.३/३।।

**ग्रहाणां वर्णसंज्ञाः।**

रक्तश्यामो दिवाधीशो गौरगात्रो निशाकरः।
अत्युच्चाङ्गो रक्तभौमो दूर्वाश्यामो बुधस्तथा।
गौरगात्रो गुरुर्ज्ञेयः शुक्रः श्यामस्तथैव च।
कृष्णदेहो रवेः पुत्रो ज्ञायते द्विजसत्वमः।।बृ.पा.हो.शा.३/५तः६।।
वर्णास्ताम्रसितारक्तहरितापीतकर्बुराः।
कृष्णाकान्तिरिनादीनां नष्टादौ च प्रकीर्तताः।।जा.पा.२/१९।।

**ग्रहाणां विप्रादिसंज्ञाः।**

गुरुशुक्रौ विप्रवर्णौ कुजार्कौ क्षत्रियौ द्विज।
शशिसौम्यौ वैश्यवर्णौ शनिः शूद्रौ द्विजोत्तम।।

## परिशिष्टम्-०३

राहुचाण्डालजातिश्च केतुर्जात्यन्तरस्तथा।।बृ.पा.हो.शा.३/१०,३०।।
शुक्र: शुक्रस्य नेत्रं च चन्द्रमा मनस्तथा।
आत्मा वै दिनकृत्तत्र जीवो जीवित सौख्यद:।।
क्रोध: पराक्रमो भौमो बुधो बालत्वधीमत:।
शनिदु:खप्रदो ज्ञेय: राहुरैश्वर्य प्रदायक:।।बृ.पा.हो.शा.१६/१७त:१८।।

| ग्रहा: | स्वामी | शरीरेआधिपत्य | स्वामी | नृपादि | वर्णम् | जातिवर्णम् |
|---|---|---|---|---|---|---|
| सूर्य: | अयन | अस्थि | आत्मा | नृप: | रक्तश्याम् | क्षत्रिय: |
| चन्द्र: | क्षण (मुहूर्त:) | रक्ता: | मन: | नृप:/नृपपत्नीव | गौरवर्णम् | वैश्य |
| मङ्गल: | वासर (दिनस्य) | मज्जा | सत्वम् (पराक्रम:) | सेनापति:/नेता | रक्तवर्णम् | क्षत्रिय: |
| बुध: | ऋतु | त्वक् (चर्म) | वाणी | राजकुमार: | दुर्वासदृशश्यामवर्णम् | वैश्य: |
| गुरु: | मास | वसा | ज्ञान | मन्त्री | गौरवर्णम् | विप्र: |
| शुक्र: | पक्ष | वीर्य | सुखम्/बलम् | मन्त्री | श्याम्वर्णम् | विप्र: |
| शनैश्चर: | वर्ष | स्नायव: (शिरा:) | दु:ख | दास/दूत | कृष्णवर्णम् | शूद्र: |
| राहु: | — | — | — | सैन्य | — | चाण्डाल: |
| केतु: | — | — | — | सैन्य | — | वर्णशङ्कर: |

### सूर्यस्यापरनामानि

सूर: सूर्योऽयर्मा आदित्यो द्वादशात्मा (=द्वादशात्मन्) दिवाकरो भास्करोऽहस्करो ब्रध्न: प्रभाकर: विभाकरो भास्वान् (=भास्वत:) विवस्वान् (=विवस्वत्) सप्ताश्वो हरिदश्व उष्णरश्मिर्विकर्तनोऽर्को मार्तण्डो मिहिरोऽरुण: पूषा द्युमणिस्तरणिर्मित्रश्चित्रभानुर्विरोचनो विभावसुर्ग्रहपति: त्विपांपतिरहर्पति: भानुर्हंस: सहस्रांशुस्तपन: सविता (सवितृ) रवि: पद्माक्षस्तेजसांराशि: छायानाथस्तमिस्रहा (=तमिस्रहन्) जगच्चक्षु:( = जगच्चक्षुस्) लोकबनधुर्त्रयीतनु: प्रद्योतनो दिनमणि र्खद्योतर्लोकबान्धव इनो भगो धामनिधिरंशुमाली (=अंशुमालिन्) अब्जनीपति: (अम.को.१/३/२८त:४१) पद्मासन: पद्माकर: पद्मगर्भसमद्यूतरथसंयुक्तो द्विभुज: काश्यपेय: महद्युतिस्तमोरि सर्वपापघ्नो हिरण्मयवपु: शीघ्रगस्त्वष्टा हेलिस्तेजोनिधिर्हरिर्दिननाथो दिनकर: सप्तसप्तिर्विभावसुर्वेदकर्ता वेदाङ्गो वेदवाहन: कालवक्त: कर्मसाक्षीन् जगत्पत्ति: पद्मिनीबोधको करुणाकरो विश्वकर्मा लोहिताङ्गस्तमोनुदो जगन्नाथोऽरविन्दाक्ष: कालात्मा कश्यपात्मजो भूताश्रयो ग्रहपतिर्जपाकुसुमसङ्काशोऽदितिनन्दनो ध्वान्तेभसिंह: सर्वात्मा लोकनेत्रो विकर्तनो मार्तण्डस्तपनो लोकतापनो जगत्कर्ता जगत्साक्षी शनैश्चरपिता जय: सहस्ररश्मिराादिदेवर्धन्वन्तरिर्व्याधिहर्ता दद्रुकुष्ठबिनाशकश्चराचरात्मा मैत्रेयोऽमितर्विष्णुर्विकर्तनो लोकशोकापहर्ता कमलाकर: आत्मभूर्नारायणो रुद्र ईश्वरो जीवात्मा परमात्मा सूक्ष्मात्मा सर्वतोमुख इन्द्रोऽनलो यमो निऋति: वरुणोऽनिल: श्रीद ईन्दु र्भौम: सोर्म्ये गुरु: कवि: शौरिर्विधुन्तुद: केतुर्विभु: सर्वदेवमय: कृष्ण: कामप्रदायक: भानुमान् (श्रीभविष्यपुरणोक्त नामानि)।

### चन्द्रस्यापरनामानि ।

हिमांशु: चन्द्रमा:(=चन्द्रमस्) चन्द्र: इन्दु: कुमुदबान्धव: विधु: सुधांशु: शुभ्रांशु: ओषधीश: निशापति: अब्ज: जैवातृक: सोम: ग्लौ: मृगाङ्क: कलानिधि: द्विजराज: शशधर: नक्षत्रेश: क्षपाकर: (अम.को.१/३/१३) सुधाकर: कुमुदप्रियो लोकप्रिय: शुभ्रभानु: रोहिणीपति: शशी, हिमकरो द्विजराजो

निशाकर: आत्रेय शीतांशु: रमाभ्राता क्षीरोदार्णवसम्भवो नक्षत्रनायक: शम्भुशिरश्चूडामणिर्विभुस्तापहर्ता नमोदीपो शम्भोर्मुकुटभूषणश्चन्द्र: श्वेत: श्वेताम्बरधरो दृढाश्व: श्वेतभूषण: (बृ.र.पृ.५३३)।

**मङ्गलस्यअपरनामानि ।**

अङ्गकारक: कुज: भौमो लोहिताङगो महीसुत: (अम.को.१/३/२५) शक्तिधरो धरासुत: कुमारो मङगलो महाकायो धनप्रद:, ऋणहर्ता दृष्टिकर्ता रोगकृत् रोगनाशको विद्युत्प्रभो व्रणकर: कामदो धनहृत् सामगानप्रियो रक्तवस्त्रो रक्तामलक्षणो लोहितो रक्तवर्ण: सर्वकर्मावबोधको रक्तमालाधरो हैमकुण्डलो ग्रहनायको भूमिनन्दनो भूमिपुत्रो धनप्रद: स्थिरासन: सर्वकर्मविरोधको लोहितो लोहिताक्ष: सामगानां कृपाकरो धरात्मजो भूतिदो यम: सर्वरोगोपहारको वृष्टिकर्ता वृष्टिहर्ता सर्वकामफलप्रद: आरो वक्र: क्षितिजो रुधिर: क्रूरनेत्र: कुमार:धरणीगर्भसम्भूतो विद्युत्कान्तिसमप्रभ: शक्तिहस्तो भौमजो ऽतिवक्रो दुराराध्य:(श्रीस्कन्दपुराणोक्तगुरुनामङ्गलनामानि बृ.र.पृ.५३४-३५)।

**बुधस्यापरनामानि ।**

रौहिणेय: बुध: सौम्यो (अम.को.१/३/२६) बुध: बुद्धिमतां श्रेष्ठ: बुद्धिदाता धनप्रद: प्रियङ्गुकलिकाश्याम: कञ्जनेत्रो मनोहर: ग्रहोपम: रौहिणेय: नक्षत्रेश: दयाकर: विरुद्धकार्यहन्ता सौम्यो बुद्धिवर्धन:चन्द्रात्मजो विष्णुरुपिन् ज्ञानी ज्ञ: ज्ञानिनायक: ग्रहपीडाहर: सौम्यमूर्ति: गुणद: गुणिवत्सल: सौम्यो (पद्मपुराणोक्त:, बृ.र.पृ.५३६)।

**गुरोरपरनामानि।**

बृहस्पति: सुराचार्य: गीर्पति: धिषण: गुरु: जीव: आङ्गिरस: वाचस्पति: चित्रशिखण्डिज: (अम.को.१/३/२४) विदांबरो वागीशो दीर्घश्मश्रु: पीताम्बर: सुधादृष्टिर्ग्रहाधीशो ग्रहपीडापहारको दयाकर: सौम्यमूर्ति: सुराच्र्य: कुड्मलद्युतिर्लोकपूज्यो लोकगुरु र्नीतिज्ञर्नीतिकारकस्तारापति: वेदवैद्यपितामहो वाक्पतिर्विश्वात्मर्वो देवमन्त्री(श्रीस्कन्दपुराणोक्त-गुरुर्नामानि बृ.र.पृ.५३७)।

**शुक्रस्यापरनामानि ।**

शुक्र: दैत्यगुरु: काव्य: उशनस् भार्गवो कवि:(अम.को.१/३/२५) भर्ग: श्रुतिस्मृतिविशारदो दण्डी कमण्डलुधरो भृगुनन्दनो हिमकुन्दमृणालाभ: शुक्ररेता शुक्लाम्बरधर: सुधीर्हिमाभ:कुन्तधवल:शुभ्रांशु: शुक्लभूषणर्नीतिज्ञर्नीतिकृन्नीतिमार्गगामी ग्रहाधिप वेदवेदाङ्गपारग:आत्मवित् करुणासिन्धुर्ज्ञानगम्य:सुखप्रद:।(श्रीस्कन्दपुराणोक्तसुक्रस्यनामानि शा.र.पृ.२०)।

**शनैश्चरस्यापरनामानि ।**

सौरि: शनैश्चर:(अम.को.१/३/२६) दण्डी नीलद्युति: शूली गृध्रवाहनो बाणहस्त: कोणो नीलाञ्जनप्रख्यो मन्दचेष्टाप्रसारि छायामार्तण्डसम्भूत: शनि: मन्दसंज्ञ: यज्ञसंज्ञो विभुरन्तको रौद्रदेहो बभ्रुवाहन भास्करनन्दन: सूर्यज: पिङ्गलो मन्दो रौद्रो यम: कोणस्थो बभ्रुर्भास्करि: छायासुत: कोटराक्ष:शितिकण्ठनिर्भे भीषणो बलिमुख: संवर्तको भयदो ग्रहराजो मन्दगति: कृष्ण: शुष्कोदरो विशालाक्षो दुर्निरीक्ष्यो विभीषणो नीलच्छाया कालदृष्टि: स्थूलरोमा बलीमुखो दीर्घ: निर्मांसगात्र: शुष्को घोरो भयानकोनीलांशु: क्रोधनो

दीर्घश्मश्रुर्जटाधरो खञ्जोऽतृप्तः संवर्तको यमो कराली श्यामलाङ्गःछायासुतः क्रूरकर्मविधाता सर्वकर्मावरोधको ग्रहपीडाहरः स्थिरासनः स्थिरगति र्महाकायो महाबलो महाकालः कालात्मा कालकालकः आदिभयदाता मृत्युस्त्रयोदशीतिथिप्रिय स्तिथ्यात्मा शमीपुष्पप्रियो नीलवासा नीलाञ्जनचयः छविःसर्वरोगहरो तिथिगणः(श्रीभविष्यपुरणोक्त नामानि)।

**राहोरपरनामानि ।**

तमःराहुःस्वर्भानुः सैहिकेयो विधुंतुदः(अम.को.१/३/२६) दानवमन्त्री सिंहिकासुतः सिंहिकाचित्तनन्दनोऽर्धकार्यः सदाक्रोधी चन्द्रादित्यविभर्दनो रौद्रो रुद्रप्रियो दैत्यः स्वर्भानुर्भानुभीतिदो ग्रहराजः सुधापायीन् राकातिथ्यभिलाषकः कालदृष्टि कालरुपः श्रीकण्ठ हृदयाश्रयः घोररुपो महाबलो नीलाम्बरो लोकवन्दितो ऽर्धशरीरवान् करालास्यः शूलपाणिः कण्ठिनांघ्रिको भुजङ्गेशो नीलमाल्याम्बरधरो मन्त्री विकटो जाड्याहा भीषणाकृतिर्नीलचन्दनभूषणः। (श्रीस्कन्दपुराणोक्त-केतुनामानि बृ.र.पृ.५४१-५४२)।

**केतोरपरनामानि।**

केतुः शिखिः ध्वजः(अम.को.३/३/६०) कालः कलयिता धूम्रकेतुर्विवर्णको लोककेतुर्महाकेतुः सर्वकेतुर्भयप्र्रो रौद्रो रुद्रप्रियो रुद्रः क्रूरकर्मा सुगन्धधृक् पलालधूमसङ्काशश्चित्र-ायज्ञोपवीतधृक् तारागणविमर्दी जैमिनेयो ग्रहाधिपो घोरस्तारकाग्रहमस्तकः (श्रीस्कन्दपुराणोक्त-केतुनामानि बृ.र.पृ.५४२)।

**ज्योतिग्रन्थे सूर्यादिग्रहाणां नामानि।**

सूर्यो हेलिर्भानुमान्दीप्तरश्मिश्चण्डांशुःस्याद्भास्करोहस्करश्च।
अब्जःसोमश्चन्द्रमाः शीतरश्मिः शीतांशुः स्यात् ग्लौर्मृगाङ्कः कलेशः।।
आरोवक्रश्चावनेयः कुजः स्याद्भौमः क्रूरो लोहिताङ्गोथ पापी।
विंज्ञः सौम्यो बोधनश्चन्द्रपुत्रश्चान्द्रिः शान्तः श्यामगात्रोतिदीर्घः।।
जीवोङ्गिरा देवगुरुः प्रशान्तो वाचांपतीज्यत्रिदिवेशवंद्याः।
भृगूशनोभार्गवसूनवोच्छः काणः कविर्दैत्यगुरुः सितश्च।।
छयात्मजः पङ्गुयमार्कपुत्राः कोणोसितः शौरिशनी च नीलः।
क्रूरःकृशाङ्गःकपिलाक्षदीर्घो तमोऽसुरश्चेत्यगुसैंहिकेयौ।
राहुःसुवर्भनुविधुन्तुदौ स्यात्केतुः शिखि स्याद्द्वजनामधेयः।।
ज्यो.श्या.सं.१२/३तः।

**सूर्यस्यकारकत्त्वम्।**

आत्मा शक्तिरतितीक्ष्णदुर्गः श्रेष्ठबलमुष्णता प्रभावोऽग्निः शिवाराधनं धैर्य शूलवृक्षाणिर्राज्याश्रयः कटुरसो वृद्धत्वं पशुर्दुष्टस्वभार्वे भूमिः पिता रुचिर्ज्ञानं (आत्मसाक्षात्कारः) भीरुसंमतिर्मनुष्यलोकश्चतुष्कोणाकृतिरस्थिः प्रतापस्तृणमुत्साहो वनमर्धवर्षं गिरिभ्रमणं चतुष्पादपशु र्नृपो यात्रा व्यवहारः पित्तप्रकृति उग्रता वृत्ताकृतिः सुराष्ट्रदेशस्याधिपत्यं भूषणं सीरः मस्तकशूलं मौतिक्तम् पूर्वदिशा ह्रस्वस्वरूपं ताम्रं रुधिरं (रक्तः) रक्तवस्त्रं पाषाणं शिल्पी नदीतीरं प्रवालो मध्याह्नबली दीर्घक्रोधत्वं रक्तचन्दनं स्थूलशरीरो रिपुग्राहो दक्षिणनेत्रं शुभफलं (स्वस्य) वनपर्वतयात्रा सूर्यस्य कारकाणि सन्ति।
उ.का.५/२३-२५

**चन्द्रस्यकारकत्त्वम्।**

बुद्धिः पुष्पं (श्वेत) सुगन्धितपदार्थो दुर्गगमनं रोगः (क्षयादि) ब्राह्मणवर्णः प्रमादः कफप्रकृतिर्मूर्च्छारोगः कामलादिरोगा मानसिकपरितापो हृदयं स्त्री पुण्यंपापमाम्लकपदार्थो निद्रा सुखं रजतं स्थूलइक्षुदण्ड:शीतज्वरं यात्रा कूपस्तडागो माता समदृष्टिर्मध्यो मौतिक्तं श्वेतवर्णः कटिसूत्रं कांस्यधातुर्लवणं लघुस्वरुपं (शरीरस्य) मनश्चञ्चलस्वभावो वज्रं (श्वेतवर्णकारणेन) मूहुर्तं मुखकान्ति उदरं वापी शरदऋतुर्गौरीआराधना मधु प्रसादः परिहासः पुष्टिः गोधूमः शीघ्रगतिर्दधिप्रीतिस्तश्पश्चर्या (मनस:एकाग्रतावशात् सिद्धिः वा असिद्धिविचार:) यशो लावण्यं (मृदुता) रात्रीबली पश्चिमाभिमुखं कार्यप्राप्तिः प्रीतिः नवरत्नानि मध्यमायुः भोजनपेयादिविचारो दूरप्रदेशगमनं (परदेशनिवास:) स्कन्धव्याधिः सुरक्तं सुशक्तिर्जलोत्पन्नमत्स्यादिपदार्थाः सर्पः मृदुवस्त्रं सुभाग्योदय आकर्षकपदार्थाः स्फटिकं रक्तविकारो वीर्यं (जलाधिक्यप्रभावात् द्रवितस्वरूपकारणात् ) वामनेत्रं समुद्रस्नानं फलं पुष्पं गौर्लवणयुक्तपदार्था विद्वत्ता प्रत्यग्दिक्प्रीति र्नवरत्नानि मध्यमायुश्चन्द्रस्य करकाणि सन्ति। उ.का.५/२६-२९।

**मङ्गलस्य कारकत्वम्।**

ज्ञातिबन्धु औदार्यं शौर्यं भूमिर्बलं शस्त्रधारणं (युद्धार्थ) राज्यं वीर्यक्षयः (शक्तिक्षयः) चौर्यं युद्धं विरोधः शत्रूरक्तवस्तु वाटिकस्वामीत्वं तूर्यरवः प्रीतिः पशुर्नृपे मूर्खः क्रोधो विदेशगमनं धैर्यं अग्निर्वाग्युद्धं पित्तप्रकृतीराज्यसेवा दिनं व्यौमेक्षणं ह्रस्वरूपं रोगो विख्यातिस्त्रपुर्खडगः कुन्तं (शस्त्र) मन्त्री क्षतिग्रस्तमङ्गं मणिः कार्तिकस्वामीयजनं युवावस्था (यौवनं) कटुरसो नृपसभा प्रतिबन्धकं मृण्मयसाधनानि मांसभक्षणं परदोषः शत्रुपराजयस्तिक्तरसो रात्रिबली सुवर्णो ग्रीष्मऋतुः पराक्रमं शत्रुबलं गाभीर्यं शूरत्वं शीलं ब्रह्मो वनेचरत्वं ग्रामाध्यक्षो मूत्रकृच्छरोगः सुवर्णकारो दुष्टता अग्निदग्धस्थानं सुरुचिभोजनं धनं विद्या निपूणत्वं रक्तं ताम्रं विचित्रवस्त्रं दक्षिणदिशाभिमुखं दक्षिणादिक् कामः क्रोधः परापवादः सेनापतिर्युद्धशस्त्राणि वृक्षः सामवेदः सहोदरः क्षेत्रं दण्डाधिकारित्वमन्यस्त्रीरतिकायम् मङ्गलस्य कारकाणि सन्ति । उ.का.५/३०-३३

**बुधस्यकारकत्वम्।**

विद्या अश्वः कोशो गणितं ज्ञानं वाणीं ब्राह्मणवर्णो लेखनकार्यं नूतनवस्त्रं विशालगृहं (प्रासाद:) हरितवर्णः शिल्पं ज्यौतिषविद्या तीर्थयात्रा धार्मिकप्रवचनं देवालयो वाणिज्यकर्म सुन्दराभूषणं मृदुवचनं वेदान्तो मातामहो दु:स्वप्नं नपुंसकत्वमुत्तराभिमुखं त्वचा आर्द्रता कांस्यधातुः (त्रपु:) वैराग्यं भिषकः (वैद्य/डॉ/चिकित्सक:) कण्ठ आभिचारिकाक्रिया (मन्त्रप्रभाव:) शिशु स्तिर्यक्दृष्टिः स्वर्गः विनयो जातिर्भयं नृत्यं भक्तिः परिहासः प्रभातेबली हेमन्तऋतुर्मन:संयमो नाभिः सगोत्रजनावृद्धिः शूद्रः पक्षी सहोदरो भाषानैपुण्यत्वम् कर्मकाण्डोऽथर्ववेद रजो (पांशु:) नगरद्वारम् वाटिका गुह्याङ्गम् समप्रकृतिः (समदर्शी) व्याकरणशास्त्रज्ञत्वम् रत्नज्ञम् (परीक्षक:) विद्वत्ता मातुलसुखम् मन्त्रो यन्त्रं भगिनीपुत्रो विष्णोराराधना उत्कृष्टवाक्शकितर्बुधस्य कारकाणि सन्ति। उ.का.५/३४-३७

**गुरोः कारकत्वम्।**

ब्राह्मणो गुरुः (शिक्षक:) कर्तव्यं रथो गौः सैनिका मीमांसा निधिर्गुप्तधनमश्वो दधिर्बृहत्तगात्रं स्थूलशरीरं प्रतापो वेदान्तः पितामह आदिगुरुः प्रासादो ज्येष्ठभ्राता नृपः शिशरऋतुः क्रोधो रत्नपरीक्षको देहारोग्यं

नृपसन्मानमुरुप्रदेशो देवता तपो दानं धर्मो परोपकार: समदृष्टि उत्तराभिमुखम् वृत्तं पीतवणत्वं मित्रं वक्तव्यं मेद: सामान्य (मध्यमश्रेणी) वस्त्रम् नूतनगृहसुखम् वृद्धत्वम् मन्त्रम् तीर्थस्थानं जानु: स्वर्गारोणं धारणात्मिकाबुद्धि: विशिष्टज्ञानं काव्यं गोपुर: (मुख्यद्वारम्) सभासन्मोद सिंहासनं ब्रह्मस्थापनं (ब्रह्माप्रतिष्ठा) सर्वकालबलं (नित्यशक्ति) वैडूर्यरत्नम् मधुररस: सत्यं सुखं दु:खं सुवर्णभूषणनिर्माणं वातप्रकृति: कफप्रकृति: पुष्यराग: (गुरुरत्नं) वेद (श्रुति:) मृदु पाषाणं शिवपूजनं धार्मिकवृत्ति: (धर्मनिष्ठा) उत्तमयानेयात्रासुखं न्यायशिक्षा (न्यायशास्त्रम्) इन्द्रियनिग्रह: पतिसुखं ग्रामचारीत्वं परेङ्गितत्वं (परचेष्टाज्ञानं) गुरो: कारकाणि सन्ति। उ.का.३८-४१

**शुक्रस्यकारकत्वम्।**

श्वेतछत्रं सुचामरं सुन्दरवस्त्रमं विवाहो आय: स्त्री मनुष्य: ब्राह्मण: शुभं श्वेतवर्णं पत्नीसुखं (कलत्र) मैथुनसुखं ह्रस्वस्वरूपं (वामनस्वरूपं) आम्लपदार्थ: पुष्पमाज्ञा कीर्ति:यौवनत्वं गर्व: (अहङ्कार:) यानं (वाहनं) रजतं आग्नेयदिक्स्वामी तिर्यक्दृष्टीरजोगुण: दृढ: मौतिक्तं यजुर्वेदस्वामी (शाखेश:) सुन्दरपदार्थक्रयविक्रयक्रिया स्नेहवार्ता जलस्थानं हस्तिरश्व: काव्यं नृत्यं युवावस्था गीतं विविधभोगसुखं स्त्रीसुखं मणिर्हास्यप्रियत्वं भृत्यं भाग्यं सुकुमारत्वं राज्यसुखं सुगन्धिपदार्था वीणासङ्गीतादिवाद्ययन्त्राणि सुन्दरगमनं (चारुगमनं) समस्तैश्वर्यं सुन्दराङ्गमल्पभोजनं वसन्तऋतु र्बहुस्त्रीसमूह: पूर्वाभिमुखं नेत्रं सत्यवचनं कलाज्ञत्वं वीर्यं (पौरुषत्वम्) गाम्भीर्यं कामक्रिडारतत्वं कामासक्तत्वं राज्यमुद्रा स्वामी लक्ष्मीपूजा कृष्णकेशं सुन्दरगुह्याङ्गत्वं रहस्यवार्ता रतिस्थानं(शय्यां) मध्याह्नसमय: प्रभूत्वं जलक्रीडा देवीआराधना नागलोकविचार: शुक्रस्य कारकाणि सन्ति। उ.का.४२-४५

**शनैश्चरस्य कारकत्वम्।**

प्रमाद: प्रतिबन्धकत्वमश्वर्हस्तिश्चर्मायो रोगोऽधिककष्टं विरोधो दु:खं मरणं/मरणसूतकं स्त्रीसुखं दासी गर्दभश्चाण्डालो विकृताङ्गत्वं वनेचरत्वं भयङ्करमुखाकृति: (दुर्मखं) दानं स्वामीत्वमायु: नपुंसकत्वमन्त्यज: दासत्वमधार्मिककृत्यं पौरुषहीनत्वं (परक्रमहीनत्वं) मिथ्याभाषणं चिरकालीनवायुर्वृद्धत्वृं स्नायव: शीरा दिनान्तान्तिभागेबलयुक्त: शिशिरऋतु: क्रोध: परिश्रम: शठत्वं मलिनवस्त्रं दुष्टविचारो दुष्टसङ्ग:पापकर्म कृष्णवर्ण: क्रुरकर्म मलिनता भस्म: कृष्णधान्यं मणिर्लोहधातु: औदार्यं संवत्सर: शुद्र: पङ्गुता तीक्ष्णं (उग्रं) कम्बल: पश्चिमाभिमुखं सञ्जीवनोपाया अधोदृष्टि: कृषिकार्येण जीवननिर्वाहरायुधगृहं ईशानदिक्प्रियो नागलोक: पतनं युद्धं भ्रमणं (अष्णशीलत्वम्) शिल्पविद्या सीसकं नीरर्थकशक्तिव्ययो यानं जीर्णतैलं काष्ठं विप्र स्तमोगुणो विषं भूसञ्चार: काठिन्यम् (कठोरता) भीरुस्वभावो दीर्घनिषाद: सार्वभौमत्वं भयं छाग: (अजादिपशव:) रतिक्रिया वस्त्रादिश्रृङ्गारपदार्था यमपूजक: श्वानस्तस्करो बंधन (कारागारअवस्था) अन्यकुल विद्यासम्पादनं त्रयोऽग्नयो पतितत्वं दीर्घविषादो विकृतकेशा:
चित्तकाठिन्यमित्यादि शनैश्चरस्य कारकाणि सन्ति। उ.का.५/४६-५०

**राहुकारकत्वम्।**

यात्राकाल: सर्पो रात्री द्युतक्रिया नष्टगतवस्तुपदार्था: छत्रं चामरो राज्यमन्त्यज: पापस्त्री अधार्मिकमानवा द्युतक्रिया दुष्टस्त्रीगमनविचारो विदेशगमनमशौचत्वमस्थिर्नीचजनसङ्गविचार: पर्वत: कष्टं

नैऋत्यकोणस्वामी वायुकफपीडा गुप्तधनं वृद्धत्वम् यानं क्षयरोगमरण्यं दुर्गापूजनं कठोरवाक् कमलादिरोगा राहो: कारकाणि सन्ति। उ.का.५/५१-५२

**केतुकारकत्वम्।**

चंडी-दुर्गायजनं चिकित्सक: (वैद्य-डॉ.) श्वान: कुक्कुट: मोक्ष ऐश्वर्यं क्षयरोगो ज्वरो गङ्गास्नानं महत्तपो वायुविकार: स्नेहो मन्त्रशास्त्रं ब्रह्मज्ञानं कुक्षि नैत्रदु:खमज्ञानता (जडत्वम्) व्रणश्चञ्चलत्वं कष्टकं (शूलं) मृग: मौनव्रतं वेदान्त: भाग्यं शत्रुपीडा अल्पभुक् वैराग्यं पितामह: क्षुधा उदरपीडा स्फोटरोग: श्रृङ्गयुक्तपशु: शिवकिकर: ध्वज: शूद्रवार्ता (गोष्ठि:) केतो: कारकाणि सन्ति । उ.का.५/५३–५४

**गुलिकादिउपग्रहाणामानयनप्रकार:।**

होराज्यौतिषे गणितागतगुलिकादिउपग्रहाणां स्वतन्त्ररूपेण विवरणं कृतं वर्तते। उपग्रहा: नवसन्तियथा

नमामिमान्दिं यमकष्टकाख्यमर्द्धप्रहारं भुवि कालसंज्ञम्।
धूमव्यतीपात परिध्यभिख्यानुपग्रहानिन्द्रधनुश्चकेतून्।।फ.दी.२५/१।।

गुलिक: (अर्थात् मान्दि:) यमकण्टक: अर्द्धप्रहार: काल: धूम: व्यतीपात: परिधि: इन्द्रधनुष: एवं उपकेतु:।

एते सर्वे उपग्रहा: गणितमाध्यमेनसिद्धिं प्राप्नुवन्ति। ज्यौतिषशास्त्रे गुलिकसिद्धयर्थं प्रथमं सूर्योदयादारभ्य सूर्यास्तपर्यन्तं यद् दिनमानं भवेत्तस्य अष्टौभागान् कृत्वा सप्तभागानां अधिपतय: सप्तवाराणां अधिपतय: भवन्ति। अष्टमभागस्य न कोऽपि स्वामिवर्तते, अत: तस्य भागस्य स्वामि गुलिक: (मान्दि:) निर्धारितो वर्तते। दिवसे प्रत्येकवारस्य आरम्भ: तस्यैवाधिपतिना भवति यथा रविवासरे प्रथमभागस्यअधिपति: सूर्य: द्वितीयस्य चंद्र इत्यादि क्रमेण अवबुद्धयते। प्रत्येक वासरे शनैश्चरस्य भागान्ते गुलिकाभाग: निर्धारित:। यथा रविवासरे अष्टमोभाग:, चन्द्रवासरे सप्तमोभाग:, मंगलवासरे षष्टभाग: सौम्यवासरे पञ्चमभाग:, गुरुवासरे चतुर्थभाग:, शुक्रवासरे तृतीयभाग:, शनिवासरे द्वितीयभाग: गुलिक: कथ्यते।

रात्रौ गुलिकानयनार्थं भिन्नगणनां वर्तते। यथा यस्यां रात्रौगुलिकानयनं करणीयं तस्या: रात्रे: य: वासरो भवेत्तस्मात् पञ्चमावाराधिपति: प्रथम भागस्य अधिपति वर्तते यथा रविवासरे रात्रौ प्रथमभागस्य अधिपतिगुरु:, द्वितीयस्य शुक्र: तृतीयस्य शनैश्चर:। रात्रौ प्रत्येकवासरे शनैश्चरस्य समाप्तिकाले (घट्यादिमानेन) यल्लग्नं राश्यादिमानं भवेत्तदेव स्पष्टगुलिकं मन्येत्।

गुलिकयेनग्रहणेयुक्तो भवेत्तद्ग्रहस्य कारकत्वं दूषिता करोति यथा गुंलिक: सूर्येणसह भवेत्तदा पिताकृते, चन्द्रेणसहमाताकृते मङ्गलेनसह भ्रातृ कृते अनिष्टफलदायको भवति। यदा बुधेन सह भवेत्तदा जातक: उन्मादयुक्तो बृहस्पतिनासह भवेत्तदा दाम्भिको शुक्रेणसह भवेत्तदरा नीचस्त्रीसङ्गी, शनिनासहभवेत्तदा महारोगी राहुणासह विषेणपीडिताङ्ग:, केतुना सह अग्निनापीडिताङ्गो भवति।

यदा गुलिक: त्याज्ययुते अर्थात् अश्विन्यादिनक्षत्राणां विषघटयां भवेत्तदा नृपगृहेजन्मजातोऽपि दरिद्रो भवति। यथा अश्विनीनक्षत्रस्य ५० त: ५४ घट्यां गुलिको भवेत्तदा जातको दरिद्रो भवति।

## परिशिष्टम्-०३

यस्मिन् भावे यमकण्टको भवेत्त तस्य भावस्य शुभफलस्य वृद्धिर्भवति। येन ग्रहेणसह यमकंटको भवेत्तस्य ग्रहस्य शुभफलस्य वृद्धिर्भवति। शास्त्रे यमकंटकस्य फल ब.हस्पति समानं मन्यते।

अप्रकाशाः सञ्चरन्ति धूमाद्याः पञ्चखेचराः
कवचित् कदाचित् दृश्यन्ते लोकोपद्रवहेतवे ।।फ.दी.२५/२७।।

अर्थात् धूमः व्यतीपातः परिवेषः (परिधिः) इन्द्रचापः उपकेतुः एते सर्वे उपग्रहाः आकाशे अदृश्यरूपेण सञ्चरन्ति। ते उपग्रहाः आकाशे कदाचित् अपि दृश्यन्ते। ते सर्वे उपग्रहाः लोकोपद्रवकारकाः मन्यन्ते। केचन् पुच्छयुक्त तारकं धूम इति कथयन्ति। उल्कापात समानं व्यतीपात पतनं मन्यते। सूर्यस्य चंद्रस्य वा परितः वृत्तं परिवेषः कथ्यते।

स्पष्ट सूर्यराश्यादिमाने राशि चतुष्टयं त्रयोदशांशाः एवं विंशतिकलानां योगेन स्पष्ट धूमोपग्रहः प्राप्यते। यदा द्वादशराशिमानात् स्पष्टधूमराश्यादिमानस्य न्यूनकरणेन व्यतीपातः लभ्यते। स्पष्ट व्यतीपात राश्यादिमाने राशिषट्कयोगकरणेन परिवेशोपग्रहः प्राप्यते। तस्यापरं नाम परिधिः। द्वादशराश्यादिमानात् स्पष्ट परिवेष राश्यादिमानस्य न्यूनकरणेन इन्द्रचापः सिद्धयति। स्पष्ट इन्द्रचाप राश्यादिमाने षेडशांशानां चत्वारिंशत् कलानां च मेलनेन उपकेतूपग्रहः प्राप्यते। उपकेतौ एकस्याः राशिः योगेन पुनः स्पष्टसूर्यः प्राप्यते।

यदा कस्यापि जातकस्य जन्मसमये सूर्यस्य राश्यादिमानं ०७।२६।१०।०० अस्ति तदा धूमादि उपलग्रहाणामानयन निम्नरीत्या भवन्ति।

| क्रमाङ्कः | ग्रहाः | योग चिह्नम् | राशिः | अशाः | कलाः | विकलाः |
|---|---|---|---|---|---|---|
| १ | सूर्यः | | ०७ | २६ | १० | ०० |
| २ | | योगः | ०४ | १३ | २० | ०० |
| ३ | | योगफलम् | १२ | ०९ | ३० | ०० |
| ४ | धूमः | | ०० | ०९ | ३० | ०० |
| ५ | | | १२ | ०० | ०० | ०० |
| ६ | | ऋणम् | ०० | ०९ | ३० | ०० |
| ७ | व्यतीपातः | ऋणफलम् | ११ | २० | ३० | ०० |
| ८ | | योगः | ०६ | ०० | ०० | ०० |
| ९ | परिवेषः | योगफलम् | ०५ | २० | ३० | ०० |
| १० | | | १२ | ०० | ०० | ०० |
| ११ | | | ०५ | २० | ३० | ०० |
| १२ | इन्द्रचापः | | ०६ | ०९ | ३० | ०० |
| १३ | | योगः | ०० | १६ | ४० | ०० |
| १४ | केतु/ शिखिः/ उपकेतु | | ०६ | २६ | १० | ०० |
| १५ | | | ०१ | ०० | ०० | ०० |
| १६ | स्पष्ट सूर्यः | | ०७ | २६ | १० | ०० |

## परिशिष्टम्-०३

रविवारादिशन्यंतं गुलिकादिनिरूप्यते। दिवसानष्टधाकृत्वा वारेशान्द्रणयेतक्रमात् ।।
अष्टमांशोनिरीश:स्यात्शन्यंशोगुलिक:स्मृत: ।रात्रिरप्यसृधाभक्तावारेशात्पञ्चमादित:।
गणवेदष्टम:खण्डो निष्पत्तिपरिकीर्तित: ।शन्यंशेगुलिक: प्रोक्त: गुर्वशेयमकण्टक:।।
भौमांशेमृत्युरादिष्ट: ख्यंशेकालसंज्ञक:। सौम्यांशेऽर्धप्रहर:।।ज्यो.कल्प.१७/१त:४।।

### दिने गुलिकादिउपग्रहाणां भागचक्रम्।

| | वार: | सूर्य: | चंद्र: | भौम: | बुध: | गुरु: | शुक्र: | शनैश्चर: |
|---|---|---|---|---|---|---|---|---|
| ग्रहभाग:(दिवा) | गुलिक: (मान्दि:) | ७ | ६ | ५ | ४ | ३ | २ | १ |
| | यमकंटक: | ५ | ४ | ३ | २ | १ | ७ | ६ |
| | मृत्यु: | ३ | २ | १ | ७ | ६ | ५ | ४ |
| | काल: | १ | ७ | ६ | ५ | ४ | ३ | २ |
| | अर्धप्रहर: | ४ | ३ | २ | १ | ७ | ६ | ५ |
| रात्रौ | | | | | | | | |
| | गुलिक: | ३ | २ | १ | ७ | ६ | ५ | ४ |
| | यमकंटक: | १ | ७ | ६ | ५ | ४ | ३ | २ |
| | मृत्यु: | ६ | ५ | ४ | ३ | २ | १ | ७ |
| | काल: | ४ | ३ | २ | १ | ७ | ६ | ५ |
| | अर्धप्रहर: | ७ | ६ | ५ | ४ | ३ | २ | १ |

अर्थात् दिनमानमष्टसख्यया भाजनेन या लब्धि: भवेत्त तां जन्मवासरस्य गुलिकादिभागेन गुणनं कृत्वा यत् फलं प्राप्यते तत् गुलिकादिग्रहाणां इष्टकाल: भवति। तत्र स्पष्टसूर्यस्य एवं लग्नानयन प्रकारेण यत् फल प्राप्यते ते सर्वे स्पष्टगुलिकादिउपग्रहा: भवन्ति।

अर्धप्रहस्य फलं बुधसदृशं लभ्यते। कालस्यफलं राहुसदृशं प्राप्यते। यस्मिन् भावे अधिकशुभबिन्दव: सन्ति तस्मिन् भावे अर्धप्रहरग्रहो भवेत्तदा शुभफलम् ज्ञायते। यदा सर्वाष्टकवर्गेअधिकाशुभबिन्दव: सन्ति तदा तस्मिन् भावे अर्धप्रहरउपग्रहस्य शुभफलं न प्राप्यते। पराशरमतेन लग्नादिभावेषु लग्नादिभावानां अधिपतिभि: सह वा धूमो भवेत्तदा तस्य भावस्य शुभफलं न लभ्यते।

**सूर्यादिग्रहाणां स्वरूपाणि**

शूरो गभीरश्चतुर: सुरूप: श्यामारुणश्चाल्पककुन्तलश्च।
सुवृत्तगात्रो मधुपिङ्गनेत्रो मित्रोहि पित्तास्थ्यधिको न तुंग:।।

सूर्य: शूरो गभीरश्चतुर: सरूपवाग् श्यामारुपवर्णोऽल्पकेशी सुवृत्तगात्रो मधुवत् नेत्रवान् पित्तप्रकृति: समानदेहश्च भवति।

सद्वाग्विलासोऽमलधी: सुकायो रक्ताधिक: कुञ्चितकेश कृष्ण:।
कफानिलात्माम्बुजपत्रनेत्रो नक्षत्रनाथ: सुभगोऽतिगौर:।।

## परिशिष्टम्-०३

चन्द्र:सद्वक्ता सुमतिरधिकरुधिर: कुञ्चितकृष्णकेश: कफवायुयुक्त: कमलवत् नेत्रवान् श्वेतवर्णे भाग्यवान् च भवति।

मज्जासारो रक्तगौरोऽत्युदारो हिंस्र: शूर: पैतिकस्तामसश्च।
चण्ड: पिङ्गाक्षो युवाऽखर्वगर्व: खर्वश्चोर्वीसूनुरग्निप्रभ:स्यात्।।

मङ्गल: अधिकमज्जायुक्तदेहो रक्तगौरमिश्रितवर्ण उदार: हिंसक: शूरोऽधिपित्तप्रकृत्ति: क्रोधी प्रचण्डदेह: पीतनेत्रवान् युवकोऽभिमानी अग्निवत्कान्तिमान् च भवति।

श्याम: शिरालश्च कलाविधिज्ञ: कुतूहली कोमलवाक्रिदोषी
रजोधिको मध्यमरूपधृक्स्यादाताम्रनेत्रो द्विजराजपुत्र: ।।

बुध: श्यामकेशयुक्तोऽनेककलाविधिज्ञ: कुतूहली त्रिदोषयुक्तो-ऽधिकरजोगुणयुक्तो मध्यमरूपो रक्तनेत्रवान् मधुरभाषी च भवति।

ह्रस्वाकारश्चारुचामीकराभ: सम्यक्सार: सुस्वरोदारबुद्धि:।
दक्ष: पिङ्गाक्ष: कफी चातिमांस: प्राज्ञै: सुज्ञै: कीर्तितो जीवसंज्ञ:।।

गुरु: ह्रस्वाकार: सुवर्णसदृश: स्थूलदेहो सुवक्ता दानी बुद्धिमान् दक्ष: पीतनेत्रवान् कफप्रकृतिश्च भवति।

सजलजलदनील: श्लेष्मलश्चानिलात्मा कुवलयदलनेत्रो वक्रनीलालकश्च।
सुसरलभुजशाली राजसश्चातिकामी मदयुतगजगामी भार्गव: शुक्रसार:।।

शुक्र: नीलवर्ण: कफवातप्रकृति: कमलवत् नेत्रवान् वक्रनीलकेशी विशालबाहु रजोगुणी कामी अभिमानी गजगामी पौरुषयुक्त: पुरुषार्थवान् च भवति।

श्यामलोऽतिमलिनश्च शिराल: सालसश्च जटिल: कृशदीर्घ:।
स्थूलदन्त नखपिङ्गलनेत्रो युक्छनिश्च खलतानिलकोपै:।।

।।जा.भ.पृ.५९/७त:१३।।

शनैश्चर: कृष्णवर्ण: मलीन: प्रमादी जटायुक्त: शिरायुक्त: दुर्बल: दीर्घदेहदन्तनखयुक्त: पीतनेत्रवान् दुष्ट: वातविकारी च भवति।

## परिशिष्टम्-०४

### प्रथमादि-द्वादशभावानां विविधाः संज्ञाः।

मेषूरणोदयकलत्ररसातलानि स्युः केन्द्रकण्टकचतुष्टयसंज्ञितानि।
लग्नात्रिकोणभवनं नवपञ्चमं च स्यात्रित्रिकोणमुदयान्नवभं वदन्ति।।
तनुसुखमदनज्ञां राशयः केन्द्रसंज्ञाः पणफरभवनानि स्वायपुत्राष्टभानि।
व्ययरिपुगुरुदुश्चिक्यानि चापोक्लिमानि प्रभवति चतुस्रं मृत्युबन्धुद्वयं च।।
दुच्चिक्यायारिमानान्युपचयभवनान्याहुराचार्यमुख्याः
शेषाः पीडर्क्षसंज्ञा नवधनजलधीकामरन्ध्रान्त्यहोराः।
एते भावास्तदीशेन्दुजसितगुरुभिः संयुता वीक्षिता वा
नान्यैर्युक्ता न दृष्टा यदि शुभफलदा जन्मतः पृच्छतो वा।। जा.पा.१/५३तः५५।।

**भावानां संज्ञाः।**

| क्रमाङ्कः | भावाः | संज्ञाः |
|---|---|---|
| १ | १–४–७–१० | कण्टकः/चतुष्टयः/केन्द्रः |
| २ | ५–९ | त्रिकोणम् (लग्नात्) |
| ३ | ९ | त्रित्रिकोणम् |
| ४ | २–५–८–११ | पणफरः |
| ५ | ३–६–९–१२ | आपोक्लिमः |
| ६ | ४–८ | चतुरस्र |
| ७ | ३–६–११ | त्रिषडाय |
| ८ | ३–६–१०–११ | उपचयः/वृद्धिः/वर्धमानः |
| ९ | १–२–४–५–७–८–९–१२ | अनुपचयः (पीऽर्क्षः) |
| १० | ३–६–१२ | त्रिक |

**लग्नादिभावानां स्थिरकारकाः।**

लग्नादिभावाना ंस्थिरकारकत्वम्।
द्युमणिरमरमन्त्रीभूसुतः सोमसोम्यौ गुरुरिनतनयारौ भार्गवो भानुपुत्रः।
दिनकरदिविजेज्यौ जीवभानुज्ञामन्दाःसुरगुरुरिनसूनुः कारकाः स्युर्विलग्नात्।। जा.पा.२/५१।।
सूर्यो गुरुःकुजःसोमो गुरुर्भौमो सितःशनिः। गुरुश्चन्द्रसुतो जीवोमन्दश्च भावकारकाः। बृ.पा.हो.शा.१२/३७

## परिशिष्टम्-०४

### लग्नादिभावानां स्थिरकारकचक्रम्।

| क्रमाङ्कः | लग्नादिभावाः | स्थिरकारकाः | |
|---|---|---|---|
| | | वैद्यनाथमतेन | पराशरमतेन |
| १ | प्रथमः | सूर्यः | सूर्यः |
| २ | द्वितीयः | गुरुः | गुरुः |
| ३ | तृतीयः | मङ्गलः | मङ्गलः |
| ४ | चतुर्थः | चन्द्रः बुधः | चन्द्रः |
| ५ | पञ्चमः | गुरुः | गुरुः |
| ६ | षष्टः | शनैश्चरः मङ्गलः | मङ्गलः |
| ७ | सप्तमः | शुक्रः | शुक्रः |
| ८ | अष्टमः | शनैश्चरः | शनैश्चरः |
| ९ | नवमः | सूर्यःगुरुः | गुरुः |
| १० | दशः | सूर्यः बुधः गुरुः शनैश्चरः | बुधः |
| ११ | एकादशः | गुरुः | गुरुः |
| १२ | द्वादशः | शनैश्चरः | शनैश्चरः |

### प्रथमभावेविचारणीयाविषयाः।

समस्तशरीरं सुखं दुःखं ज्ञानं जन्मस्थानं यज्ञः स्वप्नं बलं गौरवं राज्य विनयः आयुः शान्तिः वयः केशाः स्वरूपं अभिमानं व्यवसायः, तस्करविद्या चिह्नमानं त्वचा निद्रा धनापहरणं स्वभावः आरोग्यं वैराग्यं कार्यस्य कारणं पशुपालनं वर्णः/जातिः (विप्रादि) निजअपमानम्।

### द्वितीयभावेविचारणीयाविषयाः।

वाणी धनं अस्तिक्यं परजनपोषककार्यं दक्षिणनेत्रं स्त्रियवामनेत्रं नखाः खाद्यपानपदार्थाः नृतानृतं (सत्यासत्यं) वस्त्रं वज्रं ताम्रं रत्नं मौतिक्तं कुटुम्बसुखं स्त्रीसुगंधीपदार्थः क्रयविक्रयकार्यं मृदुवचनं दानवृत्तिः वित्तोद्यमः मैत्री कान्तिः कृपणता सुवर्णरजतं धान्याति नासीका मनः आश्रितजनः आयामर्गः (वित्त) आजिकामाध्यम स्पष्टव्याख्यानशक्तिः विद्या व्यसनम्।

### तृतीयभावेविचारणीयाविषयाः।

धैर्यं कनिष्ठभ्राता युद्धं विवादः कर्णः चरण मार्गेषुस्थानं चित्तभ्रमः सामर्थ्यं स्वर्गः परजनपीडाकार्यं स्वप्नं सैनिकः पराक्रमं बान्धवाः (सहोदराः) मित्रं यात्रा कण्ठः दुष्टपदार्थाः निंदितवस्तुग्रहणविचारः शक्तिः दायविभागः (वित्तविभागः) भूषणानि सद्गुणाः विद्या रुचिः देहसमृद्धिः सत्कुलनिर्णयः भृत्यः पितृतीर्थविचारः उत्तमयानं लघुयात्रा, महत्तकार्यं निजधर्मः।

**चतुर्थभावेविचारणीयाविषयाः।**

## परिशिष्टम्-०४

विद्या राज्यं गृहं गृहत्प्रयाणं वा यात्रा लघुवाहनं नौका यानं (उत्तमवाहनं) अभ्यङ्गं माता बन्धुत्रयं, (मातुल–पितृभगीनी–मातृभगिनी पुत्रा: कन्याश्च) मित्राणिजाति: वस्त्रं कूपजलम् पय: (क्षीर:) सगुन्धीपदार्था: सुखं यश: विश्वास: अनृतारोपणं मण्डप: जय: कृषिविचार: कृषिक्षेत्रं वाटीका लोककल्याणकर्मणि (कूपवापीतडागनिर्माणं) मातृपक्ष: शुद्धबुद्धि: पितृआयमार्ग: भार्या गुप्तधनं प्रासाद: शिल्पं गृहप्रवेश: परिणामं शीलस्वभाव: गृहत्याग: पितृसंपत्ति: देवभोजनं श्रुतिशास्त्रवृद्धि: महिषी गौ: अश्व: हस्ति: धनसमृद्धि:, तस्करदंडविद्यायां कार्यशैली दिव्यौषध्य: आर्द्रक्षेत्रोत्पन्नपदार्था:।

### पञ्चमभावेविचारणीयाविषया:।

सन्तति: पितृपुण्यकर्म राजमंत्री (सचिव:) सदाचार: शिल्पज्ञानं मन:, विद्या गर्भ: विवेक: छत्रम् धार्मिककथा माङ्गल्यपत्रं माङ्गल्यप्राप्ति: वस्त्रं महत्तकार्यं पितृधनं उत्तमनिर्णयशक्ति: स्त्रीसम्पत्तिलाभ: वाराङ्गनालिङ्गनम् गाम्भीर्यं धनं नम्रता, रहस्य् वृत्तान्तसलेखनकार्यं क्षेम स्नेह: काव्यशैली: रचनाकार्यं कार्यप्रवृत्ति: उदर: मन्त्र देवाराधना वैभव अन्नदानं पापपुण्यविवेक: मन्त्रजपसिद्धि: वित्तमार्ग: मृदङ्गादिवाद्य संतोष: पांडत्यं परम्परायांमंत्रीत्वम्।

### षष्ठेभावेविचारणीयाविषया:।

रोग: विघ्नं युद्धं मातुल: कफप्रकृति: उग्रकर्म स्फोटका: शत्रु शत्रुत्व कृपण स्वास्थ उपदेश व्रण: अन्नम् श्रम: ऋणं लाञ्छनं रिपुसंतोष: क्षयरोग: उष्णत्वं मानसिकपरिताप: बहुजनशत्रुत्वं दीर्घनेत्ररोग: भिक्षावृत्ति: अकालभोजनं कल्पभ्रष्ट:(कलाभ्रष्ट्र) लाभ: परिश्रम: विषमुदरशूलं यक्षरक्षा मूत्रकृच्छरोग: अतिसार: मधुरादिषडरसा: कारागारं (कारागृहं) उन्मादादिअवस्था स्वजनै:भयम् ।

### सप्तमभावेविचारणीयाविषया:।

विवाह: सुगन्ध: सङ्गीतं पुष्पाणिउत्तमखाद्यपेयपदार्था: ताम्बुलं यात्राभङ्ग: दधि विस्मृति: वस्त्रमुखम् वीर्यं पतिसुखं परस्त्रीसङ्ग: स्त्रीहीनता गुह्याङ्गं व्यवसाय: मधुरपयादिसुधा आज्यं दानं साहसं व्यभिचार: काम:, स्त्रीशत्रुत्वं मार्गभ्रष्टत्व् शत्रुविजय:, अव्यवस्थान्तरस्थं धनम् विवाद: मैथुनं दत्तकपुत्रादिसुखं परदेशगमनं पत्नीसुखं तस्करकार्यं शुचित्वं स्थानान्तरत्वं घृतपक्वान्नम् ।

### अष्टमभावेविचारणीयाविषया:।

आयु: सुखं पराजय: मृतधनं मृत्यु: मृत्युभयं विवाद: मूत्ररोगा स्त्रीशरीरकष्ट शत्रुदुर्गस्थानं मनसंताप: प्रमाद: राजदण्ड: भयं द्रव्यक्षय: ऋणप्रदानकार्यं अज्ञानात्परजनधनप्राप्ति: चिरधनुं पापजनसङ्ग: पापकर्म जीवहिंसा अङ्गहीनता शिरच्छेद उग्रदु:खप्राप्ति: चित्तस्यास्वास्थ्य कथा, निरंतरकष्टा क्रूरकर्मवृत्ति:।

### नवमभावेविचारणीयाविषया:।

दानं धर्म: तीर्थाटनं गुरुभक्ति: औषध्य: आचार: देवपूजनं विद्याश्रम: वैभव: यानं (वाहनं) भाग्यं विनयं प्रताप: परक्रम: सुकथा (धार्मिककथा) यात्रा राज्याभिषेक: पुष्टि: सत्सङ्ग: साधुसेवा पुण्यं पितृधनं पुत्रादिसुखं ऐश्वर्यं अश्वं हस्ति: महिषी राज्याभिषेकस्थानं वैदिकयज्ञ: धनदानं ब्रह्मज्ञानस्थिति: तप:

## परिशिष्टम्-०४

### दशमभावेविचारणीयाविषयाः।

वाणिज्यकर्म राज्यसन्मानं अश्वगमनं (अश्वेनयात्रालाभः आधुनिककाले वाहननेयात्रा) क्रीडाकलाविज्ञानं सेवकवृत्तिः कृषिः चिकित्साविद्या यशः निधिस्थानं यज्ञादिशुभकार्याणि यन्त्र-मन्त्राणि मातृविचारः पुण्य औषधि कटीप्रदेशः देवता मन्त्रसिद्धिः वैभवः दत्तकपुत्रसुखं स्वामि मार्ग मानं सुजीवना युवराजत्वं प्रसिद्धिः शिक्षणकार्यं पठनपाठनकार्यं सुवर्णादिमुद्रा गौरवं आज्ञाकार्यं भूमिः।

### एकादशभावेविचारणीयाविषयाः।

लाभ कुत्सीतआशा सकलशुभलाभ पराधीनता ज्येष्ठभ्रातृ पितृव्यः देवपूजा सात्विकीउपासना विद्या धनोपार्जनुद्यमः सुवर्णलाभः सङ्ग्रहवृत्तिः पितृधनं जानुः विशिष्टपदप्राप्तिः आभूषणादिरत्नप्राप्तिः स्वामीधनं नष्टद्रव्यज्ञानं प्रियजनकृतेसुवर्णादि आभूषणनिर्माणविषयः प्रज्ञा मन्त्रीपदं श्वसुरपक्षलाभः भाग्योदयः अभिष्टफलप्राप्तिः परिश्रमरहितलाभः पाकनिर्माणविधिः आशा जनन्याआयुः कर्णः जङ्घप्रदेशः चित्रकलाः।

### द्वादशभावेविचारणीयाविषयाः।

निद्राभङ्गः (अनिद्रा) मनोव्यग्रता पादः शत्रुभयं बन्धनं (शारीरिकरोगादिबन्धनं) रोगमुक्तिः ऋणमुक्तिः हस्तिः अश्वः पितृसम्पत्तिः (स्थावरादि) शत्रुः स्वर्गवासनिर्णयः (स्वर्गारोहण स्वर्गप्राप्तिः) वामनेत्रं स्त्रिय:दक्षिणनेत्रं लोकभयं (जनभयं) अस्थिभङ्गः मैत्री विवाहसुखं नाशः (कार्य/शरीरेत्यादि) शयनं त्यागवृत्तिः अधिकारसमाप्तिः (पदत्यागविचारः) मानसिकपरितापः दीनस्वभावप्रारंभकालः हानिः पितृभ्रातृसौख्यनाशः विवादः क्रोधः मृत्युः परदेशनिवास (परदेशयात्रा) पत्नीसुखनष्टविचारः व्ययः शरीरहानिः।

### अथ भावानामपरनमानि।

### प्रथमभावस्यापरनामानि।

तनुः कल्पः उदयः आद्यः जन्म विलग्नः होरा देहः लग्नः मूर्तिः अङ्गम्[१] वपुश्चेति।

### द्वितीयभावस्यापरानामानि।

वाक्[२] अर्थः भुक्तिः नयनं स्वः कुटुम्बः द्रव्यं कोषः धनं चेति।

### तृतीयभावस्यापरनामानि।

दुश्चिक्यः विक्रमः पराक्रमः सहोदरः वीर्यं धैर्ये कर्णः सहजः भ्रातृ चेति।

---

१ श्रीगणेशदैवज्ञनमतेन प्रथमभावस्य संज्ञा वर्तते। ।।जा.ल. सं./०६ ।।

२ श्रीगणेशदैवज्ञविरचितः जातकालङ्कारः ग्रन्थे पञ्चमभावस्य वाक्संज्ञा वर्तते एवं वैद्यनाथविरचितः जातकपारिजातग्रन्थे द्वितीयभावस्यसंज्ञा वाक्संज्ञा भवति।
वागार्थभुक्तिनयनस्वकुटुम्बभानि ।।जा.पा. १/४९।।

## परिशिष्टम्-०४

### चतुर्थभावस्यापरनामानि।

पाताल: वृद्धि: हिबुकं क्षिति: मातृ विद्या यानं गेहं सुखं बन्धु: चतुष्टयं अम्बा तुर्य: सुहृद् वाहनं अम्बु: नीरं जलं चेति।

### पञ्चमभावस्यापरनामानि।

धी: देव: राज: पितृ नन्दनं पञ्चकं सुत: तनय: बुद्धि: आत्मज: वाक्[३] तनुजश्चेति।

### षष्ठभावस्यापरनामानि।

रोग: अङ्गं[४] शस्त्रं भयं षष्ठ: रिपु: क्षत: वैरिश्चेति।

### सप्तमभावस्यापरनामानि।

जामित्रं काम: गमनं कलत्रं सम्पत् द्यून: अस्तें स्मर: मदन: मदश्चेति।

### अष्टमभावस्यापरनामानि।

रन्ध्र: आयु: अष्ट रण: मृत्यु: विनाश: निधनं लययदं छिद्रं याम्यश्चेति।

### नवमभावस्यापरनामानि।

धर्म: गुरु: यात्रा शुभं तप: भाग्यं मार्गश्चेति।

### दशमभावस्यापरनामानि।

व्यापार: मेषूरणं ज्ञानं राज्यं आस्यपदं कर्म: गगनं तात: आज्ञा मानं नभ: व्योम: मध्य:

### एकादशभावस्यापरनामानि।

उपान्त्य: भव: आय: लाभ: आगम: प्राप्तिश्चेति।

### द्वादशभावस्यापरनामानि।

रिक्त: व्यय: द्वादश: अन्त्य: प्रान्त्यश्चेति।।जा.पा.१/४९त:५२।।

---

३ वाक्स्थानं पञ्चमं स्यात्त ......।।जा.ल.सं/०७।।

४ श्री वैद्यनाथमतेन षष्ठस्थानस्य अङ्गम् संज्ञा वर्तते। रोगांगशस्त्रभयषष्ठरिपुक्षतानि..... ।।जा.ल.सं/५०।।

## परिशिष्टम् -०५
## मेषादि-मीनान्तानां राशीनां विविधाः संज्ञाः।

**राशीनां पर्यायवाचकः शब्दाः।**

मेषः अजः विश्वः क्रियः तुम्बुरः आद्यश्चैते मेषराशेः पर्यायाः सन्ति।
वृषः उक्षः गौः ताबुरुः गोकुलमित्येता वृषराशेः संज्ञाः।
मिथुनं द्वन्द्वं नृयुग्मं जुतुमं यमं युगं तृतीयं च एते मिथुनराशेः पर्यायाः।
कर्कः कुलीरः कर्काटकः कर्क्कटः इत्येताः कर्कराशेः पर्यायाः।
सिंहः कण्ठीरवः मृगेन्द्रः  हरिः लयः इत्येते सिंहराशेः पर्यायाः ।
कन्या रमणी पाथोनः तरुणीत्येते कन्याराशेः पर्यायाः।
तुला तौली वणिक् जूकः घटश्चैते तुलाराशेः पर्यायाः।
वृश्चिकः अलिः अष्टमं कौर्पिः कीटश्चैते वृश्चिकराशेः पर्यायाः।
धनुः चापं धन्वी शरासनमित्येते धनूराशेः पर्यायाः।
मकरः मृगः मृगास्य वक्रश्चैते मकरराशेः पर्यायाः।
कुम्भः घटः तोयघरश्चैते कुम्भराशेः पर्यायाः।
मीनः अन्त्यो मत्स्यः पृथुरोमो झषश्चैता मीनराशेः पर्यायाः सन्ति।। जा.पा.१/४तः७।।
मीनालिकर्कटमृगाः सलिलाभिधानास्तोयाश्रया घटवधूयुगगोपसंज्ञाः।
निस्तोयभूतलचराःक्रियचापतौलिकण्ठीरवाश्च बहवःप्रवदन्ति सन्तः।।जा.पा.१/४तः७।।

### राशीनां वन्ध्यादि संज्ञाः।

| | | |
|---|---|---|
| वन्ध्याराशयः | - | मिथुनसिंहकन्याराशयः। |
| बहुप्रजाराशयः | - | कर्कवृश्चिकमीनराशयः। |
| अयनराशी | - | मेषतुले। |
| शरीरधारीराशयः | - | मेषवृषभमिथुनकर्कराशयः। |
| जलाश्रयीराशयः | - | वृषभमिथुनकन्याकुम्भराशयः। |
| निर्जलराशयः | - | मेषसिंहतुलाधनुराशयः। |
| जलचरराशयः | - | मीनवृश्चिककर्कमकरराशयः। |
| भूतलचरराशयः | - | मेषधनुतुलासिंहराशयः।।जा.त.सं.त.पृ.०४।। |

### मेषादिराशीनां निवासदेशाः।

क्रमात्पाटलकर्नाटचरचोलवसुन्धराः।
पाण्ड्यकेरलकोल्लासमलयावनिसैन्धवाः।।
उदक्पाञ्चालयवनकोशक्षतिसंज्ञकाः।

मेषादिसर्वराशीनां वासदेशाः प्रकीर्तिताः।।
प्रयोजनस्तद्रास्युदये जनिमतां तदुक्तदेश उन्नति करो भवतीति। जा.पा.१/५९,६०

## मेषादिराशीनां मनुष्यादिसंज्ञाः।

चापाद्यार्धवधूनृयुग्घटतुला मर्त्याश्चकीटोऽलिभं।
त्वाप्याः कर्किमृगापरार्द्धशफराः शेषाश्चतुष्पादकाः।। फ.दी.१/७।।

| क्रमाङ्कः | संज्ञाः | राशयः |
|---|---|---|
| १ | मनुष्यः | मिथुनः कन्या तुला धनुपूर्वार्ध |
| २ | चतुष्पदः | मेषः वृषभः सिंहः धनूत्तरार्धः मकरपूर्वार्धः |
| ३ | कीटः | वृश्चिकः |
| ४ | जलचरः | कर्कः मीनः मकरुत्तरार्धः |

## मेषादिराशीनां निवासदेशाः।

क्रमात्पाटलकर्नाटचरचोलवसिन्दराः। पाण्ड्यकेरलकोल्लासमलयावनिसैन्धवाः।।
उदक्पाञ्चालयवनकोशक्षतिसंज्ञकाः। मेषादिसर्वराशीनां वासदेशाः प्रकीर्तिताः।।
प्रयोजनस्तद्रास्युदये जनिमतां तदुक्तदेश उन्नति करो भवतीति।।जा.पा.१/५९,६०।।

| | | | |
|---|---|---|---|
| मेषस्य | पाटलाः | तुलायाः | कोल्लासः |
| वृषस्य | कर्नाटकः | वृश्चिकस्य | मलयः |
| मिथुनस्य | चरः | धनुषः | सैन्धवः |
| कर्कस्य | चोलः | मकरस्य | पाञ्चालः |
| सिंहस्य | पाण्ड्यः | कुम्भस्य | यवनः |
| कन्यायाः | केरलः | मीनस्य | कोशलः |

**मेषादिराशीनां पुरुषादिविविधसंज्ञाः।**

ह्रस्वा गोऽजघटाः समा मृगनृयुक् चापान्त्यकर्काटकाः
दीर्घा वृश्चिककन्यकाहरितुलामेषादिपुंयोषितौ।
प्रागादिक्रियगोनृयुक्कटकभान्येतानि कोणान्विता
न्याहुः क्रूरशुभौ चरस्थिरतरद्वन्द्वानि तानि क्रमात्।।
वीर्योपेता निशि वृषनृयुक्कर्किचापाजनक्राः

## परिशिष्टम् -०५

हित्वा युग्मं भवनमपरे पृष्टपूर्वोदयाश्च।
शेषा: शीर्षोदयदिनबला: श्रेष्ठता राशयस्ते
मीनाकारद्वयमुभयत: काललग्नं समेति।।जा.पा.१/१३त:१४।।
रक्तगौरशुककान्तिपाटला: पाण्डुचित्ररुचिनीलकाञ्चना:।
पिङ्गल:शबलबभ्रुपाण्डुरास्तुम्बुरादिभवनेषु कल्पिता:।। जा.पा.१/२३।।

**राशिस्वामिनिरूपणम्**

धराजशुक्रज्ञशशीनसौम्यसितारजीवार्कजमन्दजीवा:।
क्रमेण मेषादिषु राशिनाथस्तदंशपाश्चेति वदन्ति सन्त।।जा.पा.१/२५।।

**राशिनां पुरुषादिसंज्ञा:।**

| क्रमाङ्क: | राशि: | पुरुष:/स्त्री | क्रूर:/सौम्य: | चरादिस्वभाव: |
|---|---|---|---|---|
| १ | मेष: | पुरुष: | क्रूर: | चरस्वभाव: |
| २ | वृषभ: | स्त्री | सौम्य: | स्थिरस्वभाव: |
| ३ | मिथुन: | पुरुष: | क्रूर: | द्विस्वभाव: |
| ४ | कर्क: | स्त्री | सौम्य: | चरस्वभाव: |
| ५ | सिंह: | पुरुष: | क्रूर: | स्थिरस्वभाव: |
| ६ | कन्या | स्त्री | सौम्य: | द्विस्वभाव: |
| ७ | तुला | पुरुष: | क्रूर: | चरस्वभाव: |
| ८ | वृश्चिक: | स्त्री | सौम्य: | स्थिरस्वभाव: |
| ९ | धनु: | पुरुष: | क्रूर: | द्विस्वभाव: |
| १० | मकर: | स्त्री | सौम्य: | चरस्वभाव: |
| ११ | कुम्भ: | पुरुष: | क्रूर: | स्थिरस्वभाव: |
| १२ | मीन: | स्त्री | सौम्य: | द्विस्वभाव: |

## परिशिष्टम् -०५

### राशिनां पृष्ठोदयादिसंज्ञाः।

| क्रमाङ्कः | राशिः | पृष्ठोदयः/ शीर्षोदयः/ उभयोदयः | स्वामी | दिक् | दिनबली/ रात्रीबली | वर्णः |
|---|---|---|---|---|---|---|
| १ | मेषः | पृष्ठोदयः | मङ्गलः | पूर्वा | रात्रीबली | रक्तः |
| २ | वृषभः | पृष्ठोदयः | शुक्रः | दक्षिणा | रात्रीबली | श्वेतः |
| ३ | मिथुनः | शीर्षोदयः | बुधः | पश्चिमा | रात्रीबली | शुकवत् |
| ४ | कर्कः | पृष्ठोदयः | चन्द्रः | उत्तरा | रात्रीबली | पाटलः |
| ५ | सिंहः | शीर्षोदयः | सूर्यः | पूर्वा | दिनबली | पाण्डुरश्वेतः |
| ६ | कन्या | शीर्षोदयः | बुधः | दक्षिणा | दिनबली | विविधवर्णी |
| ७ | तुला | शीर्षोदयः | शुक्रः | पश्चिमा | दिनबली | नीलः |
| ८ | वृश्चिकः | शीर्षोदयः | मङ्गलः | उत्तरा | दिनबली | स्वर्णः |
| ९ | धनुः | पृष्ठोदयः | गुरुः | पूर्वा | रात्रीबली | पीतः |
| १० | मकरः | पृष्ठोदयः | शनैश्चरः | दक्षिणा | रात्रीबली | पीतश्वेतमिश्रः |
| ११ | कुम्भः | शीर्षोदयः | शनैश्चरः | पश्चिमा | दिनबली | नकुलवत् |
| १२ | मीनः | उभयोदयः | गुरुः | उत्तरा | संध्या | शुक्लवर्णः |

## परिशिष्टम्-०६
## तीथ्यादि-पञ्चाङ्गविषया:।

**रुचकयोग:। भद्रयोग:। मालव्ययोग:।**

मूलत्रिकोणनिजतुङ्गगृहोपयाता भौमज्ञजीवसितभानुसुताबलिष्ठा:।
केन्द्रस्थिता यदि तदा रुचभद्रहंसमालव्यचारुशशयोगकरा भवन्ति।।जा.पा.७/५९।।

**रुचकयोगफलम् ।**

जात: श्रीरुचके बलान्वितवपु: श्रीक्रीर्तिशीलान्वित:
शास्त्री मन्त्रजपाभिचारकुशलो राजाऽथवा तत्सम:।
लावण्यारुणकान्तिकोमलतनुस्त्यागी जितारिर्धनी
सप्तत्यब्दमितायुषा सह सुखी सेनातिरङ्गाधिप:।।जा.पा.७/६०।।

**भद्रयोगफलम् ।**

शार्दूलप्रतिमाननो गजगति: पीनोरुचक्षस्थलो
लम्बापीनसुवृत्तबाहुयुगलस्त तुल्यमानोच्छ्रय:।
मानी बन्धुजनोपकारनिपुण: श्रीभद्रयोगोद्भवो
राजाऽशीतिमितायुरेति विपुलप्रज्ञायशोवित्तवान्।।जा.पा.७/६२।।

**मालव्ययोगफलम्।**

स्त्रीचेष्टो ललिताङ्गसन्धिनयन: सौन्दर्यशाली गुणी
तेजस्वी सुतदारवाहनधनी शास्त्रार्थवित्पण्डित:।
उत्साहप्रभुशक्तिमन्त्रचतुरस्त्यागी परस्त्रीरत:
सप्तत्चद्वमुपैति सप्रसहितं (७७) मालव्ययोगोद्भव:।।जा.पा. ७/६४।।

**पापकर्तरीयोग:।**

लग्नात् पापावृज्वनृजू व्ययार्थस्थौ यदा कदा
कर्तरी नाम सा ज्ञेया मृतयुदारिद्र्यशोकदा।।मू.चि.६/४४।।
गर्गमुनिमते।
व्यये मार्गगति: क्रूरो वक्री क्रूरो धने यदि।
तौ च लग्नांशतुल्यौ च तदा घोरख्याकर्तरी।।
नारदमते।
कर्तरीदोषसंयुक्तं यल्लगनं प्तपरित्यजेत्।
अपि सौम्यग्रहैर्युक्तं गुणै: सर्वै: समन्वितम्।।
असाध्वो: कर्तरी ज्ञेया त्वन्यथा नैव कर्तरी।
कर्तरी मृत्युदा क्रोधाद्म्पत्योर्गलकर्तरी।।

पापयो: कर्तरी कर्त्र्योर्नीचशत्रुग्रहास्तयो:।।
द्वयोरस्तगयोर्वापि कर्तरी नैव दोषदा।।कश्यपसंहिता अ.३२/३९ त:४१।।

यदा कोऽपि ग्रहस्य भावस्य वा द्वितीयभावे वक्रिपापग्रहो द्वादशभावे च मार्गिण: पापग्रहो भवेत्तदा तद् ग्रहस्य भावस्य वा पापकर्तरी भवति। अस्मिन् योगे ग्रहस्य भवास्य च शुभफलं न भवति अशुभफलस्यावृद्धिर्भवति। विशेषार्थं मू.चि.ग्रन्थस्य ६/पृ.३७४त:३७६ द्रष्टव्यम्।

**गण्डान्तविचार: ।**

पूर्णानन्दाख्ययोस्तिथ्यो: संधिर्नाडीद्वयं सदा। गण्डान्तं मृत्युदं जन्म यात्रोद्वाहव्रतादिषु।।
कुलीरसिंहयो: कीटचापयोर्मीनमेषयो:। गण्डान्तमंतरालं स्याद्धटिकार्धं मृतिप्रदम् ।।
सार्पेन्द्रपौष्णभेस्वंत्यं नाडीयुग्मं तथैव च । तदग्रभेष्वाद्यपादभानां गण्डान्तसंज्ञिका:।।
उग्रं च संधित्रयतयं गण्डान्तद्वितयं महत्। मृत्युप्रदं जन्मयान विवाहस्थापनादिषु।।
।।नारदसंहिता २९/३८ त: ४१।।

**गण्डान्तलक्षणम् ।**

गण्डान्तस्यत्रयोप्रकारा: सन्ति यथा तिथिगण्डान्तम् । नक्षत्रगण्डान्तम् । लग्न/राशिगण्डान्तश्चेति। तिथिगण्डान्तम् । पूर्णातिथीनां (५-१०-१५/३०) समाप्ति कालस्यप्राग घटीएका, नन्दातिथीनां (१-६-११) आरम्भकालस्यानन्तरं घटी एका गण्डान्ततिथि: कथ्यते।

नक्षत्रगण्डान्तम्।

आश्लेषाज्येष्ठारेवतीनक्षत्राणां समाप्तिकालस्य प्राग घटीद्वयं मघामूलअश्विनीनक्षत्राणामारम्भ-कलस्यानन्तरं घटीद्वयं नक्षत्रगण्डान्तं कथ्यते।

राशि/लग्नगण्डान्तम्।

मीनकर्कवृश्चिकराशीनां समाप्तिकालस्य प्रागार्धघटी मेषसिंहधनुराशीनमारम्भकलस्यानन्तर मर्धघटी प्रमाणं राशिगण्डान्तं कथ्यते। यदा कुण्डल्यां चन्द्रोबलवान्[१] भवेत्तदा तिथिगण्डान्तस्य एवं गुरुर्बलवान्[२] भवेत्तदा लग्नगण्डान्तस्य दोषो न भवति।

**तिथ्यादि-पञ्चाङ्गविषया:।**

तिथिर्वासरनक्षत्रेयोग: करणमेव च
इति पञ्चाङ्गभाख्यानं व्रतपर्वनिदर्शकम्।।भा. कु. वि. भाग-१ पृ.१।।
चतुर्भि: कारयेत्कमत् सिद्धिहेतोविचक्षण:।

---

१ विशेषार्थं परिशिष्टम्-०३ द्रष्टव्यम्।

२ तथैव तिथिगण्डान्तं नास्तीन्दौ बलशालिनि।
तथैव लग्नगण्डान्तं नास्ति जीवे बलान्विते ।।शीकल्यसंहिता।।

तिथिनक्षत्रकरणमुहूर्तैरिति नित्यशः।।
तिथिरेक गुणा प्रोक्ता नक्षत्रञ्च चतुर्गुणम्।
वारश्चाष्टगुणः प्रोक्तः करणं षोडशान्वितम्।।
चन्द्रः शतगुणः प्रोक्तस्स्माच्चन्द्रबलाबलम्।
समीक्ष्य चन्द्रस्य बला बलानि ग्रहाः प्रयच्छन्ति शुभाशुभानि।। भा.ज्यो.पृ.१३८/।।

**संवत्सरनामानि।**

प्रभवो विभवः शुक्लः प्रमोदोऽय प्रजापतिः।

अङ्गिरा श्रीमुखो भावो युवा धाता तथैव च ।।

ईश्वरो बहुधान्यश्च प्रमाथी विक्रमो वृषः।

चित्रभानुः सुभानुश्च तारणः पार्थिवो व्ययः।।

सार्वजिस्सर्वधारी च विरोधी विकृतिः खरः।

नन्दनो विजयश्चैव जयो मन्मथदुर्मुखौ।।

हेमलम्बी विलम्बी च विकारी शार्वरी प्लवः।

शुभकृच्छेन्छोभनः क्रोधी विश्वावसुपराभवौ ।।

प्लवङ्गः कीलकः सौम्यः साधारणो विरोधकृत्।

परिधावी प्रमादी च आनन्दो राक्षसोऽनलः।।

पिङ्गलः कालयुक्तश्च सिद्धार्थी रौद्रदुर्मती।
दुन्दुभी रुधिरोद्गारी रक्ताक्षी क्रोधनः क्षयः।। बा.ज्यो.सा.सं.१/१तः७।।

**अयनगोलविचारः।**
कर्काद्दक्षिणमयनं मकरादुत्तरायणम्।
मेषादावुत्तरो गोलस्तुलादौ दक्षिणः स्मृतः।।

**षड्ऋतवः।**
मृगादिरादिद्वयभानुभोगात्षड्तवः स्युः शिशिरो वसन्तः।
ग्रीष्मश्च वर्षा च शरच्च तद्वद्धेमन्तनामा कथितश्च षष्ठः।। बा.ज्यो.सा.सं.१/१०-११।।

**स्वस्वामितिथिविचारः।**
तिथीशा वह्निकौ गौरी गणेशेऽहिर्गुहो रविः।
शिवो दुर्गान्ताको विश्वे हरिः कामः शिवः शशी ।। मु.चि. १/३।।

## परिशिष्टम्-०६

**तिथयः।**

शुक्ल कृष्णावुभौ पक्षौ देव पित्रे च कर्मणि।
प्रतिपच्च द्वितीया च तृतीया तदनंतरम्।।
चतुर्थी पंचमी षष्ठी सप्तमी चाष्टमी तथा ।
नवमी दशमी चैवैकादशी द्वादशी ततः।।
त्रयोदशी ततो ज्ञेया ततः प्रोक्ता चतुर्दशी ।
पौर्णिमा शुक्लपक्षे तु कृष्णपक्षे त्वमा स्मृता।। बा.ज्यो.सा.सं.१/१७तः१९।।

**तिथिस्वामी**

क्रमात्तिथीनां पतयोऽग्निधातृगौरी गणेशोऽहि गुहो रविश्व ।
महेशदुर्गान्तमक विश्वविष्णुकामेश सोमाः पितरो हि दर्शे ।।१८।। बा.ज्यो.सा.सं.१/२०।।

| क्रमाङ्कः | तिथयः | स्वामिनामानि |
|---|---|---|
| १ | प्रतिपदा | अग्निः |
| २ | द्वितीया | धतृ |
| ३ | तृतीया | गौरी |
| ४ | चतुर्थी | गणेशः |
| ५ | पञ्चमी | सर्पः |
| ६ | षष्ठी | कार्तिकस्वामी |
| ७ | सप्तमी | सूर्यः |
| ८ | अष्टमी | शिवः |
| ९ | नवमी | दुर्गादेवी |
| १० | दशमी | यमः |
| ११ | एकादशी | विश्वदेवाः |
| १२ | द्वादशी | विष्णुः |
| १३ | त्रयोदशी | कामेशः |
| १४ | चतुर्दशी | शिवः |
| १५ | पौर्णिमा | चन्द्रः |
| १६ | अमावस्या | पितृदेवः (पितरः) |

**सप्तवाराः।**

आदित्यश्चन्द्रमा भौमो बुधश्चाथ बृहस्पतिः।
शुक्रःशनैश्चरश्चैव वाराः सप्त प्रक्रीर्तिताः।।
गुरुश्चन्द्रो बुधःशुक्रःशुभवाराः शुभे स्मृताः।
क्रूरास्तु क्रूरकृत्येषु सदा भौमार्कसूर्यजाः।। बा.ज्यो.सा.सं.१/२२तः२३।।

**नक्षत्रनामानि।**

अश्विनी भरणी चैव कृत्तिका रोहिणी मृगः।
आर्द्रा पुनर्वसुः पुष्यस्ततोऽश्लेषा मघा तथा ।।
पूर्वाफाल्गुनिका तस्मादुत्तराफाल्गुनी ततः।
हस्तश्चित्रा तथा स्वाती विशाखा तदनंतरम् ।।
अनुराधा ततो ज्येष्ठा ततो मूलं निगद्यते।
पूर्वाषाढोत्तराषाढस्त्वभिजिच्छ्रवणस्तथा।।
धनिष्ठा शततारी यं पूर्वाभाद्रपदा ततः ।
उत्तराभाद्रपाच्चैव रेवत्येतानि भानि च ।। बा.ज्यो.सा.सं.१/२५तः२८।।

**स्वस्वामिनक्षत्राणि नामानि।**

नासत्यान्तम-वह्नि-धातृ-शशभृद्रुद्रादितोज्योरगा
ऋक्षेशाः पितरो भगोऽर्यमवी त्वष्टा समीरः क्रमात्।
शक्राग्नी खलु मित्र इन्द्रनिऋतिक्षीराणि विश्वे विधि-
र्गोविन्दो वसुतोयपाऽजचरणाहिर्बुध्न्यपूषाभिधाः ।।मु.चि. २/१।।

## परिशिष्टम्-०६

## स्वस्वामिनक्षत्राणि नामानि।

| क्रमाङ्कः | नक्षत्रनामानि | नक्षत्रस्वामिनः नामानि |
|---|---|---|
| १ | अश्विनी | अश्विनीकुमारौ |
| २ | भरणी | यमः |
| ३ | कृतिका | अग्निः |
| ४ | रोहिणी | ब्रह्मा |
| ५ | मृगशीर्षः | चन्द्रः |
| ६ | आर्द्रा | रूद्रः |
| ७ | पुनर्वसुः | अदितिः |
| ८ | पुष्यः | बृहस्पतिः |
| ९ | आश्लेषा | सर्पः |
| १० | मघा | पितरः |
| ११ | पूर्वाफाल्गुनी | भगः (सूर्यः) |
| १२ | उत्तराफाल्गुनी | अर्यमा (सूर्यः) |
| १३ | हस्त | सूर्यः |
| १४ | चित्रा | विष्टा (विश्वकर्मा) |
| १५ | स्वाति | वायुः |
| १६ | विशाखा | इन्द्राग्नी |
| १७ | अनुराधा | मित्रः (सूर्यः) |
| १८ | ज्येष्ठा | इन्द्रः |
| १९ | मूल | निर्ऋती (राक्षसः) |
| २० | पूर्वाषाढा | वरुणः |
| २१ | उत्तराषाढा | विश्वेदेवाः |
| २२ | अभिजीत | धातो विधिः |
| २३ | श्रवण | विष्णुः |
| २४ | धनिष्ठा | अष्टवसवः |
| २५ | शनतारका | वरुणः |
| २६ | पूर्वाभाद्रपदा | अजैकपाद् (सूर्यः) |
| २७ | उत्तराभाद्रपदा | अहिर्बुध्न्यः (सूर्यः) |
| २८ | रेवती | पूषा (सूर्यः) |

**योगनामानि**

विष्कुंभ: प्रीतिरायुष्मान् सौभाग्य: शोभनस्तथा ।
अतिगण्ड: सुकर्मा च धृति: शूलस्तथैव च ।।
गण्डो वृद्धिर्ध्रुवश्चैव व्याघातो हर्षणस्तथा ।
वज्रसिद्धी व्यतीपातो वरीयान् परिध: शिव: ।।
सिद्ध: साध्य: शुभ: शुक्लो ब्रह्मैन्द्रो वैधृति: क्रमात् ।
सप्तविंशतियोगास्तु कुर्युर्नामसमं फलम् ।। बा.ज्यो.सा.सं.१/६०-६१

**योगस्वामीनामानि**

योगेशा यमविष्ण्विंदुधातृजीवनिशाकरा:
इंद्रतोयाहि वह्न्यर्कभूमरूद्रुतोद्रयपा: ।
गणेशरूद्रधनदास्त्वष्ट्टमित्र षडानना:।
सावित्री कमला गौरी नासत्यौ पितरोऽदिति:।।ना.सं. ७/१त:२।।

**करणानि।**

बवश्चबालवश्चैव कौलवस्तैतिलस्तथा।
गरश्च वणिजो विष्टि: सप्तैानि चराणि च।।
अन्ते कृष्णचतुर्दश्यां शकुनिर्दर्शभागयो:।
ज्ञेयं चतुष्पदं नागं किंस्तुघ्नं प्रतिपद्दले।।बा.ज्यो.सा.स.१/६६-६७।।

**करणेशनामानि।**

ईन्द्र: प्रजापतिर्मित्रश्चार्यमाभूर्हरिप्रया।
कीनाश: कलिरुक्षाख्यौ तिथ्यर्धे शास्त्र्यहिर्मरुत्।।
(ईन्द्र: प्रजापति:मित्र: अर्यमा भूमि: लक्ष्मी यम: कलि: वृषभ:)।।ना.सं. ८/१।।

# परिशिष्टम्-०६

## स्वस्वामियोगनामानि

| क्रमाङ्कः | योगनामानि | योगस्वामिनामानि |
|---|---|---|
| १ | विष्कुंभः | धर्मराजः |
| २ | प्रीतिः | विष्णुः |
| ३ | आयुष्मान् | चन्द्रः |
| ४ | सौभाग्यः | ब्रह्मा |
| ५ | शोभनः | बृहस्पतिः |
| ६ | अतिगण्डः | चन्द्रः |
| ७ | सुकर्मा | इन्द्रः |
| ८ | धृतिः | आपः (वरुणः) |
| ९ | शूलः | सर्पः |
| १० | गण्डः | अग्नि |
| ११ | वृद्धिः | सूर्यः |
| १२ | ध्रुवः | भूमिः |
| १३ | व्याघातः | वायुः |
| १४ | हर्षणः | शिवः |
| १५ | वज्रः | वरुणः |
| १६ | सिद्धिः | गणेशः |
| १७ | व्यतिपातः | रुद्रः |
| १८ | वरीयान् | कुबेरः |
| १९ | परिधः | त्वष्टा |
| २० | शिवः | मित्रः |
| २१ | सिद्धः | कार्तिकस्वामी |
| २२ | साध्यः | सावित्री |
| २३ | शुभः | लक्ष्मीः |
| २४ | शुक्लः | गौरी |
| २५ | ब्रह्मन् | अश्विनीकुमारौ |
| २६ | ऐन्द्रः | पितरः |
| २७ | वैधृतिः | अदितिः |

## परिशिष्टम्-०६

## परिशिष्टम्-७
## सूर्यादिग्रहाणाम् अरिष्टपरिहारोपायाः।

**नवग्रहमन्त्राः। ऋग्वेदीयनवग्रहमन्त्राः। सूर्यमन्त्रः।**

आ कृष्णेन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यंञ्च।
हिरण्येन सविता रथेना ऽऽदेवो याति भुवनानि पश्श्यन।। ऋ.सं. १/३५/२।।

**चन्द्रमन्त्रः।**

आप्यायस्व समेतु ते। विश्वतः सोम वृष्णयम्।
भवा वाजस्य संगथे।।ऋ.सं.१/९१/१६।।

**मङ्गलमन्त्रः।**

अग्निर्मूर्धा दिवः ककुत् पतिः पृथिव्या अयम्।
अपां रेतांसि जिन्वति।।ऋ.सं. ८/४४/१६।।

**बुधमन्त्रः।**

उदबुद्ध्यध्वं समनसः सखायः।
समग्निमिन्ध्वं बहवः सनीळाः।
दधिक्रामग्निमुषसं च देवी –
भिन्द्रावतोऽवसे नि ह्वये वः।।ऋ.सं. १०/१०१/०१।।

**गुरुमन्त्रः।**

बृहस्पते अति यदर्यो अर्हाद् द्युमद्
विभाति क्रतुमज्जनेषु।
यद् दीद्यच्छवस ऋतप्रजात्
तद्स्मासु द्रविणं धेहि चित्रम्।।ऋ.सं. २/२३/१५।।

**शुक्रमन्त्रः।**

शुक्रं तै अन्यद् यजन्तं ते अन्यद्
विषुरूपे अहनी द्यौरिवासि।
विश्वा हि माया अवसि स्वधावो
भद्रा ते पूषन्निह रातिरस्तु।।ऋ.सं. ६/५८/०१।।
शुक्रः शुशुक्काँ उषो न जारः
पप्रा समीची दिवो न ज्योतिः।
परि प्रजातः क्रत्वा बभूथ
भुवो देवानां पिता पुत्र सन्।।ऋ.सं. १/६९/०१।।

**शनि मन्त्रः।**

शमग्निरग्निभिः करच्छं नस्तपतु सूर्यः।
शं वोतो वात्वरपा अप् स्रिधः।।ऋ.सं. ८/१८/९।।

**राहु मन्त्रः।**

कया नश्चित्र आ भुव दूती सदावृधः सखा।
कया शचिष्ठया वृता।।ऋ.सं. ४-३१-१।।

**केतु मन्त्रः**

केतुं कृण्वन्नकेतवे पेशो मर्या अपेशसे।
समुषद्भिरजायथाः।।ऋ.सं. १/६/३।।

**यजुर्वेदीनवग्रहमन्त्राः**

**सूर्यमन्त्रः।**

आ कृष्णेन रजसा व्वर्त्तमानो निवेशयन्नमृतं मर्त्यंञ्च।
हिरण्यय येन सविता रथेना देवो याति भुवनानि पश्श्यन्।।शु.य.म.व.सं.४३/३३।।

**चन्द्रमन्त्रः।**

ॐइमन्देवाऽअसपत्क्नगूंसुवद्ध्वम्महतेक्षत्रायमहतेज्ज्यैष्ठ्याय महुतेजानराज्ज्यायेन्द्रस्येन्द्रियाय।
इमममुष्ष्यपुत्रममुष्ष्यैपुत्रमस्यैव्विशऽएषवोमीराजासोमोस्म्माकम्ब्राह्मणानागुंराजा।
।।शु.य.म.व.सं.१८/१०।।

**मङ्गलमन्त्रः।**

ॐ अग्निर्म्मूर्द्धादिवहककुत्पतिः÷पृथिव्व्याऽअयम्।। अपागुंरेतागुंसिजिन्वति।।
।।शु.य.म.व.सं.१/०३।।

**बुधमन्त्रः।**

ॐउद्द्बुद्ध्यस्त्वाग्ग्नेप्प्रतिजागृहित्त्वमिष्टापूर्त्तेसगूंसृजेथामयञ्च।
अस्म्मिन्त्सधस्त्थेऽअद्ध्युत्तरस्म्मिन्व्विश्श्वेदेवायजमानश्च्चसीदत।।
।।शु.य.म.व.सं.५४/१५।।

**गुरुमन्त्रः।**

ॐबृहस्प्पतेऽअतियदर्य्योऽअर्हाद्द्युमद्द्विभातिक्क्रतुमज्जनेषु।
यद्दीदयच्छवसऽऋतप्प्रजाततदस्म्मासुऽद्रविणन्धेहिचित्रम्।।
।। शु.य.म.व.सं.०३/२६

**शुक्रमन्त्रः।**

ॐअन्नात्परिस्स्रुतोरसम्ब्रह्मणाव्व्यपिबत्क्षत्रम्पयहसोमम्प्रजापतिः।
ऋतेन सत्त्यमिन्द्रियं व्विपानगूशुक्क्रमन्धसऽइन्द्रस्येन्द्रियमिदम्पयोमृतम्मधु।।
।। शु.य.म.व.सं.७५/१९।।

**शनिमन्त्रः।**

ॐ शन्नोदेवीरभिष्ट्टयऽआपोभवन्तुपीतये। शँय्योरभिस्स्रवन्तुनः।।
।। शु.य.म.व.सं.१२/३६।।

**राहुमन्त्रः।**

ॐ कया नश्चित्रऽ आभुवदूती सदावृधःसखा। कयाशचिष्ठ्याव‍ृता।।
।। शु.य.म.व.सं.०४/३६

**केतुमन्त्रः।**

ॐ केतुङ्कृण्ण्वन्नकेतवे पेशेमर्थ्याऽपेशसे। समुषद्भिरजायथा:।।

।। शु.य.म.व.सं.३७/२९।।

**सामवेदीयनवग्रहमन्त्रा:।**

**सूर्यमन्त्र:।**

ॐ बण्महाँ असि सूर्य बडादित्यमहाँ असि। महस्ते सतो महिमापनिष्टममह्वा देव महाँ असि।।

।।सा.सं.२७६।।

**चन्द्रमन्त्र:।**

ॐ आप्यायस्व समेतु ने विश्वत: सोम वृष्ण्यम्। भवा वाजस्य संगथे।

।।ता.ब्रा. १/५/९।।

**मङ्गलमन्त्र:।**

ॐ अग्निमूर्द्धादिव: ककुत्पति: पृथिव्या अयम्। अपाँ रेताँ सि जिन्वति।।

।।सा.सं.२७।।

**बुधमन्त्र:।**

ॐ अग्नेविवस्वदुषसश्चित्रँ राधो अमर्त्य। आ दाशुषे जातवेदोवहा त्वमद्या देवाँ उषर्बुध:।।

।।सा.सं.४०।।

**गुरुमन्त्र:।**

ॐ बृहस्पते परिदीया रथेन रक्षोहामित्राँ अपबाधमान:। प्रभजन्त्सेना:प्रमृणो युधाजयन्नस्माकमेध्यवितारथानाम्।।

।।सा.सं.१८५२।।

**शुक्रमन्त्र:**

ॐ शुक्रंते अनद्यजतं ते अन्यद्विरूषे अहनीद्यौरिवासि।

विश्वाहि माया अवसि स्वधावन्भद्रा ते पूहन्निहरातिरस्तु।।

।।सा.सं.७५।।

**शनिमन्त्र:।**

ॐ शन्नोदेवीरमिष्टयेशन्नोभवन्तु पीतये। शंयोरभिस्त्रवन्तु न:।।

।।सा.सं.।।

**राहुमन्त्र:।**

ॐ कया नश्चित्र आ भुवदूती सदावृध: सखा। कया शचिष्ठया वृता।।

।।सा.सं.१६९।।

**केतुमन्त्र:**

ॐ केतुं कृण्ण्वन्नकेतवे पेशोमर्या अपेशसे। समुषद्भिरजायथा:।।

।।सा.सं.१४७०।।

**पुराणोक्तनवग्रहमन्त्रा:।**

**सूर्यमन्त्र:।**

जपाकुसुमसंकाशं काश्यपेयं महद्युतिम्।
तमोरिं सर्वपापघ्नं प्रणतोऽस्मि दिवाकरम्।।

**चन्द्रमन्त्रः।**

दधिशंखतुषाराभं क्षीरोदार्णवसंभवम्।
नमामि शशिनं सोमं शम्भोर्मुकुटभूषणम्।।

**मङ्गलमन्त्रः।**

धरणीगर्भसंभूतं विद्युत्कान्तिसमप्रभम्।
कुमारं शक्तिहस्तं च मङ्गलं प्रणमाम्यहम्।।

**बुध मन्त्रः।**

प्रियङ्गुकलिकाश्यामं रूपेणाप्रतिमं बुधम्।
सौम्यं सौम्यगुणोपेतं तं बुधं प्रणमाम्यहम्।।

**गुरु मन्त्रः।**

देवानां च ऋषीणां च गुरुं कांचनसन्निभम्।
बुद्धिभूतं त्रिलोकेशं तं नमामि बृहस्पतिम्।।

**शुक्र मन्त्रः।**

हिमकुंदमृणालाभं दैत्यानां परमं गुरुम्।
सर्वशास्त्रप्रवक्तारं भार्गवं प्रणमाम्यहम्।।

**शनि मन्त्रः।**

नीलांजनसमाभासं रविपुत्रं यमाग्रजम्।
छायामार्तण्डसम्भूतं तं नमामि शनैश्चरम्।।

**राहु मन्त्रः।**

अर्धकायं महावीर्यं चन्द्रादित्यविमर्दनम्।
सिंहिकागर्भसंभूतं तं राहु प्रणमाम्यहम्।।

**केतु मन्त्रः।**

पलाशपुष्पसंकाशं तारकाग्रहमस्तकम्।
रौद्रं रौद्रात्मकं घोरं तं केतुं प्रणमाम्यहम्।।

**फलप्राप्तीः**

इति व्यासमुखोद्‌गीतं यः पठेत् सुसमाहितः।
दिवा वा यदि वा रात्रौ विघ्नशान्तिर्भविष्यति।।

नरनारीनृपाणां च भवेद् दुःस्वप्ननाशनम्।
ऐश्वर्यमतुलं तेषामारोग्यं पुष्टिवर्धनम्।।
ग्रहनक्षत्रजाः पीडास्तस्कराग्निसमुद्भवाः।
ताः सर्वाः प्रशमं यान्ति व्यासो ब्रूते न संशयः।।
।।इति श्रीवेदव्यासविरचितं नवग्रहस्तोत्रं संपूर्णम्।। बा.ज्यो.सा.सं.पृ.२६१,बृ.र.पृ.५४३।।

## परिशिष्टम्-०६

**तन्त्रोक्तनवग्रहमन्त्राः।**

**सूर्यमन्त्रः**

ॐ ह्राँ ह्रीँ ह्रौं सःसूर्यायनमः।।

**चन्द्रमन्त्रः**

ॐ श्राँ श्रीँ श्रौं सःसोमाय नमः।।

**मङ्गलमन्त्रः**

ॐ क्राँ क्रीँ क्रौं सःभौमाय नमः।।

**बुधमन्त्रः**

ॐ ब्राँ ब्रीँ ब्रौं सः बुधाय नमः।।

**गुरुमन्त्रः**

ॐ ज्राँ ज्रीँ ज्रौं सःबृहस्पतये नमः।।

**शुक्रमन्त्रः**

ॐ द्राँ द्रीँ द्रौं सःशुक्राय नमः।।

**शनिमन्त्रः**

ॐ खाँ खीँ खौँ सःशनैश्चराय नमः ।।

**राहुमन्त्रः**

ॐ भ्राँ भ्रीँ भ्रौं सःराहवे नमः।।

**केतुमन्त्रः**

ॐ प्राँ प्रीँ प्रौं सःकेतवे नमः।।

।। ब्र.कर्म.स.पृ.३०८-३११।।

**नवग्रहपीडाहरस्तोत्रम्।**

**सूर्यमन्त्रः**

ग्रहाणामादिरादित्यो लोकरक्षणकारकः।
विषमस्थानसंभूतां पीडां हरतु मे रविः।।१।।

**चन्द्रमन्त्रः**

रोहिणीशः सुधामूर्तिः सुधागात्रः सुधाशनः।
विषमस्थानसंभूतां पीडां हरतु मे विधुः।।२।।

**मङ्गलमन्त्रः**

भूमिपुत्रो महातेजा जगतां भयकृत् सदा।
वृष्टिकृत् वृष्टिहर्ता च पीडां हरतु मे कुजः।।३।।

**बुधमन्त्रः**

उत्पातरूपो जगतां चन्द्रपुत्रो महाद्युतिः।
सूर्यप्रियकरो विद्वान् पीडां हरतु मे बुधः।।४।।

**गुरुमन्त्रः**

देवमन्त्री विशालाक्षः सदा लोकहिते रतः।

अनेकशिष्यसंपूर्णः पीडां हरतु मे गुरुः।।५।।

**शुक्रमन्त्रः**

दैत्यमन्त्री गुरुस्तेषां प्राणदश्च महामतिः।

प्रभुस्ताराग्रहाणां च पीडां हरतु मे भृगुः।।६।।

**शनिमन्त्रः**

सूर्यपुत्रो दीर्घदेहो विशालाक्षः शिवप्रियः।

मन्दचारः प्रसन्नात्मा पीडां हरतु मे शनिः।।७।।

**राहुमन्त्रः**

महाशिरो महावक्त्रो दीर्घदंष्ट्रो महावलः।

अतनुश्चोर्ध्वकेशश्च पीडां हरतु मे शिखी।।८।।

**केतुमन्त्रः**

अनेकरूपवर्णैश्च शतशोऽथ सहस्रशः।

उत्पातरूपो जगतां पीडां हरतु मे तमः।।९।।

।।सार्थ नवग्रह स्तोत्रम् पृ.१४।।

नवग्रहस्तोत्राणि पृ.५३१ तः ५४४ पर्यन्तं बृहत् स्तोत्ररत्नाकरग्रन्थे द्रष्टव्यम्।

**ऋणपरिहारः।**

ऋणपरिहारार्थं ऋणमोचकमङ्गलस्तोत्रं पृ.५३४ बृहत् स्तोत्ररत्नाकरग्रन्थे द्रष्टव्यम्।

भोमप्रदोषव्रतम्( श्रीव्रतो.च.ग्रन्थस्य पृ.४९९ द्रष्टव्यम्)।

**दरिद्र नाशकमन्त्राः।**

दुर्गे स्मृता हरसि भीतिमशेषजन्तोः स्वस्थैः स्मृता मतिमतीव शुभां ददासि।

दारिद्र्यदुःखभयहारिणि का त्वदन्या सर्वोपकारकरणाय सदाऽऽर्द्रचित्ता। दु.स.४/१७

**धनप्राप्ति उपायाः।**

**नेत्रपीडापरिहारः।**

चाक्षुषोपनिषदः पाठकरणेन सूर्यस्याराधनेन सुवर्णाज्यदानेन च चक्षुःपीडाशमनं भवति।

**चाक्षुषोपनिषद् (चाक्षुषी विद्या)।**

विनियोगः – ॐ अस्याश्चाक्षुषीविद्याया अहिर्बुध्न्य ऋषिर्गायत्री छन्दः सूर्यो देवता चक्षूरोगनिवृत्तये विनियोगः।

ॐ चक्षुः चक्षुः चक्षुः तेजः स्थिरो भव। मां पाहि पाहि। त्वरितं चक्षुरोगान् शमय शमय। मम जातरूपं तेजो दर्शय दर्शय। यथा अहम् अन्धो न स्यां तथा कल्पय कल्पय। कल्याणं कुरु कुरु। यानि मम पूर्वजन्मोपार्जितानि चक्षुः प्रतिरोधकदुष्कृतानि सर्वाणि निर्मूलय निर्मूलय।

ॐ नमः चक्षुस्तेजोदात्रे दिव्याय भास्कराय। ॐ नमः करुणाकरायामृताय। ॐ नमः सूर्याय। ॐ नमो भगवते सूर्यायाक्षितेजसे नमः। खेचराय नमः। महते नमः। रजसे नमः। तमसे नमः।

असतो मा सद्गमय। तमसो मा ज्योतिर्गमय। मृत्योर्मा अमृतं गमय। उष्णो भगवाञ्छुचिरूपः। हंसो भगवान् शुचिरप्रतिरूपः।

य इमां चाक्षुष्मतीविद्यां ब्राह्मणो नित्यमधीते न तस्याक्षिरोगो भवति। न तस्य कुले अन्धो भवति। अष्टौ ब्राह्मणान् सम्यग् ग्राहयित्वा विद्यासिद्धिर्भवति। ॐ नमो भगवते आदित्याय अहोवाहिनी अहोवाहिनी स्वाहा ।

।। नि.पू.पृ.२९९।।

**वाणीदोषपरिहारः/ विद्याप्राप्ति उपायाः।**

ऐं नमस्ते शारदे देवि सरस्वति मतिप्रदे।
वस त्वं मम जिह्वाग्रे सर्व विद्या प्रदा भव।। (वासुदेवानन्दसरस्वती-रचितमन्त्रः)
विद्यावन्तं यशस्वन्तं लक्ष्मीवन् जनं कुरो।
रूपं देहि जयं देहि यशो देहि द्विषो जहि। ।। दु. अ./१४।।
ऐं शारदायै नमः।
सरस्वतीस्तोत्राणि पृ.५२३ तः ५२९ पर्यन्तम् बृहत् स्तोत्ररत्नाकरग्रन्थे द्रष्टव्यम्।

**वन्ध्यत्वदोषपरिहारः।**

**गर्भरक्षा उपायाः**

पाहि पाहि महायोगिन् देव देव जगत्पते।
नान्यं त्वदभयं पश्ये यत्र मृत्युः परस्परम्। ।।श्रीमद्भागवतमहापुराणम् १/८/२।।

**बालरक्षा उपायाः।**

पूतनाकवचम् (बालरक्षा स्तोत्रम् पृ.१५९ बृहत् स्तोत्ररत्नाकरग्रन्थे द्रष्टव्यम्।)। ।।श्रीमद्भागवतमहापुराणम् १०/६/२२तः२९ ।।

**सन्तति/ पुत्रप्राप्ति उपायाः।**

हरिवंशपुराणपारायणम्।
वंशवृद्धिकरं वंशकवचम् पृ.४५० बृहत् स्तोत्ररत्नाकरग्रन्थे द्रष्टव्यम्।
क्लीं देवकीसुत गोविन्द वासुदेव जगत्पते।
देहि मे तनयं कृष्ण त्वामहं शरणं गतः(गता)।। क्लीं वंशवर्धनाय नमः। (८४६श्रीविष्णुसहस्रनामावली स.ना.स्तो.सं.ग्रन्थस्य पृ.६६ द्रष्टव्यम्) मन्त्रस्य वा सपादलक्षजपानुष्ठानप्रयोगकरणेन सन्ततिर्भवति।
सन्तानगोपालस्तोत्रम् । संक्षिप्तवैष्णवयन्त्र-मन्त्र प्रयोगावली ग्रन्थे पृ ४२तः४५ मन्त्राः द्रष्टव्याः।
पुत्रप्रदपयोव्रतार्थं श्रीमद्भागवतमहापुराणे ८/१६/२७,२९ तः३७ मन्त्राः द्रष्टव्याः।

प्रदोषव्रतम् (श्रीव्रतो.च.ग्रन्थस्य पृ.४९९द्रष्टव्यम्)। व्यतिपातव्रतम्( श्रीव्रतो.च.ग्रन्थस्य पृ.४७३ द्रष्टम्म्)। विविधसन्तानोपायार्थं सर्व.अनु.प्र.ग्रन्थस्य पृ.६१७ तः ६३२ द्रष्टव्यम्)।

**पितृदोषेणसंततिनाशपरिहारः।**

तीर्थोपरि श्राद्धकरणेन संततिर्भवति । पितृस्तोत्रस्य पाठकरणेन (विशेषार्थं सर्व.अनु.प्र.ग्रन्थस्य पृ.५६५ द्रष्टव्यम्)।

**सर्पशापात्सन्ततिनाशपरिहारः।**

श्रावणशुक्लकृष्णपञ्चम्यां नागपञ्चमीव्रतम्। वर्षपर्यन्तं शुक्लपञ्चम्यां व्रतोपवासपूर्वकं नागपूजनेन सन्ततिर्भवति। तीर्थोपरि नाग-नारायणबलीश्राद्धप्रयोगकरणेन सन्ततिर्भवति।

**प्रेतशापात्संततिनाशपरिहारः।**

प्रेतोद्धारणाय श्रीमद्भागवतमहापुराणसंहितापारायणकरणेन तीर्थोपरिपञ्चबलीश्राद्धकरणेन सन्ततिर्भवति।।

**विवाहभङ्गपरिहारः। / विलम्बितविवाहपरिहारः।**

विवाहभङ्गकारकग्रहस्य जपहोमतर्पणमार्जनदानब्राह्मणभोजनपूर्वकानुष्ठानप्रयोगेण विवाहो भवति।
विश्वावसु गन्धर्वराज कवचस्तोत्रम् (विशेषार्थं सर्व.अनु.प्र.ग्रन्थस्य पृ.६१० तः ६१६ द्रष्टव्यम्)
कामदेव प्रयोगः (विशेषार्थं सर्व.अनु.प्र.ग्रन्थस्य पृ.६०१तः६०४ द्रष्टव्यम्)

**वैधव्यदोषपरिहारः**

विष्णुविवाहकरणेन (कुम्भविवाहकरणेन) वैधव्यदोषशमनं भवति। विशेषार्थं वि.च. ग्रन्थस्य पृ.१५१ द्रष्टव्यम् ।

अखण्डितसौभाग्यदायकं ज्येष्ठ शुक्ल पूर्णिमायां वटसावित्रीव्रतम्(श्रीव्रतो.च.ग्रन्थस्य पृ. ४४५-४४६ द्रष्टव्यम्), भाद्रपद शुक्ल तृतीयायां हरितालिकाव्रतम् (श्रीव्रतो.च.ग्रन्थस्य पृ.२३४-३४२ द्रष्टव्यम्), आश्विन कृष्ण चतुर्थी करकचतुर्थी व्रतकरणेन वैधव्यदोषशमनं भवति।

वन्दिताङ्घ्रियुगे देवि सर्वसौभाग्यदायिनि।
रूपं देहि जयं देहि यशो देहि द्विषो जहि।। ।।दु.अ./७।।
देहि सौभाग्यमारोग्यं देहि मे परमं सुखम्।
रूपं देहि जयं देहि यशो देहि द्विषो जहि।। ।।दु.अ./१२।।

**पत्नीप्राप्तिमन्त्रः**

पत्नीं मनोरमां देहि मनोवत्तानुसारिणीम्।
तारिणीं दुर्गसंसार सागरस्य कुलोद्भवाम्।। ।।दु.अ./२४।।

**सुयोग्यपतिप्राप्तिमन्त्रः**

कात्यायनि महामाये महायोगिन्यधीश्वरि।
नन्द गोप सुतन्देहि पतिं मे कुरु ते नमः।। श्रीभा.मा.१०/२२/०४

**पतिप्रीतिसम्पादनमन्त्रः।(हृष्टपतिप्रीतिसम्पादनमन्त्रः)**

तासामाविरभूच्छौरिः स्मयमानमुखाम्बुजः।
पीताम्बरधरः स्रग्वी साक्षान्मन्मथमन्मथः।। श्रीभा.मा.१०/३२/०२
अस्त्वम्बुजाक्ष मम ते चरणानुरागः आत्मन् रतस्य मयि चानतिरिक्तदृष्टेः।
यर्ह्यस्य वृद्धय उषात्तरजोऽतिमात्रो मामीक्षसे तदुह नः परमानुकम्पा।। श्रीभा.मा.१०/६०/४६
पति-पत्नी विरहपीडा विनाशकस्तोत्रम् (विशेषार्थं सर्व.अनु.प्र.ग्रन्थस्य पृ.६१६तः६१७ द्रष्टव्यम्)

**शत्रुनाशक उपायाः**

शत्रुसंहारकमेकदन्तस्तोत्रम् पृ.१४ बृहत् स्तोत्ररत्नाकरग्रन्थे द्रष्टव्यम्।
अचिन्त्यरूपचरिते सर्वशत्रुविनाशिनि।
रूपं देहि जयं देहि यशो देहि द्विषो जहि।। दु.अ./०८।।
सर्वाबाधा प्रशमनं त्रैलोक्यस्याखिलेश्वरि।
एवमेव त्वयाकार्यमस्मद्वैरि विनाशनम्।। दु.स.११/३१।।

**ग्रहाणां स्वभावाः**

ग्रहाणां गुणाः चन्द्रसूर्य गुरुसौम्या भृग्वारशनयो द्विज।
सत्वंरजस्तम इति स्वभावो ज्ञायते क्रमात्।
आदित्यामरमन्त्रिशीतकिरणाः सत्वप्रधानग्रहाः ।
शुक्रज्ञौ सरजोगुणेशनिधरोपुत्रोतमःस्वामिनौ ।। ।।जा.पा.२/२६।।
सत्वाधिका भास्करभौमजीवा भृग्वात्मजौ राजसिकः शशीच
शनैश्चरस्तामासिकौ बुधश्च संयोगतोऽस्माल्लभते विशेषान्।।
येनग्रहेणसह बुधःयुतिं करोति तस्य ग्रहस्य गुणानुसारं बुधस्य गुणः भवति।

**ग्रहाणां वस्त्राणि ।**

स्थूलाम्बं नूतनचारुचेलं कृशानुतोयाहतमध्यमानि।
दृढांशुकं जीर्णमिनादिकानां वस्त्राणिसर्वे मुनयोवदन्ति।।जा.पा २/२२।।

**ग्रहाणां ताम्रादि धातवाः।**

ताम्रं कांस्यं धातुताम्रं त्रपु स्यात् स्वर्णं रौप्यं चायसं भास्करादेः।। ।। फ.दी.२/३०।।

**ग्रहाणां रसाः।**

कदुलवणतिक्तमिश्र मधुरश्च कषायकाः।
क्रमेण सर्वे विज्ञेया सूर्यादीन, द्विजोत्तम।। ।। बृ.पा.हो.शा.३/२३।।

**ग्रहाणां रत्नानि।**

माणिक्यं दिननायकस्य, विमलं मुक्ताफलं शीतगो
माहेयस्य च विद्रुमं मरकतं सौमस्य गुरुत्मकम्
देवेज्यस्य च पुष्परागमसुराचार्यस्य वज्रं शमः
नीलं निर्मलमन्ययोश्च गदिते गोमेदवैडूयके ।।जा.पा.२/२१।।
गोधूमं तण्डुलं वै तलचणककुलुत्थाढकश्याममुद्गा
निष्पावा माष अर्केन्द्वसितगुरुशिखिक्रूरविद्भृग्वहीनाम्।
भोगीनार्क्यारजीवज्ञशशिशिखिसितह्यम्बराख्यं कलिङ्गं
सौराष्ट्रवन्तिसिन्धून्सुनगधयवनान्पर्वतान्कीकटांश्च ।।फ.दी.२/२८।।

**सूर्यादिग्रहाणां पीडाशमनार्थं धन्यादिदानाविचारः।**

**ग्रहाणां निवासप्रदेशाः।**

देवतोयतटवह्निविहाराः कोशगेहशयनोत्करदेशाः।
भानूपूर्वनिलयाः परिकल्प्या वेस्मकोणनिलयाहिकेतू।। ।।जा.पा.२/२४।।
लङ्कादिकृष्णासरिदनतमारः सितस्ततो गौतमिकान्तभूमिः।

विन्ध्यान्तमार्यः सुरनिम्नगान्तं बुधः शनिः स्यात्तुहिनाचलानतः।। जा.पा.२/२५।।

**सूर्यादिग्रहाणां जपसंख्या।**

रवेःसप्तसहस्राणि चन्द्रस्यैकादश स्मृताः ।
भौमे दशसहस्राणि बुधे चाष्टसहस्रकम्।।
एकोनविंशतिर्जीवे भृगोर्नपसहस्रकम्।
त्रयोविंशतिः सौरेश्च रहोरष्टादश स्मृताः।।
केतोरत्यष्ट्यसाहस्रं जहसंख्याः प्रकीर्तिताः।। बा.ज्यो.सा.स.१०/६३-६४।।

**ग्रहाणामात्मादि संज्ञाः।**

कालस्यात्मा भास्करश्चित्तमिन्दुः सत्वं भौमः स्वाद्वचन्द्रसूनुः
देवाचार्यः सौख्यविज्ञानसारः कामः शुक्रो दुःख मेवार्कसूनुः।। ।।जा.पा.२/१।।
कालात्मा च दिवानाथे मनः कुमुदबान्धवः।
सत्वंकुजो विजानीयाद् बुधो वाणी प्रदायकः।।
देवेज्यो ज्ञानसुखदो भृगुवीर्यप्रदायकः।
विचार्यतामिदं सर्वं छायासूनुश्च दुःखदः।। ।।बृ.पा.हो.शा.३/१तः२।।
रुद्राम्बागुहविष्णुधातकमलकालह्यजा देवताः
सूर्यादग्नि जलाग्नि भूमिखपयोवाश्व्यात्मकाः स्युर्ग्रहाः।। ।।फ.दी.२/२।।
अग्निभूमिनभस्तोयवायवः क्रमतो द्विजा
भौमादीनां ग्रहाणां च तत्त्वास्वामी प्रकीर्तिताः।। ।।बृ.पा.हो.शा.३/९।।

**ग्रहाणाआग्नेयादिसंज्ञाः।**

रामाऽवतारः सूर्यस्य चन्द्रस्य यदुनायकः।
नृसिंहा भूमिपुत्रस्य बुद्धः सोमसुतस्य च।।
वामनो विबुधेन्यस्य भार्गवो भार्गवस्य च।
कूर्मो भास्करपुत्रस्य सैंहिकेयस्य सूकरः।
केतोमीनावतारश्च ये चान्ये तेऽपि खेरजाः। ।।बृ.पा.हो.शा.२/२७तः२९।।

## परिशिष्टम्-०६

### ग्रहाणामरिष्टशमनार्थंरामादिदेवतानामाराधना विचारः।

| ग्रहाः | अवतारः |
|---|---|
| सूर्यः | रामावतारः |
| चन्द्रः | कृष्णावतारः |
| मङ्गलः | नृसिंहावतारः |
| बुधः | बौद्धावतारः |
| गुरुः | वामनावतारः |
| शुक्रः | परशुरामावतारः |
| शनैश्चरः | कूर्मावतारः |
| राहुः | सूकरावतारः |
| केतुः | मत्स्यावतारः |

## परिशिष्टम्-७
## सूर्यादिग्रहाणाम् अरिष्टपरिहारोपायाः।

**नवग्रहमन्त्राः। ऋग्वेदीयनवग्रहमन्त्राः। सूर्यमन्त्रः।**

आ कृष्णेन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यंञ्च।
हिरण्येन सविता रथेना ऽऽदेवो याति भुवनानि पश्श्यन।। ऋ.सं. १/३५/२।।

**चन्द्रमन्त्रः।**
आप्यायस्व समेतु ते। विश्वतः सोम वृष्णयम्।
भवा वाजस्य संगथे।।ऋ.सं.१/९१/१६।।

**मङ्गलमन्त्रः।**
अग्निर्मूर्धा दिवः ककुत् पतिः पृथिव्या अयम्।
अपां रेतांसि जिन्वति।।ऋ.सं. ८/४४/१६।।

**बुधमन्त्रः।**
उदबुद्ध्यध्वं समनसः सखायः।
समग्निमिन्ध्वं बहवः सनीळाः।
दधिक्रामग्निमुषसं च देवी –
भिन्द्रावतोऽवसे नि ह्वये वः।। ऋ.सं. १०/१०१/०१।।

**गुरुमन्त्रः।**
बृहस्पते अति यदर्यो अर्हाद् द्युमद्
विभाति क्रतुमज्जनेषु।
यद् दीद्यच्छवस ऋतप्रजात्
तद्स्मासु द्रविणं धेहि चित्रम्।।ऋ.सं. २/२३/१५।।

**शुक्रमन्त्रः।**
शुक्रं तै अन्यद् यजन्तं ते अन्यद्
विषुरूपे अहनी द्यौरिवासि।
विश्वा हि माया अवसि स्वधावो
भद्रा ते पूषन्निह रातिरस्तु।।ऋ.सं. ६/५८/०१।।
शुक्रः शुशुक्काँ उषो न जारः

पप्रा समीची दिवो न ज्योतिः।
परि प्रजातः क्रत्वा बभूथ
भुवो देवानां पिता पुत्र सन्।।ऋ.सं. १/६९/०१।।

**शनि मन्त्रः।**
शमग्निरग्निभिः करच्छं नस्तपतु सूर्यः।
शं वोतो वात्वरपा अप् स्त्रिधः।।ऋ.सं. ८/१८/९।।

**राहु मन्त्रः।**
कया नश्चित्र आ भुव दूती सदावृधः सखा।
कया शचिष्ठया वृता।।ऋ.सं. ४-३१-१।।

**केतु मन्त्रः**
केतुं कृण्वन्नकेतवे पेशो मर्या अपेशसे।
समुषद्भिरजायथाः।।ऋ.सं. १/६/३।।

**यजुर्वेदीनवग्रहमन्त्राः**
**सूर्यमन्त्रः।**
आ कृष्णेन रजसा व्वर्त्तमानो निवेशयन्नमृतं मर्त्यञ्च।
हिरण्य येन सविता रथेना देवो याति भुवनानि पश्श्यन्।।शु.य.म.व.सं.४३/३३।।

**चन्द्रमन्त्रः।**
ॐइमन्देवाऽअसपत्क्नगूंसुवद्ध्वम्महतेक्षत्रायमहतेज्ज्यैष्ठ्याय महुतेजानराज्ज्यायेन्द्रस्येन्द्रियाय।
इमममुष्यपुत्रममुष्यैपुत्रमस्यैव्विशऽएषवोमीराजासोमोस्म्माकम्ब्राह्मणानागुंराजा।
।शु.य.म.व.सं.१८/१०।।

**मङ्गलमन्त्रः।**
ॐ अग्निर्म्मूर्द्धादिवहककुत्पति÷पृथिव्व्याऽअयम्।। अपागुंरेतागुंसिजिन्वति।।शु.य.म.व.सं.१/०३।।

**बुधमन्त्रः।**
ॐउद्बुद्ध्यस्त्वाग्ग्नेप्प्रतिजागृहित्त्वमिष्टापूर्त्तेसगूंसृजेथामयञ्च।
अस्मिन्त्सधस्त्थेऽअद्ध्युत्तरस्मिन्व्विश्श्वेदेवायजमानश्च्चसीदत।।शु.य.म.व.सं.५४/१५।।

## परिशिष्टम्-७

**गुरुमन्त्रः।**

ॐबृहस्प्पतेऽअतियदर्य्योऽअर्हाद्द्युमद्विभातिक्क्रतुमज्जनेषु।
यद्दीदयच्छवसऽऋतप्प्रजाततदस्म्मासुऽद्रविणन्धेहिचित्रम्।। शु.य.म.व.सं.०३/२६।।

**शुक्रमन्त्रः।**

ॐअन्नात्परिस्रुतोरसम्ब्रह्मणाव्व्यपिबत्क्षत्रम्पयहसोमम्प्रजापतिः।
ऋतेन सत्त्यमिन्द्रियं व्विपानगूशुक्क्रमन्धसऽइन्द्रस्येन्द्रियमिदम्पयोमृतम्मधु।। शु.य.म.व.सं.७५/१९।।

**शनिमन्त्रः।**

ॐ शन्नोदेवीरभिष्ट्टयऽआपोभवन्तुपीतये। शँय्योरभिस्रवन्तुनः।। शु.य.म.व.सं.१२/३६।।

**राहुमन्त्रः।**

ॐ कया नश्चित्रऽ आभुवदूती सदावृधःसखा। कयाशचिष्ठ्ठयावृता।। शु.य.म.व.सं.०४/३६

**केतुमन्त्रः।**

ॐ केतुङ्कृण्ण्वन्नकेतवे पेशेमर्य्याऽपेशसे। समुषद्भिरजायथाः।। शु.य.म.व.सं.३७/२९।।

**सामवेदीयनवग्रहमन्त्राः।**

**सूर्यमन्त्रः।**

ॐ बण्महाँ असि सूर्य बडादित्यमहाँ असि। महस्ते सतो महिमापनिष्टममह्ना देव महाँ असि।।
।।सा.सं.२७६।।

**चन्द्रमन्त्रः।**

ॐ आप्यायस्व समेतु ने विश्वतः सोम वृष्ण्यम्। भवा वाजस्य संगथे।। ता.ब्रा. १/५/९।।

**मङ्गलमन्त्रः।**

ॐ अग्निमूर्द्धादिवः ककुत्पतिः पृथिव्या अयम्। अपाँ रेताँ सि जिन्वति।। सा.सं.२७।।

**बुधमन्त्रः।**

ॐ अग्नेविवस्वदुषसश्चित्रँ राधो अमर्त्य। आ दाशुषे जातवेदोवहा त्वमद्या देवाँ उषर्बुधः।।
।। सा.सं.४०।।

**गुरुमन्त्रः।**

ॐ बृहस्पते परिदीया रथेन रक्षोहामित्राँ अपबाधमानः।
प्रभजन्त्सेनाःप्रमृणो युधाजयन्नस्माकमेध्यविताराथानाम्।। सा.सं.१८५२।।

## परिशिष्टम्-७

**शुक्रमन्त्रः**

ॐ शुक्रंते अनद्यजतं ते अन्यद्विरूषे अहनीद्यौरिवासि।
विश्वाहि माया अवसि स्वधावन्भद्रा ते पूहन्निहरातिरस्तु।। सा.सं.७५।।

**शनिमन्त्रः।**

ॐ शन्नोदेवीरमिष्टयेशन्नोभवन्तु पीतये। शंयोरभिस्त्रवन्तु नः।। सा.सं.।।

**राहुमन्त्रः।**

ॐ कया नश्चित्र आ भुवदूती सदावृधः सखा। कया शचिष्ठया वृता।। सा.सं.१६९।।

**केतुमन्त्रः**

ॐ केतुं कृण्ण्वन्नकेतवे पेशोमर्या अपेशसे। समुषद्भिरजायथाः।। सा.सं.१४७०।।

**पुराणोक्तनवग्रहमन्त्राः।**

**सूर्यमन्त्रः।**

जपाकुसुमसंकाशं काश्यपेयं महद्युतिम्।
तमोरिं सर्वपापघ्नं प्रणतोऽस्मि दिवाकरम्।।

**चन्द्रमन्त्रः।**

दधिशंखतुषाराभं क्षीरोदार्णवसंभवम्।
नमामि शशिनं सोमं शम्भोर्मुकुटभूषणम्।।

**मङ्गलमन्त्रः।**

धरणीगर्भसंभूतं विद्युत्कान्तिसमप्रभम्।
कुमारं शक्तिहस्तं च मङ्गलं प्रणमाम्यहम्।।

**बुध मन्त्रः।**

प्रियङ्गुकलिकाश्यामं रूपेणाप्रतिमं बुधम्।
सौम्यं सौम्यगुणोपेतं तं बुधं प्रणमाम्यहम्।।

**गुरु मन्त्रः।**

देवानां च ऋषीणां च गुरुं कांचनसन्निभम्।
बुद्धिभूतं त्रिलोकेशं तं नमामि बृहस्पतिम्।।

## परिशिष्टम्-७

**शुक्र मन्त्रः।**
हिमकुंदमृणालाभं दैत्यानां परमं गुरुम्।
सर्वशास्त्रप्रवक्तारं भार्गवं प्रणमाम्यहम्।।

**शनि मन्त्रः।**
नीलांजनसमाभासं रविपुत्रं यमाग्रजम्।
छायामार्तण्डसम्भूतं तं नमामि शनैश्चरम्।।

**राहु मन्त्रः।**
अर्धकायं महावीर्यं चन्द्रादित्यविमर्दनम्।
सिंहिकागर्भसंभूतं तं राहु प्रणमाम्यहम्।।

**केतु मन्त्रः।**
पलाशपुष्पसंकाशं तारकाग्रहमस्तकम्।
रौद्रं रौद्रात्मकं घोरं तं केतुं प्रणमाम्यहम्।।

**फलप्राप्तीः।**
इति व्यासमुखोद्गीतं यः पठेत् सुसमाहितः।
दिवा वा यदि वा रात्रौ विघ्नशान्तिर्भविष्यति।।

नरनारीनृपाणां च भवेद् दुःस्वप्ननाशनम्।
ऐश्वर्यमतुलं तेषामारोग्यं पुष्टिवर्धनम्।।
ग्रहनक्षत्रजाः पीडास्तस्कराग्निसमुद्भवाः।
ताः सर्वाः प्रशमं यान्ति व्यासो ब्रूते न संशयः।।
।।इति श्रीवेदव्यासविरचितं नवग्रहस्तोत्रं संपूर्णम्।। बा.ज्यो.सा.सं.पृ.२६१,बृ.र.पृ.५४३।।

**तन्त्रोक्तनवग्रहमन्त्राः।**

**सूर्यमन्त्रः**
ॐ ह्राँ ह्रीँ ह्रौं सःसूर्यायनमः।।
**चन्द्रमन्त्रः**
ॐ श्राँ श्रीँ श्रौं सःसोमाय नमः।।
**मङ्गलमन्त्रः**
ॐ क्राँ क्रीँ क्रौं सःभौमाय नमः।।

**बुधमन्त्रः**

ॐ ब्राँ ब्रीँ ब्रौं सः बुधाय नमः।।

**गुरुमन्त्रः**

ॐ ज्राँ ज्रीँ ज्रौं सःबृहस्पतये नमः।।

**शुक्रमन्त्रः**

ॐ द्राँ द्रीँ द्रौं सःशुक्राय नमः।।

**शनिमन्त्रः**

ॐ खाँ खीँ खौँ सःशनैश्चराय नमः ।।

**राहुमन्त्रः**

ॐ भ्राँ भ्रीँ भ्रौं सःराहवे नमः।।

**केतुमन्त्रः**

ॐ प्राँ प्रीँ प्रौं सःकेतवे नमः।। ब्र.कर्म.स.पृ.३०८–३११।।

**नवग्रहपीडाहरस्तोत्रम्।**

**सूर्यमन्त्रः**

ग्रहाणामादिरादित्यो लोकरक्षणकारकः।
विषमस्थानसंभूतां पीडां हरतु मे रविः।।१।।

**चन्द्रमन्त्रः**

रोहिणीशः सुधामूर्तिः सुधागात्रः सुधाशनः।
विषमस्थानसंभूतां पीडां हरतु मे विधुः।।२।।

**मङ्गलमन्त्रः**

भूमिपुत्रो महातेजा जगतां भयकृत् सदा।
वृष्टिकृत् वृष्टिहर्ता च पीडां हरतु मे कुजः।।३।।

**बुधमन्त्रः**

उत्पातरूपो जगतां चन्द्रपुत्रो महाद्युतिः।
सूर्यप्रियकरो विद्वान् पीडां हरतु मे बुधः।।४।।

**गुरुमन्त्रः**

देवमन्त्री विशालाक्षः सदा लोकहिते रतः।
अनेकशिष्यसंपूर्णः पीडां हरतु मे गुरुः।।५।।

**शुक्रमन्त्रः**

दैत्यमन्त्री गुरुस्तेषां प्राणदश्च महामतिः।
प्रभुस्ताराग्रहाणां च पीडां हरतु मे भृगुः।।६।।

**शनिमन्त्रः**

सूर्यपुत्रो दीर्घदेहो विशालाक्षः शिवप्रियः।

मन्दचार: प्रसन्नात्मा पीडां हरतु मे शनि:।।७।।

**राहुमन्त्रः**

महाशिरो महावक्त्रो दीर्घदंष्ट्रो महावल:।

अतनुश्चोर्ध्वकेशश्च पीडां हरतु मे शिखी।।८।।

**केतुमन्त्रः**

अनेकरूपवर्णैश्च शतशोऽथ सहस्रश:।

उत्पातरूपो जगतां पीडां हरतु मे तम:।।९।। सार्थ नवग्रह स्तोत्रम् पृ.१४।।

नवग्रहस्तोत्राणि पृ.५३१ त: ५४४ पर्यन्तं बृहत् स्तोत्ररत्नाकरग्रन्थे द्रष्टव्यम्।

**ऋणपरिहारः।**

ऋणपरिहारार्थं ऋणमोचकमङ्गलस्तोत्रं पृ.५३४ बृहत् स्तोत्ररत्नाकरग्रन्थे द्रष्टव्यम्।

भोमप्रदोषव्रतम्( श्रीव्रतो.च.ग्रन्थस्य पृ.४९९ द्रष्टव्यम्)।

**दरिद्र नाशकमन्त्राः।**

दुर्गे स्मृता हरसि भीतिमशेषजन्तो: स्वस्थै: स्मृता मतिमतीव शुभां ददासि।

दारिद्र्यदु:खभयहारिणि का त्वदन्या सर्वोपकारकरणाय सदाऽऽर्द्रचित्ता। दु.स.४/१७

**धनप्राप्ति उपायाः।**

**नेत्रपीडापरिहारः।**

चाक्षुषोपनिषद: पाठकरणेन सूर्यस्याराधनेन सुवर्णाज्यदानेन च चक्षु:पीडाशमनं भवति।

**चाक्षुषोपनिषद् (चाक्षुषी विद्या)।**

विनियोग: – ॐ अस्याश्चाक्षुषीविद्याया अहिर्बुध्न्य ऋषिर्गायत्री छन्द: सूर्यो देवता चक्षूरोगनिवृत्तये विनियोग:।

ॐ चक्षु: चक्षु: चक्षु: तेज: स्थिरो भव। मां पाहि पाहि। त्वरितं चक्षुरोगान् शमय शमय। मम जातरूपं तेजो दर्शय दर्शय। यथा अहम् अन्धो न स्यां तथा कल्पय कल्पय। कल्याणं कुरु कुरु। यानि मम पूर्वजन्मोपार्जितानि चक्षु: प्रतिरोधकदुष्कृतानि सर्वाणि निर्मूलय निर्मूलय।

ॐ नम: चक्षुस्तेजोदात्रे दिव्याय भास्कराय। ॐ नम: करुणाकरायामृताय। ॐ नम: सूर्याय। ॐ नमो भगवते सूर्यायाक्षितेजसे नम:। खेचराय नम:। महते नम:। रजसे नम:। तमसे नम:। असतो मा सद्गमय। तमसो मा ज्योतिर्गमय। मृत्योर्मा अमृतं गमय। उष्णो भगवाञ्छुचिरूप:। हंसो भगवान् शुचिरप्रतिरूप:।

य इमां चाक्षुष्मतीविद्यां ब्राह्मणो नित्यमधीते न तस्याक्षिरोगो भवति। न तस्य कुले अन्धो भवति। अष्टौ ब्राह्मणान् सम्यग् ग्राहयित्वा विद्यासिद्धिर्भवति। ॐ नमो भगवते आदित्याय अहोवाहिनी अहोवाहिनी स्वाहा ।। नि.पू.पृ.२९९।।

## परिशिष्टम्-७

**वाणीदोषपरिहारः/ विद्याप्राप्ति उपायाः।**

ऐं नमस्ते शारदे देवि सरस्वति मतिप्रदे।
वस त्वं मम जिह्वाग्रे सर्व विद्या प्रदा भव।। (वासुदेवानन्दसरस्वती-रचितमन्त्रः)
विद्यावन्तं यशस्वन्तं लक्ष्मीवन् जनं कुरो।
रूपं देहि जयं देहि यशो देहि द्विषो जहि। ।। दु. अ./१४।।
ऐं शारदायै नमः।
सरस्वतीस्तोत्राणि पृ.५२३ तः ५२९ पर्यन्तम् बृहत् स्तोत्ररत्नाकरग्रन्थे द्रष्टव्यम्।

**वन्ध्यत्वदोषपरिहारः।**
**गर्भरक्षा उपायाः**
पाहि पाहि महायोगिन् देव देव जगत्पते।
नान्यं त्वदभयं पश्ये यत्र मृत्युः परस्परम्। ।।श्रीमद्भागवतमहापुराणम् १/८/२।।
**बालरक्षा उपायाः।**
पूतनाकवचम् (बालरक्षा स्तोत्रम् पृ.१५९ बृहत् स्तोत्ररत्नाकरग्रन्थे द्रष्टव्यम्।)। ।।श्रीमद्भागवतमहापुराणम् १०/६/२२तः२९ ।।

**सन्तति/ पुत्रप्राप्ति उपायाः।**
हरिवंशपुराणपारायणम्।
वंशवृद्धिकरं वंशकवचम् पृ.४५० बृहत् स्तोत्ररत्नाकरग्रन्थे द्रष्टव्यम्।
क्लीं देवकीसुत गोविन्द वासुदेव जगत्पते।
देहि मे तनयं कृष्ण त्वामहं शरणं गतः(गता)।।
क्लीं वंशवर्धनाय नमः। (८४६श्रीविष्णुसहस्रनामावली स.ना.स्तो.सं.ग्रन्थस्य पृ.६६ द्रष्टव्यम्) मन्त्रस्य वा सपादलक्षजपानुष्ठानप्रयोगकरणेन सन्ततिर्भवति।

सन्तानगोपालस्तोत्रम् । संक्षिप्तवैष्णवयन्त्र-मन्त्र प्रयोगावली ग्रन्थे पृ ४२तः४५ मन्त्राः द्रष्टव्याः।
पुत्रप्रदपयोव्रतार्थं श्रीमद्भागवतमहापुराणे ८/१६/२७,२९ तः३७ मन्त्राः द्रष्टव्याः।
प्रदोषव्रतम् (श्रीव्रतो.च.ग्रन्थस्य पृ.४९९द्रष्टव्यम्)। व्यतिपातव्रतम्(श्रीव्रतो.च.ग्रन्थस्य पृ.४७३ द्रष्टम्म्)। विविधसन्तानोपायार्थं सर्व.अनु.प्र.ग्रन्थस्य पृ.६१७ तः ६३२ द्रष्टव्यम्)।

**पितृदोषेणसंततिनाशपरिहारः।**
तीर्थोपरि श्राद्धकरणेन संततिर्भवति । पितृस्तोत्रस्य पाठकरणेन (विशेषार्थं सर्व.अनु.प्र.ग्रन्थस्य पृ.५६५ द्रष्टव्यम्)।

## परिशिष्टम्-७

**सर्पशापात्सन्ततिनाशपरिहार:।**

श्रावणशुक्लकृष्णपञ्चम्यां नागपञ्चमीव्रतम्। वर्षपर्यन्तं शुक्लपञ्चम्यां व्रतोपवासपूर्वकं नागपूजनेन सन्ततिर्भवति। तीर्थोपरि नाग-नारायणबलीश्राद्धप्रयोगकरणेन सन्ततिर्भवति।

**प्रेतशापात्संततिनाशपरिहार:।**

प्रेतोद्धारणाय श्रीमद्भागवतमहापुराणसंहितापारायणकरणेन तीर्थोपरिपञ्चबलीश्राद्धकरणेन सन्ततिर्भवति।।

**विवाहभङ्गपरिहार:। / विलम्बितविवाहपरिहार:।**

विवाहभङ्गकारकग्रहस्य जपहोमतर्पणमार्जनदानब्राह्मणभोजनपूर्वकानुष्ठानप्रयोगेण विवाहो भवति।

विश्वावसु गन्धर्वराज कवचस्तोत्रम् (विशेषार्थं सर्व.अनु.प्र.ग्रन्थस्य पृ.६१० त: ६१६ द्रष्टव्यम्)

कामदेव प्रयोग: (विशेषार्थं सर्व.अनु.प्र.ग्रन्थस्य पृ.६०१त:६०४ द्रष्टव्यम्)

**वैधव्यदोषपरिहार:**

विष्णुविवाहकरणेन (कुम्भविवाहकरणेन) वैधव्यदोषशमनं भवति। विशेषार्थं वि.च. ग्रन्थस्य पृ.१५१ द्रष्टव्यम् ।

अखण्डितसौभाग्यदायकं ज्येष्ठ शुक्ल पूर्णिमायां वटसावित्रीव्रतम्(श्रीव्रतो.च.ग्रन्थस्य पृ. ४४५-४४६ द्रष्टव्यम्), भाद्रपद शुक्ल तृतीयायां हरितालिकाव्रतम् (श्रीव्रतो.च.ग्रन्थस्य पृ.२३४-३४२ द्रष्टव्यम्), आश्विन कृष्ण चतुर्थी करकचतुर्थी व्रतकरणेन वैधव्यदोषशमनं भवति।

वन्दिताङ्घ्रियुगे देवि सर्वसौभाग्यदायिनि।<br>
रूपं देहि जयं देहि यशो देहि द्विषो जहि।। ।।दु.अ./७।।<br>
देहि सौभाग्यमारोग्यं देहि मे परमं सुखम्।<br>
रूपं देहि जयं देहि यशो देहि द्विषो जहि।। ।।दु.अ./१२।।

**पत्नीप्राप्तिमन्त्र:**

पत्नीं मनोरमां देहि मनोवत्तानुसारिणीम्।<br>
तारिणीं दुर्गसंसार सागरस्य कुलोद्भवाम्।। ।।दु.अ./२४।।

**सुयोग्यपतिप्राप्तिमन्त्र:**

कात्यायनि महामाये महायोगिन्यधीश्वरि।<br>
नन्द गोप सुतन्देहि पतिं मे कुरु ते नम:।। श्रीभा.मा.१०/२२/०४

**पतिप्रीतिसम्पादनमन्त्र:।(हृष्टपतिप्रीतिसम्पादनमन्त्र:)**

तासामाविरभूच्छौरि: स्मयमानमुखाम्बुज:।<br>
पीताम्बरधर: स्रग्वी साक्षान्मन्मथमन्मथ:।। श्रीभा.मा.१०/३२/०२<br>
अस्त्वम्बुजाक्ष मम ते चरणानुराग: आत्मन् रतस्य मयि चानतिरिक्तदृष्टे:।

यर्ह्यस्य वृद्धय उषात्तरजोऽतिमात्रो मामीक्षसे तदुह नः परमानुकम्पा।। श्रीभा.मा.१०/६०/४६
पति-पत्नी विरहपीडा विनाशकस्तोत्रम्  (विशेषार्थं सर्व.अनु.प्र.ग्रन्थस्य पृ.६१६त:६१७ द्रष्टव्यम्)

**शत्रुनाशक उपायाः**

शत्रुसंहारकमेकदन्तस्तोत्रम् पृ.१४ बृहत् स्तोत्ररत्नाकरग्रन्थे द्रष्टव्यम्।
अचिन्त्यरूपचरिते सर्वशत्रुविनाशिनि।
रूपं देहि जयं देहि यशो देहि द्विषो जहि।। दु.अ./०८।।
सर्वाबाधा प्रशमनं त्रैलोक्यस्याखिलेश्वरि।
एवमेव त्वयाकार्यमस्मद्वैरि विनाशनम्।। दु.स.११/३१।।

**ग्रहाणां स्वभावाः**

ग्रहाणां गुणाः चन्द्रसूर्य गुरुसौम्या भृग्वारशनयो द्विज।
सत्वंरजस्तम इति स्वभावो ज्ञायते क्रमात्।
आदित्यामरमन्त्रिशीतकिरणाः सत्वप्रधानग्रहाः ।
शुक्रज्ञौ सरजोगुणेशनिधरोपुत्रोतमःस्वामिनौ ।।     ।।जा.पा.२/२६।।
सत्वाधिका भास्करभौमजीवा भृग्वात्मजौ राजसिकः शशीच
शनैश्चरस्तामासिकौ बुधश्च संयोगतोऽस्माल्लभते विशेषान्।।
येनग्रहेणसह बुधःयुतिं करोति तस्य ग्रहस्य गुणानुसारं बुधस्य गुणः भवति।

**ग्रहाणां वस्त्राणि ।**

स्थूलाम्बं नूतनचारुचेलं कृशानुतोयाहतमध्यमानि।
दृढांशुकं जीर्णमिनादिकानां वस्त्राणिसर्वे मुनयोवदन्ति।।जा.पा २/२२।।

**ग्रहाणां ताम्रादि धातवाः।**

ताम्रं कांस्यं धातुताम्रं त्रपु स्यात् स्वर्णं रौप्यं चायसं भास्करादेः।। ।। फ.दी.२/३०।।

**ग्रहाणां रसाः।**

कदुलवणतिक्तमिश्र मधुरश्च कषायकाः।
क्रमेण सर्वे विज्ञेया सूर्यादीन, द्विजोत्तम।।  ।। बृ.पा.हो.शा.३/२३।।

**ग्रहाणां रत्नानि।**

माणिक्यं दिननायकस्य, विमलं मुक्ताफलं शीतगो
माहेयस्य च विद्रुमं मरकतं सौमस्य गुरुत्मकम्
देवेज्यस्य च पुष्परागमसुराचार्यस्य वज्रं शमः
नीलं निर्मलमन्ययोश्च गदिते गोमेदवैइयके     ।।जा.पा.२/२१।।

गोधूमं तण्डुलं वै तलचणककुलुत्थाढकश्याममुद्गा
निष्पावा माष अर्केन्द्वसितगुरुशिखिक्रूरविद्धृग्वहीनाम्।
भोगीनाक्यारजीवज्ञशशिशिखिसितह्वम्बराख्यं कलिङ्गं
सौराष्ट्रवन्तिसिन्धून्सुनगधयवनान्पर्वतान्कीकटांश्च।।फ.दी.२/२८।।

**सूर्यादिग्रहाणां पीडाशमनार्थं धान्यादिदानाविचार:।**

**ग्रहाणां निवासप्रदेशा:।**

देवतोयतटवह्निविहारा: कोशगेहशयनोत्करदेशा:।
भानूपूर्वनिलया: परिकल्प्या वेस्मकोणनिलयाहिकेतू।। जा.पा.२/२४।।
लङ्कादिकृष्णासरिदनतमार: सितस्ततो गौतमिकान्तभूमि:।
विन्ध्यान्तमार्य: सुरनिम्नगान्तं बुध: शनि: स्यात्तुहिनाचलानत:।। जा.पा.२/२५।।

**सूर्यादिग्रहाणां जपसंख्या।**

रवे:सप्तसहस्राणि चन्द्रस्यैकादश स्मृता: ।
भौमे दशसहस्राणि बुधे चाष्टसहस्रकम्।।
एकोनविंशतिर्जीवे भृगोर्नपसहस्रकम्।
त्रयोविंशति: सौरेश्च रहोरष्टादश स्मृता:।।
केतोरत्यष्टयसाहस्त्रं जहसंख्या: प्रकीर्तिता:।। बा.ज्यो.सा.स.१०/६३-६४।।

# परिशिष्टम्-७

## परिशिष्टम्-७

**ग्रहाणामात्मादि संज्ञाः।**

कालस्यात्मा भास्करश्चित्तमिन्दुः सत्वं भौमः स्वाद्वचन्द्रसूनुः
देवाचार्यः सौख्यविज्ञानसारः कामः शुक्रो दुःख मेवार्कसूनुः।।जा.पा.२/१।।
कालात्मा च दिवानाथे मनः कुमुदबान्धवः।
सत्वंकुजो विजानीयाद् बुधो वाणी प्रदायकः।।
देवेज्यो ज्ञानसुखदो भृगुवीर्यप्रदायकः।
विचार्यतामिदं सर्वं छायासूनुश्च दुःखदः।।बृ.पा.हो.शा.३/१तः२।।
रुद्राम्बागुहविष्णुधातकमलकालह्यजा देवताः
सूर्यादग्नि जलाग्नि भूमिखपयोवाश्व्यात्मकाः स्युर्ग्रहाः।।फ.दी.२/२।।
अग्निभूमिनभस्तोयवायवः क्रमतो द्विजा
भौमादीनां ग्रहाणां च तत्त्वास्वामी प्रकीर्तिताः।।बृ.पा.हो.शा.३/९।।
रामाऽवतारः सूर्यस्य चन्द्रस्य यदुनायकः।
नृसिंहा भूमिपुत्रस्य बुद्धः सोमसुतस्य च।।
वामनो विबुधेन्यस्य भार्गवो भार्गवस्य च।
कूर्मो भास्करपुत्रस्य सैंहिकेयस्य सूकरः।
केतोमीनावतारश्च ये चान्ये तेऽपि खेरजाः। ।।बृ.पा.हो.शा.२/२७तः२९।।

**ग्रहाणामरिष्टशमनार्थंरामादिदेवतानामाराधना विचारः।**

| ग्रहाः | अवतारः |
|---|---|
| सूर्यः | रामावतारः |
| चन्द्रः | कृष्णावतारः |
| मङ्गलः | नृसिंहावतारः |
| बुधः | बौद्धावतारः |
| गुरुः | वामनावतारः |
| शुक्रः | परशुरामावतारः |
| शनैश्चरः | कूर्मावतारः |
| राहुः | सूकरावतारः |
| केतुः | मत्स्यावतारः |

# परिशिष्टम्-७

## ग्रहाणां आग्नेयादिसंज्ञाः।

| ग्रहः | देवताः | वासदेशाः | तत्त्वम् | तत्त्वानुसार देवता | आत्मादि | जपसंख्या | पुष्वम् |
|---|---|---|---|---|---|---|---|
| सूर्यः | अग्निः | देवालयः | अग्नि/तेजतत्त्वम् | रुद्रः | आत्मा | ७००० | रक्तकमलम् |
| चन्द्रः | वरुणः | जलस्थानम् | जलतत्त्वम् | देवी (लक्ष्मी) | शरीरम् | ११००० | श्वेत पुष्पम् |
| मङ्गलः | कार्तिकस्वामी | अग्निशाला | तेजतत्त्वम् | कार्तिकः | दृष्टेन्द्रियम् | १००० | रक्तकरवीर पुष्पम् |
| बुधः | विष्णुः | विहारस्थानम् | पृथ्वीतत्त्वम् | विष्णुः | घ्राणेन्द्रियम् | ४००० | हरितपुष्पम् |
| गुरुः | इन्द्रः | कोशगृहम् | आकाशतत्त्वम् | ब्रह्मा | श्रवणेन्द्रियम् | १९००० | पीतपुष्पम् |
| शुक्रः | इन्द्राणी | शयनालयः | जलतत्त्वम् | देवी (लक्ष्मी) | रसेन्द्रियम् | १६००० | श्वेतपुष्पम् |
| शनैश्चरः | प्रजापतिः | उषरभूमि | वायुतत्त्वम् | यमः | स्पर्शेन्द्रियम् | २३००० | कृष्णपुष्पम् |
| राहुः | भूतप्रेत | कोणस्थानम् | वायुतत्त्वम् | शेषनागः | स्पर्शेन्द्रियम् | १८००० | कृष्णपुष्पम् |
| केतुः | - | कोणस्थानम् | वायुतत्त्वम् | ब्रह्मा | स्पर्शेन्द्रियम् | १७००० | धूम्रपुष्पम् |

## सूर्यादिग्रहाणां पीडाशमनार्थं धन्यादिदानाविचारः।

| क्रमांङ्कः | ग्रहः | गुणाः | वस्त्राणि | धातवः | पशवः | रसाः | रत्नानि | प्रदेशाः | धान्यानि |
|---|---|---|---|---|---|---|---|---|---|
| १ | सूर्यः | सत्वम् | रक्तम् | ताम्रम् | रक्तधेनुः | कटुः | माणिक्यम् | कुलिङ्गाः | गोधूमाः |
| २ | चन्द्रः | रजस् | श्वेतम् | कास्यम् | श्वेतवृषभः | लवणः | मौक्तिकम् | यवनानि | तण्डुलाः |
| ३ | मङ्गलः | सत्वम् | रक्तम् | ताम्रम् | रक्तवृषभः | तिक्तः | प्रवालं | अवन्ती | मसूराः |
| ४ | बुधः | ग्रहयुतिअनुसारं[१] | हरितम् | सीसकम्/ त्रपुः | हस्तिः | मिश्रः | मरकतः | मगधः | मुद्गाः |
| ५ | गुरुः | सत्वम् | पीतम् | सुवर्णम् | अश्वः | मधुरः | पुष्परागः | सिन्धुः | चनकाः |
| ६ | शुक्रः | रजस् | पाटलम् | रजतम् | श्वेताश्वः | आमलः | वज्रम् | कर्णाटकः | श्यामुद्गाः/ तण्डुलाः |
| ७ | शनैश्चरः | तमस् | कृष्णम् | लोहः | महिषी | कषायः | नीलम | सुराष्ट्रः | तिलाः/ माषान्नम् |
| ८ | राहुः | तमस् | गाठहरितम् | सीसकम् | अश्वः | - | गोमेद | अम्बरः | माषान्नाः |
| ९ | केतुः | तमस् | चित्रविचित्र | - | अजः | - | वैदूर्यम् | पर्वतः | तिलाः/ कुलत्थः |

[१] आदित्यामरमन्त्रिशीतकिरणाः सत्वप्रधानग्रहाः । शुक्रज्ञौ सरजोगुणेशनिधरोपुत्रोतमःस्वामिनौ ।। २६ श्लो.२ अ.जा.पा.
सत्वाधिका भास्करभौमजीवा भृग्वात्मजौ राजसिकः शशीच
शनैश्चरस्तामासिकौ बुधश्च संयोगतोऽस्माल्लभते विशेषान्।।
येनग्रहेणसह बुधःयुतिं करोति तस्य ग्रहस्य गुणानुसारं बुधस्य गुणः भवति।

## सन्दर्भग्रन्थसूचि।

### संस्कृतग्रन्थाः

(१) अथ सपूजनविधिरुद्रजपः।
ग्रन्थ.गौरीशङ्करःवल्लभराम ओझा।
प्र.हरिशङ्करः,रविशङ्करः।
शुक्लतीर्थ,भरुच(वाया अंकलेश्वर)
ई.स.१९३०(वि.स.१९८७)।

(२) महाकविकालिदासविरचितम्।
अभिज्ञानशाकुन्तलम् (कृष्णदास संस्कुत सीरीज ११८)।
(ज्योत्स्ना-सरल-संस्कुत- हिन्दीव्याख्यापेतम्)
सं.व्या.डॉ सुधाकर मालवीयः
प्र.कृष्णदास अकादमी वाराणसी-१।
ई.स.१९९१

(३) अमरकोष (१९८ काशी संस्कृत ग्रन्थमाला)।
(रामाश्रमी व्याख्यासुधा)
व्या. भानुजी दीक्षित (संस्कृत)
पं.हरगोविन्द शास्त्री (हिन्दी)
प्र. चोखम्बा संस्कृत संस्थान वाराणसी-१
ई.स.२००१
(४) आचार्य मीनराज विरचितम्
वृद्धयवनजातकम्।
सम्पादकव्याख्याकारश्च सुरेशचन्द्र मिश्रः
प्रकाशकः रञ्जनपब्लिकेशन्स,१६, अन्सारी रोड, दरियागंज नई दिल्ला-२
संस्करणः ई.स. २०१०।
(५) उत्तरकालामृत।
ग्रन्थ. गणककवि कालिदास
व्या.जगन्नात भसीन।(हिन्दी)
प्र. रञ्जन पब्लिकेशन्स नईदिल्ली-०२।
ई.स.२०००।

(६) कालिदासविरचितम्।
कालिदासग्रंथावलि।
रेवाप्रसाद द्विवेदी।
प्रका. काशी हिन्दु विश्वविद्यालयः।
वाराणसी,
ई.स. १९७६।

(७) गणकतरगिणी।
ग्रन्थ.पं.सदानन्द शुक्ल
प्र.हेमन्त संस्कृत सीरीज ओफीस।
वाराणसी–१।
ई.स.१९८६

(८) श्रीमद् गणेशदैवत्रविरचितम्।
ग्रहलाघवम्।
व्या.डॉ. ब्रह्मानन्द त्रिपाठी (हिन्दी)
प्र.चौखम्बासुरभारतीप्रकाशन
वारणसी–१।
ई.स.१९८७
(९) भट्टनारायणः रचितः, चमत्कारचिन्तामणिः।
(अन्वयार्थप्रबोधप्रदीपटीकासमेतः, टिप्पण्यादिभिः समलङ्कृतश्च)
व्या. मालवीय–दैवज्ञ–धर्मेश्वरः।
सं. ब्रजबिहारीलाल शर्मा।
प्र. मोतीलाल बनारसीदास।
दिल्ली–७।
ई.स.१९९४।
(१०) श्री मन्महादेवपाठकविरचितम्।
जातकतत्वम् ।(२८३ चौखम्बा सुरभारती ग्रन्थमाला)
सुबोधिनी–हिन्दीव्याख्यासहितम्
व्या. डॉ. हरिशङ्कर पाठकः(हिन्दी)
प्र. चौखम्बा सुरभारती प्रकाशन
वाराणसी – १।
ई.स. १९९७ ।
(११) श्री दैवज्ञ वैद्यनाथविरचितः।
जातकपारिजातः।

व्या.पं. श्री कपिलेश्वरशास्त्री (सुधाशालिनी–संस्कृतटीकासमेत:)
व्या.पं. श्री मातृप्रसादशास्त्री (विमलाख्य हिन्दी)
प्र. चौखम्बा संस्कृत संस्थान
वाराणसी – १
ई.स.२००४।

(१२) जातकपारिजात:। (प्रथमभाग:, द्वितीयभाग:)
श्री दैवज्ञ वैद्यनाथविरचित:।
व्या. गोपेश ओझा
प्र. मोतीलाल बनारसीदास । नई दिल्ली –७।
ई.स.१९८३।

(१३) श्री ढुण्ढिराजविरचितम्।
जातकाभरणम्।
व्या. पं.श्यामलाल:
(बांसबरेलीस्थ–गौडवंशावतस–श्री बलदेवप्रसादात्मज
गौरीराज ज्यौतिषि पण्डित श्यामलालकृत श्यामसुन्दरीभाषाटीकासहिता)
प्र.खेमराज श्रीकृष्णदास– श्री वेंकटेश्वर स्टीम् –प्रेस,
बम्बई।
ई. १९९२।

(१४) श्री गणेशकवि विरचित:।
जातकालङ्कार:। (चाखम्बा सुरभारती ग्रन्थमाला ३१७)
(सान्वय: 'हरभानु' संस्कृतटीकया 'प्रज्ञावर्धिनी' हिन्दीटीकया च विभूषित:)
सं.व्या.डॉ. सत्येन्द्रमिश्र:(हिन्दी)
प्र.चौखम्बा सुरभारती प्रकाशन।
वाराणसी –१।
ई.स.२००३।

(१५) ज्योतिष विज्ञान (लघुपाराशरी)
गन्थ. उत्तमराम मायाराम ठाकर।(गुजराती)
प्र. ठाकर उत्तमराम मयाराम
ई.स.१९३७।

(१६) ज्योतिषश्यामसङ्ग्रह:।
व्या.पं.श्यामलाल: (हिन्दी)
प्र.गङ्गाविष्णु श्रीकुष्णदास, मुंबई ।
ई.स.१८९७।

(१७) नारद संहिता।
व्या. बुधवसतिराम।
प्र. खेमराज श्री कृष्णदास प्रकाशन बम्बई।
ई.स. १९१९।
(१८) नित्यकर्मप्रकाश
ग्रन्थ. पं.श्री रामभवनजी मिश्र श्री लालबिहारीजी मिश्र
प्र. गोविन्दभवन–कार्यालय,गीताप्रेस, गोरखपुर–५।
ई.स.१९९६(वि.सं२०५३)।
(१९) पारस्कर गुह्यसूत्र
व्या.विष्णुप्रसाद शिवशङ्कर शास्त्री (गुजराती)
प्र.विक्रान्तकुमार नीतिनकुमार रावल
वडोदरा।
ई.स.१९८८।
(२०) पूर्वकालामृत।
ग्रन्थ. गणककवि कालिदास
व्या.डॉ. सुरेशचन्द्र मिश्रः। (हिन्दी)
प्र. रञ्जन पब्लिकेशन्सनईदिल्ली–०२।
ई.स.२०००।
(२१) फलदीपिका ।
मन्त्रेश्वरविरचिता।
सं. गोपेशकुमार ओजा। (हिन्दी)
प्र. मोतीलाल बनारसीदास,दिल्ली–७ ।
ई.स. १९९६।
(२२) फलित मार्तण्डः
सं.व्या. पं. मुकुन्द वल्लभ मिश्रः (हिन्दी)
मोतीलाल बनारसीदास ४१, दिल्ली–७।
ई.सं.२००४।
(२३) नित्यकर्म–पूजाप्रकाश (५९२)
गोविन्दभवन कार्यालय,गीताप्रेस,
गीतागोरखपुर
इ.स.१९९६(वि.सं.२०५३)
(२४) बृहद् ब्रह्मनित्यकर्मसमुच्चयः।
प्र.अरुण यज्ञदत्तशास्त्री
वालुकेश्वरसंस्कुतपाठशाला बाणगङ्गा, म्म्बई।
ई.स.१९८२।

(२५) बालबोध ज्योतिषसारसमुच्चय:।
प्र.अरुण यज्ञदत्त ठाकर
बालुकेश्वर संस्कृत पाठशाला,बाणगङ्गा मुम्बई।
ई.स.१९९६।
(२६) बालबोध ज्योतिष संग्रहः।
ग्रहगोचरेण समलङ्कृतः
अनु. ज्योतिर्विद् वृन्दावन भट्ट माणेकलालः (गुजराती)
प्र. महादेव रामचन्द्र जागुष्ट बुक सेलर, अहमदाबाद।
ई.स.१९३८ (संवत १९९५।)
(२७) बृहज्जातकम् ।
श्री मद्दैवज्ञश्रीवराहमिहिराचार्येण विरचितम् ।
व्या.श्रीभट्टत्पलः (संस्कृत )
श्रीकेदारदत्तः (हिन्दी )
प्र. मोतीलाल बनारसीदास । दिल्ली-७ ।
ई.स.१९९६।
(२८) बृहत्पाराशरहोराशास्त्रम्।
महामुनि पराशर प्रणीतम्।
सं.व्या. पं.श्री गणेशदत्त पाठकः । (हिन्दी)
प्र. श्रीठाकुर प्रसाद पुस्तक भण्डार, वाराणसी-१।
ई. २००५।
(२९) बृहत्संहिता। (विद्याभवन संस्कृत ग्रन्थमाला-४१)
वराहमिहिर विरचिता।
व्या.पं.श्री अच्युतानन्द झा शर्मा (हिन्दी)
प्र. चौखम्बा विद्याभवन, वाराणसी-२२१००१।
ई.स.१९८३।
(३०) बृहत्संहिता। (खण्ड -१, खण्ड -२)
सं.व्या. डॉ. सुरेशचन्द्र मिश्रः। (हिन्दी)
प्र. रञ्जनपब्लिकेशन्स, नई दिल्ला-२।
ई.स.१९९७।
(३१) बृहत् स्तोत्ररत्नाकरः
सं. पं. दिवाकर शर्मा
प्र. आंजनेय धनञ्जय ढवळे , केशव भिकाजी ढवळे
गिरगाव, मुंबई-४।
ई.स.२००८।

(३२) भारतीय कुण्डली विज्ञान।
ग्रन्थ. स्व. श्रीमीठालाल हिंमतराम ओझा। (हिन्दी)
सं. वसन्त ओझा
प्र. देवर्षि प्रकाशन वाराणसी -१।
ई.सं. १९९७।

(३३) भावकुतूहलम्।
श्री मैथिलशंकर शंभुनाथत्मजगणकजीवनाथ विरचितम्
व्या. टिहरी निवासी महीधर:। (हिन्दी)
प्र. खेमराज कृष्णदास प्रकाशन, बम्बई।
ई.स.१९९३।

(३४) भावमञ्जरी
आचार्य मुकुन्द देवज्ञ: पर्वातीय
अनु. सुरेशचंद्र मिश्रा (हिन्दी)
प्र. रञ्जन पब्लिकेशन, नईदिल्ली-२
ई.स. १९९८।

(३५) मानसागरी। (विद्याभवन संस्कृत ग्रन्थमाला। १०१)
(सविशेष 'सुबोधिनी' हिन्दी व्याख्योपत्ता।)
व्या. आचार्य श्रीमधुकान्त झा। (हिन्दी)
प्र. चौखम्बा विद्याभवन। वाराणसी-१।
ई.स. १९८६।

(३६) भविष्य भावफल (भाग-१, गुजराती)
ग्रन्थ. प्र. तलकचन्द शीरचन्द शाह
पोष्ट रूपाल ,तलोद, साभरकांठा,उत्तर गुजरात.
ई.स.१९५८।

(३७) मुहूर्त चिंतामणि:। (१६८, चौखम्बा सुरभारती ग्रन्थमाला)
श्रीमद्राम दैवज्ञ विरचित:।
व्या. दैवज्ञ गोविन्द (पीयूषधाराटीकासहिता)
श्री विन्ध्येश्वरीप्रसाद द्विवेदी
सं. डॉ. ब्रह्मानन्द त्रिपाठी (हिन्दी)
प्र. चौखम्बा सुरभारती। वाराणसी -७।
ई.स. १९९७।

(३८) मुहूर्त मार्तण्डः।
अनु. जोशी सोमेश्वर द्वारकादास (गुजराती)
प्र. जोशी सोमेश्वर द्वारकादास
मुंबई।
ई.सं.१९२१।

(३९) यजुर्वेदसंहिता।(वाजसनेयिमाधयन्दिनशुक्लयजुर्वेदसंहिता)
सं. वेददर्शनाचार्यः स्वाागङ्गेश्वरानन्द उदासीनः
प्र. योगेश्वर-गुरु-गङ्गेश्वर-चैरिटेबल-ट्रस्ट चर्चगेट, बम्बई-२०।
ई.स.१९९३ (वि.सं.२०५०)।

(४०) ऋग्वेदसंहिता।
सं. पं. श्रीपाद दामोदर सातवलेकर
प्र. वसन्त श्रीपाद सातवलेकर स्वाध्याय मण्डल- पारडी जि. वलसाड।

(४१) लघुपाराशरी-मध्यपाराशरी (१३५,हरिदास संस्कृतग्रन्थमालल)
व्या.पं.श्रं अच्युतान्नद झा। (हिन्दी)
प्र. चौखम्वा अमरभारती प्रकशन,गोपालमन्दिर लेन, वाराणसी-१
ई.स.१९८४ ।

(४२) वृद्धयवन जातकम्। (भाग-१,भाग-२)
मुरादाबाद निवासी पं. ज्वालाप्रसाद मिश्रकृत भाषाटिका समेतम्
प्र. - गंगाविष्णु श्री कृष्णदास
''लक्ष्मीवेंकटेश्वर'' स्ट्रीम-प्रेस
कल्याणं, मुंबई ।
इ.स. १९५३

(४३) श्रीव्रतोद्यापनचन्द्रिका
संयोजकःसंशोदकश्च शास्त्री तुलजाशङ्कर धीरजराम पंडया
प्र.जे.बी.बोडा एण्डा कंपनी धीरजलाल भगवानदास बोडा
मुंबई-२०
१९९६।

(४४) श्रीमद्भागवतमहापुराणम् (मूलमात्रम्)
गीताप्रेस ,गोरखपुर।
ई.स.१९४९।

(४५) श्रीदुर्गासप्तशती
(मूलभागपाठविधिसहिता)
सं.प्र. गोविन्दभवन-कार्यालय,गीताप्रेस, गोरखपुर-५।
ई.स.२००४(वि.सं.२०६१)

(४६) श्रीविवाहचन्द्रिका।
संग्रहकर्ता जगन्नाथपरशुराम द्विवेदी
प्र. भालचन्द्र ज. द्विवेदी सुरत.
ई.स.१९७६(वि.सं.२०३३)।
(४७) शान्तिरत्नम्।
सं.डॉ.मुकुन्दचन्द्र शान्तिलाल ठाकर
प्र. अङ्गिरा आश्रम ट्रस्ट,मु.पो. कडीयार, ता. ईडर साबरकाठा गुजरात।
ई.स. १९९२
(४८) स्त्रीजातकम् ।
व्या. पं.श्री श्यामलाल:
(वंशवरेलीस्थ - गौऽवंशावतंस बलदेवप्रसादात्मजज्योतिषकपण्डिवर्यश्री श्यामलाल संगृहीतम्।
स्वकीय श्यामसुन्दर टीकया - समलङ्कतम्।)
प्र. खेमराज श्रीकृष्णदासश्रेष्ठिना श्रीवेंकटेश्वर (स्टीमप्रेस)
मुम्बई।
ई.सं.१९५८।
(४९) सार्थनवग्रहस्तोत्रम्।
स.अलङ्कार भारती (व्या.मराठी)
तुकाराम बुक देपो
मादवबाग, सी.पी. टँक, मुंम्बई-४
ई.स.२०११।
(५०) सर्वदेव अनुष्ठन प्रकाश: (भाग-२ देव खण्ड)
स.प्र.पं.रमेशचन्द्र शर्मा मयूरेश प्रकाशन
मदनगंज-किशनगढ,अजमेर -१
इ.स.२००२।
(५१) सर्वार्थ चिन्तामणि: (प्रथम-द्वितीयखण्ड)
श्री मदप्ययसुत वेंकटेश शर्मा विरचित:
सं.व्या. डॉ. सुरेशचन्द्र मिश्र:। (हिन्दी)
प्रकाशन: रञ्जन पब्लिकेशन्स नईदिल्ली-०२।
ई.स.२०१०।

(५२) सहस्त्रनामस्तोत्रसंग्रह ।
गीताप्रेस,गोरखपुर
ई.स.२००६(वि.सं.२०६३)।

(५३) सारावली
श्रीकल्याणवर्मविरचिता।
व्या. डॉ. सुरेशचन्द्र मिश्रः(हिन्दी)
प्र. रञ्जनपब्लिकेशन्स नई दिल्ला–२
ई.स. १९९८।

(५४) सामवेदसंहिता
सं. पं. श्रीपाद दामोदर सातवलेकर
प्र. वसन्त श्रीपाद सातवलेकर स्वाध्याय मण्डल– पारडी जि. वलसाड।
ई.स. १९८९।

(५५) सुलभ ज्यौतिषशास्त्रम् ।
ग्रन्थ. कृष्णाजी विठ्ठल सोमण
प्र. ज्योती धनंजर ठवळे
केशव भिकाजी ठवळे
गिरगांव मुंबइ–४
ई.स.१९१७ ।

(५६) सूर्यसिद्धान्तः।
(सारदीपिका भाषा–भाष्य उपपत्ति तथा उदाहरण–सहित)
व्या. पं. माधवप्रसाद पुरोहित। (हिन्दी)
प्र. नवलकिशोर प्रेस, लखनऊ।

(५७) कश्यपसंहिता हस्तप्रतः।
(क्रमांक–२३७१)।
प्राच्यविद्यामंदिर। (म.स.यु.) वडोदरा।

**हिन्दीग्रन्थाः**

(०१) काशी कि पाण्डित्य परम्परा
(काशीस्थ संस्कृत विद्वानो के जीवनचरित्र उवं अवदानों का प्रामाणिक विवरण)
ग्रन्थ. पद्मभूषण पं. बलदेव उपाध्याय (हिन्दी) ।
प्र. विश्वविद्यालय प्रकशन ,वारणसी ।
ई.स.१९९४।

(०२) भारतीय ज्योतिष।
श्री शंकर बालकृष्ण दिक्षीत:
अनु. झरखण्डी शिवनाथ
हिन्दी समिति उत्तरप्रदेश शासन
लखनऊ-१९७५

(०३) मेलापक मीमांसा ।
ग्रन्थकर्त्री मृदुला त्रिवेदी , टी.पी. त्रिवेदी
प्र. मोतीलाल बनारसीदास। दिल्ली-७।
ई.स.२००७।

(०४) षड्वर्गी फलदर्शन ।
ग्रन्थ. प्र. डॉ. गमनलाल जे वैद्य सूरत-१
ई.स.१९७४।

(०५) समृद्धि सूत्र
ग्रन्थकर्त्री मृदुला त्रिवेदी, टी.पी. त्रिवेदी
प्र. एल्का पब्लिकेशन, दिल्ली-६।
ई.स.२००७।

(०६) वैवाहिकसुख।
ग्रन्थकर्त्री मृदुला त्रिवेदी
प्र. मोतीलाल बनारसीदास। दिल्ली-७।
ई.स.२००७।

**गुजरातीग्रन्थाः।**

(०१) खेल-खेलाडी अने ज्योतिष
ग्रन्थ. मोहनभाई डी पटेल
प्र. मोहन डी पटेल राणीप ,अमदावाद ।
ई.स. २००६।

(०२) जैमिनी सूत्र । भाग-१ (गुजराती)
जैमिनी मुनी रचित सूत्रेनुं सरळ गुजराती विवेचन
सं.मोहनभाई डी पटेल (गुजराती)
प्र. डी आर पब्लीकेशन मु.पो. संडेर ता. पाटण गुजरात
ई.स.१९८३।

(०३) गुजराती विश्वकोश
स.डॉ. धीरुभाई ठक्कर
प्र.गुजराती विश्वकोश ट्रस्ट
अमदावाद–८।
इ.स.१९८९।

(०४) ज्योतिष अने जातीयता
ग्रन्थ. मोहनभाई डी पटेलः
प्र.आर.आर. शेठनी कंपनी मुंबई–२।
ई.स.२००७।
(०५) प्रेकटीकल अेस्ट्रोलोजी
ग्रन्थ. मरहुम(स्व.) दीनशाह शाहपुरजी होमीयार
सं. रूस्तमजी डोसाभाई मोटाफराम
प्र. परमसुख पंड्या ,अेन.अेम.त्रपाठी लि. प्रिन्सेस स्ट्रीट मुंबई–२
ई.स.१९५२।

(०६) भाविनां गूढ रहस्यो
ग्रन्थ. यशोधर महेता
प्र. धी अमदावाद कंपनी शाहीबाग, अमदावाद–४
१९५७।
(०७) वक्री ग्रहो
ग्रन्थ.मोहनभाई डी पटेल
प्र. मोहन डी पटेलराणीप अमदावाद ।
ई.स. २०१२।
(०८) वेद–पुराण सौरभ (गुजराती)
सम्पादकमण्डलः डॉ. अरुणोदय न. जानी
(संयोजकः) डॉ. सुरेश ह. जानी डॉ. प्रभाकर:के. डोंगरे,
डॉ. सुरशचन्द्र गो. कांटावाला,
डॉ. हर्षद म. त्रिवेदी, डॉ. सुभाष दवे,
डॉ. जयदेव रा. पाठक
प्र. अेम.अेस. युनिवर्सिटी, पब्लीदेशन्स सेल्स युनिट,
राजमेहल रोड वडोदरा–१ ।
ई.स.१९७९

**मराठीग्रन्थाः।**

(०१) पंचम स्थान।

लेखक : वसंत दामोदर भट्ट

प्र. सो.कविता श. काले

डोंबिवली (५)मुम्बई -१

(०२) सप्तम स्थान।

लेखक : वसंत दामोदर भट्ट

प्र.सो.मीना वसंत भट

पूणे-३०

ई.स. २००९

**शब्दकोशः (अग्रेजी)**

(०१) आप्टे वामनराव

(The Student Sanskrit English Dictionary)

APTE VAMAN SHIVRAM

The Student's Sanskrit English Dictionary

Motilal Banarsidass,

New Delhi

1965.

(०२) Vaidya Lakshman Ram Chandra

The Standard Sanskrit - English Dictionary

Radhabai Atmaram Sagoon,

Book - Seller & Publisher;

Mumbai

1889.